॥ श्री शंखेश्वर पार्श्वनाथाय नमः ॥

आचार्यश्री ॐकारसूरि ज्ञानमंदिर ग्रंथावली - २३

श्री देवेन्द्रसूरिविरचितस्वोपज्ञटीकोपेता

# ॥ श्रीदानोपदेशमाला ॥

प्रेरणापीयूषपायकाः

पू. श्रीअरविन्दसूरिमहाराजाः

पू. श्रीयशोविजयसूरिमहाराजाः

पू. श्रीमुनिचन्द्रसूरिमहाराजाः

संपादिका

रम्यरेणुः

प्रकाशकः

ॐकारसूरिज्ञानमन्दिरग्रन्थावलिः ।

सुभाषचोक, गोपीपुरा, सुरत

Jain Education International For Personal & Private Use Only www.jainelibrary.org

॥ श्री शंखेश्वर-पार्श्वनाथाय नमः ॥

आचार्यश्री ॐकारसूरि ज्ञानमंदिर ग्रंथावली-२३

श्री देवेन्द्रसूरिविरचितस्वोपज्ञटीकोपेता

# श्रीदानोपदेशमाला

दिव्याशीर्दातारः

पू. श्रीभद्रसूरीश्वरमहाराजाः

पू. श्रीॐकारसूरीश्वर महाराजाः

卐

प्रेरणापीयूषपायकाः

पू. श्रीअरविन्दसूरिमहाराजाः

पू. श्रीयशोविजयसूरिमहाराजाः

पू. श्रीमुनिचन्द्रसूरिमहाराजाः

卐

संपादिका

रम्यरेणुः

卐

प्रकाशकः

ॐकारसूरिज्ञानमन्दिरग्रन्थावलिः।

सुभाषचोक; गोपीपुरा, सुरत

Jain Education International For Personal & Private Use Only www.jainelibrary.org

द्रव्यसहायकः

श्रीवर्धमान-जैनसंघः
कतारगाम दरवाजा, सुरत

प्राप्तिस्थान

ॐकारसूरि आराधना भवन
सुभाषचोक, गोपीपुरा, सुरत

श्री विजयभद्र चेरीटेबल ट्रस्ट,
पार्श्वभक्तिनगर, हाइवे, भीलडीयाजी, ( ब.कां. )

प्रकाशन वर्ष

वीर संवत - २५२८ ईस्वीसन-२००२
वि. संवत - २०५८ प्रथम आवृत्ति

दादा गुरुदेव श्री भद्रसूरि दीक्षा शताब्दि वर्ष

: कम्पोझ-प्रिन्टींग-बाईन्डींग :
भरत ग्राफिक्स
न्युमार्केट, पांजरापोळ,
रीलीफ रोड, अमदावाद-१.
फोन : २१३४१७६, २१२४७२३

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# શ્રી શંખેશ્વર પાર્શ્વનાથ ભગવાન



रम्यास्य - दिव्यदीपस्य, हेमज्योतिः सुहर्षदम् ।
स्यात्सदा भव्यलोकानां, श्री शङ्खेश्वरपार्श्व ! ते ॥१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ॥ ઝીંઝુવાડામંડન શ્રી શાંતિનાથ ભગવાન ॥



भव्याब्जदिव्यदेहार्क ! श्रीझंझुपुरभूषण !
शान्ते ! ते हर्षकारी स्यात् रम्यहेमप्रभाऽनिशम् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org




Jain Education International For Personal & Private Use Only www.jainelibrary.org

# સમર્પણ



પૂ. પિતા મુનિરાજ
શ્રી ચંદ્રયશ વિ. મ. સા.



ગુરુમાતા પૂ. સાધ્વી
શ્રી રમ્યગુણાશ્રીજી મ. સા.

અગણિત છે ઉપકાર જેનાં,
ગુણો વળી અગણ્ય છે,
ઋણ ચુકવવા ભવોભવ કરેલા,
લખ પ્રયાસો નગણ્ય છે;
જન્મ જીવન-સંસ્કાર-શાસન-
સંયમ આપ્યા સ્નેહથી,
એ માત તાતને પાયે પડી,
ગ્રંથ સમર્પું નેહથી...

અનેક ઉપકારોની માત્ર સ્મૃતિ નિમિત્તે

પરમોપકારી પરમારાધ્યપાદ
પૂ. પિતાજી મ. સા.
પૂ. માતાજી મ. સા.ના
પાવન પાણિપદ્મમાં
સાદર સનમ્ર સમર્પણ ...

-કૃપાકાંક્ષી
રમ્યરેણુની
અનંતાનંત વંદના ...

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# પ્રકાશકીય

ૐકારસૂરિજ્ઞાનમંદિર ગ્રંથાવલીનું આ અનુઠું ગ્રંથપુષ્પ-૨૩ પ્રગટ થઇ રહ્યું છે ત્યારે અમે ગૌરવ અનુભવીએ છીએ..

આ. શ્રી દેવેન્દ્રસૂરિજી રચિત દાનોપદેશમાલા ગ્રંથનું સ્વોપજ્ઞટીકા સાથે પ્રથમવાર જ પ્રકાશન થઇ રહ્યું છે. તે ઘણાં હર્ષનો વિષય છે.

વિદુષી પૂ. સાધ્વીશ્રી **હેમગુણાશ્રીજી મ.** અને વિદુષી પૂ. સાધ્વીશ્રી **દિવ્યગુણાશ્રીજી મ.**એ અદ્યાવધિ અપ્રગટ આ ગ્રંથરત્નની વિવિધ હસ્તલિખિત પ્રતોના આધારે આ ગ્રંથનું સંપાદન કર્યું છે. સાધ્વીજી ભગવતીઓ ગ્રંથોના સંશોધન-સંપાદન કરે તે શ્રમણી સમુદાયમાં આદર્શરૂપ છે.

આ ગ્રંથના પ્રકાશન માટે ઉદારહૃદયી-ગુરુભક્ત **શ્રી વર્ધમાન જૈન શ્વે. મૂ. પૂ. સંઘ કતારગામ દરવાજા**ના જ્ઞાનદ્રવ્યમાંથી ઉદારતાપૂર્વક લાભ લેવામાં આવ્યો છે. આ લાભ લેવા બદલ અમો તેઓના આભારી છીએ.

પૂ. સાધ્વીજી ભગવતીજીને કરબદ્ધ પ્રાર્થના કરીએ કે જલ્દી જલ્દી આવા ગ્રંથરત્નો પ્રકાશિત કરવાનો અમને અવસર આપે.

પ્રાન્તે આ ગ્રંથનું અધ્યયન કરીને ધર્મારાધનાના પ્રથમ સોપાન સમા દાનધર્મનું સેવન કરી શીઘ્રતયા મુક્તિનાં શિખરે પહોંચે એ જ મંગલ કામના.........

આ. ૐકારસૂરિ આરાધના ભવન
**સુભાષચોક, ગોપીપુરા, સૂરત-૧.**

લિ. ટ્રસ્ટીગણ
**આ. ૐકારસૂરિ જ્ઞાનમંદિર ગ્રંથાવલિ**

# અંતરના ઉદ્ગાર

વિ. સં. ૨૦૪૨માં પૂ. આ. ભ. **શ્રી ૐકારસૂરીશ્વરજી મહારાજા**નાં પાવન પગલા સુરત-કતારગામ દરવાજા વિસ્તારમાં થયા ત્યારે અહીં શ્રાવકોનાં ઘર બહુ ઓછા...પૂ. આ. ભ. શ્રીનાં સાન્નિધ્યમાં **શ્રીવર્ધમાન જૈન શ્વેતામ્બર મૂર્તિપૂજક સંઘ**ની સ્થાપના થઇ અને પૂ. ગુરુદેવશ્રીની પ્રેરણા અને માર્ગદર્શન મળતાં ધાતુનાં પરમાત્મા અને ૨૦૪૭માં આરસનાં શ્રીમહાવીરસ્વામી પ્રભુને સંઘનાં જિનાલયમાં બિરાજમાન કરવા ભાગ્યશાળી બન્યા.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

વિ. સં. ૨૦૪૩માં પૂજ્યશ્રીની પ્રેરણાથી **વાવનિવાસી દોશી રિખવચંદ-ત્રિભોવનદાસ પરિવાર** તરફથી શ્રીભદ્રસૂરિ પાઠશાળાની સ્થાપના થઇ.

જૂના ઉપાશ્રય નિર્માણનો લાભ પણ દોશી રિખવચંદભાઇ ત્રિભોવનદાસ પરિવાર તરફથી સ્વ. દોશી છોટાલાલ રિખવચંદભાઇનાં શ્રેયાર્થે લેવામાં આવ્યો છે.

અમારા શ્રીસંઘની સ્થાપના બાદ પ્રથમ પર્યુષણારાધના પૂજ્ય જયાનંદવિજયજી મહારાજે તથા વિ. સં. ૨૦૫૧માં પૂ. આ. ભ. શ્રી મુનિચંદ્રસૂરિ મ. સા.(ત્યારે પંન્યાસજી મ.) અને વિ. સં. ૨૦૫૩માં પૂ. મુનિરાજશ્રી મોક્ષેશ વિ. મ. સા. તથા પૂ. કલ્પજ્ઞ વિ.મ. સા.ને પર્યુષણારાધના માટે મોકલતાં અમારા સંઘમાં ઉત્સાહ ઓર જામ્યો.

પૂ. ગુરુદેવશ્રીનાં સમગ્ર સમુદાયના અમારા શ્રીસંઘ ઉપર વર્ષી રહેલી વાત્સલ્યભરી આશિષથી અમારો શ્રીસંઘ સતત વિકાસ કરી રહ્યો છે. અનેક ગામોમાંથી પધારેલ શ્રાવક-શ્રાવિકા વર્ગ પૂર્ણમૈત્રીથી આરાધના કરી રહ્યો છે.

શ્રીસંઘની વૃદ્ધિ થતી હોવાથી ઉપાશ્રય નાનો લાગતાં નૂતન ઉપાશ્રય નિર્માણ થઇ ગયું છે જેનું નામ પણ ગુરુદેવનાં ઉપકારોની સ્મૃતિ નિમિત્તે ૐકારસૂરિ આરાધના ભવન રાખવામાં આવ્યું છે. આ માટે અમને શ્રી જશવંતપુરા જૈન સંઘનો સુંદર સહકાર મળ્યો છે તે બદલ તેમનાં આભારી છીએ. અહિં કાયમી આયંબિલભવન-પાઠશાળા તથા પૂ. સાધુ-સાધ્વીજી ભગવંતોનાં પાવન પગલા-ચાતુર્માસ સ્થિરતા આદિ લાભથી બડભાગી બનેલ શ્રીસંઘ પૂ. ગુરુદેવશ્રીનો ખૂબ ખૂબ આભાર માની સવંદન પ્રાર્થના કરે છે કે આપની કૃપા-પ્રેરણાની વર્ષા સતત વર્ષી રહો.. અમારા જીવનમાં ધર્મની સુંદર હરિયાળી સર્જી મોક્ષમાર્ગનાં પથિક બનાવી મુક્તિની મંઝીલને આપો..

પ્રસ્તુત ગ્રંથ પ્રકાશનની લાભ અમને આપવા બદલ પૂ.શ્રી.નાં અમે ઋણી છીએ.

**ટ્રસ્ટીગણ**
શ્રીવર્ધમાન શ્વે. મૂ. પૂ. સંઘ
કતારગામ દરવાજા

Jain Education International For Personal & Private Use Only www.jainelibrary.org



# આશીર્વચન

વિદુષી સાધ્વીજીના હાથે સંપાદિત થઈને આવેલ આ ગ્રન્થને જોતાં હૃદય પ્રસન્ન બને છે.

સંપાદન અને સંશોધનના વિશાળ ક્ષેત્રમાં શ્રમણી વર્ગનો પ્રવેશ બહુ જ આવકારદાયક ઘટના છે.

ઇચ્છીએ કે આવા ગ્રન્થોની વિશાળ શ્રેણી શ્રમણીવર્ગ દ્વારા થયા કરે અને આપણો શ્રેષ્ઠ વારસો વિદ્વાનોના હાથમાં પહોંચ્યા કરે.

આશિષ.

આચાર્ય વિજય અરવિન્દસૂરિ
આચાર્ય યશો વિજયસૂરિ

કાવ

વિ.સં. ૨૦૫૮, પોષ વદિ ૨.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्रीमते वीरनाथाय नमः
श्री शंखेश्वरपार्श्वनाथाय नमः
सिद्धि-विनय-भद्र-विलास-ॐकारसूरिभ्यो नमः

# પ્રસ્તાવના

રુદ્રપલ્લીયગચ્છના આ. શ્રી દેવેન્દ્રસૂરિ મ. રચિત અદ્યાવધિ અપ્રગટ સ્વોપજ્ઞ ટીકા સહિત દાનોપદેશમાલા ગ્રંથનું વિવિધ હસ્તલિખિત-પ્રતોના આધારે સંશોધન-સંપાદન થઈ પ્રગટ થઈ રહ્યું છે તે ઘણા આનંદનો વિષય છે.

શ્રી જિનેશ્વર ભગવંતના શાસનમાં દાન-શીલ-તપ-ભાવ આ ચારે પ્રકારના ધર્મોનો મહિમા વર્ણવવા અનેક ગ્રંથોની રચના થઈ છે.

કલિકાલ સર્વજ્ઞ આ.ભ.શ્રી હેમચન્દ્રસૂરિ મ.સા. એ વીતરાગસ્તોત્રમાં કહ્યું છે કે-

[1]હે ભગવાન્ ! આપ સમવસરણમાં ચાર-મુખે દેશના આપો છો એનું કારણ એવું લાગે છે કે દાન-શીલ-તપ-ભાવ એ ચાર પ્રકારના ધર્મોનું આપને એક સાથે વર્ણન કરવું છે.

પુણ્ય-બંધના પ્રકારોમાં પણ દાન-ધર્મની મહત્તા સ્પષ્ટપણે દેખાય છે.

- આમ તો પ્રાયઃ દરેક ગ્રંથોમાં દાનાદિનું વર્ણન આવતું હોય છે. પણ, એનો અલગ મહિમા વર્ણવતાં સ્વતંત્રગ્રંથો પણ સારા પ્રમાણમાં રચાયા છે.

જિનરત્નકોશ, જૈનગ્રંથાવલી વગેરે હસ્તલિખિત ગ્રંથોના સૂચિપત્રોમાં જે આવા ગ્રંથોની વિગતો મળે છે તે ટુંકમાં આ પ્રમાણે છે.

## દાન વિષયક સ્વતંત્ર ગ્રંથો

| | |
|---|---|
| દાન-શીલ-તપ-ભાવના કુલક | (દેવેન્દ્રસૂરિ) |
| દાન-શીલ-તપ-ભાવના કુલક | (જયઘોષસૂરિ) |

---

१. दान-शील-तपो-भावभेदाद् धर्मचतुर्विधम् ।
मन्ये युगपदाख्यातुं चतुर्वक्त्रोऽभवद् भवान् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

| | |
|---|---|
| દાન-શીલ-તપ-ભાવના સ્તબક | (અશોકસૂરિ) |
| દાન-શીલ-તપ-ભાવના ઢાળિયા | (સમયસુંદર) |
| દાન-શીલ-તપ-ભાવના સંવાદ | (સમયસુંદર) |
| દાન-શીલ-તપ-ભાવના ચોપાઇ | (સમયસુંદર) |
| દાનકલ્પદ્રુમ | (જિનકીર્તિ) |
| દાનપ્રકાશ | (કનકકુશલ) |
| દાનપ્રદીપ | (ચારિત્રરત્નગણિ) |
| દાનસાર | (પ્રભાચંદ્ર) |
| દાનસાર | (વાસુપૂજ્ય દિગંબર) |
| દાનાદિ પ્રકરણ | (સુરાચાર્ય) |
| દાનાદિ કથા | (શુભશીલ) |
| દાનાદિ કુલક | (પ્રદ્યુમ્ન) |
| દાનાદિ ચતુષ્ટયકથા | (વિજયચંદ્ર) |

દાનદ્વાત્રિંશિકા, દાનષટ્ત્રિંશિકા, દાનપંચાશત્, દાનપંચાશિકા, દાનસપ્રતિકા, દાનવિધિકુલક, દાનવિધિપ્રકરણ, દાનહીરાવલી, દાનસ્વાધ્યાય, દાનાદિચતુષ્ટયકથા, આમ અનેક ગ્રંથકારોએ અનેક ગ્રંથો રચ્યા છે.

જૈનગ્રંથાવલીમાં (પૃ-૧૮૦૦ના ટિપ્પણ) જણાવ્યું છે કે-''દાનોપદેશમાલા તેની વૃત્તિ સાથે બૃહત્ ટિપ્પનિકામાં નોંધી છે,[૧] પણ અમોને હજુ સુધી તે ક્યાંય પણ ઉપલબ્ધ થઇ નથી''

જો કે આની નકલો બહુ જ ઓછી થઈ છે છતાં સદ્ભાગ્યે આની બે પૂર્ણ અને એક અપૂર્ણ પ્રતિ મળી શકી છે. બન્ને પ્રતિ અર્વાચીન અને પ્રાયઃ કોઈ એક પ્રતમાંથી નકલ થઇ હોય એમ જણાય છે. એકાદ સ્થળે કથાનક અધુરું રહે છે. તે પૂર્ણ કરવા અમે ઘણા ભંડારોમાં તપાસ કરી પણ ક્યાંયથી પ્રતી મળી નહીં

## સંપાદનમાં ઉપયુક્ત હસ્તલિખિત પ્રતિઓનો પરિચય

L.D. આ સંજ્ઞાવાળી પ્રત લાલભાઈ દલપતભાઈ ઈન્સ્ટીટ્યુટ અમદાવાદ સ્થિત લા.દ. ભેટ સુરક્ષા ૪૨૨ ક્રમાંકની પ્રતિ છે

---

૧. बृहट्टिपनिका नामक जैनग्रंथसूचि.... जैनसाहित्य संशोधक भा.૧ નાં પરિશિષ્ટમાં છપાઇ છે તેના પૃ ૭માં....૨૨૧ दानोपदेशमालावृत्तिः, पत्रा....७१ આ પ્રમાણે ઉલ્લેખ છે.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

પત્ર સંખ્યા ૧૨૮
પત્રની દરેક બાજુ ૧૫ પંક્તિઓ
દરેક પંક્તિમાં લગભગ ૫૦ અક્ષરો
આકાર લંબાઈ × પહોળાઈ - ૨૨ સે.મી. × ૧૧ સે.મી.
લેખન સંવત ૧૯૬૪

અંતે લખાણ : **सम्वत १९६४ रा मिति चैत्रकृष्णपक्षकी तीथी ६ षष्ठमी शनिश्चरवार । इति संख्ये वर्षे बाणांऽगानवेन्दु । चैत्रकृष्णपक्षस्य षष्ठ्यां शनिश्चरवारे मूलचंदशर्मा लिलेख ॥**

V આ. સંજ્ઞાવાળી પ્રત વડોદરાસ્થિત 'પ્રવર્તક મુનિશ્રી કાંતિવિજયજી શાસ્ત્રસંગ્રહ' ની છે.

પ્રત સંખ્યા ૧૭૫
પ્રતની બન્ને બાજુ ૧૩ પંક્તિઓ
દરેક પંક્તિમાં લગભગ ૪૫ અક્ષરો
લંબાઈ × પહોળાઈ ૨૧ સે.મી. × ૧૧ સે.મી.

P સંજ્ઞક પ્રતિ પાટણ હેમચન્દ્રાચાર્ય જ્ઞાનમંદિરની ૪૨૯૭ ક્રમાંકની આ પ્રતિ છે.

આ પ્રતિ માત્ર ૩૪ પત્રાત્મક અપૂર્ણ છે. પત્રની દરેક બાજુ ૧૨ પંક્તિઓ. દરેક પંક્તિમાં લગભગ ૫૦ અક્ષરો

લંબાઈ × પહોળાઈ ૨૬ સે.મી × ૧૦ સે.મી.

M સંજ્ઞાવાળી પ્રત માંડવી શ્રીખરતરગચ્છ જ્ઞાનભંડારમાંથી ૭૨૫૫૬નંબરની પાર્શ્વચન્દ્રગચ્છીય શ્રીભુવનચંદ્ર વિ. મ. સા.ની પ્રેરણાથી ભરતભાઇ દ્વારા પ્રાપ્ત થઇ છે. તે મૂળમાત્ર છે. ૧૫ પત્ર છે. એક એક પાનામાં-૧૨-૧૨ લીટી છે દરેક લીટીમાં ૩૧-૩૨ અક્ષરો છે.

## ગ્રંથ અને ગ્રંથકાર

પ્રસ્તુત ગ્રંથ પ્રાકૃતભાષામાં ૧૦૭ કારિકાઓમાં પૂર્ણ થાય છે. મોટાભાગની આર્યાછંદની ગાથાઓ છે. સ્વોપજ્ઞટીકા સાથે ગ્રંથનું પ્રમાણ ૫૩૪૮ (મતાંતરે ૫૫૦૦) શ્લોક-પ્રમાણ છે.

મૂળગ્રંથની છેલ્લી ગાથા અને તેની ટીકામાં–

**इइ संघतिलकगणहरसीसेण, दिवायरेण रइएयं ।**
**दाणोपदेशमाला कंठगया कं ण भूसेइ ? ॥ १०७ ॥**

इत्यमुना प्रकारेण श्रीसंघतिलकगणधरशिष्येण दिवाकरेण रचिता-कृतेयं दानोपदेशमाला ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

આ પ્રમાણે ઉલ્લેખ છે અને ટીકાના પ્રારંભમાં શ્લો. ૧૦માં **स्वकृतेः दानोपदेशमालायाः** લખે છે એટલે એવું અનુમાન થાય છે કે– મૂળગ્રંથની રચના વખતે ગ્રંથકારનું નામ કે ઉપનામ दिवाकर હોય, પછી ટીકારચના પૂર્વે આચાર્યપદવી થઈ હોય અને આ. દેવેન્દ્રસૂરિ નામ પડ્યું હોય.

ગ્રંથનો રચના સમય જણાવ્યો નથી. પરંતુ ટીકાનો રચના સમય પ્રશસ્તિમાં જણાવ્યો છે તે મુજબ વિ.સં. ૧૪૧૮ માં ટીકાની રચના થઇ છે.

ગ્રંથ વિષે ટીકામાં પ્રારંભમાં જણાવ્યું છે કે– "સંસાર સાગરમાં ડૂબતાં પ્રાણીઓને જહાજ જેવું અને પુણ્યરૂપી વનને વિસ્તારવામાં મેઘ સરખું આ દાનોપદેશમાલા પ્રકરણ છે."

ગ્રંથમાં દાનના સુપાત્રદાન, ઉચિતદાન, અનુકંપાદાન, અભયદાન અને જ્ઞાનદાન એમ પાંચ પ્રકારો અને તેના ઉપર નાની મોટી ચોવીસ કથાઓ છે. કથાઓ પદ્યમાં છે. ૩૩ શ્લોકથી ૯૧૬ શ્લોક સુધીના વિવિધ પરિમાણની કથાઓની ભાષા સરળ સાદી છતાં આકર્ષક અને પ્રવાહી છે. પ્રારંભિક કક્ષાના અભ્યાસીને વાંચવામાં તકલીફ પડે એવા શબ્દો અને પ્રયોગો ભાગ્યે જ આવે છે.

દરેક કથાના અંતે -

इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ...

આ પ્રમાણે ઉલ્લેખ કરે છે એટલે ગ્રંથકારશ્રી રુદ્રપલ્લીયગચ્છના છે એ વાત સ્પષ્ટ છે.

## રુદ્રપલ્લીયગચ્છ

વિક્રમના ૧૩માંથી ૧૬મા શતક સુધીમાં આ ગચ્છમાં ઘણાં વિદ્વાન્ શાસન-પ્રભાવક આચાર્યો થયાના ઉલ્લેખો મળે છે.

**'रुद्रपल्लीयगच्छ के इतिहास पर संक्षिप्त प्रकाश'** (તિત્થયર' કલકત્તાથી પ્રકાશિત) ડૉ. શિવપ્રસાદશ્રીના લેખમાં આ ગચ્છ વિષે વિગતે માહિતી આપવામાં આવી છે, આ ગચ્છની સ્વતંત્ર પટ્ટાવલી મળતી નથી. પરંતુ, ખરતરગચ્છની પટ્ટાવલીમાં આ ગચ્છની વિગતો આવતી હોવાથી કેટલાક વિદ્વાનો આને ખરતરગચ્છની શાખા માને છે. મુનિશ્રી કાંતિસાગરજી લખે છે કે[1]–

---

૧. જુઓ 'શત્રુંજય વૈભવ' પૃ.૩૭૪ મુનિશ્રી કાંતિસાગરજી
પ્રકાશક : કુશલસંસ્થાન જયપુર ઇ.સ. ૧૯૯૦

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'रुद्रपल्लीयगच्छ : यह गच्छ भी खरतरगच्छ की शाखा है । यह सं. १२०८ में जिनेश्वरसूरि से विख्यात हुई ।[१]''

પંડિત શ્રી વિનયસાગરજી એમના ૧૮-૩-૨૦૦૨ ના પત્રમાં પણ જણાવે છે કે- ''रुद्रपल्लीयगच्छ स्वतंत्र गच्छ नहीं है किन्तु खरतरगच्छ की एक शाखा है।''

મોહનલાલ દેસાઇ આ ગચ્છ બાબત લખે છે : ''તેઓ ખરતરગચ્છની સામાચારી માનતા ન હોતા આથી રુદ્રપલ્લીયગચ્છને ખરતરની શાખા માનવી કે કેમ તે પ્રશ્ન છે. 'ખરતર' નામ પણ એણે છોડ્યું છે. અને આચાર્યોના નામ પૂર્વે 'જિન' શબ્દ પણ લગાડાતો નથી. (જૈ. ગૂ. ક. ભા.-૯ પૃ.-૩૯)

આ ગચ્છની ઉત્પત્તિ ખરતરગચ્છ પટ્ટાવલીઓમાં બતાવ્યા મુજબ જિનશેખરસૂરિથી નહીં પણ અભયદેવસૂરિથી થયાના સ્પષ્ટ પ્રમાણો મળે છે.

શ્રીત્રિપુટી મ. લખે છે કે- ''૪૨ આ. અભયદેવસૂરિ : તેમણે કાશીની રાજસભામાં મોટા વાદીને હરાવ્યો, તેથી કાશીરાજે તેમને 'વાદિસિંહ'નું બિરૂદ આપ્યું હતું. તેમણે સં. ૧૨૭૮માં શ્રીઅંકિત 'જયંતવિજય મહાકાવ્ય' બનાવ્યું છે. તેમનાથી મધુકરગચ્છનું રુદ્રપલ્લીય એવું બીજું નામ પડ્યું.

રુદ્રપલ્લીય આ. સિંહતિલકસૂરિ લખે છે કે–पट्टे तदीयेऽभयदेवसूरि-रासीत् द्वितीयोऽपि गुणाद्वितीयः । जातो यतोऽयं जयतीह रुद्रपल्लीयगच्छः सुतरामतुच्छः ॥१९॥ (સમ્યક્ત્વસપ્તતિકાવૃત્તિ પ્રશસ્તિ)

સં. ૧૧૬૯માં મધુકર, સં. ૧૨૦૪માં ખરતર અને તે પછી રુદ્રપલ્લીયગચ્છ ઉત્પન્ન થયો એ યુક્તિસંગત લાગે છે. (જૈનપરંપરાનો ઇતિહાસ ભા.-૨ પૃ.-૪૩૫)

**ગ્રંથરચનાઃ** આ. દેવેન્દ્રસૂરિ મ.ની ગ્રંથરચના વિષે ત્રિપુટીમ. લખે છે કે– ''તેમણે વિમલચન્દ્રની પ્રશ્નોત્તરમાલિકા ઉપર વૃત્તિ[૧] રચના (વિ.સં. ૧૪૨૯) દાનોપદેશમાલા તેની સ્વોપજ્ઞટીકા અને મુનિ હેમચંદ્રની વિનંતીથી

૧. આનું સંશોધન વડગચ્છના ૪૬ મા આ. મુનિભદ્રસૂરિજીએ કર્યું હતું. (જૈ. ગુ. ક. ભા. પૃ. ૨૪૨) જૈન ગુર્જરકવિઓ ભા. ૯ પૃ.૧૮ માં સોમતિલકસૂરિ શિષ્ય દેવેન્દ્રે પ્રશ્નોત્તર રત્નમાલાટીકા રચ્યાનું જણાવ્યું છે.પરંતુ આ બરાબર જણાતું નથી. આ જ ગ્રંથમાં પૃ. ૪૦ માં સંઘતિલકના પટ્ટધર દેવેન્દ્રસૂરિ દ્વારા રચ્યાનું જણાવ્યું જ છે.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ત્રિંશત્ ચતુર્વિંશતિના ૧૦ સ્તવનોની રચના કરી છે. (જૈન પરંપરાનો ઈતિહાસ ભા.-૨ પૃ. ૪૩૬)

પ્રશ્નોત્તરમાલાવૃત્તિ કે જેની રચના વિ.સં. ૧૪૨૯માં થઇ છે. તેનું પ્રકાશન પં. હીરાલાલ હંસરાજે કર્યું છે.

દાનોપદેશમાલા સ્વોપજ્ઞટીકાવૃત્તિ સાથે પ્રગટ થઇ રહી છે. સ્તવનો વિષે કંઇ માહિતી પ્રાપ્ત થઇ નથી. ગ્રંથકારની ગુરુપરંપરા આ પ્રમાણે ડૉ. શિવપ્રસાદજીએ એમનાં લેખમાં આપી છે.

વર્ધમાનસૂરિ(પ્રથમ)→જિનેશ્વરસૂરિ→અભયદેવસૂરિ(પ્રથમ)→જિન-વલ્લભસૂરિ→જિનશેખરસૂરિ→પદ્મચન્દ્રસૂરિ→વિજયચંદ્રસૂરિ→અભયદેવસૂરિ (દ્વિતીય)→દેવભદ્રસૂરિ→પ્રભાનંદસૂરિ→શ્રીચન્દ્રસૂરિ→ગુણશેખરસૂરિ→સંઘતિલકસૂરિ→દેવેન્દ્રસૂરિ

વિદુષી સાધ્વીશ્રી વિરાગરસાશ્રીજી અને સા. શ્રી ધૈર્યરસાશ્રીજીએ (કલીકુંડતીર્થોદ્ધારક પૂ. આ. ભ. શ્રી રાજેન્દ્રસૂરિ મ. સા. ના આજ્ઞાવર્તીની) હસ્તલિખિત પ્રતિની ઝેરોક્ષ ઉપરથી મુદ્રણયોગ્ય નકલ બનાવવાનું જહેમત ભર્યું કામ ઉત્સાહ અને આનંદથી કર્યું છે.

વિદુષી સાધ્વીશ્રી હેમગુણાશ્રીજી અને વિદુષી સા. શ્રી. દિવ્યગુણાશ્રીજીએ જુદી જુદી પ્રતિઓના પાઠભેદ નોંધી યોગ્યપાઠનિર્ણય, કઠિન શબ્દોના અર્થો, ત્રુટક સ્થળોએ પૂર્તિ આદિ કરી સંપાદન કાર્ય રસપૂર્વક કર્યું છે.

આમ સાધ્વીજીઓની શ્રુતભક્તિના પરિપાકરૂપે આપણને એક અપ્રગટ-ગ્રંથ અત્યંત સુંદર સાજ-સજ્જાપૂર્વક સુસંપાદિત થઇ મળે છે. બધા સાધ્વીજીઓને ધન્યવાદ !

સહુ કોઇ આ ગ્રંથનું અધ્યયન કરી આત્મકલ્યાણને વરે, એ જ મંગલ કામના.

**જૈન ઉપાશ્રય**
**વાંકડીયા વડગામ,**
**જિ. જાલોર**
**અષાઢ સુ. ૧૫**
**વિ.સં. ૨૦૫૭**

લિ.
પૂ. આ. ભ. **શ્રી ભદ્રસૂરીશ્વરજી મ. સા.**ના શિષ્યરત્ન
પૂ. મુનિરાજશ્રી **જિનચન્દ્રવિજય મ. સા.**ના શિષ્ય
**આચાર્ય મુનિચન્દ્રસૂરિ**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

।अर्हं नमः।

# સંપાદકીય

पात्रे धर्मनिबन्धनं तदितरे, प्रोद्यद्दयाख्यापकम् ।
मित्रे प्रीतिविवर्धनं रिपुजने, वैरापहारक्षमम् ॥
भृत्ये भक्तिभरावहं नरपतौ, सन्मानसम्पादकम् ।
भट्टादौ च यशस्करं वितरणं न क्वाप्यहो निष्फलम् ॥

જેની અમીનજરથી વહેતી કૃપાધારામાં ઝીલવાનો અનહદ આનંદ પ્રાપ્ત થાય છે. એવા પરમોપાસનીય શ્રીશંખેશ્વર પાર્શ્વપ્રભુનાં શ્રીચરણોમાં અનંતાનંત નમન શ્રેણિ....

જેઓશ્રીના શીળી છાયા સતત શાતા સમર્પી રહી છે એવા પરમારાધનીય શ્રીશાંતિનાથદાદાજીનાં શ્રીચરણોમાં અવિરત પ્રણામ પંક્તિ....

## પ્રસ્તુત ગ્રંથની પ્રાપ્તિ... તથા પ્રારંભ...

પરમાત્મકૃપા અને પૂજ્યોની પરમાશિષથી શ્રીશાંતિનાથમહાકાવ્યની સ્વાધ્યાયયાત્રા પૂર્ણ થઇ અને દાનોપદેશમાલાની હસ્તપ્રતિની પધરામણી થઇ. જોકે લખાણ કામ પૂ. સા. વિરાગરસાશ્રીજી (સંસારી માસીઆઇ બહેન મ.) કરીને મોકલેલ... પણ એક જ પ્રતિ(મૂળ) બીજી પ્રતિ L.D ની ખરી પણ એ મૂળની જ કોપી... લહિયાઓની અશુદ્ધિ ખૂબ જ... જેથી થોડી મુશ્કેલી પડે.. પણ દેવગુરુકૃપા અને અનેક પૂજયોની સહાયથી આ ગ્રંથની સંશુદ્ધિનું કામ પૂર્ણ થયું...

## ગ્રંથની મહત્તા

રૂદ્રપલ્લીયગચ્છનાં શ્રીદેવેન્દ્રસૂરિજી મ.ની આ કૃતિ દાનોપદેશમાલા એ ખરેખર માળા સમાન જ છે. જેમાં સુપાત્રદાનાદિ પાંચ પ્રકારનાં દાનરૂપી પંચવર્ણી પુષ્પો શોભી રહ્યા છે... પ્રાસંગિક કથાનકોની પરાગ પ્રસરી રહી છે. સમ્યગ્જ્ઞાનની સૌરભથી સદાય સુવાસિત છે... સુપાત્રદાનમાં સાત પ્રકારનાં સૌંદર્યની શોભા નિરાળી છે. એવી આ દાનોપદેશમાલા ખરેખર સાન્વયાર્થ નામને ભજે છે... પુષ્પની માળા તનમનનાં સંતાપ હરીને ખુશીની ખુશ્બુ ફેલાવે છે. તેમ આ ગ્રંથ આત્માનાં અજ્ઞાનમયતાપ-સંતાપ હરીને પ્રસન્નતાની પરિમલથી આત્માને તરબતર કરી દે છે... અરે ! એથી યે આગળ કહું તો પેલી પુષ્પમાળા તો સાંજે કદાચ કરમાઇ જશે જ્યારે આ દાનોપદેશમાળા તો સદાકાળ રહેવાવાળી છે... પદલાલિત્ય, સુગમશબ્દો

Jain Education International For Personal & Private Use Only www.jainelibrary.org

દ્વારા તત્ત્વજ્ઞાનામૃતને પીરસવાની આગવીકળા, દાનધર્મ પ્રત્યે અંતરમાં અહોભાવનો દરિયો ઉછળે તેવી વાતોની એવી તો છણાવટ કરી છે કે વાંચતાં જ હૈયું ગદ્‌ગદ્ થઇ જાય છે મસ્તક સહજભાવે તેઓશ્રીનાં ચરણોમાં ઢળી પડે છે.

**ગ્રંથમાં દૃષ્ટિગોચર થયેલી વિશેષતાઓ...**

સામાન્યતઃ અન્યગ્રંથોમાં દાનધર્મનાં સુપાત્ર-ઉચિત-અનુકંપા-અભય-કીર્તિદાન એવા પાંચભેદ કહ્યા છે. જ્યારે પ્રસ્તુત ગ્રંથકારશ્રીએ પાંચમું જ્ઞાનદાન લીધું છે.

ત્રિષષ્ટિ વિ. ગ્રંથમાં ચંદનબાળાચરિત્રમાં ચંદનબાળાએ પ્રભુને અભિગ્રહ-પૂર્ણતા સમયે અટ્ઠમ તપ કર્યાનો ઉલ્લેખ થયો છે. જ્યારે અહિં ચંદનબાળાએ છઠ્ઠ તપ કર્યાની વાત આવે છે. તથા અન્યત્ર પ્રભુ એકવાર પાછાવળીને પુનઃ પધાર્યા પછી અભિગ્રહ પૂર્ણતા થઇ છે એવું જણાવ્યું છે જ્યારે આ ગ્રંથમાં પ્રભુ પાછા ફર્યાની વાત આવતી નથી...

શાંતિનાથ ચરિત્રાદિમાં/ચૈત્યવંદનાદિમાં મેઘરથરાજાએ પારેવાને અભયદાન આપ્યાનું કથન છે. ("અભયદાન દેઇ કરી બાંધ્યું તીર્થંકરનામ") જ્યારે અહીં મેઘરથરાજાનાં દૃષ્ટાંતની ઘટના અનુકંપાદાનનાં વિષયમાં કરી છે.. ઇત્યાદિ...

તથા સિદ્ધહૈમવ્યાકરણનાં મતે અસિદ્ધ પ્રયોગો પણ ઘણા નજરે ચડે છે જોકે એ કદાચ અન્યવ્યાકરણની અપેક્ષાએ સિદ્ધ થઇ પણ શકતાં હોય તો ખ્યાલ નથી છતાં ત્યાં ત્યાં નોંધ કરેલી છે...

**ઉર ઉછળે ઉપકાર સ્મૃતિ ! ઉપકારી ચરણે અગણિતનતિ !!**

જેઓશ્રીની દિવ્યાશીઃરૂપી દીવાદાંડી સતત અજ્ઞાન અંધકારમાંથી ઉગારી રહી છે એવા અવિરત કૃપાધારા વર્ષાવતાં યુગમહર્ષિ...... દાદાગુરુદેવશ્રી **ભદ્રસૂરીશ્વરજી મહારાજા....**

અમ જીવનમાં ગોખડે સંયમનાં દીપજલાવી સ્વાધ્યાયનાં પ્રાણ પૂરનારા, સંઘૈક્ય સૂત્રધાર... પરમારાધ્યપાદ ગુરુદેવશ્રી**ૐકારસૂરીશ્વરજી મહારાજા...**

ગમે ત્યારે ગમે તેવા ઉડઝૂડ પ્રશ્નો કર્યા હશે તેનાં પુરાં પ્રેમથી પોતાનું બધું જ કાર્ય અટકાવીને અમને જવાબ આપીને સંશોધન માર્ગે અમારા સાચા રાહબર બનનારા **પૂ. શ્રી જંબૂવિજયજી મહારાજા....**

પલ પલ પ્રેરણા પીયૂષનું પાન કરાવનાર, અપ્રમત્તતાનાં અવતાર, પરમનિઃસ્પૃહી પૂજ્ય ગુરુદેવશ્રી **અરવિંદસૂરીશ્વરજી મહારાજા...**

વાત્સલ્યદાનમાં માતૃહૃદયી, સાક્ષિભાવ-દ્રષ્ટાભાવનાં ઉદ્‌ગાતા અધ્યાત્મયોગી પૂ. ગુરુદેવશ્રી **યશોવિજયસૂરીશ્વરજી મહારાજા...**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

સ્વાધ્યાયનાં સ્નેહથી જ જ્યાં મળ્યા ત્યાં, ગમે તેવી કટોકટિની વેળાએ પણ બધાજ પ્રશ્નોનાં હસતાં હૃદયે સુંદર-સચોટ જવાબ આપનારા, પ્રચંડ પ્રતિભાશાલી પરમોપકારી પૂજ્ય **શ્રી ધુરંધરવિજયજી મહારાજા...**

અવનવા ગ્રંથોની તપાસ કરાવી, પ્રતો મેળવી, અમને સ્વાધ્યાય સરિતામાં સતત ઝીલતાં રાખનારા સ્વાધ્યાયપ્રેમી પૂ. **શ્રી મુનિચંદ્રસૂરીશ્વરજી મહારાજા...**

હસ્તલિખિત પ્રતિનાં બિનઅનુભવને કારણે જ્યાં મુંઝાયા ત્યાં વિના વિલંબે પત્રદ્વારા માર્ગદર્શન આપી અમારી સ્વાધ્યાય યાત્રામાં ભોમિયા તરીકેની ભૂમિકા ભજવનારા પરમોપકારી પૂ. **શ્રી શીલચંદ્રસૂરીશ્વરજી મહારાજા...**

અમ જીવનક્ષેત્રમાં વૈરાગ્ય બીજનાં વાવેતર કરી પ્રેરણાનાં પીયૂષ સિંચીને વિરતિવાટિકાને સદાય નવપલ્લવિત રાખનાર પરમ તપસ્વી પૂ. પિતાજી મુનિરાજશ્રી **ચંદ્રયશવિજયજી મ. સા.**

ગ્રંથપ્રસાદની પ્રથમ ઇંટથી આરંભીને શિખર-કળશ સુધીની તમામ જવાબદારી પોતાનાં શિરે લઇને અમને સ્વાધ્યાય માર્ગે સતત પ્રોત્સાહન આપતાં બન્ધુમુનિરાજશ્રી પૂ. **ભાગ્યેશવિજયજી મ. સા.**, પૂ. **મહાયશવિજયજી મ. સા.**

અપ્રમત્તતાનાં અવતાર વાત્સલ્યની ગંગોત્રી સમા દાદીગુરૂણીજી શ્રી **મનકશ્રીજી મ. સા....**

આદર્શમય સંયમપાલનનાં ટાંકણા દ્વારા જ અમજીવન શિલ્પનાં ઘડવૈયા પરમ તપસ્વી પરમોપકારી ગુરૂણીજીશ્રી **સુવર્ણાશ્રીજી મ.સા...**

જન્મદાત્રી, જીવનદાત્રી, સંસ્કારદાત્રી, એમ ઉપકાર ત્રિવેણીને આરે ઉભેલા અનન્યોપકારી ગુરૂમાતા પૂ. **શ્રી રમ્યગુણાશ્રીજી મ. સા....**

આદિ ઉપકારી ગુરૂભવંતોનાં પાવન-ચરણ-કમલમાં અનંતાનંત વંદનાવલી-

જીવનમાં સ્વાધ્યાયનાં સંસ્કારોનું સિંચન કરનારા જ્ઞાનદાતા સરસ્વતીસુત **શ્રી વ્રજલાલભાઈ, માણેકલાલભાઈ, ચંદ્રકાંતભાઈ, મહેશભાઈ, ધીરૂભાઈ, જગદીશભાઈ,** આદિ પ્રાધ્યાપકવર્યોને કૃતજ્ઞતાપૂર્વક યાદ કરું છું. સાથ સાથ જ્યારે જેટલા જે જે સુધારા કરાવીએ ત્યારે.. તેટલા...તે તે તમામ સુધારાઓ હસતા હૈયે સ્વીકારી પુસ્તકને સર્વાંગીણ સૌંદર્ય બક્ષનાર **'ભરત ગ્રાફિક્સ'** વિગેરેને કેમ ભૂલાય ?

પ્રાન્તે સર્વદા સર્વક્ષેત્રે મહિમા જેનો ગવાઇ રહ્યો છે એવો આદ્યધર્મ કે જે દાનધર્મ ઉપર અવનવી વાતો જાણી સૌ દાનધર્મ પ્રત્યે પૂર્ણપ્રેમી બની આત્મકલ્યાણ સાધે એજ મંગળમનીષા સાથ છદ્મસ્થતા, પ્રેસદોષાદિને કારણે રહી ગયેલી ક્ષતિને વિદ્વદ્જનોએ સુધારવી એ નમ્ર વિનંતિ...

ભાયંદર, મુંબઇ.
જ્યેષ્ઠી પૂર્ણિમા સંવત ૨૦૫૮



લિ.
દેવ-ગુરુકૃપાકાંક્ષિ **રમ્યરેણુ**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

પ્રવર્તક શ્રી કાંતિવિજયજી શાસ્ત્રસંગ્રહ જૈન જ્ઞાનમંદિર, વડોદરા V



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# હેમચંદ્રાચાર્ય જૈન જ્ઞાનભંડાર, પાટણ P



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# L.D. संज्ञक प्रति



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## श्री ખરતરગચ્છ જ્ઞાનભંડાર, માંડવી(કચ્છ) M

सिरिसमणसमणिसावय। सावियजणसूयणंचेव॥११ नाउत्तवच्छियाविवद्दविणकरेइ
जोकारवेइत्तावेणंसोत्तरइनरवरोइव। तंजियरज्जोसिवंलहइ॥१२॥इहलोएदा
णाउ॥लहइतिसवासुहंचसोहग्गं। उस्सपसरंसिसिसरिसं। रज्जंचउरंगबलकलि
यं॥१३॥परलोएसुरमणी॥संसोग। सुद्धालिश्रणुहवेऊण। दाणपरापरियालिय
वरणंसाहंतिसिद्धिपद्द॥१४॥जेमा। णडुद्दरमणा॥कस्सविसीसंनियंनमामंति॥ते
विकदाणपराणं। चाडुयवयण। तणित्तासंति॥१५॥मालंसिणोविधणसालिणो
चि। मणुवामणेसिककेणाविम्भवि। गुणरयणनिहाणा। दाणेणचिणातिणसमाणा
जहरयणाणं॥रयणं। कप्पदुमोजहदुमाणं॥तहदाणंपवरं। सुपत्तदाणंजिणाविंति॥
॥१६ केकेकपत्तजणदाणोदाइणोइहनसंतिपाणिगणा। तिहुणविजिणियबिहवंय।
उजंति॥१७ अरजिणस्सजावं। जिणदासेणडुराइसत्तीए॥पर मत्तेणपारावि ऊण। पत्ता
इसुस्काइ॥१८॥तंचित्तं वित्तपत्ताण। सेयउजायएमहासफलं। [illegible]तिवेणिसंग॥तिहुंस
मएपवित्तयरं॥१९ तेधम्माखकयच्छा तेसिंसद्दलंचमाणसंजमं। [illegible]पछिकएसुणिणो।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# क्व किम् ?


| विषयः | पृष्ठाङ्कः |
|---|---|
| मङ्गलाचरणम् | १ |
| दानस्य प्रकाराः | ५ |
| सत्पात्रदानविषये श्रीयुगादिदेवचरित्रम् | ८ |
| सप्तक्षेत्रीविषये दानफलम् | ८५ |
| सप्तक्षेत्रदानविषये श्रीभरतचक्रिकथा | ८९ |
| सत्पात्रदानस्य ऐहिक-पारलौकिकफलम् | ११७ |
| परमान्नदानविषये श्रीजिनदासश्रेष्ठिकथा | १२० |
| चित्त-वित्त-सत्पात्रश्लाघा | १४३ |
| सत्पात्रगुणवर्णनम् | १४४ |
| दाने सत्पात्रविषये श्रीवज्रस्वामिदृष्टान्तः | १४८ |
| चित्त-वित्त-सत्पात्रसामग्रीदानविषये श्रीमूलदेवनृपकथा | १७३ |
| सत्पात्रदानफलम् | १९९ |
| सत्पात्रदानविषये श्रीचन्दनबालादृष्टान्तः | १०१ |
| दानेऽशनशुद्धिविवेचनम् | २१७ |
| अशनदानविषये श्रीधनसेनश्रेष्ठिकथानकम् | २१८ |
| पानदानविषये पुलिन्दमिथुनदृष्टान्तः | २३४ |
| आसनप्रदानविषये सज्ञातिप्रियाकथा | २४२ |
| वस्त्रदानविषये श्रीमृगाङ्ककथा | २४८ |
| वसतिदानस्वरूपम् | २७१ |
| वसतिदानविषये श्रीअवन्तिसुकुमालकथा | २७३ |
| संस्तारकादिदानविषये श्रीचन्दनवणिक्कथा | २७९ |
| शुश्रूषादानविषये मृगदृष्टान्तः | २९३ |
| वन्दनदानविषये श्रीदुर्गतनैगमकथा | २९७ |


Jain Education International For Personal & Private Use Only www.jainelibrary.org

| विषयः | पृष्ठाङ्कः |
| --- | --- |
| अतुष्टि-तुष्टिदानविषये निधिदेव-भोगदेव कथा | ३०७ |
| कुपात्रोपकारदानविषये वैद्यसुतकथा | ३१७ |
| कुदानविषये नागश्रीकथा | ३२३ |
| अदानविषये मम्मणश्रेष्ठिकथा | ३२७ |
| साधोर्भैषजदानस्वरूपम् | ३३१ |
| भेषजदानविषये कपिराजकथा | ३३२ |
| सत्पात्रदानविषये श्रीअमरसेन-वरसेनकथा | ३३७ |
| उचितदानवर्णनम् | ३५४ |
| अनुकम्पादानस्वरूपम् | ३६२ |
| अनुकम्पादानविषये श्रीमेघरथनृपकथा | ३६४ |
| अभयदानकथनम् | ३७० |
| प्राणिवध-प्राणिपालनविषये श्रीमानभङ्ग-श्रीअभयसिंहनृपकथा | ३७३ |
| श्रीज्ञानदानस्वरूपम् | ३८८ |
| ज्ञानदानविषये श्रीकेशिगणधर-प्रदेशिनृपकथा | ३९१ |
| ग्रन्थसमाप्तिमङ्गलम् | ४०० |
| ग्रन्थप्रशस्तिः | ४०१ |
| महागुणाष्टकगर्भित-श्रीप्रभुस्तुतिः | ४०३ |
| गुप्तक्रियापदात्मिका श्रीगुरुस्तुतिः | ४०७ |

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# शुद्धिसूची

| पृष्ठाङ्कः | पङ्क्त्यः | शुद्धपाठः |
|---|---|---|
| ९ | १ | दानविषये श्रीयुगादिदेवचरित्रम् |
| ४१ | ४ | सा |
| ९२ | ४ | चक्री सेनां |
| १०२ | १२ | तत्तुल्यस्तेन |
| १०८ | ११ | *उत्पाटितेयं (नीचे मुजबनी फुटनोट समजवी.) |
| | | * मुष्टिशब्दः स्त्रीलिङ्गोऽत्र तु पुंलिङ्गः प्रयुक्तोऽतश्चिन्तनीयः |
| १५६ | १ | वृषैरिभै रथै |

Jain Education International For Personal & Private Use Only www.jainelibrary.org

Jain Education International For Personal & Private Use Only www.jainelibrary.org

॥ श्रीसिद्धचक्राय नमः ॥

॥ ॐ नमो जिनेभ्यः ॥

# श्रीदानोपदेशमाला

त्रैलोक्यराजकमलाममलाशयेभ्यः,
सद्भ्यः प्रदातुमिव यस्य शिरःप्रदेशे ।
छत्रत्रयं रजनिजानिनिभं विभाति,
स श्रेयसे भवतु वो **वृषभो** जिनेशः ॥१॥ (वसन्ततिलका)

यः स्वर्गलोकात् कृपयाचिरायाः, कुक्षौ धरावासिजनाऽशिवानाम् ।
प्रशान्तिमाधातुमिवावतीर्णः, स **शान्ति**देवो मुदमादधातु ॥२॥
(उपजातिः)

यस्योपदेशसमये विशदा रदानां,
भासस्तमालसमदेहरुचौ मिलन्त्यः ।
भव्याङ्गिमङ्गलविधौ दधिनव्यदूर्वा-
लीलां श्रयन्ति स शिवाय **शिवातनूजः** ॥३॥ (वसन्ततिलका)

यस्य प्रभोर्मूर्धनि भोगिराज-स्फुटस्फटाटोपमणिमयूखाः ।
विभान्ति दीपा इव मुक्तिमार्ग-प्रकाशनार्थं स मुदेऽस्तु पार्श्वः ॥४॥
(उपजातिः)

वाञ्छातिगार्थफलदौ चरणौ यदीयौ,
स्वं चाल्पदायिनमवेत्य सुपर्ववृक्षाः ।
अद्याप्यमी नखमिषादिव पल्लवौघै-,
रञ्चन्ति सोऽवतु जनान् जिन**वर्धमानः** ॥५॥ (वसन्ततिलका)

आपगा इव महापगापतिं, सत्कला इव कलाविलासिनम् ।
यं श्रिताश्चतुरशीतिलब्धयः, स श्रिये भवतु **गौतमः** प्रभुः ॥६॥
(रथोद्धतावृत्तम्)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रसादमासाद्य यदङ्घ्रिपद्मयोर्जडोऽपि विद्वज्जनशेखरायते ।
**सरस्वती** सा मम मानसान्तरे, तनोतु हंसीव निवासमञ्जसा ॥७॥
(वंशस्थवृत्तम्)

विश्वातिशायिमतयो गुणशालिरुद्र-
पल्लीयगच्छगगनाङ्गणशीतभासः ।
सिद्धान्तवारिनिधयो गणधारिणोऽमी,
नन्दन्तु **सङ्घतिलका** गुरवोऽस्मदीयाः ॥८॥ (वसन्ततिलका)
येषां गुरूणामभिधा जगत्यामजिह्मवाग्, ब्रह्ममयीव मन्ये ।
नो चेत् कथं तत्स्मृतिमात्रतोऽयं, जनः कवित्वं तनुते जडोऽपि ॥९॥
(उपजातिः)

तन्निर्देशात् स्वकृतेः **श्रीमद्दानोपदेशमालायाः** ।
वृत्तिं सुखावबोधां कुर्वे स्वपरोपकाराय ॥१०॥

इह हि प्रकरणकारः प्रकटीकृताऽमृतायमानसत्पात्रदानोपदेशसारः संसारपारावारवारिप्रवाहप्रणिमज्जत्प्राणिगणनिस्तारणप्रवहणायमानागण्यपुण्यकाननोल्लासनघनाघनसंरम्भे श्रीदानोपदेशमालाप्रकरणप्रारम्भे तत्त्वातत्त्वविवेकच्छेकास्तोकलोकचेतश्चमत्काराय प्रेक्षावत्प्रवर्तनाय शिष्टसमयप्रतिपालनाय दुरन्तदुरितदूरीकरणाय च समुचितेष्टदेवतानमस्कारपूर्वकमभिधेयप्रयोजनसंबन्धबन्धुरां प्रथमगाथामाह-

**सयलसमीहियकरणं, रिसहजिणं पणमिऊण णाणधणं ।**
**दाणोवएसमालं भणामि मंगलमणीसालं[१] ॥१॥**

व्याख्या-'सकलसमीहितकरणं ज्ञानधनं वृषभजिनं प्रणम्य मङ्गलमणीशालां दानोपदेशमालां भणामीति' क्रियासंबन्धः । भावार्थस्त्वयम्-'सयलसमीहियकरणित्ति', क्रियत इति करणम्, सकलं-समस्तम्, यत्समीहितम् ऐहिकपारलौकिकशिवशर्मानुयायि मनोवाञ्छितं

१. मालं... M।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तस्य करणं संपादकम्, न ह्यन्येन केनापि दैवतेन ईदृग्विधमभिलषितं सम्पादयितुं शक्यत इति भावः।

"नाणधणित्ति" ज्ञायते त्रिभुवनभवनोदरविवर्त्तमानानन्तधर्मात्मकं वस्त्वनेनेति ज्ञानं मतिश्रुतावधिमनःपर्यायकेवलस्वरूपं तदेव धनमिव धनं सारस्वतेयरूपं यस्य तम्। यथा धनी धननिवहेन महीतले महत्त्वमाप्नोति, तथा भगवानपि ज्ञानधनेन त्रिजगदाश्चर्यकारि परमैश्वर्यमार्जितवानित्याकूतम्। नन्वेवंविधविविधगुणगणप्रगुणः कस्तमित्याह, 'रिसहजिणित्ति' जयति दुर्निवारानन्तरङ्गारातीनिति जिनः, ऋषभश्चासौ जिनश्च ऋषभजिनस्तं प्रथमनाथं 'प्रणम्य' त्रिकरणविशुद्ध्या नमस्कृत्य। यत उपहासपरोऽपि नमस्कारः संभवति।

यदुक्तं-नमस्यं तत्सखि! प्रेम घण्टारणितसोदरम्।
क्रमक्रशिमनिस्सारमारम्भगुरुडम्बरम् ॥१॥

अतस्तद्व्यवच्छेदाय प्रोपादानं। अत्र च श्रीयुगादिदेवस्य विशेषणद्वारेण चत्वारोऽतिशयाः प्रतिपादिताः। तत्र च सयलसमीहियकरणमित्यनेन भगवतो निरुपमदेशनादानसम्पादितमनोवाञ्छितत्वाद् वचनातिशयः। 'यो ददाति स देवता' इति न्यायादनेनैव निरन्तरभक्तिभरप्रणम्रसुरासुरनराधिराजराजिविनिर्मितप्रातीहार्यसपर्यावत एव पूजार्हत्वात् पूजातिशयः॥ रिसहजिणमित्यनेनाऽष्टादशदोषसमूलकाषंकषणादपायापगमातिशयः॥ णाणधणमित्यनेन विमलकेवलविशिष्टत्वाज्ज्ञानातिशयः। अथ कृतभावमङ्गलोऽभिधेयमाह, दाणोवएसमालित्ति-'दीयते सत्पात्रादिभ्य इति दानं' तस्योपदेशा-विधिनिषेधस्वरूपनिरूपणानि, तेषां माला श्रेणिस्ताम्। यद्वा मालेव माला पुष्पदाम सा हि कण्ठपीठधारणार्हा भवत्यतो दानोपदेशमालापि सहृदयैः स्वहृदये विशिष्य निवेश्या। तामेव विशिनष्टि मंगलमणीसालित्ति-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मङ्गलानि-कुशलानि तान्येव मणयो-वैडूर्यादिरत्नानि तेषां निवास-योग्यत्वात् शालेव शाला-वसतिस्थानं ताम् । यथाहि-शाला सकलसारवस्तूनां वासभूर्भवति, तथेयमपि मङ्गलमणीनां निवासत्वा-दास्थानमण्डपः॥ तामेवंविधां भणामि-कथयामि भव्यानां पुरस्तादिति। अत्र संबन्धो वाच्यवाचकलक्षणः, वाच्यं प्रकरणस्यार्थः, वाचकमेतत् प्रकरणम्, अभिधेयं दानोपदेशाः, मङ्गलमणीशालामिति प्रयोजनम् , तच्च द्विप्रकारम् , प्रकरणकर्तुः श्रोतुश्च, तत् पुनः परापरभेदेन द्विविधम् , कर्तुः परं परमपदसाम्राज्यप्राप्तिरपरं च भव्यप्राणिप्रतिबोधानुग्रहः, यदुवाच वाचकमुख्यः-

न भवति धर्मः श्रोतुः सर्वस्यैकान्ततो हितश्रवणात् ।
ब्रुवतोऽनुग्रहबुद्ध्या वक्तुस्त्वेकान्ततो भवति ॥१॥

श्रोतुरपि परं सिद्धिसौधादिदेवताधिगतिः, अपरं तु शास्त्रार्थ-परिज्ञानम् । योऽत्र पुरा धनसार्थवाहजन्मनि कृतसत्पात्रदानस्य श्रीयुगादिदेवस्य नमस्कारः, सोऽस्य ग्रन्थस्य दानप्राधान्यं व्यनक्ति । तथा मङ्गलादीनि मङ्गलपर्यन्तानि शास्त्राणि भवन्ति । अतो मंगल-मणीसालमित्यनेन विशेषणेन मङ्गलोपादानमिति गाथार्थः ॥६॥

अथ फलप्रतिपादनपूर्वं दानोपदेशमाह।

**णिरुवमसुहाण ठाणं दुरियाण पणासणं गुणनियाणं ।**
**तिहुयणसिद्धिनिहाणं आयरह सया जणा दाणं ॥२॥**

व्याख्या-णिरुवमित्ति-निरुपमान्यनन्यान्यसामान्यानि यानि सुखानि नरासुरसुरशिवशर्मरूपाणि तेषां स्थानमिव स्थानं न्यासभूमिः, यतो-ऽमुष्मादेव क्रमादेषामुत्पादात् । दुरियत्ति-दुरितानि-राजवैरिपर-चक्रदुर्जनादिभिः कृतानि यानि विघ्नानि तेषां प्रणाशनं विध्वंसकारकम् उक्तं च-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दानेन सत्त्वानि वशीभवन्ति, दानेन वैराण्युपयान्ति नाशम् ।
परोऽपि बन्धुत्वमुपैति दानात्तस्माद्धि दानं सततं प्रदेयम् ॥२॥

(उपजातिः)

गुणित्ति गुणा-औदार्य-धैर्य-गाम्भीर्यादयस्तेषां निदानं-कारणम्। 'यतो दानवानेव भुवने जनैर्गुणवान् गीयत' इत्याशयः। तिहुयणित्ति त्रिभुवनमूर्ध्वाधस्तिर्यग्लोकलक्षणं तत्र याः सिद्धयश्चतुरशीतिलब्धिरूपा अथवा अणिमाद्यास्तासां निधानं-सेवधिः। यथा रत्नानामाधारो निधिर्भवति, तथा सर्वासामपि सिद्धीनामिदमेव। अत ईदृग्विधगुणगरिष्ठं हे जना! लोकाः!, सदा-निरन्तरम्, दानमाचरत-कुरुध्वमिति गाथार्थः॥

कैरिदं दानं प्ररूपितमित्याह-

**चउगइणिवारयाणं, धम्माणं चउविहाण मज्झम्मि ।**
**पढमं दाणं पवरं, परूवियं वीयराएहिं ॥३॥**

व्याख्या-चउगइत्ति-चतस्रश्च ता गतयश्च चतुर्गतयः सुरनरनैरयिकतिर्यग्रूपास्ता निवारयन्ति निषेधयन्तीति चतुर्गतिनिवारकास्तेषां केषामित्याह धम्माणंति-दुर्गतौ प्रपतन्तं प्राणिगणं धत्त इति धर्मः। उक्तं च- दुर्गतिप्रसृतान् जन्तून्, यस्माद्धारयते ततः।
धत्ते चैतान् शुभे स्थाने तस्माद्धर्म इति स्मृतः ॥१॥

कतिसंख्यानां तेषामित्याह चउविहाणंति, चतुर्विधानां दानशील-तपोभावनाभिश्चतुष्प्रकाराणां मध्ये प्रथमं-पूर्वम्, प्रवरं-प्रकृष्टं दानं प्ररूपितं-निवेदितम्, कैरित्याह, वीयराएहिंति विशेषेण इताः प्रेरिता रागादयोऽरयो, यैस्ते वीतरागास्तैरेवंविधैरतीतानागतवर्तमान-जिनवरेन्द्रैरिति गाथार्थः ॥

तस्यैव दानस्य भेदान् प्रकटयन्नाह-

**तं पुण पंचपगारं सुपत्तदाणं तहा उचियदाणं ।**
**अणुकंपाभयदाणं पण्णत्तं[१] णाणदाणं च ॥४॥**

१. पंचमं... M।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

व्याख्या-तत्पुनर्दानं सकलमङ्गलनिदानं पञ्चप्रकारं-पञ्चविधं प्रज्ञप्तं-कथितमिति क्रियासंबन्धः। तत्र-तेष्वादिमं सुपत्तदाणंति-सत्प्रधानं ज्ञानदर्शनचारित्रपवित्रितगात्रं यत्पात्रं सुसाधुरूपं तत्र द्वि-चत्वारिंशदद्दोषाकलुषिताशन-पान-खादिम-स्वादिम-वस्त्र-पात्र-शय्या-संस्तारकलक्षणं यद् दानं दीयते तत् सत्पात्रदानम्, यस्मादस्मादेव सर्वा अपि संपदः संपद्यन्ते ॥ यदुक्तं-

जं चउरंगं रज्जं, जं सुरवरसंपयाओ विउलाओ ।
जं सिवसुहमणुहवई, तं मुणह सुपत्तदाणफलं ॥१॥

द्वितीयम् उचियदाणंति-मित्र-पुत्र-कलत्र-स्वजन-संबन्धि-बन्धुषु लोकापवादभीरुतया स्वमहेच्छताख्यापनाय च यद्वित्तवितरणं तदुचित-दानम् । यत औचित्यमेव गुणेषु गौरवमावहति। यदाहुः-

औचित्यमेकमेकत्रगुणानां राशिरेकतः।
विषायते गुणग्राम औचित्यपरिवर्जितः ॥१॥

तृतीयम् अणुकंपादाणंति-दीनानाथान्धबधिरदुःखस्थैडमूक-प्रमुखलोकेषु यदनुकम्पया कृपया दानं तदनुकम्पादानम् । यतो-ऽमुष्याप्यविकलं फलं लोके विलोक्यते ॥ उक्तं च-

जं रयणीयरकरसरिसकित्तिपसर पसरंति ।
तं अणुकंपादाणफलु पंडिय पयडु भणंति ॥१॥

चतुर्थम् अभयदाणंति-सकललोकोदरवर्त्तिचराचरजन्तुजात-प्राणरक्षणदक्षणं यद् दानं तदभयदानम् । यस्मादेतदेव सर्वेष्वपि दानेषु शिरःशेखरतामञ्चति॥ यदुक्तं-

देवेसु वीयराओ, चारित्ती उत्तमो सुपत्तेसु ।
दाणाणमभयदाणं, वयाण बंभव्वयं पवरं ॥४॥

लौकिका अप्याहुः-

हेमधेनुधरादीनां दातारः सुलभा भुवि।
दुर्लभः स पुमाँल्लोके यः प्राणिष्वभयप्रदः ॥१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पञ्चमं च 'णाणदाणंति' विनयावनतविनेयजनस्य द्वादशाङ्ग्यादिसूत्रार्थाध्यापनरूपं यद्दानं तज्ज्ञानदानम्, यतस्तस्यैव सर्वभावाविर्भावकत्वात्, यदागमः-

णाणं पयासगं सोहगो, तवो संजमो य गुत्तिकरो ।
तिण्हंपि समाजोगे, मुक्खो जिणसासणे भणिओ ॥१॥

(उपदेशसारे. ३१-३२)

चः-समुच्चये इत्युल्लिङ्गनागाथासमासार्थः । व्यासार्थस्तु प्रत्यधिकारं प्रकटयिष्यत इति गाथार्थः ॥

प्रथमं तावत्सत्पात्रदानं प्रचिकटयिषुराह-

**तेसिं मज्झे पढमं सुपत्तदाणं मुणीहिं परिकहियं ।**
**संसारजलहिणिवडिरणराणमुत्तरणे तरणिसमं ॥५॥**

व्याख्या-तेषां पञ्चानामपि दानानां मध्ये 'प्रथमं' सत्पात्रदानं मुनिभिस्त्रिकालवेदिभिस्तीर्थंकरगणधरदेवैः, परि-समन्तात् कथितं-प्रतिपादितम्, तस्यैव निरुपचरितं विशेषणमाह, संसारित्ति संसरणं-संसारश्चातुर्गतिकभवभ्रमणम्, स एव जलधिर्विपुलत्वात् दुर्लङ्घत्वाच्च, समुद्रस्तत्र शुभाशुभकर्मपारतन्त्र्येण नितरां पततां-ब्रुडताम्, नराणां-प्राणिनामुत्तरणे-तारणविषये, तरणिसमं-प्रवहणप्रायम्। यतः कृतसत्पात्रदानाः सुखेनैव संसारसागरं तरन्तीति गाथार्थः ॥

तस्मात्सत्पात्रदानात् केनापि किं फलमवाप्तमित्याह[१]-

***सिरिरिसहसामिणा धणभवंमि दिण्णं मुणीण घयदाणं ।***
**तस्सेव पभावाओ समज्जियं बोहिवरबीयं ॥६॥**

---

१. सावियाए रेवईए दिण्णं भेसजमेव वीररुजा ।
तस्सेव पभावाओ समज्जियं तित्थयरगोत्तं ॥१॥ V. संज्ञक-प्रतौ एवं टिप्पनकं दृष्टम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

व्याख्या-श्रीऋषभस्वामिना-प्रथमतीर्थंकरेण, धनभवे-धनसार्थवाहजन्मनि, मुनिभ्यः-साधुभ्यो, घृतदानं दत्तं-वितीर्णं नन्वत्र चतुर्थ्याः स्थाने कथं षष्ठी? प्राकृतत्वात्, यदुक्तं-बहुवयणेण दुवयणं छट्ठि-विभत्तीइ भणइ चउत्थी। जह हत्था तह पाया नमुत्थु देवाहिदेवाणं॥१॥

तस्यैव सत्पात्रदानस्य प्रभावान्माहात्म्याद् बोधिवरबीजम् 'औपशमिकं सम्यक्त्वम्, समर्जितं-लब्धम्, यस्मादनादिभवपरिभ्रमणं कुर्वाणः प्राणी कर्मग्रन्थिमासाद्य यथाप्रवृत्तकरणान्तरकरणापूर्वकरण-पुरःसरमान्तर्मौहूर्त्तिकमौपशमिकं सम्यक्त्वमर्जयति। तस्मिंश्च प्राप्तेऽपार्धपुद्गल एव संसारसरणम्, यदागमः-

अंतोमुहुत्तमित्तंपि, फासियं हुज्ज जेहिं सम्मत्तं ।
तेसिं अवड्ढपुग्गल, परियट्टो चेव संसारो ॥१॥

(नवतत्त्वप्रकरणम्-५३)

बोधिशब्दपुरतो वरबीजग्रहणमिति ज्ञापयति, यथा प्रशस्य-बीजादन्यान्यबीजोत्पादः स्यात्, तथास्माद् बोधिवरबीजादपि सम्यक्त्वानां लाभ इति गाथार्थः । भावार्थस्तु कथानकगम्यस्तच्चेदम्, तथाहि-

अस्ति संख्यातिगाम्भोधिद्वीपानां वलयैर्वृतः।
**जम्बू**द्वीपाभिधो द्वीपो लक्षयोजनविस्तृतः ॥ १॥
चतुराशास्थितपरद्वीपश्रीविजिगीषया ।
यो बिभर्ति द्विचन्द्रार्कव्याजाच्चक्रचतुष्टयम् ॥ २॥
तदन्त**र्भद्रशाला**दिवनराजिविराजितः ।
उच्चार्हच्चैत्यसश्रीको भाति **मेरु**महीधरः ॥ ३॥
तस्मात्पश्चिमदिग्भागविदेहेषु महर्द्धिषु ।
**क्षितिप्रतिष्ठितं** नाम पुरमस्ति मनोहरम् ॥ ४॥
यत्र प्रासादशृङ्गेषु कलशा मणिनिर्मिताः ।
प्रदीपकलिकायन्ते, निशि तामसनाशनात् ॥ ५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्र सत्रं कलौघानां, धर्मकर्मणि कर्मठः ।
**प्रसन्नचन्द्र**राजेन्द्रः, प्राज्यराज्यमपालयत् ॥ ६ ॥
तस्मिंश्चासीद् **धनो** नाम, सार्थवाहो महापतिः ।
यः स्थानं श्रीविलासानां, रत्नानामिव रोहणः ॥ ७ ॥
सर्वसाधारणा तस्य, संपत् संतापनाशिनी ।
सुरस्रोतस्विनीवारां, प्रवेणीव व्यराजत ॥ ८ ॥
यानानां सेवकानां च, सुहृदां संपदामपि ।
कोऽपि न प्राप्तवान् संख्यां, तस्याम्भोधेस्तरङ्गवत् ॥ ९ ॥
गृहीतभाण्डः सोऽन्येद्युः, स्वपुराद् गन्तुमैहत ।
श्री**वसन्तपुरं** तिग्मरश्मिर्मेषाद् वृषं यथा ॥ १० ॥
सर्वेषामपि लोकानां, करिष्यामि समीहितम् ।
एवमुद्घोषणां सार्थपार्थिवोऽकारयत्तराम् ॥ ११ ॥
शुभे दिने शुभे लग्ने, कुलस्त्रीकृतमङ्गलः ।
सार्थेशो रथमास्थाय, प्रतस्थे नगराद् बहिः ॥ १२ ॥
प्रयाणढक्कानिस्वानैराकारणनरैरिव ।
वसन्तपुरमेतारो, लोकास्तत्र समैयरुः ॥ १३ ॥
रथैर्वृषैः खरैरुष्ट्रैरश्वैरश्वतरैरपि ।
सार्थपोऽमण्डयत्सार्थं, पुष्पैर्मधुरिव द्रुमम् ॥ १४ ॥
अस्मिन्नवसरे **धर्मघोषा**ख्याः सूरिशेखराः ।
सार्थवाहमुपाजग्मुर्विनयं सद्गुणा इव ॥ १५ ॥
तान्निरीक्ष्य धनो नत्वा, निवेश्य च वरासने ।
विहिताञ्जलिरप्राक्षीत्, समागमनकारणम् ॥ १६ ॥
सूरयस्तमभाषन्त, सार्थे सार्थेश! तावके ।
वसन्तपुरमेतारस्तारा इव निशाकरम् ॥ १७ ॥
धन्यंमन्यो धनोऽप्याह, सूरीन् दूरीकृतागसः ।
पवित्रयत मत्सार्थं, भगवन्! स्वांह्रिरेणुभिः ॥ १८ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदा स सूदानादिक्षद्, भो! भो! युष्माभिरन्वहम् ।
संपाद्यमन्नपानाद्यं कृतेऽमीषां महात्मनाम् ॥ १९ ॥
गुरवोऽप्यवदन्नेवं, सार्थवाह! महात्मनाम् ।
अकृताऽकारितं मुक्त्वा नान्यदन्नादि कल्पते ॥ २० ॥
अथो धनाय केनापि स्थालमाम्रफलैर्भृतम् ।
उपढौकितमेषोऽपि, सूरिभ्यो दातुमैहत ॥ २१ ॥
गुरवोऽप्यूचिरेऽस्माकं, नाशस्त्रोपहतानि हि ।
फलान्यमूनि कल्पन्ते, भोक्तुं मुक्तिसुखार्थिनाम् ॥ २२ ॥
साश्चर्यः सार्थपोऽवादीत्, काप्येषां दुष्करक्रिया ।
यन्नैषा क्षणमप्यन्यैर्धर्तुं चित्तेऽपि शक्यते ॥ २३ ॥
यत्कल्पनीयमन्नादि, तद्वो दास्ये प्रसीदत ।
आयात च मया साकमित्युक्त्वा प्रैषयद् गुरून् ॥ २४ ॥
ततः सार्थपतिः सार्थं, प्रगुणीकृत्य कृत्यवित् ।
चचाल चञ्चलैरश्ववारवारैर्विराजितः ॥ २५ ॥
वाञ्छितार्थप्रदैः कल्पपादपैरिव जङ्गमैः ।
साधुभिः सहिताः सार्थे, सूरयोऽपि प्रतस्थिरे ॥ २६ ॥
उद्भटैः सुभटैर्युक्तः, सार्थस्याग्रेसरो धनः ।
तत्सखा **माणिभद्र**स्तु, भद्रार्थं पृष्ठतः स्थितः ॥ २७ ॥
प्रतिप्रातः प्रयाणेन, सार्थस्य व्रजतः सतः ।
तापोपशमनायेव, वर्षाकालः समागमत् ॥ २८ ॥
विद्युदुत्पातकरणं, कुर्वाणः शब्दपूर्वकम् ।
ववर्ष धारासारोघैर्धीरवीर इवाम्बुदः ॥ २९ ॥
तदा कूलंकषाः कूलमूलपाटनलम्पटाः ।
मार्गाश्च कर्दमाकीर्णास्तूर्णमर्णश्चयैः कृताः ॥ ३० ॥

Jain Education International	For Personal & Private Use Only	www.jainelibrary.org

सार्थं पदात्पदमपि, प्रेक्ष्यासौ गमनाक्षमम् ।
तस्यामेव महाटव्यां, दत्त्वा वासानवास्थित ॥ ३१ ॥
केचित्कुटीरकेष्वासन्, पटकुट्यां च केचन ।
सूरीन्द्रा माणिभद्रेण, दर्शितोपाश्रये स्थिताः ॥ ३२ ॥
सम्बले त्रुटिते दीर्घकालत्वात्सार्थवासिनः ।
कन्दमूलफलान्यत्तुं, प्रवृत्तास्तापसा इव ॥ ३३ ॥
अन्यदा माणिभद्रेण, धनस्याग्रे निशामुखे ।
सार्थस्य दौस्थ्ये विज्ञप्ते, विषसाद स सार्थपः ॥ ३४ ॥
तच्चिन्ताव्याकुलस्यास्य, चरमप्रहरे निशः ।
कोऽप्येत्य मन्दुरापालः, पपाठेत्यशठाशयः ॥ ३५ ॥
कष्टं गतोऽपि नः स्वामी, प्रत्याशं प्रस्फुरद्यशाः ।
अहो! स्वाङ्गीकृतं कृत्यं, युगान्तेऽपि न लुम्पति ॥ ३६ ॥
सोपालम्भं स तस्येदं, वचः श्रुत्वेत्यचिन्तयत् ।
अत्यर्थं मामके सार्थे, सन्ति के केऽतिदुःखिताः ॥ ३७ ॥
आ ज्ञातं सन्ति मे सार्थे, केवलप्रासुकाशिनः ।
श्रीधर्मघोषसूरीन्द्राः, दुःखिताः सपरिच्छदाः ॥ ३८ ॥
येषां स्वीकृत्य निर्वाहं, ते वाचापि न सत्कृताः ।
भ्रष्टप्रतिज्ञस्तत्तेषां, दर्शयामि कथं मुखम् ॥ ३९ ॥
तथापि तानहं नत्वा, हन्मि पातकमात्मनः ।
विमृश्येति धनः सूरिपार्श्वे प्रातरगान्मुदा ॥ ४० ॥
निधानं गुणरत्नानामास्थानं पुण्य[१]भूभृतः ।
आधानं सर्वसिद्धीनां, निदानं निर्वृतिश्रियः ॥ ४१ ॥
कुर्वद्भिर्वाचनां कैश्चित्तपस्यद्भिश्च कैश्चन ।
कैश्चिच्छिक्षां प्रयच्छद्भिर्यतिभिः परितो वृतम् ॥ ४२ ॥

१. रत्नानां स्थानं पुण्यस्य. L. P. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विकस्वरमुखाम्भोजं, सूरिराजं निरीक्ष्य सः ।
नत्वोपविश्य चावोचदिति ह्रीनम्रिताननः ॥ ४३ ॥ कुलकम् ॥
भगवन्तोऽपराधं मे, सहध्वं विहितागसः ।
उपकारापकारेषु मुनीनां हि मनः समम् ॥ ४४ ॥
गुरवोऽपि जगुः श्राद्ध! किं किं नोपकृतं त्वया ।
अस्मान् रक्षयता मार्गे, चौरश्वापदविघ्नतः ॥ ४५ ॥
त्वत्सार्थवासिनोऽस्मभ्यं, वितरन्त्यशनादिकम् ।
अतो विषादलेशोऽपि, न कर्तव्यस्त्वया हृदि ॥ ४६ ॥
धनोऽवादीत् स्वप्रमादान्नाथ! ह्रीणोऽस्मि यद्यपि ।
तथापि प्रेष्यतां साधुद्वन्द्वमाहारहेतवे ॥ ४७ ॥
दास्ये तदेव साधुभ्यो, यद्यत् कल्प्यं भविष्यति ।
इत्युदित्वा च नत्वा च, गुरून् धाम जगाम सः ॥ ४८ ॥
मुनी तदनुगावेव, जग्मतुर्धनमन्दिरम् ।
तदा दैववशात् तत्र, न बभूवाशनादिकम् ॥ ४९ ॥
इतस्ततो धनो भ्राम्यन्नापश्यदशनादिकम् ।
स्त्यानं च घृतमद्राक्षीत्पुण्यपुञ्जमिवात्मनः ॥ ५० ॥
कल्पनीयमिदं साधो! गृहाणानुगृहाण माम् ।
तेनेत्युक्ते मुनिस्तस्य पुरः पात्रमधारयत् ॥ ५१ ॥
अद्य पुण्यवतां धुर्यो जातोऽहमिति चिन्तयन् ।
रोमाञ्चाञ्चितगात्रोऽसावृषये प्रददौ घृतम् ॥ ५२ ॥
आनन्दाश्रुजलैः पुण्यतरुं सिञ्चन्निवात्मनः ।
धनो दानावसानेऽथ मुनियुग्ममवन्दत ॥ ५३ ॥
समीहितार्थदानेन, कल्पवल्लीसमानया ।
धर्माशिषाभिनन्द्याऽमुं तौ जग्मतुरुपाश्रयम् ॥ ५४ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदा सत्पात्रदानस्य, माहात्म्यात्सार्थपार्थिवः ।
मोक्षलक्ष्मीलताबीजं, बोधिबीजमुपार्जयत् ॥ ५५ ॥
पुनर्धनः शुभाकाङ्क्षी, निशायां पौषधालयम् ।
गत्वा नत्वा च सूरीन्द्रानुपाविक्षद्विचक्षणः ॥ ५६ ॥
श्रीधर्मघोषसूरीन्द्रा अपि ज्ञात्वा तदाशयम् ।
सुधामधुरया वाचा दिदिशुर्देशनामिमाम् ॥ ५७ ॥
देवोऽष्टादशदोषवर्जितमतिः पूज्यस्त्रिसन्ध्यं त्रिधा,
सेव्याः सद्गुरवोऽपरिग्रहयुजः श्रोतव्यमर्हद्वचः ॥
येनैतत्सकलं गुणैरविकलं सम्यक्तया पाल्यते,
सोऽहंपूर्विकया नरामरशिवश्रीभिः समाश्रीयते ॥ ५८ ॥ शार्दूलविक्रीडितम् ॥
तदयं सदयैर्धर्मः, स्वाराध्यः पितृमातृवत् ।
यथा तीर्त्वा भवाम्भोधिं, प्राप्यते परमं पदम् ॥ ५९ ॥
देशनान्ते धनः प्राह, स्वामिन्! धर्मोऽयमुत्तमः ।
चिरकालान्मयाश्रावि, श्रवणामृतपारणम् ॥ ६० ॥
कृतकृत्यमिवात्मानं, मन्वानो मनसा धनः ।
व्रतिव्रातवृतान् सूरीन्नत्वा निजगृहं ययौ ॥ ६१ ॥
हर्षप्रकर्षसंपूर्णो, देशनां तां हृदि स्मरन् ।
धनोऽतिवाहयामास, त्रियामामेकयामवत् ॥ ६२ ॥
अथ सुप्तोत्थिते तस्मिन् प्रातर्मङ्गलपाठकः ।
मेघनिर्घोषगम्भीरध्वनिरित्यपठन्मुदा ॥ ६३ ॥
घनान्धकारसंभारपूर्णा पद्मापहारिका ।
व्यवसायहरी पुंसां, निशा प्रावृडिवागमत् ॥ ६४ ॥
प्रभोदयिसहस्रांशुर्नृणां व्यापारकारणम् ।
प्रभातसमयः प्राप्तः शरत्काल इवाऽधुना ॥ ६५ ॥
पन्थानः पङ्करहिता, मुनीनामाशया इव ।
सरितां भग्नमौद्धत्यं, खलमैत्रीव तत्क्षणात् ॥ ६६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सरांस्युल्लासिपद्मानि, सद्मानि धनिनामिव ।
श्वेतच्छत्रवदम्भोदा अध्वगातपवारिणः ॥ ६७ ॥
विपक्वाः शालिकेदारा, घनसारा इवाऽवनीम् ।
वासयन्तश्च यानायोत्कयन्ति पथिकाशयम् ॥ ६८ ॥ त्रिभिर्विशेषकम् ॥
इदमाकर्ण्य विज्ञातप्रयाणसमयो धनः ।
प्रस्थानभेरीभाङ्कारैः, पूरयामास रोदसीम् ॥ ६९ ॥
ततश्चचाल सार्थेन सहितः सार्थपार्थिवः ।
सूरयोऽप्यचलन् साधुवृन्देन परिवारिताः ॥ ७० ॥
लङ्घितायां महाटव्यामनुज्ञाप्य धनं ततः ।
विजह्रुर्गुरवोऽन्यत्राप्रतिबन्धा हि साधवः ॥ ७१ ॥
निरन्तरप्रयाणेन, सार्थवाहः पथि व्रजन् ।
श्रीवसन्तपुरं प्राप, सरित्पूर इवाऽम्बुधिम् ॥ ७२ ॥
तत्र भाण्डं स विक्रीय, क्रीत्वा च प्रतिभाण्डकम् ।
पुरं क्षितिप्रतिष्ठाह्वं, सार्थयुक् पुनरराययौ ॥ ७३ ॥
तत्र प्रपाल्य सुचिरं, धर्मं मध्यमभावतः ।
सर्वायुः पूरयित्वा च, कालधर्मं ययौ धनः ॥ ७४ ॥
इतश्च **जम्बूद्वीपे**ऽत्र, **विदेह**क्षेत्रवर्त्तिषु ।
उत्तरेषु **कुरु**ष्वेष, दानधर्माद्युगल्यभूत् ॥ ७५ ॥
स तत्राऽष्टमपर्यन्तभोजी क्रोशत्रयोन्नतः ।
रसबाणाक्षिसंख्याङ्कैर्युक्तः पृष्ठकरण्डकैः ॥ ७६ ॥
पल्योपमत्रयायुष्को, दशभिः कल्पपादपैः ।
**मद्याङ्गाद्यैः** कृताभीष्टोऽन्वभूद् वैषयिकं सुखम् ॥ ७७ ॥ युग्मम् ॥
दिनान्येकोनपञ्चाशत्, प्रपाल्याऽपत्ययुग्मकम् ।
धनजीवोऽथ **सौधर्मे,** दानधर्मात्सुरोऽजनि ॥ ७८ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भोगान् भुक्त्वा ततश्च्युत्वा, **विदेहे**ष्वपरेषु सः ।
विजये **गन्धिलावत्यां, वैताढ्ये** धरणीधरे ॥ ७९ ॥
**श्रीगन्धारा**भिधे देशे, पुरे **गन्धसमृद्धके** ।
राज्ञः **शतबला**ख्यस्य विद्याधरनरेशितुः ॥ ८० ॥
कान्तायां **चन्द्रकान्तायां,** सुतत्वेनोदपद्यत ।
तस्याभिधा पितृभ्यां च, व्यधायीति **महाबलः** ॥ ८१ ॥ कुलकम् ॥
प्रपाल्यमानो धात्रीभिर्वृद्धिं प्राप महाबलः ।
महीरुह इवोद्यानपालिकाभिर्भृशोक्षितः ॥ ८२ ॥
कलावान् कुमुदोल्लासी मृगाङ्क इव राजसूः ।
अवाप यौवनं नारीचकोरीनेत्रपारणम् ॥ ८३ ॥
कन्यां **विनयवत्या**ह्वां, देहश्रीविजितश्रियम् ।
समये पितुरादेशादुपायंस्त महाबलः ॥ ८४ ॥
एकदा खेचरस्वामी सुधीः शतबलो नृपः ।
संसारासारतां चित्ते, चिन्तयामासिवानिति ॥ ८५ ॥
यौवनं विद्युदुल्लोलमायुः सन्ध्याभ्रविभ्रमम् ।
तरङ्गतरला लक्ष्म्यः, संगमाः स्वप्नसंनिभाः ॥ ८६ ॥
भोगा भुजङ्गभोगाभाः स्वान्तं पातकपातुकम् ।
तथापि मूढाः संसारे, रमन्ते सुखलिप्सया ॥ ८७ ॥
तदद्यैव कुमारेऽस्मिन् क्षोणीरक्षणदक्षणे ।
साम्राज्यभारमारोप्य, कुर्महे स्वसमीहितम् ॥ ८८ ॥
विचार्यैवं शतबलः, समाहूय महाबलम् ।
राज्ये निवेशयामास, महोत्सवपुरःसरम् ॥ ८९ ॥
महाबलमहीपालं, सामन्तामात्यपुंगवाः ।
समागत्य नमश्चक्रुर्नवोदितमृगाङ्कवत् ॥ ९० ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सुतं राज्येऽभिषिच्यैवं ततः शतबलो नृपः ।
गुरुपार्श्वेऽग्रहीद्दीक्षां विद्यामिव विशारदः ॥ ९१ ॥
राजर्षिर्दुःसहानेष, सहमानः परीषहान् ।
चारित्रं पालयित्वा च द्युसदां सद्म जग्मिवान् ॥ ९२ ॥
महाबलोऽपि भूपालः, पितृवत्पालयन् प्रजाम् ।
दुर्वारान् वारयामास, तमोऽरीन् भानुमानिव ॥ ९३ ॥
विललास प्रजापालः सोऽबलाभिरहर्निशम् ।
क्षीरोदनन्दन इव, तारिकाभिरनेकशः ॥ ९४ ॥
संगीतादिविनोदेषूद्यानादिक्रीडनेषु च ।
मदोन्मत्तकरीवार्यं, गमयामास वासरान् ॥ ९५ ॥
अन्यदामात्यसामन्तै, राज्यस्तम्भैरिवापरैः ।
समन्वितोऽवनीजानिः, सभामण्डपमासदत् ॥ ९६ ॥
तत्रामात्याः **स्वयंबुद्धसंभिन्नमति**नामकौ ।
**महामतिः शतमति**स्ते चत्वारोऽप्युपाविशन् ॥ ९७ ॥
सम्यग्दर्शनभाक् स्वामिभक्तिनीरधिचन्द्रमाः ।
स्वयंबुद्धमहामात्यश्चेतस्येवमचिन्तयत् ॥ ९८ ॥
मन्त्रिभावं धिगस्माकं, पश्यतामपि यत्प्रभुः ।
दुर्दान्तैरिन्द्रियैरश्वैरिवाधः परिपात्यते ॥ ९९ ॥
तद्विज्ञप्य नृपोऽस्माभिः, स्थापनीयो हिते पथि ।
भृत्यास्त एव हि श्लाध्याः, प्रभूणां ये हितैषिणः ॥ १०० ॥
रोचिष्यते न मे वाक्यं, यद्यप्यन्यानुजीविनाम् ।
तथापि स्वामिनः पथ्यं, कथयिष्यामि संप्रति ॥ १०१ ॥
विमृश्येति स्वयंबुद्धो महाबलमहीपतिम् ।
व्यजिज्ञपदिदं मूर्ध्नि संयोजितकराञ्जलिः ॥ १०२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पयोभिरिव पाथोधिरेधोभिरिव पावकः ।
प्रान्तातिविरसैर्भोगैः, स्वामिन्! जीवो न तृप्यति ॥ १०३॥
कूलच्छाया विषं सर्पाः, पारीन्द्रा दुर्जना अपि ।
संसेव्यमाना विषया, जायन्तेऽत्र विपत्तये ॥ १०४॥
तत्प्रसद्य कुलस्वामिन्! मोहनिद्रामपास्य च ।
व्यसनासेवनं हित्वा धियं धर्मे नियोजय ॥ १०५॥
चातुर्गतिकसंसारे धर्मेण रहिता नराः ।
बाध्यन्ते विविधैर्दुःखैस्तिलयन्त्रे तिला इव ॥ १०६॥
धर्मेणैव त्वया लेभे, नाथ! खेचरचक्रिता ।
अतस्तमेव सेवस्व, चिदानन्दपदाप्तये ॥ १०७॥
सुधामधुरमप्यस्य वचो मत्वा विषोपमम् ।
कौलाः संभिन्नमत्याद्याः, सचिवा अवदन्निति ॥ १०८॥
कौलाः-कुलीनाः ।
हे स्वयंबुद्ध! नः स्वामी, शिशुवद्विप्रतार्यते ।
मातृमोदकतुल्येनानेन धर्मेण किं त्वया ॥ १०९॥
अभावादेव धर्मस्य, फलं परभवश्रियः ।
ब्रुवाणास्त्वादृशाः कैः कैर्न हस्यन्ते जडैरिव ॥ ११०॥
तदाधारोऽपि नैवात्मा, प्रत्यक्षेण निरीक्ष्यते ।
अतः परभवभ्रान्तिं, भ्रान्तिं मन्यस्व तं विना ॥ १११॥
अतो नाथ! लल स्वैरं, पिब स्वपिहि भुङ्क्ष्व च ।
रहस्यमिति मत्वोज्झ, स्वयंबुद्धमते मतिम् ॥ ११२॥
इत्युक्त्वा विरतेष्वेषु, स्वयंबुद्धोऽब्रवीदिदम् ।
हहा नास्तिकलुण्टाकैर्लुण्ट्यतेऽनीश्वरं जगत् ॥ ११३॥
स्वसंवेदनसंवेद्ये, सिद्धिसौख्यादिहेतुभिः ।
फलभोक्तरि चाप्रोक्ते, मोहो वः कथमात्मनि ॥ ११४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

देहादात्मा पृथग्भूतः परलोकगमागमी ।
परलोकोऽपि धर्मादिजनितः सुखदुःखदः ॥ ११५॥
यदेको भवति स्वामी, किंकरास्तस्य चापरे ।
इति दृष्ट्वापि किं मूढैर्धर्मेऽधर्मे च मुह्यते ॥ ११६॥
तत्प्रभो! पापमित्राणाममीषां भाषितं त्यज ।
विहाय विरसान् भोगान्, धियं धर्मे निधेहि च ॥ ११७॥
पुनर्विज्ञपयाञ्चक्रे, स्वयंबुद्धो महाबलम् ।
शङ्कां कुरुष्व मा धर्मफले खेचरशेखर! ॥ ११८॥
तत्किं ते विस्मृतं स्वामिन्नावाभ्यां नन्दने वने ।
गताभ्यां क्रीडितुं दृष्टो, यदेको भासुरः सुरः ॥ ११९॥
सानन्दं स तदा देव! देवस्त्वामित्यभाषत ।
अहं विद्याधराधीशोऽतिबलस्ते पितामहः ॥ १२०॥
भोगिभ्य इव भीमेभ्यो, भोगेभ्यो बिभ्यता मया ।
विहाय तृणवद्राज्यं, रत्नत्रयमुपाददे ॥ १२१॥
सुदुस्तपं तपस्तप्त्वा, गृहीत्वा चानशनं ततः ।
शुभध्यानपरो मृत्वा, जज्ञेऽहं लान्तकेश्वरः ॥ १२२॥
तस्माद् वत्स! प्रमादस्य, सेवा कार्या न कर्हिचित् ।
इत्युदीर्य स देवेन्द्रो, जगाम त्रिदशालयम् ॥ १२३॥
तत्त्वं पैतामहं वाक्यं, स्मरान्यभवसाधकम् ।
न हि प्रत्यक्षसिद्धेऽर्थे, भ्रान्तिः संगतिमङ्गति ॥ १२४॥
भूपोऽप्याह महाभाग! साध्विदं स्मारितं वचः ।
परलोकमहं धर्माधर्मकारणमाद्रिये ॥ १२५॥
मिथ्यात्वकन्दकुद्दालः, संप्राप्यावसरं पुनः ।
स्वयंबुद्धोऽवनीजानिं, प्रत्यूचे सचिवाग्रणीः ॥ १२६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

महाबल! महीपाल! तव वंशे पुराजनि ।
**कुरुचन्द्रो** महीचन्द्रो वैरिवारणकेसरी ॥ १२७॥
कान्ता **कुरुमती** तस्य, शीलालङ्कारधारिणी ।
तयोश्च **हरिचन्द्रो**ऽभून्नन्दनो जननन्दनः ॥ १२८॥
स भूपोऽभून्महारम्भनिरतो नास्तिकाग्रणीः ।
सदैव मद्यमांसाशी, निष्कृपश्च कृतान्तवत् ॥ १२९॥
स पापीयानपि चिरं राज्यश्रियमपीपलत् ।
पुरार्जितानां पुण्यानां, फलमप्रतिपाति हि ॥ १३०॥
तस्य पापीयसः प्रान्तकाले धातुविपर्ययात् ।
व्यथा बभूवुरासन्नदुर्गतेर्वर्णिका इव ॥ १३१॥
तस्याग्निशकटीवाभूत्तूलिका दुःखदायिका ।
धत्तूररससंकासा, सरसा रसवत्यपि ॥ १३२॥
सुगन्धा अपि दुर्गन्धा, बभूवुर्यक्षकर्दमाः ।
कलत्रमित्रपुत्राद्या, दुर्जना इव जज्ञिरे ॥ १३३॥
कर्णक्लेशकराश्चासन्, गीतयः क्रोष्टुनादवत् ।
यतः पुण्यक्षये सर्वं, प्रयाति प्रतिकूलताम् ॥ १३४॥
भोगोपचारैरशुभैः, क्षणं तस्य सुखावहैः ।
प्रतिजागरणं चक्रे, हरिचन्द्रः प्रसूयुतः ॥ १३५॥
दाहवेदनयाक्रान्तो, रौद्रध्यानपरायणः ।
कुरुचन्द्रनृपो मृत्वा, जगाम नरकावनीम् ॥ १३६॥
तस्यान्तकृत्यं कृत्वाथ हरिचन्द्रस्तदङ्गजः ।
न्यायवानशिष्यद्राज्यं, सुरेन्द्र इव ताविषम् ॥ १३७॥
ताविषम्-स्वर्गम् ।
तादृक् पापफलं वीक्ष्य, पितृमृत्युं सुदारुणम् ।
पुरुषार्थेषु सर्वेषु, सारं धर्मममन्यत ॥ १३८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सोऽन्यदा बालसुहृदं, **सुबुद्धिं** श्राद्धमभ्यधात् ।
तत्त्वज्ञेभ्यस्त्वया धर्मः, श्रुत्वा कथ्यो ममाग्रतः ॥ १३९ ॥
अथोद्याने समुत्पन्नकेवलं देवसेवितम् ।
**शीलन्धर**मुनिं प्राह सुबुद्धिर्नृपतेः पुरः ॥ १४० ॥
इदमाकर्ण्य तद्वाक्यं, हर्षोत्फुल्लविलोचनः ।
नरेन्द्रस्तुरगारूढो, मुनीश्वरमुपाययौ ॥ १४१ ॥
नत्वोपविष्टे भूमीन्द्रे शीलन्धरमुनीश्वरः ।
विदधे कुमतध्वान्तचन्द्रिकां धर्मदेशनाम् ॥ १४२ ॥
व्याख्याप्रान्ते प्रजापालस्तमप्राक्षीत् कृताञ्जलिः ।
भगवन्! मत्पिता मृत्वा, कां गतिं गतवानयम् ॥ १४३ ॥
मुनिर्जगाद राजेन्द्र! क्रूरकर्मा पिता तव ।
सप्तमं नरकं प्राप स्थितिर्नान्यत्र पापिनाम् ॥ १४४ ॥
एतदाकर्ण्य भूपालो मुनीन्द्रं प्रणिपत्य च ।
संवेगरङ्गसंसङ्गी निजप्रासादमासदत् ॥ १४५ ॥
राज्यं दत्त्वाथ पुत्राय, नृपः सचिवमब्रवीत् ।
स्वीकरिष्ये व्रतं मद्वत्त्वं चाऽस्मिन् धर्ममादिश ॥ १४६ ॥
सोऽप्याह त्वामनु स्वामिन्नादास्ये व्रतमप्यहम् ।
मत्पुत्रस्त्वत्सुते पुण्यं, वक्ष्यतेऽहमिव त्वयि ॥ १४७ ॥
कर्मदावमहादावं, गृहीत्वा व्रतमार्हतम् ।
हरिचन्द्रः सुबुद्धिश्च, जग्मतुः परमं पदम् ॥ १४८ ॥
अन्यच्च युष्मद्वंशेऽभूद् **दण्डको** नाम भूपतिः ।
तत्पुत्रो **मणिमाली**ति, विख्यातः क्षितिमण्डले ॥ १४९ ॥
कलत्रपुत्रमित्रेषु, स्वर्णरत्नधनेषु च ।
प्राणेभ्योऽप्यतिभीष्टेषु, मूर्च्छावान् दण्डकोऽभवत् ॥ १५० ॥

Jain Education International　For Personal & Private Use Only　www.jainelibrary.org

आर्तध्यानपरो राजा, मृत्वा कोशालये निजे ।
दुर्गरोऽजगरो जज्ञे ही दुष्कर्मविजृम्भितम् ॥ १५१ ॥
तत्र कोशगृहे यो यः, प्रवेशं चकृवान् जनः ।
तं तं ददंश निःशूको, दन्दशूको निरन्तरम् ॥ १५२ ॥
तत्राविशन्तमन्येद्युर्विलोक्य **वनमालिनम्** ।
ममायं सूनुरित्यस्य जातिस्मृतिरजायत ॥ १५३ ॥
वनमाल्यपि तं नागं, निरीक्ष्य प्रेमनिर्भरम् ।
ध्रुवं कोऽप्येष मे बन्धुरिति चेतस्यचिन्तयत् ॥ १५४ ॥
सोऽपि तं ज्ञानिनः पार्श्वाद्विज्ञाय जनकं निजम् ।
तस्याहेः पुरतो जैनं, धर्मतत्त्वमुपादिशत् ॥ १५५ ॥
सोऽपि श्रुत्वार्हतं धर्मं, प्रपद्यानशनं मुदा ।
शुभध्यानेन मृत्वा च, स्वर्लोकश्रियमाप्तवान् ॥ १५६ ॥
पुत्रप्रेम्णा दिवोऽभ्येत्य स देवो वनमालिने ।
ददौ मुक्तामयं हारं, सोऽयं कण्ठे तव प्रभो! ॥ १५७ ॥
हरिचन्द्रस्य वंशे त्वं, सुबुद्धेश्चाहमन्वये ।
अतः क्रमागतादाप्तभावाद्धर्म्मे प्रवर्त्यसे ॥ १५८ ॥
यद्विज्ञप्तं मयेदानीं, त्वयि यौवनवत्यपि ।
तत्रैकाग्रमनाः स्वामिन्! समाकर्णय कारणम् ॥ १५९ ॥
देवाऽद्य नन्दनोद्याने, चारणश्रमणौ मम ।
मिलितौ शीलकलितौ, ज्ञानविज्ञातविष्टपौ ॥ १६० ॥
व्याख्यान्ते तौ मया पृष्टौ प्रमाणं भवदायुषः ।
मासमात्रं तदूचातेऽतस्त्वां धर्मे प्रवर्त्तये ॥ १६१ ॥
ततो महाबलः प्राह, स्वयंबुद्ध! हितोऽसि मे ।
यद्भोगनिद्रानिद्राणं, मामुज्जागरयस्यरम् ॥ १६२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

धर्मः कियान्मया साध्य, आयुष्यल्पतरेऽधुना ।
प्रवृत्ते समरे शक्याः, शिक्षितुं किं तुरङ्गमाः? ॥ १६३ ॥
सचिवोऽप्यूचिवानेवं देव! मा खेदमुद्वह ।
स्थिरीभव भवच्छेत्त्रीं, संयमश्रियमाश्रय ॥ १६४ ॥
जीवो दिवसमप्येकं, प्रव्रज्यां समुपागतः ।
मोक्षं यद्यपि नाप्नोति ध्रुवं वैमानिको भवेत् ॥ १६५ ॥
अङ्गीकृत्य वचस्तस्य, महाबलनृपः सुतम् ।
स्वपदे स्थापयामास विनेयमिव सूरिराट् ॥ १६६ ॥
स चैत्येऽष्टाह्निकां कृत्वा, दीनानुद्धृत्य वैभवैः ।
स्वजनान् क्षमयित्वा, च गुरोः पार्श्वेऽग्रहीद् व्रतम् ॥ १६७ ॥
व्रतानन्तरमेवासौ, सर्वाहारनिषेधनम् ।
द्वाविंशतिदिनान् कृत्वा, परीषहजिगीषया ॥ १६८ ॥
परमेष्ठिनमस्कारं, स्मरन् मृत्वा समाधिना ।
**ईशाने ललिताङ्गो**ऽभूद्विमाने **श्रीप्रभे** सुरः ॥ १६९ ॥ संदानतिकम् ॥
श्रुत्वा जयजयारावं, देवदेवीविनिर्मितम् ।
कोऽहं कुतः समायातः किमिदं का इमाः श्रियः? ॥ १७० ॥
इति दत्तोपयोगोऽयमवधिज्ञानतः सुरः ।
व्यतीताहमिवास्मार्षीत् पाश्चात्यभवमात्मनः ॥ १७१ ॥ युग्मम् ॥
सोऽहं विद्याधराधीशः, स्वयंबुद्धेन मन्त्रिणा ।
बोधितो जैनधर्मेऽस्मिन्, प्रव्रज्यां प्रतिपन्नवान् ॥ १७२ ॥
तस्याः प्रभावतो देवः शक्रसामानिकोऽभवम् ।
इति ज्ञात्वा स उत्थाय, सिंहासनमुपाविशत् ॥ १७३ ॥
ततोऽभिषिक्तः सोऽमर्त्यैर्वीजितश्चामरैर्वरैः ।
अगीयत च गन्धर्वैर्विधृतातपवारणः ॥ १७४ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तस्मादुत्थाय गत्वा च चैत्यं भक्तिनताङ्गकः ।
पुष्पाद्यैः पूजयाञ्चक्रे शाश्वतीप्रतिमाः सुरः ॥ १७५ ॥
वाद्यमानैर्महातोद्यैर्गीयमानैश्च गीतकैः ।
विधाय नाटकं स्तोत्रैः सोऽस्तवीज्जिनपुङ्गवान् ॥ १७६ ॥
ज्ञानरत्नार्णवानेष, वाचयामास पुस्तकान्* ।
अस्थीनि माणवस्तम्भस्थान्यानर्च तथार्हताम् ॥ १७७ ॥
छत्रेण धार्यमाणेन, त्रिदशैराभियोगिकैः ।
सलीलं ललिताङ्गोऽथ, स लीलानिलयं ययौ ॥ १७८ ॥
विलोचनाभ्यां पादाभ्यां हस्ताभ्यामाननेन च ।
सौन्दर्यसरिदन्तस्था, स्मेराम्बुजवनीव सा ॥ १७९ ॥
कुचाभ्यां कुम्भिकुम्भस्य, बिभ्रती विभ्रमश्रियम् ।
भुजाभ्यां नलिनीनालतुलनां कलयन्त्यलम् ॥ १८० ॥
कृशेनोदरमध्येन, स्पृशन्त्यणुगतां श्रियम् ।
गम्भीरां तन्वती नाभीं शृङ्गाररससरसीमिव ॥ १८१ ॥
स्मरक्रीडास्थानमिव, नितम्बफलकं पृथु ।
दधती कदलीस्तम्भनिभमूरुयुगं तथा ॥ १८२ ॥
तेजसा द्योतयन्ती द्यां, सर्वाङ्गीणविभूषणा ।
ददृशे ललिताङ्गेन पट्टराज्ञी **स्वयंप्रभा** ॥ १८३ ॥ पञ्चभिः कुलकम् ॥
तया सस्नेहया सार्धं, कृताभ्युत्थानयाऽमरः ।
पर्यङ्कावस्थितो रेजे, रोहिण्येव सुधाकरः ॥ १८४ ॥
स दिव्यैर्विविधैर्भोगैर्ललिताङ्गः स्वयंप्रभाम् ।
अरंस्त ध्वस्तविरहो, मराल इव पद्मिनीम् ॥ १८५ ॥
कियत्यपि गते काले, प्रदीपकलिकेव सा ।
स्वयंप्रभा ययावस्तं समं प्रियमनोरथैः ॥ १८६ ॥

---

* पुस्तकानीति संगतं भाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वज्राहत इव क्षिप्रं, मुमूर्च्छ ललिताङ्गकः ।
ततः सोऽवाप्तचैतन्यो व्यलपच्च पुनः पुनः ॥ १८७॥
हा प्रिये! क्व गतासि त्वं, मां मुक्त्वैकमनाथकम् ।
ब्रुवाण इति बभ्राम, स पश्यंस्तन्मयं जगत् ॥ १८८॥
अथ मन्त्री स्वयंबुद्धः स्वामिमृत्युवियोगतः ।
**सिद्धाचार्या**न्तिके दीक्षां जग्राहाऽभिग्रहाग्रही ॥ १८९॥
चारित्रं निरतीचारं पालयित्वा चिराय सः ।
ईशाने **दृढधर्मा**ऽभूच्छक्रसामानिकः सुरः ॥ १९०॥
स पूर्वभवसंबन्धात्सस्नेहो बन्धुवत्तदा ।
प्रबोधयितुमारेभे, ललिताङ्गं वियोगिनम् ॥ १९१॥
मा मुहस्त्वं महाभाग! वनितामात्रहेतवे ।
अवस्थामीदृशीं नैव, धीरा गच्छन्ति कर्हिचित् ॥ १९२॥
जगाद ललिताङ्गोऽपि सखे! किमिदमुच्यते ।
वरं प्राणात्ययोऽपि स्यान्न तु कान्तावियोगता ॥ १९३॥
सखे! ह्यसारे संसारे सारमेकेव वल्लभा ।
यया विना विषायन्ते, सकला अपि संपदः ॥ १९४॥
दृढधर्मापि तद्दुःखश्रवणादिव दुःखितः ।
ज्ञानेनावधिना दत्त्वोपयोगमिदमब्रवीत् ॥ १९५॥
महाभाग! विषादं मा कुरु सुस्थो भवाधुना ।
मयापि पश्यता विश्वं, लब्धासि तव वल्लभा ॥ १९६॥
विद्यते **धातकीखण्डे** **प्राग्विदेह**विभूषणम् ।
**नन्दि**ग्रामाभिधो ग्रामो, निधानमिव संपदाम् ॥ १९७॥
तत्रास्ते **नागिलो** नाम, दारिद्रमिव मूर्त्तिमत् ।
भार्या तस्यास्ति **नागश्री**श्चण्डिकेवातिभीषणा ॥ १९८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्रमात्सुषुविरे नागश्रिया षट्प्रमिताः सुताः ।
कुरूपा बहुभाषिण्यो ग्रामशूकरिका इव ॥ १९९ ॥
पुनस्तां गुर्विणीं दृष्ट्वा, नागिलो हृद्यचिन्तयत् ।
सवित्री चेदियं पुत्रीं, तदा देशान्तरं गमी ॥ २०० ॥
एवं चिन्तयतस्तस्य दयिता सुषुवे सुताम् ।
तच्छ्रुत्वा नागिलः शीघ्रमनश्यन्निष्कृपाशयः ॥ २०१ ॥
तस्या नामापि नाकार्षीन्नागश्रीरतिदुःखिता ।
ततो **निर्नामिके**त्याह्वा, लोकैरस्या विनिर्ममे ॥ २०२ ॥
अपालितापि सा मात्रा, वृद्धिमाप विधेर्वशात् ।
दौर्भाग्याच्चान्यगेहेषु, दुष्कर्माण्यकरोत्सदा ॥ २०३ ॥
सान्येद्युरुत्सवे जाते, धनिनां बालपाणिषु ।
मोदकान् मोदकान् वीक्ष्य, स्वां मातरमयाचत ॥ २०४ ॥
तां प्रत्युवाच सा कोपात्पापे! किमिदमब्रवीः ।
जाने पितापि ते नाश्नात् जातुचिन्मोदकैर्विना ॥ २०५ ॥
चेन्मोदकबुभुक्षुस्त्वं रज्जुं लात्वा प्रयाहि तत् ।
काष्ठभारकृते पापेऽ**म्बरग्रतिलके** गिरौ ॥ २०६ ॥
तद्वचो वज्रपाताभं, श्रुत्वा संतापतापिता ।
रज्जुमादाय पर्यश्रुस्तं भूधरमगादसौ ॥ २०७ ॥
तदास्याद्रेः शिरस्येकरात्रिकप्रतिमाजुषः ।
**युगन्धर**मुनेर्जज्ञे, केवलज्ञानमुज्ज्वलम् ॥ २०८ ॥
तन्निवासिसुरैर्भक्तिभरात्तस्य महात्मनः ।
केवलज्ञानमहिमोत्सवोऽत्यर्थं विनिर्ममे ॥ २०९ ॥
तत्समीपपुरग्रामनिवासी सकलो जनः ।
तं मुनीन्द्रं नमस्कर्तुं, समायातः प्रमोदतः ॥ २१० ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्रायान्तं जनं दृष्ट्वा, पृष्ट्वा चागमकारणम् ।
निर्नामिकापि तद्दुःखं त्यक्त्वा नन्तुं मुनिं ययौ ॥ २११ ॥
मुनिं नत्वोपविष्टा सा, भवसंवेगकारिणीम् ।
निशम्य देशनां तं द्राक् पप्रच्छ रचिताञ्जलिः ॥ २१२ ॥
स्वामिन्नस्मिन् भवे कोऽपि, मत्सदृक्षोऽस्ति दुःखितः ।
इतीरितो यतिः प्राह, किं ते कष्टं हि विद्यते ॥ २१३ ॥
भद्रे! शृणु महद् दुःखं छेदभेदसमुद्भवम् ।
सहन्ते नरकावन्यां जीवाः परमदारुणम् ॥ २१४ ॥
भारारोपणशीतोष्णक्षुत्पिपासादिसंभवाम् ।
तिर्यञ्चोऽपि परायत्ताः सहन्ते हन्त वेदनाम् ॥ २१५ ॥
वातपित्तकफश्लेष्मज्वरकुष्ठादिकैर्गदैः ।
निर्धनत्ववियोगैश्च पीड्यन्ते मानवा अपि ॥ २१६ ॥
इर्ष्याविषादविरहैः, पराभूताः सुरा अपि ।
वहन्ति सर्वदा दुःखं, ही कष्टा कर्मणां गतिः ॥ २१७ ॥
इति विज्ञाय संसारं, वत्से! दुःखनिबन्धनम् ।
सम्यक्त्वमूलं तद्धर्मं, द्वादशात्मानमाश्रय ॥ २१८ ॥
तथाहि-अर्हन् देवो गुरुः साधुस्तत्त्वं श्रीमज्जिनोदितम् ।
सम्यक्त्वमिति सेवस्व पञ्चलक्षणलक्षितम् ॥ २१९ ॥
त्यज हिंसामसत्यं च, चौरिकां मैथुनं तथा ।
परिग्रहातिरिक्तत्वं, दिग्प्रमाणमथाश्रय ॥ २२० ॥
उज्झ भोगातिरिक्तत्वं, तथानर्थाग्रदण्डकम् ।
भज सामायिकं सम्यक् तथा देशावकाशिकम् ॥ २२१ ॥
पौषधातिथिसत्कारौ कुरु सद्वासनापरा ।
यथा समीहितं सर्वं, फलेग्रहि भवेत्तव ॥ २२२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति सा देशनां श्रुत्वा, युगन्धरगुरोः पुरः ।
आदरादार्हतं धर्मं गृहस्थोचितमग्रहीत् ॥ २२३॥
भक्त्या यतिपतिं नत्वा, ततो धाम गता सती ।
दुष्कर्मक्षपणायैव, सा तेपे दुस्तपं तपः ॥ २२४॥
तारुण्येऽपि न तां कश्चित् समुपायंस्त दुर्भगाम् ।
सुपक्वमपि निम्बद्रुफलमश्नाति किं शुकः ? ॥ २२५॥
निजदौर्भाग्यनिर्विण्णा, तत्राद्रौ पुनरेयुषः ।
युगन्धरगुरोः पार्श्वे, सास्त्यात्तानशनाधुना ॥ २२६॥
तद् गत्वाद्भुतरूपं स्वं दर्शयास्या महामते!।
यथा संक्षुब्धचित्ता सा त्वामेव दयितीयति ॥ २२७॥
तच्चक्रे ललिताङ्गोऽपि, सापि तत्रानुरागिणी ।
कृत्वा निदानं मृत्वा च, तत्प्रियाभूत् स्वयंप्रभा ॥ २२८॥
ललिताङ्गस्तया साकं, रममाणः कियत्यपि ।
गते काले स चिह्नानि, च्यवनस्य निरैक्ष्यत ॥ २२९॥
कल्पद्रुकम्पो ह्रीनाशस्तेजोहानिर्मतिभ्रमः ।
वस्त्रोपरागो दीनत्वं चाङ्गभङ्गोऽतिरागता ॥ २३०॥
एवं चेष्टा विलोक्यासौ कान्दिशीक इव स्थितः ।
**दृढधर्मा**ख्यमित्रेण, समागत्येत्यभाष्यत ॥ २३१॥
**नन्दीश्वरा**दिषु जिनप्रतिमार्चाचिकीर्षया ।
यास्यतीशानकल्पेन्द्रस्त्वमप्यागच्छ तद्गिरा ॥ २३२॥
पुण्योदयादहो स्वामिशासनं समयोचितम् ।
ललिताङ्ग इति ध्यायन् दयितासहितोऽचलत् ॥ २३३॥
नन्दीश्वरादितीर्थेषु गत्वार्चित्वा जिनार्चिकाः ।
प्रपाल्य चायुः सोऽभावं निरेधोऽग्निरिवागमद् ॥ २३४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**जम्बूद्वीपे** **प्राग्विदेहे**, विजयः **पुष्कलावती** ।
तत्र **लोहार्गल**द्रङ्गे, **स्वर्णजङ्घ**महीपतेः ॥ २३५॥
**लक्ष्म्यां** पत्न्यां सुतो जातो ललिताङ्गस्ततश्च्युतः ।
पितृभ्यां **वज्रजङ्घे**ति नाम तस्य व्यधीयत ॥ २३६॥ युगलम् ॥
स्वयंप्रभापि जीवेशवियोगविवशाशया ।
धर्मकर्मपराच्योष्ट ललिताङ्गसुपर्ववत् ॥ २३७॥
तत्रैव विजये **पुण्डरीकिण्यां** पुरि चक्रिणः ।
**वज्रसेनस्य** जायायां, **गुणवत्यां** सुताभवत् ॥ २३८॥
तन्नाम पितरौ प्रीतौ **श्रीमती**ति प्रचक्रतुः ।
साप्यवर्धत सच्छाया, कल्पवल्लीव वर्णिनी ॥ २३९॥
एकदा **सर्वतोभद्रं** प्रासादमधिरुह्य सा ।
**मनोरमा**भिधोद्याने, **सुस्थितस्य** महामुनेः ॥ २४०॥
उत्पन्ने केवलज्ञाने, निरीक्ष्यागच्छतः सुरान् ।
पूर्वजन्म च संस्मृत्य, मूर्च्छिता पतिता भुवि ॥ २४१॥ युग्मम् ॥
चन्दनद्रुमसेकेन, वयस्याभिः कृतेन सा ।
चैतन्यमाप्य चोत्थाय, चेतस्येवमचिन्तयत् ॥ २४२॥
स मे प्रागृजन्मनो भर्ता, ललिताङ्गो दिवश्च्युतः ।
क्वास्तेऽवतीर्ण इत्येषा चिन्ता दुःखाकरोति माम् ॥ २४३॥
तेनैव साकमालापः, कार्यो नान्येन केनचित् ।
इति निश्चित्य राट्पुत्री, मौनव्रतमुपाददे ॥ २४४॥
मन्त्रौषधप्रयोगेण सखीभिः कारितेन सा ।
मूकत्वं नात्यजद् बालबालो बालग्रहं यथा ॥ २४५ ॥
बालबालः-जडबालः ।
हस्तभ्रूसंज्ञया वर्णांल्लिँखित्वा स्वप्रयोजनम् ।
बाला वयस्यावर्गाय निवेदयति सर्वदा ॥ २४६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्रीडोद्यानेऽन्यदायातां, श्रीमतीं विजने मुदा ।
धात्र्यूचे **पण्डिता**नाम्नी, वत्से! किं मौनवत्यसि ॥ २४७ ॥
सा प्राह तस्यै वृत्तान्तं, निजप्राग्भवसंभवम् ।
तं लिखित्वा पटे धात्र्यप्यगाद् दर्शयितुं बहिः ॥ २४८ ॥
अथ सा वज्रसेनस्य, वर्षग्रन्थिमहोत्सवे ।
समागतेभ्यो भूपेभ्यो दर्शयामास तं पटम् ॥ २४९ ॥
तत्र जैनागमाभिज्ञाः केचिन्नन्दीश्वरादिकम् ।
सिद्धान्तस्याविसंवादि, लिखितं वीक्ष्य तुष्टुवुः ॥ २५० ॥
बिम्बान्यवर्णयन् केऽपि, चित्ररेखास्तथापरे ।
केचिच्च व्याजमूर्च्छाला, भूपालाः स्वमहासयन् ॥ २५१ ॥
अथ लोहार्गलद्रङ्गाद्वज्रजङ्घः समेत्य तत् ।
पटचित्रं समीक्ष्यासौ, मूर्च्छां तत्क्षणतो गतः ॥ २५२ ॥
सिक्तश्चन्दनपानीयैर्वीजितो व्यजनैरपि ।
कुमारः प्राप्तचैतन्यः, स्वं पूर्वभवमस्मरत् ॥ २५३ ॥
पटचित्रमिदं दृष्ट्वा, मूर्च्छितोऽसि कुमार! किम् ।
इति पण्डितया प्रोक्तो, वज्रजङ्घो जगाविति ॥ २५४ ॥
भद्रे! मम सभार्यस्य चरित्रं पूर्वजन्मनः ।
पटे लिखितमस्तीह तेनाहं मूर्च्छितोऽभवम् ॥ २५५ ॥
देवलोकोऽयमीशानो विमानं श्रीप्रभं त्विदम् ।
ललिताङ्गः सुरश्चायं मत्प्रियेयं स्वयंप्रभा ॥ २५६ ॥
नन्दिग्रामे दुर्गतस्य पुत्री निर्नामिकेत्यसौ ।
भूधरेऽम्बरतिलके युगन्धरगुरोः पुरः ॥ २५७ ॥
गृहीतानशनास्त्येषा मां दृष्ट्वा चानुरागिणी ।
मृत्वा स्वयंप्रभा जज्ञे, ललिताङ्गस्य वल्लभा ॥ २५८ ॥ युग्मम् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जैनबिम्बार्चनासक्तोऽस्मिन् श्रीनन्दीश्वरेऽस्म्यहम् ।
तीर्थेष्वन्येषु गच्छंश्च च्यवमानोऽयमस्म्यहम् ॥ २५९ ॥
इह दीनानना चैका, च्यवमाना स्वयंप्रभा ।
मन्ये तयेदं सञ्ज्ञातजातिस्मृत्या ह्यलेख्यत ॥ २६० ॥
पण्डितापि वचस्तस्य सत्यं मत्वा चमत्कृता ।
श्रीमत्यग्रेऽवदत् सर्वं, तत् स्वरूपं यथोदितम् ॥ २६१ ॥
सापि धात्रीमुखेणेदं वृत्तं पित्रे व्यजिज्ञपत् ।
चक्री श्रीवज्रसेनोऽपि वज्रजङ्घमथाह्वयत् ॥ २६२ ॥
नृपः कुमारमाह स्म, श्रीमती मत्तनूद्भवा ।
पूर्वजन्मवदत्रापि, त्वत्प्रिया भवतादियम् ॥ २६३ ॥
तेनाप्यङ्गीकृते राजा श्रीमतीं पर्यणाययत् ।
सत्कृत्य प्रेषितश्चायं लोहार्गलपुरं गतः ॥ २६४ ॥
न्यस्य राज्ये वज्रजङ्घं, स्वर्णजङ्घो नरेश्वरः ।
दीक्षामादाय जैनेन्द्रीं, कृतकृत्योऽगमद् दिवम् ॥ २६५ ॥
चक्रभृद्वज्रसेनोऽपि, पुत्रे **पुष्कलपालके** ।
राज्यं न्यस्याग्रहीद् दीक्षां, जिनीभूय शिवं ययौ ॥ २६६ ॥
वज्रजङ्घमहीभर्तुः, श्रीमत्या कान्तया सह ।
भुञ्जानस्याद्भुतान् भोगांस्तनयः समजायत ॥ २६७ ॥
अथ पुष्कलपालस्य, सामन्ताः केऽपि शासनम् ।
नामन्यन्त मदोन्मत्ता वारणेन्द्रा इवाङ्कुशम् ॥ २६८ ॥
तेनाथाकारितस्तेषां, जयार्थं वज्रजङ्घराट् ।
श्रीमतीदयितायुक्तः प्राचालीत्प्रबलैर्बलैः ॥ २६९ ॥
सोऽर्द्धमार्गं गतोऽपश्यन्महाशरवणं वनम् ।
निश्यन्धकारयुक्तायामपि तेजोभ्रमप्रभम् ॥ २७० ॥

Jain Education International　　For Personal & Private Use Only　　www.jainelibrary.org

दृग्विषोऽस्त्यत्र भोगीति, पान्थलोकैर्निवेदिते ।
नयज्ञः सोऽन्यमार्गेणागात्पुरीं पुण्डरीकिणीम् ॥ २७१ ॥
राजा पुष्कलपालोऽपि वज्रजङ्घबलान्वितः ।
वशीचकार सीमालभूपालानखिलानपि ॥ २७२ ॥
राज्ञा पुष्कलपालेन, सत्कृतः श्रीमतीयुतः ।
वज्रजङ्घो नृपोऽचालील्लोहार्गलपुरं प्रति ॥ २७३ ॥
मुक्त्वा पार्श्वे शरवणं, गच्छन् व्यज्ञपि कैश्चन ।
मध्येकृत्य प्रजापाल! प्रयाहीदं हि सम्प्रति ॥ २७४ ॥
यदत्र केवलज्ञानं, जातं संयतयोर्द्वयोः ।
तेनामरागमोद्द्योतो, दृग्विषश्चाविषोऽजनि ॥ २७५ ॥
मुनी **सागरसेनश्च मुनिसेनश्च** सुव्रतौ ।
स्वामिन्नत्रैव विद्येते साक्षात्कल्पद्रुमाविव ॥ २७६ ॥
तौ च बन्धू नृपो ज्ञात्वा गत्वा नत्वा च सप्रियः ।
देशनां भववैराग्यकारिणीमशृणोन्मुदा ॥ २७७ ॥
व्याख्यान्ते तौ मुनी राजा, प्रतिलभ्याशनादिभिः ।
प्रमोदमेदुरस्वान्तश्चिन्तयामासिवानिति ॥ २७८ ॥
एतौ महामुनी धन्यावभूतां कृतकृत्यकौ ।
एकश्चाहमधन्योऽस्मि, यद् व्रतं नादृतं मया ॥ २७९ ॥
तद् गत्वा स्वपुरे पुत्रे, राज्यलक्ष्मीं निविश्य च ।
जनकाङ्गीकृतां दीक्षामाचरिष्यामि निश्चितम् ॥ २८० ॥
ततो राज्ञीयुते राज्ञि, लोहार्गलपुरं गते ।
तत्सुतो राज्यलुब्धः संस्तद्विघातमचिन्तयत् ॥ २८१ ॥
राज्यं वितीर्य पुत्राय ग्रहीष्यावो व्रतं प्रगे ।
इति निश्चित्य निश्चिन्तौ प्रसुप्तौ दम्पती निशि ॥ २८२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विषधूपप्रयोगेण, तदङ्गजकृतेन तौ ।
कीनाशातिथितां प्राप्तौ, नान्यथा भवितव्यता ॥ २८३ ॥
अ**थोत्तरकुरुष्वे**तावभूतां युग्मधर्मिणौ ।
पूर्णायुष्कौ च **सौधर्मे** जज्ञाते स्नेहलौ सुरौ ॥ २८४ ॥
जीवः श्रीवज्रसेनस्य भुक्त्वा भोगांस्ततश्च्युतः ।
**जम्बूद्वीपे विदेहेषु**, पुरे **क्षितिप्रतिष्ठिते** ॥ २८५ ॥
**सुविधे**र्वैद्यराजस्य, **जीवानन्दः** सुतोऽजनि ।
तदा तत्र पुरेऽन्येऽपि चत्वारः शिशवोऽभवन् ॥ २८६ ॥ युग्मम् ॥
तत्राद्योऽभव**दीशानचन्द्रा**वनिबिडौजसः ।
कान्तायां **कनकवत्यां** सुतो नाम्ना **महीधरः** ॥ २८७ ॥
द्वितीयोऽद्वैतमहिमा **सुनासीरस्य** मन्त्रिणः ।
**लक्ष्म्यां** पत्न्यां महाबुद्धिः, **सुबुद्धि**रिति नन्दनः ॥ २८८ ॥
श्रीमत्**सागरदत्तस्य,** सार्थवाहस्य योषिति ।
अभूदभयमत्यां श्री**पूर्णचन्द्रा**भिधः सुतः ॥ २८९ ॥
श्री**धन**श्रेष्ठिकान्तायां, **शीलमत्यां** तनूभवः ।
तुर्यः **शीलेन** नाम्ना च, ख्यातो जातो गुणाकरः ॥ २९० ॥
श्रीमत्या अपि जीवोऽत्र **पत्तने** स्वर्गतश्च्युतः ।
अभू**दीश्वरदत्तस्य,** श्रेष्ठिनः **केशवो**ऽङ्गभूः ॥ २९१ ॥
एते षडपि तारुण्यलक्ष्मीभाजः परस्परम् ।
कार्तिकेयमुखानीव, मित्रभावमशिश्रियन् ॥ २९२ ॥
ग्रहेष्विव निशाधीशस्तरुष्विव सुरद्रुमः ।
जीवानन्दोऽभवद्वैद्यविद्यावेदिषु पुङ्गवः ॥ २९३ ॥
भुञ्जाना रममाणाश्च, बान्धवा इव तेऽन्यदा ।
जीवानन्दगृहे तस्थुः, पार्थिवे षड्गुणा इव ॥ २९४ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इतश्च विहरन् **पृथ्वीपाल**क्ष्मापालनन्दनः ।
**गुणाकरा**भिधस्त्यक्तराज्यः प्रात्तव्रतो व्रती ॥ २९५ ॥
कुपथ्यभोजनोत्पन्नकृमिकुष्ठगलद्वपुः ।
जीवानन्दगृहे प्राप्तस्तैरदृश्यत सादरम् ॥ २९६ ॥ युग्मम् ॥
सहासं भूपतेः पुत्रो, जीवानन्दमदोऽवदत् ।
व्याध्यौषधपरिज्ञानमस्ति ते करुणा न तु ॥ २९७ ॥
सखेऽर्थलोभनिरतैर्नैव भाव्यं मनीषिभिः ।
धर्मार्थेऽपि क्वचित्कार्यं, चिकित्सितमकुत्सितैः ॥ २९८ ॥
जीवानन्दोऽप्युवाचैवं साधूक्तं नृपनन्दन! ।
चिकित्स्योऽयं मुनिः किन्त्वौषधाप्तिर्मे न विद्यते ॥ २९९ ॥
तत्रैकं लक्षपाकाख्यं तैलमस्ति ममालये ।
विद्यते न च गोशीर्षचन्दनं रत्नकम्बलः ॥ ३०० ॥
तके आनाययिष्याम, इत्युक्त्वा तत्क्षणाद्ययुः ।
ते पञ्चाप्यापणश्रेणिं, स्वाश्रयं मुनिरप्यगात् ॥ ३०१ ॥
मूल्यमादत्स्व नो यच्छ गोशीर्षरत्नकम्बलौ ।
इत्युक्तस्तैर्वणिग्वृद्धस्तौ ददत्सोऽब्रवीदिदम् ॥ ३०२ ॥
प्रत्येकमेतयोर्मूल्यमेकं दीनारलक्षकम् ।
किं वः प्रयोजनं ताभ्यामिति जल्पत पण्डिताः! ॥ ३०३ ॥
तेऽप्यूचुराभ्यां वस्तुभ्यां चिकित्स्योऽस्ति मुनीश्वरः ।
निशम्येति गिरस्तेषां वणिगेवमचिन्तयत् ॥ ३०४ ॥
तेऽमी धन्यतमा येषां यौवनेऽपीदृशी मतिः ।
अहं पुनर्वृथा वृद्धो यस्य पुण्ये मनोऽपि न ॥ ३०५ ॥
तद्वत्सा! गच्छतादाय गोशीर्षरत्नकम्बलौ ।
न चाहमनयोर्मूल्यं ग्रहीष्ये सुकृतं पुनः ॥ ३०६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तेभ्यो वस्तुद्वयं दत्त्वा, श्रेष्ठी संविग्नमानसः ।
प्रवव्राज च वव्राज मुक्तिकान्तानिकेतनम् ॥ ३०७॥
गृहीत्वौषधसामग्रीं जीवानन्दसमन्विताः ।
ते पञ्चापि मुनेः पार्श्वे चिकित्सार्थं [समागताः ॥३०८॥
वटवृक्षतले कायोत्सर्गसंस्थं मुनीश्वरम् ।
नत्वाहुस्तेऽनुजानीहि,] चिकित्सार्थं हि नः प्रभो! ॥ ३०९॥
ते गोकलेवरं पार्श्वे मुक्त्वा तैलेन रोगिणः ।
अङ्गप्रत्यङ्गकाभ्यङ्गं व्यधुर्विधिविशारदाः ॥ ३१०॥
उष्णवीर्येण तैलेन तापिताः कृमयो बहिः ।
मुनिदेहाद्विनिर्जग्मुर्बिलान्मर्कोटका इव ॥ ३११॥
ततो वैद्यसुतो न्यस्थान्मुनेरुपरि कम्बलम् ।
शीतत्वात्कृमयस्तत्र लग्ना यूका इवाम्बरे ॥ ३१२॥
स वैद्यः कम्बलं मन्दं झाटयन् गोकलेवरे ।
कृमीनपातयदहो सतां कोऽपि कृपोदयः ॥ ३१३॥
तापाक्रान्तं यतिं शीतैश्चन्दनैरमृतैरिव ।
विलिप्याश्वासयामास सविद्यो वैद्यनन्दनः ॥ ३१४॥
एवं त्रिर्विहिते तेन त्वग्मांसास्थिगतैर्बहिः ।
निर्गतैः कृमिभिः सर्वैर्मुनिर्नीरोगतां गतः ॥ ३१५॥
संरोहणौषधैः साधो रुरुचे रोचिषा तनौ ।
बोधिना च समित्रस्य जीवानन्दस्य दिद्युते ॥ ३१६॥
तैर्दक्षैः क्षमितः साधुरन्यत्र विजहार सः ।
ततस्तेऽपि तयोर्द्रव्येणार्हद्गृहमकारयन् ॥ ३१७॥
जिनार्चां रचयन्तस्तेऽन्यदा सद्गुरुसंनिधौ ।
धर्मं श्रुत्वा षडप्याशु मित्राण्याददिरे व्रतम् ॥ ३१८॥
पूर्वं संलेखनां कृत्वा, पश्चादनशनं च ते ।
*मृत्वा कल्पेऽच्युतेऽभूवन्निन्द्रसामानिकाः सुराः ॥ ३१९॥*

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भोगान् भुक्त्वा पूरयित्वायुर्द्वाविंशतिसागरान् ।
ततोऽच्यवन्त ते स्वर्गात्पत्राणीव महीरुहः ॥ ३२० ॥
**जम्बूद्वीपे विदेहेषु** पूर्वेषु द्युसदां गिरेः ।
विजये **पुष्कलावत्यां, पुण्डरीकिणिका**पुरि ॥ ३२१ ॥
**वज्रसेनस्य** भूभर्तु**र्धारिणी**दयितोदरे ।
क्रमेण जज्ञिरे पुत्राः पञ्च कल्पद्रुमा इव ॥ ३२२ ॥
तत्राद्यो वैद्यजीवोऽ**भूद्वज्रनाभो**ऽभिधानतः ।
चतुर्दशमहास्वप्नसूचितश्चक्रिलक्षणः ॥ ३२३ ॥
द्वितीयो राजपुत्रस्य जीवो **बाहु**रिति स्मृतः ।
तृतीयो मन्त्रिभूजीवः, **सुबाहु**रिति विश्रुतः ॥ ३२४ ॥
जीवौ **पीठमहापीठौ** श्रेष्ठिसार्थेशपुत्रयोः ।
**सुयशा** राजसूरासीत्केशवस्य च जीवकः ॥ ३२५ ॥
आबाल्यात् वज्रनाभस्य सुयशाः सेवकोऽजनि ।
तेषां षण्णामपि मिथः प्रेमाभूत् पूर्वजन्मवत् ॥ ३२६ ॥
साक्षीकृत्य कलाचार्यं गृहीतासु कलासु ते ।
क्रमेण मदनक्रीडावनं, यौवनमासदन् ॥ ३२७ ॥
अथागत्यान्तिके वज्रसेनो लोकान्तिकैः सुरैः ।
विज्ञप्तो भगवंस्तीर्थं, प्रवर्त्तय जगद्धितम् ॥ ३२८ ॥
वज्रिवज्रौजसं वज्रनाभं श्रीवज्रसेनराट् ।
राज्येऽभिषिच्य दानेन वार्षिकेणापुषज्जनान् ॥ ३२९ ॥
सुरासुरनराधीशैः कृतनिष्क्रमणोत्सवः ।
गत्वोद्याने स्वयंबुद्धः प्रभुर्दीक्षामुपाददे ॥ ३३० ॥
चतुर्ज्ञानधरः स्वामी विजहार वसुन्धराम् ।
वज्रनाभोऽपि बन्धुभ्यो विभज्य विषयानदात् ॥ ३३१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सुयशा राजपुत्रोऽपि, वज्रसेनमहीभृता ।
स्वरथे सारथिश्चक्रे वासवेनेव मातलिः ॥ ३३२॥
वज्रसेनप्रभोर्जज्ञे, केवलज्ञानमुज्ज्वलम् ।
चक्रं चायुधशालायां, वज्रनाभस्य भूपतेः ॥ ३३३॥
अपराण्यपि रत्नानि त्रयोदश विशांपतेः ।
निधयश्च नवाभूवन् पुण्यप्राप्या हि संपदः ॥ ३३४॥
तत्रान्येद्युः समायातं, वज्रसेनं जिनेश्वरम् ।
नन्तुं जगाम चक्रीन्द्रः सुयशोभ्रातृसंयुतः ॥ ३३५॥
स मुक्त्वा राज्यचिह्नानि, कृत्वा च त्रिः प्रदक्षिणाः ।
प्रभुं समवसरणे नत्वोपेन्द्रमुपाविशत् ॥ ३३६॥
राजा भगवतो वाणीं, भवसंवेगरङ्गिणीम् ।
निशम्य शाम्यनिस्नातश्चिन्तयामासिवानिति ॥ ३३७॥
अहो असारे संसारे, महाभूरुहदारुवत् ।
स्वकार्यनिरताः सर्वे, पुत्रमित्रादयो जनाः ॥ ३३८॥
तस्मादुदयमाप्तस्य, जिनेश्वरदिनेशितुः ।
पादानासाद्य सद्योऽहं, हन्मि संसृतिकृत्तमः ॥ ३३९॥
तातं व्यज्ञपयद्राजा, राज्यं दत्तं यथा पुरा ।
तथाधुनापि मे नाथ! यच्छ स्वां संयमश्रियम् ॥ ३४०॥
अनुज्ञातो जिनेनासौ राज्यं कृत्वा स्वपुत्रसात् ।
दीक्षामुपाददे चक्री चतुर्भिर्बन्धुभिः सह ॥ ३४१॥
सारथिः सुयशाः सोऽप्यनुस्वामि व्रतमग्रहीत् ।
वज्रनाभश्च पारीणो द्वादशाङ्ग्यम्बुधेरभूत् ॥ ३४२॥
एकादशाङ्गीपारीणाः शेषाः पञ्चापि जज्ञिरे ।
तपःप्रभावतश्चैषां बहुधा लब्धयोऽभवन् ॥ ३४३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ प्रभुर्वज्रनाभो विंशतिस्थानकान्यसौ ।
समासेवितुमारेभे, तीर्थकृन्नामकर्मणे ॥ ३४४॥
तत्रादौ सोऽर्हतोऽस्तावीत्तद्बिम्बानि च भक्तितः ।
सिद्धांश्च सिद्धस्थानस्थान्, यथार्थगुणकीर्तनात् ॥ ३४५॥
स श्रीसंघस्य वात्सल्यं चक्रे ग्लानादिभक्तिभिः ।
गुरूणामपि वस्त्रान्नपानभेषजदानतः ॥ ३४६॥
व्रतायुःश्रुतवृद्धानां साधूनां सेवनं व्यधात् ।
स्वतश्च बहुसिद्धान्तपाठिनां सोऽशठाशयः ॥ ३४७॥
विकृष्टतपसः साधूनार्चिचद्दानभक्तिभिः ।
स्वाध्यायं पञ्चधा चक्रे, द्वादशाङ्गे श्रुते च सः ॥ ३४८॥
लक्षणैः सप्तषष्ट्याढ्यं स सम्यक्त्वमपालयत् ।
रत्नत्रयोपचारैश्च चतुर्धा विनयं सुधीः ॥ ३४९॥
सामाचारीं दशविधामाराराध मुनीश्वरः ।
मूलोत्तरगुणांश्चैतानतीचारविवर्जितान् ॥ ३५०॥
*क्षणे लवे शुभध्यानैः, स्वं मनः समभावयत् ।*
निर्निदानैर्यथाशक्त्या, स तपश्चरणैस्तथा ॥ ३५१॥
संविभागं व्यधादेषोऽन्नादीनां सत्तपस्विषु ।
वैयावृत्यं च दशधाचार्योपाध्यायसाधुषु ॥ ३५२॥
समाधिं कृतवानेष संघस्यापायरक्षणात् ।
यत्नेनार्थस्य सूत्रस्यापूर्वस्याध्ययनानि च ॥ ३५३॥
विदधे श्रुतभक्तिं स श्रद्धानोद्भासनादिभिः ।
अष्टधा च निमित्ताद्यैः, शासनस्य प्रभावनाम् ॥ ३५४॥
विंशत्या स्थानकैरेवं, वज्रनाभमुनिप्रभुः ।
बबन्ध तीर्थकृन्नामकर्म निर्वाणकारणम् ॥ ३५५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वैयावृत्यस्य निर्माणादृषीणामनघात्मनाम्[१] ।
बाहुरप्यर्जयाञ्चक्रे, चक्रिश्रीसुभगं पदम् ॥ ३५६ ॥
विश्रामणां प्रकुर्वाणो व्रतिनां शमशालिनाम् ।
सुबाहुश्चार्जयामास, लोकोत्तरभुजाबलम् ॥ ३५७ ॥
अहो धन्याविमौ वैयावृत्यविश्रामणापरौ ।
मुनी बाहुसुबाह्वाह्वौ वज्रनाभोऽस्तवीदिति ॥ ३५८ ॥
श्रुत्वा तद्वर्णनां पीठमहापीठौ तपस्विनौ ।
चिन्तयामासतुः सत्यं, कार्यकृद्वर्ण्यते जनैः ॥ ३५९ ॥
आवां स्वाध्यायसंलीनावुपकारपराङ्मुखौ ।
कः श्लाघतेऽथवा लोके स्वार्थो हि **बलवत्तरः** ॥ ३६० ॥
तौ मायाक्लृप्ततपसावप्रतिक्रान्तपातकौ ।
कर्म स्त्रीत्वफलं पीठमहापीठौ बबन्धतुः ॥ ३६१ ॥
एते षडपि निस्त्रिंशधाराचङ्क्रमणोपमाम् ।
प्रपाल्य दीक्षामक्षीणां, पूर्वलक्षांश्चतुर्दश ॥ ३६२ ॥
द्विधा संलेखनापूर्वं पादपोपगमं श्रिताः ।
त्रयस्त्रिंशत्सागरायुः **सर्वार्थ**त्रिदिवं ययुः ॥ ३६३ ॥ युग्मम् ॥
अथापर**विदेहेषु** **श्रीजम्बू**द्वीपवर्त्तिषु ।
सर्वश्रीणां निवासोर्वी, नगर्य**स्त्यपराजिता** ॥ ३६४ ॥
तस्या**मीशानचन्द्रो**ऽभूद्राजा, द्रोहिद्रुमानलः ।
तस्य **चन्दनदासा**ख्यो, मित्रं श्रेष्ठिवरोऽजनि ॥ ३६५ ॥
तद्भूः **सागरचन्द्रो**ऽभूत् पुरीमुखविभूषणम् ।
सोऽन्यदेशानचन्द्रस्य सेवार्थं तत्सभां ययौ ॥ ३६६ ॥
ताम्बूलासनदानाद्यै राज्ञास्मिन् सत्कृते सति ।
कश्चिद्वैतालिकोऽभ्येत्य, पपाठ स्पष्टया गिरा ॥ ३६७ ॥

१. मनिन्द्यात्मनाम् । L. D.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सर्वाङ्गसुभगां पुष्पसौरभ्याकृष्टषट्पदाम् ।
भवदाराममायातां सेवस्वेश! मधुश्रियम् ॥ ३६८ ॥
द्वास्थमाह नृपः प्रातर्नागरैरखिलैरपि ।
उद्याने समुपेतव्यमेवमाघोषणां कुरु ॥ ३६९ ॥
एनमेवार्थमादिक्षच्छ्रेष्ठिपुत्रं नरेश्वरः ।
सोऽप्यागत्य गृहे**ऽशोकदत्त**मित्राय तं जगौ ॥ ३७० ॥
द्वितीयदिवसे राजा, सपौरः सपरिच्छदः ।
तदुद्यानमलंचक्रे श्रेष्ठिभूरपि मित्रभाक् ॥ ३७१ ॥
तदारामे वसन्तश्रीः कोकिलालिकुलारवैः ।
पप्रच्छेव प्रजापालं, स्वागतं रन्तुमागतम् ॥ ३७२ ॥
गीतैर्नृत्यैश्च वादित्रवादनैः कुसुमोच्चयैः ।
स्मराज्ञाविवशो लोको रन्तुं प्रववृते वने ॥ ३७३ ॥
अत्रान्तरे समीपस्थादेकस्मात्तरुगह्वरात् ।
पाहि पाहीति संत्रस्तपुरन्ध्रीध्वनिरुत्थितः ॥ ३७४ ॥
कर्णे प्रविष्टे नादेऽस्मिन् किमेतदिति सत्वरः ।
सागरः समधाविष्ट विष्टपोद्भासिविक्रमः ॥ ३७५ ॥
**पूर्णचन्द्रा**भिधश्रेष्ठितनयां **प्रियदर्शनाम्** ।
सोऽद्राक्षीद् बन्दिभी रुद्धां, वृकैर्व्रातमृगीमिव ॥ ३७६ ॥
एकस्य बन्दिनो हस्तमामोट्यादाय च क्षुरीम् ।
शेषानुत्त्रासयामास सागरो हरिवद् द्विपान् ॥ ३७७ ॥
एवं सागरचन्द्रेण मोचिता प्रियदर्शना ।
ससंभ्रमा जजल्पेदं कोऽयं मदुपकारकृत् ॥ ३७८ ॥
स्मररूपाधरीकर्ता, भर्त्तायं स्वीकरिष्यते ।
इति ध्यात्वा निजं धाम जगाम प्रियदर्शना ॥ ३७९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

योगीव परमात्मानं स स्मरन् प्रियदर्शनाम् ।
सागरोऽशोकदत्तेन सहितः स्वगृहं गतः ॥ ३८० ॥
तं सर्वमपि वृत्तान्तं श्रुत्वा पुत्रस्य चन्दनः ।
दध्यौ न वणिजामीदृक्, युज्यते विक्रमक्रमः ॥ ३८१ ॥
आकार्य पुत्रं श्रेष्ठ्यूचे वत्स! विज्ञोऽसि यद्यपि ।
तथापि ज्ञाप्यसे किंचिच्छिक्षादा गुरवो यतः ॥ ३८२ ॥
पौरुषं भवता चक्रे, यदुद्भटभटोचितम् ।
तद्वणिक्षु न शोभायै न्यस्तं रत्नं त्रपुष्विव ॥ ३८३ ॥
या तवाशोकदत्तस्य कुवयस्यस्य संगतिः ।
सानर्थाय यथा वह्निज्वाला काननशाखिनाम् ॥ ३८४ ॥
यदादिशति तातो मां, तत्कर्त्तव्यं तथैव हि ।
इत्युक्त्वा प्राञ्जलिः प्राह, पितरं प्रति सागरः ॥ ३८५ ॥
सुहृद्यशोकदत्तेऽस्मिन् , न दोषो दृश्यते क्वचित् ।
परं खलेन केनापि, तातागेऽसौ खलीकृतः ॥ ३८६ ॥
उतासौ भवताद्यादृक्, तादृक् किं मे विधास्यति ।
एकत्र स्थानवासेऽपि, हंसो हंसो बको बकः ॥ ३८७ ॥
ततः पिता सुतं प्राह बुद्धिमानसि यद्यपि ।
तथाप्यवहितो भूया दुर्ज्ञेया हि पराशयाः ॥ ३८८ ॥
स्वसूनोर्भाववेदी स तदर्थं प्रियदर्शनाम् ।
याचयित्वा पूर्णचन्द्रात्, पर्यणाययदङ्गजम् ॥ ३८९ ॥
मिथोऽभवत्तयोः प्रेम चन्द्रचन्द्रिकयोरिव ।
अविश्रम्भश्च न क्वापि गौरीशंकरयोरिव ॥ ३९० ॥
एकदा कार्यवशतः, सागरेन्दौ बहिर्गते ।
अशोकदत्तस्तद्गेहं गत्वोचे प्रियदर्शनाम् ॥ ३९१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यत्सागरो मन्त्रयते धनदत्तस्य भार्यया ।
तद् वेत्सि साह नाहं चेत्त्वं जानास्येव तत्सखा ॥ ३९२ ॥
स धूर्त्तः प्राह वेद्म्येव, किन्तु वक्तुं न शक्यते ।
स *ऋज्युवाच तत्किं भो, इत्युक्तः प्रोक्तवान् शठः ॥ ३९३ ॥
यथा स रज्यते तस्यां, तथाहं त्वयि वर्णिनि! ।
रहस्यमिति विज्ञाय, त्वं रमस्व मया समम् ॥ ३९४ ॥
कल्पान्तज्वलनज्वालाकरालं दधती मुखम् ।
सावोचत्तव जिह्वेति, वदतः स्फुटिता न किम् ॥ ३९५ ॥
सा तं निर्वासयामासाक्रुश्याक्रुश्य स्ववेश्मतः ।
ततो म्लानाननः सोऽपि, सागरस्यान्तिकं ययौ ॥ ३९६ ॥
तेनाभाणि सखे! किं त्वं, सोद्विग्न इव दृश्यसे ।
उच्छ्वासानुद्वहन् दीर्घान् सकष्ट इव सोऽप्यवक् ॥ ३९७ ॥
अद्य मित्रशिरोरत्न! भवतो भवने गतः ।
प्रियदर्शनया रुद्धो, राक्षस्येव रिरंसया ॥ ३९८ ॥
तद्रागजालादात्मानं, मोचयित्वा कथंचन ।
तिमिङ्गल इवोत्प्लुत्य, सागरं प्राप्तवानहम् ॥ ३९९ ॥
इदं मित्र! निजोद्वेगकारणं ते निवेदितम् ।
तच्छ्रुत्वा सागरोऽप्येवं, चिन्तयामास मानसे ॥ ४०० ॥
सुखेन ज्ञायते लोकैः, प्रमाणं वार्द्धिवारिणः ।
न तु स्त्रीणां चरित्राणि ज्ञायन्ते पण्डितैरपि ॥ ४०१ ॥
को दण्डः क्रियतेऽमुष्या, यतोऽवध्याः पुरन्ध्रयः ।
ध्यात्वेति सागरस्तस्यां, निःस्नेहः समजायत ॥ ४०२ ॥

---

* ऋज्वी+उवाच...ऋज्व्य्+उवाच...व्यो: १।३।२३ इतिसूत्रेण... मतान्तरे कश्चित् (विश्रान्तविद्याधरादिः) तु स्वरजयोरनादिस्थयोर्यकारवकारयोर्घोषवत्यवर्णादन्यतोऽपि लोपमिच्छति तन्मते एष प्रयोगः सिद्धः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मानयोर्विप्रयोगोऽस्तु मित्रयोर्मत्कृतो मिथः ।
सेति संचिन्त्य नो पत्येऽशोकस्योचे कुचेष्टितम् ॥ ४०३ ॥
जानन्नसारं संसारं, ससंवेगोऽथ सागरः ।
न्ययोजयन्निजामृद्धिं, दीनानाथान्धदुःखिषु ॥ ४०४ ॥
कियत्यपि गते काले सागरः प्रियदर्शना ।
अशोकश्चायुरापूर्य्य, कालधर्ममुपाययुः ॥ ४०५ ॥
अस्यैव **जम्बूद्वीपस्य, भरतार्धे**ऽत्र दक्षिणे ।
**गङ्गासिन्धु**महानद्योरन्तराले विशालके ॥ ४०६ ॥
अवशिष्टेऽष्टमे भागे तृतीयारस्य युग्मिनौ ।
अल्पपुण्ये समुत्पन्ने सागरप्रियदर्शने ॥ ४०७ ॥ युग्मम् ॥
पल्यदशमांशायुष्कौ धनुर्नवशतोन्नतौ ।
स्वर्णप्रियङ्गुवर्णाङ्गौ युग्मिनौ तौ विरेजतुः ॥ ४०८ ॥
तत्रैवाभूदशोकोऽपि, शुभ्रवर्णश्चतूरदः ।
गजः प्राग्जन्मविहितमाययेन्द्रकरीन्द्रवत् ॥ ४०९ ॥
अन्यदा भ्रमता तेन, कलभेन समं ततः ।
स युग्मधर्मा प्राग्जन्म मित्रं हर्षाददृश्यत ॥ ४१० ॥
तद्दर्शनेन संजातप्रीतिना तेन दन्तिना ।
स युग्मी स्कन्ध आरोपि सुरेभेनेव वासवः ॥ ४११ ॥
कुन्देन्दुसोदरच्छायमारूढोऽयं मतङ्गजम् ।
इतीव युग्मिनोऽस्याह्वां चक्रु**र्विमलवाहनम्** ॥ ४१२ ॥
जातिस्मृतिवशाज्ज्ञातनीतिः कुलकृदादिमः ।
सर्वेषां युग्मिनां मान्योऽभूदिन्द्र इव नाकिनाम् ॥ ४१३ ॥
अथाभवन् कालवशान्निष्प्रभावाः सुरद्रुमाः ।
विवदन्ते तदर्थं च ममामी इति युग्मिनः ॥ ४१४ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जातिस्मृत्या स नीतिज्ञो, युग्मी विमलवाहनः ।
तेभ्यो विवादच्छेदाय विभज्यादात्सुरद्रुमान् ॥ ४१५ ॥
परकल्पद्रुमस्यार्थे, यो यः सन्धां विमुक्तवान् ।
तद्दण्डनाय हाकारनीतिमेष प्रयुक्तवान् ॥ ४१६ ॥
विरूपं हा त्वयाकारीत्यस्य वाणीं निशम्यते ।
तथैव तस्थुरालेख्यलिखिता इव युग्मिनः ॥ ४१७ ॥
तस्यायुषोऽवशेषे च षण्मासप्रमिते सति ।
प्रियायां **चन्द्रयशसि** युग्मं समुदपद्यत ॥ ४१८ ॥
तौ स्त्रीपुंसावष्टधन्वशतोच्चौ श्यामलच्छवी ।
असंख्यातपूर्वायुष्कावाद्यसंस्थानसंस्थिती ॥ ४१९ ॥
**चक्षुष्मांश्चन्द्रकान्ते**ति जनकाभ्यां कृताभिधौ ।
पालितौ प्रापतुर्वृद्धिं, वयोबुद्धिगुणाविव ॥ ४२० ॥
मृत्वोत्पेदे सुपर्णेषु देवो विमलवाहनः ।
चन्द्रयशाश्च हस्ती च मृत्वा नागेषु जग्मतुः ॥ ४२१ ॥
चक्षुष्मतोऽपि हाकारनीतिं युगलधर्मिणः ।
सिन्धुवेलाजलानीव मर्यादां नातिचक्रमुः ॥ ४२२ ॥
संवृत्ते चरमे काले तयोर्युग्ममजायत ।
**यशस्वी** च **सुरूपा** च, तनयत्वेन तत्समम् ॥ ४२३ ॥
मनागूनायुषौ पित्रोः सप्तधन्वशतोच्छ्रयौ ।
बिभराञ्चक्रतुर्वृद्धिं तौ वल्लीपादपाविव ॥ ४२४ ॥
पूर्णायुष्क सुपर्णेषु चक्षुष्मानुदपद्यत ।
तदैव चन्द्रकान्तापि ययौ नागकुमारताम् ॥ ४२५ ॥
उल्लङ्घितायां हानीतौ यशस्वी स्थितिहेतवे ।
ततो हाकारमाकारनीतियुग्मं व्यधात्सुधीः ॥ ४२६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आयुषोऽन्ते तयोर्युग्मं, जज्ञे शुभ्रप्रियङ्गुभम् ।
**अभिचन्द्राभिधः** पुत्रः **प्रतिरूपा** च पुत्रिका ॥ ४२७॥
पित्रोरल्पायुषौ सार्धषट्कोदण्डशतोन्नतौ ।
मिथस्तौ यमुनागङ्गाश्रोतोवद्रेजतुर्युतौ ॥ ४२८॥
मृत्वा पूर्णायुरुदधिकुमारेषु यशस्व्यभूत् ।
सुरूपापि मृता नागकुमारेषूदपद्यत ॥ ४२९॥
पितृप्रयुक्तनीतिभ्यामभिचन्द्रः कुलेश्वरः ।
युग्मिनः पालयामास यस्माद् राज्ञामियं स्थितिः ॥ ४३०॥
आयुःप्रान्ते मिथुनकं, प्रासावि प्रतिरूपया ।
पित्रा **प्रसेनजिच्चक्षुष्कान्ते**त्याख्या कृता तयोः ॥ ४३१॥
पित्रोरूनायुषौ श्यामौ षट्कार्मुकशतोन्नतौ ।
तौ युग्मिनौ विरेजाते द्रुमवल्ली इवाभितः ॥ ४३२॥
मृत्वाभिचन्द्र उदधिकुमारेषु सुरोऽजनि ।
विपद्य प्रतिरूपापि प्राप नागकुमारताम् ॥ ४३३॥
नीतियुग्ममनन्वानान् युग्मिनो मत्तदन्तिवत् ।
धिक्कारनीतिसृणिना स सन्मार्गं समानयत् ॥ ४३४॥
चक्षुष्कान्ता प्रान्तकाले प्रासूत युगलं कलम् ।
**मरुदेवः** सुतः पुत्री **श्रीकान्ते**त्यभिधानतः ॥ ४३५॥
पञ्चाशदधिकपञ्चधनुःशतसमुन्नतौ ।
पितृतोऽल्पायुषौ स्वर्णश्यामवर्णौ बभूवतुः ॥ ४३६॥
मृत्वा द्वीपकुमारेषु त्रिदशोऽभूत्प्रसेनजित् ।
चक्षुष्कान्तापि नागेषु परासुत्वमुपेयुषी ॥ ४३७॥
नीतित्रयप्रयोगेण, पितृवद्युग्मधर्मिणः ।
सुचिरं पालयामास मरुदेवः कुलाधिपः ॥ ४३८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ श्रीकान्तया प्रान्ते सुषुवेऽपत्ययामलम् ।
**श्रीनाभिर्मरुदेवे**ति काममूर्त्तिविडम्बकम् ॥ ४३९ ॥
तौ पञ्चविंशत्यधिकपञ्चधन्वशतोन्नतौ ।
बिभ्राणावायुः संख्यातपूर्वकं पितृतोऽल्पकम् ॥ ४४० ॥
सुवर्णफलिनीवर्णसमाङ्गौ मिलितौ मिथः ।
मेरुनन्दनवृक्षालीतुलनां दधतुः कलाम् ॥ ४४१ ॥ युग्मम् ॥
मृत्वा द्वीपकुमारत्वं मरुदेवः समासदत् ।
तत्कालमेव श्रीकान्ता व्याप नागकुमारताम् ॥ ४४२ ॥
सप्तमोऽभूत्कुलकरो नाभिस्तदनुयुग्मिनः ।
निखिलानपि हि न्याय्ये, पथि प्रावर्त्तयन्मुदा ॥ ४४३ ॥
पूर्वाणां चतुरशीत्या सनवाशीतिपक्षया ।
न्यूनेऽतीतेऽवसर्पिण्या दुःषमासुषमारके ॥ ४४४ ॥
आषाढस्यादिमपक्षे चतुर्थीतिथिवासरे ।
उत्तराषाढनक्षत्रयोगयुक्ते निशाकरे ॥ ४४५ ॥
सागराणां त्रयस्त्रिंशदायुर्मानं प्रभुज्य सः ।
च्युतः श्रीवज्रनाभस्य जीवः सर्वार्थसिद्धतः ॥ ४४६ ॥
श्रीनाभिपत्न्याः स्वामिन्या मरुदेव्या वरोदरे ।
अवातरन्नभोदेशान्मराल इव मानसे ॥ ४४७ ॥ चतुर्भिः कलापकम् ॥
तदा गर्भावतीर्णेऽस्मिन्, स्वामिनि त्रिजगत्यपि ।
बभूव परमानन्द उद्द्योतश्च समंततः ॥ ४४८ ॥
तस्यामेव विभावर्यां वासवेश्मनि सुप्तया ।
चतुर्दश महास्वप्ना दृष्टा श्रीमरुदेवया ॥ ४४९ ॥
पूर्वं **वृषः** सितस्तुङ्गः कैलास इव जङ्गमः ।
श्वेतो **दन्ती** चतुर्दन्त ऐरावण इवापरः ॥ ४५० ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**मृगेन्द्रो** लोलपुच्छोऽक्षिद्युत्या द्यां द्योतयन्निव ।
**श्री**रक्षिमुखपाण्यंह्रिपद्मैः पद्ममयीव सा ॥ ४५१ ॥
धनुर्लतेव कामस्य **स्रक्** कल्पद्रुसुमान्विता ।
**पूर्णचन्द्रः** स्वबिम्बाभं मुखं द्रष्टुमिव प्रभोः ॥ ४५२ ॥
स्वामिप्रभाजितो **भास्वा**न्निषेवितुमिवागतः ।
किङ्किणीक्वणितैः **केतु**र्गुणान् गायन्निव प्रभोः ॥ ४५३ ॥
**पूर्णकुम्भो** जलैः पूर्णो मङ्गल्यं सूचयन्निव ।
पदौ पूजयितुमिव पद्मैः **पद्मसरः** प्रभोः ॥ ४५४ ॥
जिनं स्नपयितुमिवायातो **दुग्धाब्धि**रूर्मिभिः ।
**विमानं** स्वप्रभोः प्रीत्या, सेवां कर्तुमिवागतम् ॥ ४५५ ॥
**रत्नपुञ्जः** स्फुरत्कान्त्या स्वानर्घत्वं ब्रुवन्निव ।
तेजस्विषु च दीप्रो**ऽग्नि**र्मुख्यत्वं ख्यापयन्निव ॥ ४५६ ॥
एवं दृष्ट्वा महास्वप्नान्, प्रत्यूषसमये मुदा ।
स्वामिनी मरुदेवाशु बुबुधेऽम्बुजिनीव सा ॥ ४५७ ॥ नवभिः कुलकम् ॥
शयनीयात्समुत्थाय हर्षात्पत्यन्तिकं गता ।
सा स्वप्नान् कथयामास, यथास्थान्नाभिभूभुजे ॥ ४५८ ॥
सर्वोत्तमः कुलकरस्तनूजस्ते भविष्यति ।
इति नाभिर्महास्वप्नानृजुभावाद् व्यचारयत् ॥ ४५९ ॥
अत्रान्तरे सुराधीशाः प्रकम्पितनिजासनाः ।
दत्तोपयोगा विज्ञाततत्त्वास्तत्र समैयरुः ॥ ४६० ॥
ततस्ते विनयानम्रा, विहिताञ्जलिकुड्मलाः ।
देव्याः पुरस्तात्स्वप्नार्थं, कथयाञ्चक्रिरेतराम्* ॥ ४६१ ॥
देवि! स्वप्ने वृषालोकाद् भविता तनयस्तव ।
पापपङ्कमग्नपुण्यशताङ्गोद्धरणक्षमः ॥ ४६२ ॥

---

* परस्मैपदी अयं धातुस्तस्यात्मनेपदरूपं कथं स्यादिति चिन्तनीयम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कर्मद्रून्मूलनेऽलङ्कर्मीणः कलभदर्शनात् ।
सिंहावलोकनान्निर्भीर्नृसिंहोऽद्भुतविक्रमः ॥ ४६३ ॥
अभिषेकेक्षणात् क्षोणीपालमूर्धाभिषिक्तकः ।
मालावलोकनाद् विश्वमनुष्यैर्धार्यशासनः ॥ ४६४ ॥
अभिषेकेक्षणात्-अभिषेकसहितलक्ष्मीदर्शनात्, (अभिषेक+ई+ईक्षणात्)।
नेत्रानन्दकरो नृणां, निशाकरनिभालनात् ।
रवेरीक्षणतो मोहध्वान्तविध्वंसनक्षमः ॥ ४६५ ॥
ध्वजदर्शनतो धर्मध्वजादिप्रतिहार्यभूः ।
निध्यानात् पूर्णकुम्भस्य, जगन्मङ्गल्यदर्शनः ॥ ४६६ ॥
सरःप्रदर्शनाद् विश्वतापव्यापापहारकः ।
क्षीरनीरधिनिध्यानाद् गुणरत्ननिवासभूः ॥ ४६७ ॥
विमानदर्शनाद्वैमानिकदेवेन्द्रवन्दितः ।
रत्नपुञ्जेक्षणाद्रत्नत्रयधारिशिरोमणिः ॥ ४६८ ॥
निर्धूमाग्न्यवलोकाच्च कर्मेन्धनविनाशकृत् ।
सर्वस्वप्नेक्षणादेष मनुरज्जुजगत्पतिः ॥ ४६९ ॥ आदिकुलकम् ॥
मनुरज्जुजगत्पतिः-चतुर्दशरज्वात्मकविश्वाधिपः ।
इति स्वप्नफलं सम्यग् व्याख्याय त्रिदशाधिपाः ।
स्वामिनीं मरुदेवीं च नत्वा स्वःसदमासदन् ॥ ४७० ॥
मरुदेवापि शक्रेभ्यः श्रुत्वा स्वप्नभवं फलम् ।
मेघसिक्तमहीवाभूद् रोमाञ्चाङ्कुरदन्तुरा ॥ ४७१ ॥
स्वामिनी श्यामवर्णापि, तेन गर्भेण पाण्डुताम् ।
उवाह शालिश्रेणीव, फलयोगेन हारिणा ॥ ४७२ ॥
प्रभुप्रभावतो नाभिर्मान्योऽभूद्युग्मधर्मिणाम् ।
कल्पद्रवोऽप्यभीष्टार्थदातारो जज्ञिरे तदा ॥ ४७३ ॥
नवमासेष्वतीतेषु, दिनेष्वर्द्धाष्टमेषु च ।
चैत्रस्य बहुलाष्टम्यां यामिनीयामयामले ॥ ४७४ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उत्तराषाढगे चन्द्र, उच्चस्थेषु ग्रहेषु च ।
देव्यासावि सुतो युग्मधर्मी प्राच्येव भास्करः ॥ ४७५ ॥ युग्मम् ॥
असावि-प्रसूतः ।
तदानुकूलोऽवाद्वायुर्दिशो वैशद्यमासदन् ।
प्रजा मुमुदिरे नित्यदुःखिनोऽपि हि नारकाः ॥ ४७६ ॥
विभोर्विश्वचमत्कारिमाहात्म्यादिव दुन्दुभिः ।
भृत्यैरनाहतोऽप्युच्चैर्दध्वान गगनाङ्गणे ॥ ४७७ ॥
सूतिकालयपार्श्वेलारजो जहुः समीरणाः ।
चेलक्षेपं च गन्धाम्बु ववृषुर्वारिदा मुदा ॥ ४७८ ॥
अथाधोलोकवासिन्यो दिक्कुमार्योऽष्टसमिताः ।
प्रकम्पितासनाः सद्यः सूतिकालयमैयरुः ॥ ४७९ ॥
ता नत्वा स्वामिनीमाहुर्मातर्मा भीर्मुदं भज* ।
त्वत्पुत्रजन्ममहिमकृतेऽत्र वयमागताः ॥ ४८० ॥
इत्युक्त्वेशानकोणे ता स्तम्भैर्दशशतैर्युतम् ।
सूतिकासदनं चक्रुः स्वर्विमानमिवापरम् ॥ ४८१ ॥
देव्यः संवर्त्तवातेन परितः सूतिकागृहम् ।
आयोजनकण्टकाद्यमपाहार्षुः प्रहर्षुलाः ॥ ४८२ ॥
अष्टोर्ध्वलोकवासिन्योऽप्यागत्याशाकुमारिकाः ।
ववृषुस्तत्र गन्धाम्बु पञ्चवर्णसुमानि च ॥ ४८३ ॥
ततोऽष्टौ पूर्वरुचकवासिन्यो दिक्कुमारिकाः ।
तत्रैत्य दर्शयाञ्चक्रुर्दर्पणं त्रिजगद्गुरोः ॥ ४८४ ॥
दक्षिणाद्रुचकादष्टौ तत्रैयुर्दिक्कुमारिकाः ।
रत्ननिर्वृत्तभृङ्गारं, दधत्यः करसम्पुटे ॥ ४८५ ॥
पश्चिमाद्रुचकादष्टौ तत्रैयुर्दिक्कुमारिकाः ।
दधानास्तालवृन्तानि खचितानि मणीगणैः ॥ ४८६ ॥

* मा भीर्भज...मुदं भजेत्यन्वयः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उत्तराद्रुचकादष्टौ तत्रैत्याशाकुमारिकाः ।
चामरैर्वीजयामासुः प्रभुं चन्द्रप्रभानिभैः ॥ ४८७ ॥
विदिग्रुचकवासिन्यश्चतस्रो दिक्कुमारिकाः ।
नाभिनालं विभोश्छित्त्वा, प्राक्षिपन् विवरोदरे ॥ ४८८ ॥
तच्छिद्रं भासुरै रत्नैः पूरयामासुराशु ताः ।
वितेनुः पीठिकाबन्धं, तस्योपरि च दूर्वया ॥ ४८९ ॥
सूतिकागृहतोऽपाचीप्राच्युत्तरहरित्स्वमाः ।
त्रीन् रम्भानिलयांश्चक्रुश्चतुःशालोपशोभितान् ॥ ४९० ॥
तत्र याम्ये चतुःशाले रत्नसिंहासनोपरि ।
निवेशयाञ्चक्रिरे ताः सजिनां जिनमातरम् ॥ ४९१ ॥
लक्षपाकेण तैलेन, सुगन्धेनाभिषज्य तौ ।
उद्वर्त्तनेन दिव्येनोद्वर्त्तयामासुराशु ताः ॥ ४९२ ॥
ततः प्राच्यचतुःशाले, तौ नीत्वा जिनमातरौ ।
विनिवेश्यासने नीरैः, स्नपयाञ्चक्रिरेतराम् ॥ ४९३ ॥
गन्धकाषायिकावस्त्रैस्तास्तदङ्गममार्जयन् ।
चन्दनैर्वसनैश्चित्रैर्भूषणैश्च व्यभूषयन् ॥ ४९४ ॥
नीत्वोत्तरचतुःशाले, देव्यः सिंहासनोपरि ।
न्यवेशयन् जिनाधीशं, मरुदेवीं च हर्षतः ॥ ४९५ ॥
अथाभियोगिकैर्देवै**र्हिमवद्**भूधराल्लघोः ।
गोशीर्षचन्दनैधांस्यानाययामासुराशु ताः ॥ ४९६ ॥
अरणेर्दारुयुग्मेण समुत्पाद्येन्धनञ्जयम् ।
गोशीर्षचन्दनैर्होमं, व्यधुस्ता इन्धनीकृतैः ॥ ४९७ ॥
भस्मना तेन तेनुस्ता रक्षापोट्टलिकां प्रभोः ।
शैलायुश्च भवेत्युक्त्वास्फालयन् गोलकौ च तौ ॥ ४९८ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सूतिकासदने गत्वा, कृत्वा शय्यागतौ च तौ ।
गातुं लग्ना गुणानाशाकुमार्योऽर्हज्जिनाम्बयोः ॥ ४९९ ॥
एवमाशाकुमारीभिः सूतिकृत्ये कृते सति ।
**सौधर्मा**धिपतेः सिंहासनकम्पस्ततोऽभवत् ॥ ५०० ॥
तं दृष्ट्वा त्रिदशाधीशोऽवधिज्ञानप्रयोगतः ।
दक्षिणे भरते जन्म ज्ञातवानादिमप्रभोः ॥ ५०१ ॥
सिंहासनादथोत्थाय, संमुखं पदसप्तकम् ।
गत्वा शक्रस्तवेनेन्द्रस्तुष्टाव प्रथमप्रभुम् ॥ ५०२ ॥
ततः पदात्यनीकेन्द्रो **नैगमेषी**न्द्रशासनात् ।
सुरानाह्वयितुं घण्टां **सुघोषा**ख्यामवादयत् ॥ ५०३ ॥
तन्नादानुगता घण्टा द्वात्रिंशल्लक्षसंख्यकाः ।
स्वनिस्वनैः प्रसर्पद्भिर्देवानवहितान् व्यधुः ॥ ५०४ ॥
ततः पत्तिचमूस्वामी देवानेवमवोचत ।
भो भोः सुरान् सदारान् वः, समादिशति वासवः ॥ ५०५ ॥
जम्बूद्वीपस्य भरते, नाभेः कुलकृतो गृहे ।
आद्यतीर्थपतेर्जन्ममहोत्सवविधित्सया ॥ ५०६ ॥
सर्वैरपि समेतव्यमित्याज्ञां वासवस्य ते ।
निशम्य सपरीवारास्तदैव तमुपाययुः ॥ ५०७ ॥ युग्मम् ॥
अथ शक्रः समादिक्षत् **पालका**ख्याभियोगिकम् ।
विमानं **पालकं** लक्षयोजनप्रमितं कुरु ॥ ५०८ ॥
सोऽपि तस्याज्ञया रत्नमयं कृत्वा विमानकम् ।
उपढौकितवान् स्वामिशासनं को हि लङ्घते ॥ ५०९ ॥
सदारः सपरीवारस्तत्र सिंहासनस्थितः ।
कृतकृत्यमिवात्मानं मन्वानो मघवाचलत् ॥ ५१० ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स गोष्पदवदुल्लङ्घ्यासंख्यातद्वीपसागरान् ।
**नन्दीश्वर**राख्यद्वीपस्थे, दक्षिणे **रतिकृद्गिरौ** ॥ ५११॥
गत्वा विमानं संक्षिप्य श्रीयुगादिजिनेशितुः ।
प्रदक्षिणीचकार त्रिः सूतिकाया निकेतनम् ॥ ५१२॥ युग्मम् ॥
नत्वा जिनं जिनाम्बां च, दत्त्वावस्वापिनीं हरिः।
मातुः पार्श्वे प्रभोः प्रत्यष्ठापयत् प्रतिबिम्बकम् ॥ ५१३॥
निर्माय पञ्च रूपाणि शक्र एकेन च प्रभुम् ।
कराभ्यां स्थापयाञ्चक्रे छत्रमन्येन चाधृत ॥ ५१४॥
अन्याभ्यां धारयाञ्चक्रे चामरे चापरेण तु ।
दम्भोलिदण्डं बिभ्राणो वल्गन् सोऽस्थात् प्रभोः पुरः ॥५१५॥ युगलकम्॥
ततो जयजयारावमुखरीकृतदिग्मुखैः ।
त्रिदशैः सहितः शक्रः, प्राप **मेरु**महीधरम् ॥ ५१६॥
तदन्तः**पाण्डुकारा**मे **शिलातिपाण्डुकम्बला** ।
तत्र सिंहासने शक्रः, सार्हन् पूर्वमुखोऽस्थित ॥ ५१७॥
**अथासनप्रकम्पेनाच्युताद्या** हरयो नव ।
ज्ञात्वा जन्मोत्सवं भर्तुस्तत्रैयुः सपरिच्छदाः ॥ ५१८॥
ततो विंशतिसंख्याका, इन्द्रा **भवनवासिनाम्** ।
द्वात्रिंशद् **व्यन्तराणां चेन्द्वकौ** तत्रैव चाययुः ॥ ५१९॥
आदावच्युतनाकेन्द्रः स्नात्रं कर्तुं जगद्विभोः ।
किङ्करान् प्रेषयामास, जलाद्यानयनेच्छया ॥ ५२०॥
योजनास्या रत्नमयाः सौवर्णा रूप्यनिर्मिताः ।
रत्नस्वर्णमया रौप्यरात्नाः सौवर्णराजताः ॥ ५२१॥
सुवर्णरूप्यमाणिक्यमया भौमाश्च भासुराः ।
कुम्भाः प्रत्येकमष्टाग्रसहस्रं तैर्विचक्रिरे ॥ ५२२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्षुद्रहिमवदद्र्यादितीर्थनीरैः सुगन्धिभिः ।
भृत्वा कुम्भान् सपुष्पांस्तेऽच्युतेन्द्रायोपाढौकयन् ॥ ५२३ ॥
सोऽपि तान् स्वकरे कृत्वा, पुष्पाञ्जलिपुरस्सरम् ।
जिनेन्द्रं स्नपयामास, गीतनृत्यस्तवैः सह ॥ ५२४ ॥
एवं द्वाषष्टिसंख्याकैरपरैरपि वासवैः ।
निर्ममे स्वामिनो जन्मस्नात्रं मुदितमानसैः ॥ ५२५ ॥
अथ शक्रवदीशाननाकस्वामी जिनेश्वरम् ।
उत्सङ्गसङ्गिनं कृत्वा, सिंहासनमुपाविशत् ॥ ५२६ ॥
ततः सौधर्मकल्पेन्द्रो जगद्भर्तुश्चतुर्दिशम् ।
उत्तुङ्गशृङ्गान् वृषभान् स्फाटिकांश्चतुरोऽकृत ॥ ५२७ ॥
तच्छृङ्गमूलनिर्यद्भिर्वारिधाराकदम्बकैः ।
ऋषभस्वामिनं हर्षात् स्नपयामास वासवः ॥ ५२८ ॥
वृषभानथ संहृत्य वृत्रहा त्रिजगद्गुरोः ।
अङ्गं प्रमार्जयाञ्चक्रे गन्धकाषायिकांशुकैः ॥ ५२९ ॥
ततो रत्नमये पट्टे तन्दुलै रूप्यनिर्मितैः ।
स्वामिनः पुरतो लेखा अलिखन्नष्टमङ्गलीम् ॥ ५३० ॥
लेखाः-देवाः ।
अङ्गरागैर्विलिप्याथ जगन्नाथं पुरन्दरः ।
पूजयामास वासोभिः, स्वचेतोभिरिवामलैः ॥ ५३१ ॥
नानाविधैरलङ्कारैर्द्युतिद्योतितदिग्मुखैः ।
विभुं विभूषयामास वासवो वासनावशात् ॥ ५३२ ॥
देवप्रकीर्णकुसुमं त्रिरारात्रिकमुच्चकैः ।
वृत्रहोत्तारयाञ्चक्रे भक्तितो भुवनप्रभोः ॥ ५३३ ॥
काहलातालकंसालवेणुवीणामृदङ्गकान् ।
वादयन्तः सुरा नृत्यं, व्यधुर्गीतिपुरस्सरम् ॥ ५३४ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततः प्रभोः पुरो मूर्ध्नि योजिताञ्जलिकुड्मलः ।
वृन्दारकाधिराजस्तमस्तावीद्वास्तवैः स्तवैः ॥ ५३५ ॥
नमस्तुभ्यं जगन्नाथ! कारुण्यक्षीरसागर! ।
संसारमरुकल्पद्रो! शरणागतवत्सल! ॥ ५३६ ॥
अमुष्यामवसर्पिण्यामाद्यधर्माध्वदर्शक!।
युग्मधर्मतिरस्कारिन्! जय श्रीनाभिनन्दन! ॥ ५३७ ॥ युगलम् ॥
सपद्यैरमृताधारैर्गुणैस्तेऽर्हन्! महोज्ज्वलैः ।
प्रवाहैरिव गाङ्गेयैर्भुवनं पावनीकृतम् ॥ ५३८ ॥
मोहान्धकारविध्वंसदिनेश्वरसहोदर! ।
धन्यास्त एव ये देव! सेवन्ते त्वत्पदाम्बुजम् ॥ ५३९ ॥
दासदासोऽस्मि भृत्योऽस्मि, किंकरोऽस्मि तव प्रभो! ।
अतो मयि कृपापात्रे प्रसन्नां दृशमातनु ॥ ५४० ॥
इति स्तुत्वा जिनं शक्रः पूर्ववत् पञ्चरूपभृत् ।
स्वामियुग्देवतावृन्दैर्वृतो देव्या गृहं ययौ ॥ ५४१ ॥
वासवोऽर्हत्प्रतिच्छन्दमुपसंहृत्य वेगतः ।
मातुः श्रीमरुदेवायाः, समीपेऽस्थापयद्विभुम् ॥ ५४२ ॥
इन्द्रोऽवस्वापिनीं निद्रां, मरुदेव्या व्यपाहरत् ।
जिनोच्छीर्षे दुकूले द्वे, कुण्डले चामुचत् कले ॥ ५४३ ॥
प्रभोर्नेत्रविनोदाय स्वर्णप्राकारभासुरम् ।
श्रीदामगण्डमद्वैतं वितानेऽस्थापयद्धरिः ॥ ५४४ ॥
अथेन्द्रादेशतः श्रीदः, कोटीर्द्वात्रिंशतं द्रुतम् ।
सुवर्णरत्नरूप्याणामवर्षन्नाभिमन्दिरे ॥ ५४५ ॥
अर्हतोऽर्हज्जनन्याश्च, यः सुरोऽशुभचिन्तकः ।
तस्यार्जकमञ्जरीवच्छिरो भेत्तेत्यवग्घरिः ॥ ५४६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शक्रः संक्रमयाञ्चक्रे, स्वामिनोऽङ्गुष्ठकेऽमृतम् ।
अस्तन्यपायिनोऽर्हन्तस्तत्पिबन्ति क्षुधोदयात् ॥ ५४७॥
पञ्च देवाङ्गना धात्रीः, प्रभोः पालनहेतवे ।
अवस्थाप्य स्वयं शक्रो, द्वीपे नन्दीश्वरे ययौ ॥ ५४८॥
मेरुतोऽन्येऽपि देवेन्द्रास्तत्रागत्य वितेनिरे ।
अष्टाह्निकामहैः पूजां चैत्येषु शाश्वतार्हताम् ॥ ५४९॥
ततः सुरेन्द्राः सर्वेऽपि स्वं स्वं स्थानं मुदा ययुः ।
मरुदेवापि वृत्तान्तं, नैशं श्रीनाभये जगौ ॥ ५५०॥
उरुदेशे जगद्भर्तुर्वृषभं वीक्ष्य लाञ्छनम् ।
जनकाभ्यां **श्रीऋषभ** इति नाम विनिर्ममे ॥ ५५१॥
तदार्हत्सहजातायाः, कन्याया अपि हर्षतः ।
**सुमङ्गले**ति नामैतौ, पितरौ चक्रतुस्तराम् ॥ ५५२॥
क्षुधितोऽधयदङ्गुष्ठं, शक्रसंक्रमितामृतम् ।
इन्द्रादिष्टाप्सरोभिश्च, लाल्यमानोऽश्वयीद्विभुः ॥ ५५३॥
किञ्चिदूने गते वर्षे, वंशस्थापनहेतवे ।
इक्षुयष्टिकरः शक्रः, प्रभोरन्तिकमागमत् ॥ ५५४॥
नाभेरङ्कगतः स्वामी, ज्ञानेन त्रिदिवस्पतेः ।
ज्ञात्वा संकल्पमक्षेप्सीत्करमिक्षुलतां प्रति ॥ ५५५॥
यदिक्षुपक्षणं चक्रे, भगवांस्तेन वासवः ।
वंशस्येक्ष्वाकुरित्याख्यां, प्रभोः कृत्वा दिवं ययौ ॥ ५५६॥
इक्षुपक्षणम्-इक्षुग्रहणम् ।
विभोरङ्गं मलस्वेदरोगमुक्तं हिरण्यरुक् ।
मांसरक्ते सिताविस्रे, श्वासोऽम्भोरुहसौरभः ॥ ५५७॥
आहारनीहारविधी अदृश्यौ चर्मचक्षुषाम् ।
इत्येतेऽतिशया जाताश्चत्वारो जन्मना समम् ॥ ५५८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वर्गलोकात् समागत्य वृन्दारककुमारकाः ।
क्रीडाभिरतिरम्याभिः प्रभुमक्रीडयंस्तमाम् ॥ ५५९ ॥
सुराहृतोत्तरकुरुकल्पद्रुमफलावलीम् ।
स स्वाम्यास्वादयामास क्षीरं च क्षीरनीरधेः ॥ ५६० ॥
बाल्यावस्थामतिक्रम्य पूर्वाह्णं भानुमानिव ।
भगवान् यौवनं प्राप स्त्रीनेत्राम्भोजनन्दनम् ॥ ५६१ ॥
अन्यदैकस्य युग्मस्य, बालक्रीडां वितन्वतः ।
तालवृक्षात्पतित्वाधः फलेनामारि पूरुषः ॥ ५६२ ॥
तस्मिन्नल्पकषायत्वात् स्वर्गते युग्मिनी कनी ।
यूथभ्रष्टा मृगीवासौ तस्थौ तरलितेक्षणा ॥ ५६३ ॥
तां च तादृग्विधां वीक्ष्य पितृयुग्मं निजान्तिके ।
अस्थापयदमुष्याश्च **सुनन्दे**त्यभिधां व्यधात् ॥ ५६४ ॥
दिनैः कतिपयैस्तस्याः पितरौ पञ्चतां गतौ ।
किंकर्त्तव्यजडा सापि बभ्रामैकाकिनी वने ॥ ५६५ ॥
बालां बालेन्दुभालां तां भ्रमन्तीमेकिकां वने ।
विलोक्य युग्मिनो निन्युः श्रीनाभिनृपसंनिधौ ॥ ५६६ ॥
एषा ऋषभदेवस्य प्रेयसी भवतादिति ।
नाभिराजाङ्ग्यकार्षीत्तां शृङ्गाररससारणीम् ॥ ५६७ ॥
अथ ज्ञानेन विज्ञाय, विवाहसमयं विभोः ।
दिक्स्पतिर्दिवोऽभ्येत्य तं नत्वेति व्यजिज्ञपत् ॥ ५६८ ॥
यद्यपि त्वं प्रभो! भोगविमुखोऽसि तथापि हि ।
लोकानां व्यवहाराय कुरु पाणिग्रहोत्सवम् ॥ ५६९ ॥
सुमङ्गलां सुनन्दां च, कन्ये भुवनभूषणे ।
धर्मपत्नीयितुं नाथ! प्रस्तावस्तव वर्तते ॥ ५७० ॥
प्रभुः कर्मावधिज्ञानाज्ज्ञात्वा भोगफलं निजम् ।
त्र्यशीतिपूर्वलक्षाणि शक्रवाक्यममन्यत ॥ ५७१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततः प्रभोर्विवाहाय, मण्डपादिक्रियां हरिः ।
सुरैरकारयत्स्वामिकृत्ये भृत्या हि सोद्यमाः ॥ ५७२ ॥
वाद्यमानैर्महातोद्यैर्देवक्लृप्तैर्जयारवैः ।
अप्सरोभिर्नृत्यपूर्वं गीयमानैश्च मङ्गलैः ॥ ५७३ ॥
सुमङ्गलासुनन्दाभ्यां सह पाणिग्रहोत्सवम् ।
सुरेन्द्रः कारयाञ्चक्रे महदृध्या त्रिजगत्पतेः ॥ ५७४ ॥
एवं स्वामिकृतोद्वाहविधिः स्वर्गं ययौ हरिः ।
ततः प्रभृति लोकेषु, जाता वैवाहिकी स्थितिः ॥ ५७५ ॥
ताभ्यां समं प्रभोर्भोगान्, भुञ्जानस्य दिवानिशम् ।
किञ्चिन्न्यूनतमा षट्कपूर्वलक्षी व्यतीयुषी ॥ ५७६ ॥
अथ सर्वार्थतश्च्युत्वा, जीवौ श्रीबाहुपीठयोः ।
देवीसुमङ्गलाकुक्षौ, युग्मत्वेनावतेरतुः ॥ ५७७ ॥
तस्मादेव सुनन्दाया, अपि कुक्षौ तदा च्युतौ ।
श्रीसुबाहुमहापीठजीवौ ताववतेरतुः ॥ ५७८ ॥
ततः सुमङ्गलादेवी महास्वप्नांश्चतुर्दश ।
निरीक्ष्य मरुदेवीवद् वृषभाय न्यवेदयत् ॥ ५७९ ॥
ज्ञानवान् भगवानाह प्रिये! तव तनूभवः ।
षट्खण्डभरताधीशश्चक्रवर्ती भविष्यति ॥ ५८० ॥
श्रुत्वेति मुदिता पूर्णमासैर्यामद्वये निशः ।
सुषुवे **भरतब्राह्म्यौ** पुत्रपुत्र्यौ सुमङ्गला ॥ ५८१ ॥
**श्रीबाहुबलिसुन्दर्या**वपत्ये सुषुवे मुदा ।
सुनन्दा नन्दनोर्वीव, सुरद्रुसुरवीरुधौ ॥ ५८२ ॥
पुनः सुमङ्गलैकोनपञ्चाशत्प्रमितानि सा ।
महौजसां तनूजानां, युग्मानि सुषुवे क्रमात् ॥ ५८३ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रममाणैर्महौजस्कैरपत्यैः परिवारितः ।
रराज ऋषभस्वामी, तारकैरिव चन्द्रमाः ॥ ५८४ ॥
अथ कालस्य दोषेण, प्रणष्टं सुरभूरुहैः ।
युगलानामभूवंश्च कषायाः कलहादयः ॥ ५८५ ॥
नीतित्रयममन्वाना युग्मिनो नाभिनन्दनम् ।
एत्यासमञ्जसं जायमानं सर्वं व्यजिज्ञपन् ॥ ५८६ ॥
स्वाम्याह युज्यते राजा, यो युष्मान् स्थापयेत् पथि ।
तेऽप्यूचुस्त्वां विना नाथ! नान्यो योग्यो विलोक्यते ॥ ५८७ ॥
यद्येवं तर्हि याचध्वं, श्रीनाभेः स्वस्य भूपतिम् ।
इत्यादिष्टाः कुलकृतं, तेऽप्येवं हि व्यजिज्ञपन् ॥ ५८८ ॥
श्रीनाभिरपि तानूचे हंहो युगलधर्मिणः! ।
युष्माकमृषभो राजा, भवतु न्यायपारगः ॥ ५८९ ॥
नाभेरादेशमासाद्य, सानन्दा युग्मिनस्ततः ।
प्रभो राज्याभिषेकाय, जलाहृतिकृते गताः ॥ ५९० ॥
तदोत्पन्नासनाकम्पो, ज्ञानेनावधिना विभोः ।
राज्याभिषेकसमयं, ज्ञात्वा तत्राययौ हरिः ॥ ५९१ ॥
तीर्थोदकैः सुरानीतैर्जम्भारिर्वृषभप्रभोः ।
राज्याभिषेकमकरोत्सामन्ता इव चक्रिणः ॥ ५९२ ॥
जम्भारिः-शक्रः ।
किरीटाद्यैरलङ्कारैः, सर्वाङ्गं जगदीश्वरम् ।
भूषयित्वा पुरस्तस्थौ, प्रतीहार इव द्युपः ॥ ५९३ ॥
द्युपः-शक्रः ।
युग्मिनोऽपि गृहीत्वाम्भः, पद्मिनीपत्रसंपुटैः ।
समेत्यालङ्कृतं नाथं, विलोक्येति व्यचिन्तयन् ॥ ५९४ ॥
स्वामिनो दिव्यनेपथ्यभृतो मूर्ध्नि न युज्यते ।
जलं क्षेप्तुमतस्तत्ते चिक्षिपुः पदपद्मयोः ॥ ५९५ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अहो सुविनया लोकास्तद्विनीतां पुरीं प्रभोः ।
सम्यक्कारयितुं श्रीदमादिश्येन्द्रोऽगमद् दिवम् ॥ ५९६ ॥
विस्तारायामतः सोऽपि नवद्वादशयोजनीम् ।
**विनीतां** नगरीं चक्रे**ऽयोध्ये**त्यपरनामिकाम् ॥ ५९७ ॥
सप्राकारां महागेहां रम्यारामां सदीर्घिकाम् ।
धान्यरत्नहिरण्याढ्यां, तां कृत्वा धनदो ययौ ॥ ५९८ ॥ युग्मम् ॥
जन्मतः पूर्वलक्षाणां, गतायां विंशतौ तदा ।
तस्यां पुर्यामभूद्राजा, ऋषभो रक्षितुं प्रजाः ॥ ५९९ ॥
गजेन्द्रान् भद्रजातीयांस्तुरगान् वायुवेगिनः ।
रथान् महाप्रथान् पत्तीन्, विक्रमाक्रान्तभूतलान् ॥ ६०० ॥
रक्षादक्षांस्तथारक्षान् सामन्तान् दिग्जयोद्यतान् ।
संगृह्य नाभिभू राज्यं कृतवान् सुस्थिरं चिरम् ॥ ६०१ ॥ युग्मम् ॥
गोधूमशालिमुद्गाद्या, औषध्यस्तृणवत्स्वयम् ।
समुत्पेदुश्चखादुश्च, युग्मिनोऽथाविपक्विमाः ॥ ६०२ ॥
ताभिर्जातोदराबाधैस्तैरुक्तः स्वाम्यभाषत ।
ता वित्वच्य करैर्नीरैस्तिमित्वा चात्त सुस्थिताः ! ॥ ६०३ ॥
तैस्तत्तथा प्रकुर्वाणैरपि जाठरजां व्यथाम् ।
विज्ञप्तस्त्रिजगन्नाथः, पुनस्तानूचिवानिति ॥ ६०४ ॥
पूर्वोक्तयुक्तियुक्तास्ताः क्षिप्त्वा मुष्ट्यन्तरे ततः ।
कक्षामध्यमवस्थाप्य भक्षयन्तु यथारुचि ॥ ६०५ ॥
तथाप्यजीर्यदन्नेषु व्यथाशालिषु नृष्वथ ।
वने मिथो वंशघर्षात्कृशानुरुदपद्यत ॥ ६०६ ॥
रत्नभ्रमात् क्षिप्तहस्तास्तत्र दग्धा जडाशयाः ।
दैत्यः कोऽपि वने स्वामिन्नुत्पन्न इति ते जगुः ॥ ६०७ ॥
प्रभुः प्राहाग्निरुत्तस्थावरुक्षास्निग्धकालतः ।
तद् गत्वामुष्य मध्येऽन्नं, क्षिप्त्वा पक्त्वा च खादत ॥ ६०८ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ऋजवस्ते तथा चक्रुर्दग्धान्यन्नानि चाग्निना ।
समेत्य कथयाञ्चक्रुरेवं प्रभुपुरः पुनः ॥ ६०९ ॥
विभोऽस्मभ्यमयं किञ्चिन्न दत्तेऽग्निर्बुभुक्षितः ।
उदरम्भरिवत् सर्वमपि क्षिप्तं प्रभक्षति ॥ ६१० ॥
तदा गजाधिरूढः सन्, विभुस्तेभ्योऽथ मृत्तिकाम् ।
आनाय्य करिणः कुम्भे हत्वा भाण्डमसूत्रयत् ॥ ६११ ॥
नाथस्तानाह पात्राणि, कृत्वान्यान्यपि पावके ।
निवेश्य पचतान्नानि ततो भक्षत सुस्थिताः! ॥ ६१२ ॥
तथैव ते विदधिरे स्वाम्याज्ञां सरलाशयाः।
तदादि च विभुः कुम्भकाराणां शिल्पमादिमम् ॥ ६१३ ॥
तक्षायस्कारविज्ञानं द्वितीयं वेश्मनां कृते ।
तार्तीयं चित्रकृच्छिल्पं, जगद्विस्मयहेतवे ॥ ६१४ ॥
तुर्यं कुविन्दशिल्पं च जनाच्छादनकर्म्मणा ।
पञ्चमं नापितं शिल्पं, कचाद्यर्त्तिच्छिदेऽकरोत् ॥ ६१५ ॥ कुलकम् ॥
एवं विंशतिभेदं तत्प्रत्येकं शिल्पपञ्चकम् ।
शतसंख्यामगायिष्ट, कृष्याद्यन्यदपि स्फुटम् ॥ ६१६ ॥
भरतं पाठयामास, द्वासप्ततिकलाः प्रभुः ।
लक्षणं बाहुबलिनं, गजाश्वस्त्रीविशां पुनः ॥ ६१७ ॥
ब्राह्मीमष्टादश लिपीः पाणिना दक्षिणेन सः ।
लेखयामास वामेन गणितं सुन्दरीमपि ॥ ६१८ ॥
व्यापारानखिलानीशः स सावद्यान् विदन्नपि ।
लोकानुकम्पयाऽदिक्षन्महान्तो ह्युपकारिणः ॥ ६१९ ॥
स्वाम्युग्रभोजराजन्यक्षत्रभेदैश्चतुर्विधान् ।
वंशान् प्रकटयामास चतुर्धा नीतिवर्त्म च ॥ ६२० ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

त्रिषष्टिपूर्वलक्षेषु, व्यतिक्रान्तेषु राज्यतः ।
प्रभुर्जनानुरोधेन, मधावुद्यानमासदत् ॥ ६२१ ॥
माकन्दमञ्जरीस्वादमधुरैर्मधुपारवैः ।
मधुश्रीः कुशलोदन्तपृच्छिकेवाभवद्विभोः ॥ ६२२ ॥
कोकिला पञ्चमारावैर्वल्लीपल्लवहस्तकैः ।
मलयानिलशैलूषः प्रवृत्त इव नर्त्तितुम् ॥ ६२३ ॥
शैलूषः-नटः ।
रणन्मञ्जीरचरणप्रहारेण मृगेक्षणाः ।
अशोकं ताडयाञ्चक्रुः कृतागसमिव प्रियम् ॥ ६२४ ॥
पुष्पाग्रस्थालिसंरावव्याजतो वादयन्निव ।
स्मरस्य विश्वविजयकाहलां पाटलांह्रिपः ॥ ६२५ ॥
परमध्यानमग्नानां, मुनीनामपि मानसात् ।
धृतेः फुल्लसुमामोदैश्चम्पको लुम्पकोऽजनि ॥ ६२६ ॥
अस्मासु विश्वजैत्रासु, किं स्मरस्य शरैरिमैः ।
पौष्पैरितीव कोपात्तान्यवाचिन्वन् मृगीदृशः ॥ ६२७ ॥
प्रतिप्रतीकं पुष्पाणां, भूषया कामिनो बभुः ।
जयभङ्गभयाद् बाणैरनङ्गेनाहता इव ॥ ६२८ ॥
प्रतिप्रतीकम्=प्रत्येकावयम् ।
विडम्बितेन्द्रकोदण्डां, पञ्चवर्णसुमस्रजम् ।
संदृभ्य कश्चनाप्युच्चैस्तोषयामास वल्लभाम् ॥ ६२९ ॥
प्रियया प्रेषितं कोऽपि, पाणिभ्यां पुष्पकन्दुकम् ।
प्रतीयेष मुदा स्वामिप्रसादमिव सेवकः ॥ ६३० ॥
एवं सलीलं खेलत्सु सत्सु लोकेषु नाभिभूः ।
इति दध्यौ किमीदृक्षा क्रीडान्यत्रापि विद्यते ॥ ६३१ ॥

Jain Education International　　For Personal & Private Use Only　　www.jainelibrary.org

अथ ज्ञानेन विज्ञातानुभूतसुरभूसुखः ।
स्वाम्येतत्क्रीडनं तुच्छमिव मत्वेत्यचिन्तयत् ॥ ६३२ ॥
अपारे भवकान्तारे, सन्मार्गस्खलिता जनाः ।
हहा भ्रमन्त्यमी मूढमतयः पथिका इव ॥ ६३३ ॥
अमी रागद्वेषमोहाः स्ववशीकृत्य देहिनम् ।
अकृत्यसागरे दूरं पातयन्ति हहा कथम् ॥ ६३४ ॥
कषाययामिका यावज्जाग्रतीह समीपगाः ।
तावत्संसारकारायाः कुतो मोक्षो भवेन्नृणाम् ॥ ६३५ ॥
एवं विरक्तचित्तोऽभूद्यावन्नाभिनृपाङ्गभूः ।
तावल्लोकान्तिका देवा, भगवन्तमुपागताः ॥ ६३६ ॥
कृत्वा पद्मदलाकारं ते मूर्ध्नि करसंपुटम् ।
मरुदेवासुतस्यांह्री विनत्यैवं व्यजिज्ञपन् ॥ ६३७ ॥
यथा नाथ! त्वया लोकव्यवहारः प्रकाशितः ।
तथा प्रवर्त्तयेदानीं धर्मतीर्थं जगद्धितम् ॥ ६३८ ॥
इति विज्ञप्तिकां कृत्वा ब्रह्मलोगमगुः सुराः ।
नाथोऽपि तस्मिन्नुद्याने, तां निशामत्यवाहयत् ॥ ६३९ ॥
ततः प्रातर्गृहे गत्वा, सामन्तान्निखिलानपि ।
भरतादींस्तनूजांश्च, शतमाजूहवद्विभुः ॥ ६४० ॥
राज्यमादत्स्व नो वत्स! बभाषे भरतं प्रभुः ।
संप्रति व्रतसाम्राज्यं, स्वीकरिष्यामहे वयम् ॥ ६४१ ॥
श्रुत्वेति स्वामिनो *वाक्यं स्थित्वाधोवदनः क्षणम् ।*
भरतो भूतलन्यस्तमस्तकस्तातमब्रवीत् ॥ ६४२ ॥
एकैव तात! ते सेवा राज्यकोटिसमा मम ।
भवतादन्वहं तूर्णं, पूर्णं राज्यश्रियानया ॥ ६४३ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रभुरप्याह हे वत्स! यद्यादेशकरोऽसि मे ।
तदा मुदा मया दत्तां, परिपालय मेदिनीम् ॥ ६४४॥
पितुराज्ञामनुल्लङ्घ्यां विज्ञाय वृषभाङ्गभूः ।
पुष्पमालामिव शिरःशेखरीकृतवानिमाम् ॥ ६४५॥
ततः प्रणम्य पादाब्जं, तातस्य भरतेश्वरः ।
पित्र्यं सिंहासनमलञ्चक्रे शक्र इवापरः ॥ ६४६॥
सामन्तमन्त्र्यनीकेन्द्रैः प्रभोरिव सुरेश्वरैः ।
चक्रेऽभिषेकमहिमा भरतस्य तदा मुदा ॥ ६४७॥
सद्वृत्तेनातपत्रेण, चामराभ्यां विभूषणैः ।
वासोभिश्च रराजासौ, राजा श्रीभरतेश्वरः ॥ ६४८॥
बाहुबल्यादिपुत्रेभ्योऽपरेभ्योऽपि च नाभिभूः ।
ददौ विभज्य विषयान्महेच्छा हि समाशयाः ॥ ६४९॥
दातुमारब्धवान् दानं वार्षिकं वृषभप्रभुः ।
कल्पवृक्ष इव स्वेच्छानुरूपफलदं नृणाम् ॥ ६५०॥
यो यद्यद् याचते तत्तत्तस्य पूरयते प्रभुः ।
चतुष्पथादिस्थानेषूद्घोषणामित्यकारयत् ॥ ६५१॥
चिरत्नेभ्यो निरीशेभ्यो निधिभ्यो धनदो धनम् ।
आदाय वासवादेशाद्विभोर्गेहमपूपुरत् ॥ ६५२॥
स्वामिना दीयते हेम्नः कोटिरेका दिने दिने ।
अष्टलक्षयुता प्रातराशं दिनकरोदयात् ॥ ६५३॥
वर्षेकेण सुवर्णस्य नाथः कोटीशतत्रयम् ।
अष्टाशीतिं च कोटीनां लक्षाशीतिं च दत्तवान् ॥ ६५४॥
अथ वार्षिकदानान्ते सुरेन्द्राः कम्पितासनाः ।
भर्तुर्दीक्षामहं कर्तुमयोध्यायां समागमन् ॥ ६५५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

राज्याभिषेकवद् दीक्षाभिषेकमहिमा विभोः ।
शातकौम्भैः पयस्कुम्भैरकारि सुरनायकैः ॥ ६५६ ॥
स्वामी विमुच्य मां मुक्तिकान्तामङ्गीकरिष्यति ।
इतीवाश्रवमुचद्राज्यश्रीः केशाम्बुकणच्छलात् ॥ ६५७ ॥
दिव्यांशुकैरलङ्कारैश्चालङ्कृत्य जगद्विभुम् ।
**सुदर्शना**ह्वां शिबिकां, वृत्रशत्रुरसूत्रयत् ॥ ६५८ ॥
दत्तहस्तः सुरेन्द्रेण शिबिकामारुरोह सः ।
तां चादौ मनुजाः पश्चादमरा उदपाटयन् ॥ ६५९ ॥
देववादिततूर्यादिनिनादैर्द्यौरपूर्यत ।
नृणां जयजयारावैर्युवतीनां च गीतिभिः ॥ ६६० ॥
व्रताय पथि गच्छन्तं, लाजैः पुष्पैश्च काश्चन ।
काश्चनापि दृगम्भोजैर्जगन्नाथमपूपुजन् ॥ ६६१ ॥
लाजैः-अक्षतैः ।
चिरं जीव चिरं नन्द, चिरं पालय संयमम् ।
इत्याशीर्वचनैर्नाथमभ्यनन्दन् कुलाङ्गनाः ॥ ६६२ ॥
मात्रा प्रियाभ्यां पुत्रैश्च, बाष्पाविलविलोचनैः ।
इन्द्रैश्चानुगतः स्वामी, **सिद्धार्थो**द्यानमासदत् ॥ ६६३ ॥
उत्तीर्य शिबिकारत्नाद्, भवादिव जगद्विभुः ।
**अशोका**नोकुहस्याधोऽमुचद् भूषणवाससी ॥ ६६४ ॥
देवराजार्पितं देवदूष्यमंसे निवेश्य सः ।
चैत्रस्य बहुलाष्टम्यां दिनभागे च पश्चिमे ॥ ६६५ ॥
नक्षत्रमुत्तराषाढामाश्रिते मृगलाञ्छने ।
चतुर्भिर्मुष्टिभिर्मूर्ध्न उच्चखान कचान् प्रभुः ॥ ६६६ ॥ युग्मम् ॥
तान् प्रतीच्छन् शचीनाथः कुन्तलान् वसनाञ्चले ।
शेषान् पञ्चममुष्ट्या च जिघृक्षुं तं व्यजिज्ञपत् ॥ ६६७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वामिंस्तेऽंसयुगे स्वर्णवर्णे श्यामलकुन्तलाः ।
मेरुशृङ्गस्थदूर्वालीलीलामाकलयन्त्यलम् ॥ ६६८॥
तत्प्रसद्य जगन्नाथ! स्थापयैतान् यथास्थितान् ।
तथैव तद्वचः सोऽपि चक्रे प्रार्थकवत्सलः ॥ ६६९॥
शक्रेण तेषु क्षीराब्धौ क्षिप्तेष्वथ जगद्विभुः ।
कृतषष्ठतपाः क्लृप्तसर्वसिद्धनमस्कृतिः ॥ ६७०॥
सावद्ययोगं प्रत्याख्याम्यहं सर्वमिति ब्रुवन् ।
समक्षं सर्वलोकानां स्वीचक्रे चरणश्रियम् ॥ ६७१॥ युग्मम् ॥
दीक्षाकल्याणके जाते जन्तुजातसुखावहे ।
**श्रीमनःपर्यव**ज्ञानं, बभूव भुवनप्रभोः ॥ ६७२॥
स्वैः स्वैर्वर्ग्यैर्वार्यमाणा अपि **कच्छा**दयो नृपाः ।
दीक्षां सहस्राश्चत्वारः स्वीचक्रुः स्वामिना समम् ॥ ६७३॥
नत्वा नुत्वा च नाभेयमिन्द्राः स्वां स्वां दिवं ययुः ।
कथंचिद् भरतबाहुबल्याद्याश्च निजं गृहम् ॥ ६७४॥
जिनः कच्छमहाकच्छैः कलभैरिव हस्तिराट् ।
अनुयाततमो मौनी विजहार वसुन्धराम् ॥ ६७५॥
भिक्षां प्राप न स क्वापि पारणस्यापि वासरे ।
तदैकान्तर्जवो लोका भिक्षां दातुं न जानते ॥ ६७६॥
कुञ्जरान् वाजिराजांश्च कन्या वस्त्राणि सन्मणीः ।
उपदीचक्रिरे लोकास्तानि नादत्त च प्रभुः ॥ ६७७॥
अलाभेनापि भिक्षाया, अदीने भ्रमति प्रभौ ।
यताः कच्छमहाकच्छादय एवमचिन्तयन् ॥ ६७८॥
क्वायं क्षुदजितः स्वामी क्व वयं धान्यकीटकाः ।
पिपासाविजयी क्वायं, क्व वयं वारिदर्दुराः ॥ ६७९॥
क्वायं शीतातपाजेयः क्व पुनस्तज्जिता वयम् ।
क्वैषोऽन्तरारिविजयी क्व वा तत्तर्जिता वयम् ॥ ६८०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

न ब्रूतेऽस्मान्न च/प्रेमपरयापि दृशेक्षते ।
उपेक्षते प्रभुस्तत्किं कुर्मो ही क्षुद्बुभुक्षिताः ॥ ६८१ ॥
किं वा श्रयामो भरतमुज्झित्वा व्रतमादृतम् ।
नैवं हि युज्यते तस्य दर्शयामः कथं मुखम् ॥ ६८२ ॥
एवमालोच्य सर्वेऽपि कच्छाद्या जाह्नवीतटे ।
वनं भेजुरभूवंश्च, तापसास्ते फलाशिनः ॥ ६८३ ॥
अथ कच्छमहाकच्छसुतौ स्वामिनिदेशतः ।
कार्यान्तरं गतौ तस्याप्यायातौ तत्र कानने ॥ ६८४ ॥
निजौ **नमिविनम्याख्यौ** पितरौ स्मैक्ष्य पृच्छतः ।
अवस्था युवयोः केयमित्युक्तावूचतुश्च तौ ॥ ६८५ ॥
वत्सौ! शृणुतमस्माकं प्रभुः श्रीनाभिनन्दनः ।
भरतादितनूजानां राज्यं दत्त्वाग्रहीद् व्रतम् ॥ ६८६ ॥
अस्माभिरप्यनुस्वामि, गृहीत्वा दुष्करं व्रतम् ।
तत्पालनाक्षमैर्गङ्गावने वासो व्यधीयत ॥ ६८७ ॥
श्रुत्वेति नमिविनमी प्रस्थितौ राज्यलिप्सया ।
कायोत्सर्गस्थितं नाथं, नत्वा तावेवमूचतुः ॥ ६८८ ॥
भरतादिस्वपुत्रेभ्यो, विभज्य प्रददे मही ।
त्वया यथा तथा नाथ! दीयतामावयोरपि ॥ ६८९ ॥
विज्ञप्तोऽपि विभुर्मौनी यद्यप्यावां न भाषते ।
तथापि खड्गपाणिभ्यामावाभ्यां सेव्य एव सः ॥ ६९० ॥
अहर्निशं जिनेशस्य सेवां कुर्वाणयोस्तयोः ।
धरणेन्द्रोऽन्यदा नाभितनयं नन्तुमागतः ॥ ६९१ ॥
सेवमानौ विभुं याचमानौ राज्यश्रियं च तौ ।
विलोक्य पन्नगस्वामी साश्चर्यमिदमभ्यधात् ॥ ६९२ ॥
निःसंगो निर्ममः स्वामी, कुतो राज्यं प्रयच्छति ।
अतस्तदर्थिनौ यातां, भवन्तौ भरतेश्वरम् ॥ ६९३ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तौ चाहतुस्तं वारुण्यां, यद्युदेति दिनेश्वरः ।
तथापि वृषभं मुक्त्वा, नान्यं सेवामहे प्रभुम् ॥ ६९४॥
भरतादिमहीपालाः, पालयन्तु सुखं प्रजाः ।
किं तैर्यदेष स्वामी नौ दत्ते तेन प्रयोजनम् ॥ ६९५॥
तदुक्तिमुदितोऽहीन्द्रोऽप्यवोचत्तौ यथा युवाम् ।
प्रभोर्भृत्यौ तथैवाहमपि पातालपालकः ॥ ६९६॥
उपास्त्यामुष्य नाथस्य, किं किं न प्राप्यते जनैः ।
अतः सेवाफलं विद्याधरत्वं वितरामि वाम् ॥ ६९७॥
एवमानन्द्य **गौर्या**द्या विद्याः सोऽदान्मुदा तयोः ।
पाठसिद्धा अष्टचत्वारिंशद्दशशतैर्मिताः ॥ ६९८॥
आदिशच्च युवां गत्वा, **वैताढ्य**श्रेणियामले ।
पुराणि स्थापयित्वाशु, भुञ्जाथां राज्यसंपदम् ॥ ६९९॥
प्रभुं प्रणम्य कृत्वा च, विमानं **पुष्पका**भिधम् ।
भुजगस्वामिना साकं, तावारुह्य प्रचेलतुः ॥ ७००॥
एतत्स्वरूपं जल्पित्वा, पित्रोः श्रीभरतस्य च ।
स्वकुटुम्बं गृहीत्वा तौ, श्रीवैताढ्यगिरिं गतौ ॥ ७०१॥
तेन तद्दक्षिणश्रेण्यां पञ्चाशत्पुरशेखरे ।
**श्रीरथनूपुरचक्रवाले** राजा नमिः कृतः ॥ ७०२॥
उत्तरस्यां तु तच्छ्रेण्यां, षष्टिपत्तनमुख्यके ।
विदधे विनमी राजा पुरे **गगनवल्लभे** ॥ ७०३॥
एवं राज्यं तयोर्दत्त्वा, व्यवस्थां प्रविधाय च ।
न्यायमार्गं दर्शयित्वा, धरणेन्द्रस्तिरोदधे ॥ ७०४॥
शाश्वतप्रतिमावृन्दं मूर्त्तिं च वृषभप्रभोः ।
पूजयन्तौ सुखं राज्यं चक्राते तौ सुरेन्द्रवत् ॥ ७०५॥
अथार्यानार्यदेशेषु मौनेन विहरन् प्रभुः ।
संवत्सरं निराहारश्चिन्तयामास चेतसि ॥ ७०६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आहारमन्तरेणाङ्गं न निर्वाहं क्वचिद् व्रजेत् ।
अतोऽनागारिभिर्दोषमुक्तं ग्राह्यं सदाशनम् ॥ ७०७॥
यद्याहारमहं नैव ग्रहीष्याम्यधुना तदा ।
भाविनो मुनयः कच्छादिवत् त्यक्ष्यन्ति संयमम् ॥ ७०८॥
विचार्येति हृदि स्वामी, भिक्षादानोद्यतस्ततः ।
पुरं **गजपुरं** प्राप **कुरु**देशविभूषणम् ॥ ७०९॥
अत्र बाहुबलेः पौत्रः, **सोमप्रभ**नृपाङ्गभूः ।
नाम्ना कुमारः **श्रेयांस**स्तदैवं स्वप्नमैक्षत ॥ ७१०॥
समन्ताच्छ्यामलच्छायं हिरण्यधरणीधरम् ।
पयस्कुम्भैः क्षालयित्वाधिकं दीपितवानहम् ॥ ७११॥
**सुबुद्धि**श्रेष्ठिनादर्शि, गोसहस्त्रं रवेश्च्युतम् ।
श्रेयांसेनाहितं तस्मिंस्तस्मादर्कोऽधिकद्युतिः ॥ ७१२॥
राज्ञा सोमप्रभेणापि, दृष्ट एको महाभटः ।
श्रीश्रेयांसस्य साहाय्याज्जयमापारिवेष्टितः ॥ ७१३॥
ते त्रयोऽपि सभामेत्य मिथः स्वप्नानवीवदन् ।
तेषां चार्थमजानाना जग्मुर्वेश्म निजं निजम् ॥ ७१४॥
अथ भिक्षाकृते स्वामी, प्रविशन् हस्तिनापुरम् ।
निरीक्ष्य नागरैश्चक्रे, सोपदैस्तुमुलो ध्वनिः ॥ ७१५॥
कोऽयं कोलाहल इति द्वास्थं श्रेयांस ऊचिवान् ।
सोऽपि ज्ञात्वाब्रवीन्नाभितनयागमकारणम् ॥ ७१६॥
हर्षोत्फुल्लेक्षणः सोऽपि श्रेयांसो जिनपुङ्गवम् ।
आयान्तं वीक्ष्य वेगेन गत्वानंसीत् पदातिवत् ॥ ७१७॥
स ऊर्ध्वीभूय नाभेयमुखाम्भोजं विलोकयन् ।
ईदृग्दृष्टो मया क्वापीत्यस्मरत्पूर्वजन्मनः ॥ ७१८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ज्ञातवांश्चेति यत्पूर्वविदेहे चक्र्यभूदयम् ।
वज्रनाभाभिधोऽस्याहं सुयशाः सारथिः पुनः ॥ ७१९ ॥
स्वपितुर्वज्रसेनस्यार्हतः पार्श्वं उपात्तवान् ।
वज्रनाभः परिव्रज्यां तत्पृष्ठेऽहमपि द्रुतम् ॥ ७२० ॥
ततो विपद्य सर्वार्थे भुक्त्वा च त्रैदशं सुखम् ।
जीवः श्रीवज्रनाभस्याभून्मेऽसौ प्रपितामहः ॥ ७२१ ॥
अनुग्रहीतुं मामेष मद्गृहं समुपाययौ ।
ध्यायतोऽस्येति कोऽपीक्षुरसकुम्भानढौकयत् ॥ ७२२ ॥
स तु पूर्वभवाभ्यासात्कल्प्याकल्प्यविधिं विदन् ।
तातोपादीयतामिक्षुरस इत्यवदद्विभुम् ॥ ७२३ ॥
कल्प्यं विदित्वा नाथोऽपि पाणिपात्रमधारयत् ।
तत्र सोऽपीक्षुनिर्यासं घटानुत्पाट्य चाक्षिपत् ॥ ७२४ ॥
इक्षुनिर्यासम् - इक्षुरसम् ।
प्रभोः पाणौ प्रसर्पन्तीक्षुरसश्रेणिरुच्चकैः ।
श्रेयांसाऽगण्यपुण्यस्य स्पर्धयेवाभ्यवर्धत ॥ ७२५ ॥
तेन पारणकं कुर्वन्नादिमं नाभिनन्दनः ।
त्रैलोक्यजनतानन्दकन्दं समुदलासयत् ॥ ७२६ ॥
तदा जगत्कृतानन्दा नेदुर्दुन्दुभयो दिवि ।
रत्नप्रसूनगन्धाम्बुवृष्टयश्चाभवद् भुवि ॥ ७२७ ॥
चेलोत्क्षेपः कृतोऽमर्त्यैः प्रभुपारणकक्षणे ।
इति पञ्चापि दिव्यानि, जज्ञिरे पौत्रमन्दिरे ॥ ७२८ ॥
वैशाखस्य तृतीयस्यां, शुक्लायां दानमक्षयम् ।
बभूवातो जने ख्याता, नाम्नाक्षयतृतीयिका ॥ ७२९ ॥
यथादौ स्वामिना सर्वे व्यवहाराः प्रकाशिताः ।
तथैव दानधर्मोऽयं श्रेयांसेन प्रकाशितः ॥ ७३० ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रभुपारणकास्वप्नसंपाताभ्यां चमत्कृताः ।
गृहमेत्य नृपाः पौराश्चेति श्रेयांसमस्तुवन् ॥ ७३१ ॥

प्रभुपारणकास्वप्नसंपाताभ्याम्-परमात्मपारणदेवागमनाभ्याम् । (अस्वप्नः-देवः)

धन्योऽसि कृतपुण्योऽसि श्रीश्रेयांसनरोत्तरः ।
यदिक्षुरसदानेन पारणं कारितः प्रभोः ॥ ७३२ ॥
ददतां नस्तुरङ्गेभकन्यारत्नफलादिकम् ।
न गृह्णाति प्रभुस्तत्र कुमार! भण कारणम् ॥ ७३३ ॥
सोऽप्याह निर्ममः स्वामी किमेभिः कुरुतेतराम् ।
गृह्णाति केवलं धर्माङ्गपुष्ट्यै प्रासुकाशनम् ॥ ७३४ ॥
तर्ह्येतत्कथमज्ञायि त्वयेति गदितो नृभिः ।
स प्राह दर्शनाद् भर्तुर्ममाभूत्प्राग्भवस्मृतिः ॥ ७३५ ॥
अमुना स्वामिना साकमभ्रमञ्जनुरष्टकम् ।
जन्मतोऽस्माच्च तार्तीये, भवे क्षेत्रे विदेहके ॥ ७३६ ॥
पितुः श्रीवज्रसेनस्य, जिनस्य चरणान्तिके ।
स्वाम्येष जगृहे दीक्षामहमप्यस्य पृष्ठतः ॥ ७३७ ॥
एतज्जन्मस्मृतेर्दानविधिरज्ञायि हे नराः! ।
तथा शृणुत स्वप्नानां त्रयाणामप्यदः फलम् ॥ ७३८ ॥
यन्मया श्यामलो मेरुर्दृष्टः सिक्तश्च वारिभिः ।
स हि स्वामी तपःक्षामोऽभादिक्षुरसपारणात् ॥ ७३९ ॥
यो राज्ञारातिभी रुद्धो योद्धो दृष्टः स तु प्रभुः ।
मम[1] पारणसाहाय्याज्जिगायान्तरवैरिणः ॥ ७४० ॥
सुबुद्धिनापि यद् दृष्टं गोसहस्रं रवेश्च्युतम् ।
मया तदाहितं तत्र ततोऽभात्तपनाधिकम् ॥ ७४१ ॥

१. मत्पारण० P. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सूर्यप्रायः प्रभुस्तस्य गोसहस्त्रं च[1] केवलम् ।
प्रच्युतं पारणेनैतत्संबद्धः सोऽधिकं बभौ ॥ ७४२ ॥
इति श्रुत्वाऽखिलो लोकः श्रेयांसं संस्तुवन्मुहुः ।
स्वं स्वं स्थानं ययौ तस्माद् व्यहरद् भगवानपि ॥ ७४३ ॥
प्रभोः पारणकस्थानातिक्रमं कोऽपि मा करोत् ।
इतीव तत्र श्रेयांसः पीठं रत्नमयं व्यधात् ॥ ७४४ ॥
श्रेयांसेनार्च्यमाणं तं दृष्ट्वा लोकास्तमब्रुवन् ।
किमेतदिति सोप्याख्यदादिकृन्मण्डलं ह्यदः ॥ ७४५ ॥
यत्र यत्राकृत स्वामी, पारणं तत्र तत्र च ।
जनैः पीठः कृतोऽस्याख्याभूत्क्रमाद्रविमण्डलम् ॥ ७४६ ॥
अन्यदा विहरन् स्वामी बहल्याह्वयमण्डले ।
सायाह्ने श्रीबाहुबलेः पुरीं **तक्षशिलां** ययौ ॥ ७४७ ॥
उद्यानेऽस्याः प्रतिमया स्थितं वीक्ष्यर्षभं विभुम् ।
आगत्य बाहुबलये वनपाला न्यवेदयन् ॥ ७४८ ॥
तच्छ्रुत्वा स मुदा तेभ्यो दानं दत्त्वेत्यचिन्तयत् ।
यत्प्रातः सपरीवारो वन्दिष्ये सोत्सवं प्रभुम् ॥ ७४९ ॥
सत्स्वस्तिकं पताकाढ्यं लसद्वन्दनमालिकम् ।
सोल्लोचं तोरणोद्भासि भूपः पुरमकारयत् ॥ ७५० ॥
तातस्य दर्शनात्प्रातः करिष्ये स्वं पवित्रितम् ।
इति चिन्तयतस्तस्य निशा वर्षोपमाजनि ॥ ७५१ ॥
विभातायां विभावर्यां प्रपूर्य प्रतिमां प्रभुः ।
अन्यत्र कुत्रचिद्देशे विजहार समीरवत् ॥ ७५२ ॥
अथ प्रातः करिस्कन्धारूढो बाहुबलिर्नृपः ।
छत्रेण चामराभ्यां च राजमानः किरीटभृत् ॥ ७५३ ॥
पौरान्तःपुरराजन्यैर्गजवाजिरथस्थितैः ।
परीतः परितो भट्टथट्टैः कृतजयारवः ॥ ७५४ ॥

१ तु V. L. ।

Jain Education International　　For Personal & Private Use Only　　www.jainelibrary.org

नानातोद्योल्लसन्नादबधिरीकृतदिग्मुखः ।
नगरान्निरगान्नाथसनाथं काननं प्रति ॥ ७५५ ॥ कुलकम् ॥
संत्यज्य राजचिह्नानि तत्र तक्षशिलापतिः ।
विवेश पदचारेण, वन्दितुं जगदीश्वरम् ॥ ७५६ ॥
श्रीतातं तत्र चापश्यन्नश्रुमिश्रविलोचनः ।
अधोमुखः स मुषितसर्वस्व इव तस्थिवान् ॥ ७५७ ॥
दध्यौ च मे धियं हा धिग् यत्तदैव न वन्दितः ।
तातस्तद्वेद्मि मत्तोऽन्यः कोऽपि नो दुर्धियां पदम् ॥ ७५८ ॥
एवं चिन्ताचितस्वान्तं तं दृष्ट्वा सचिवो जगौ ।
राजन्नलं विषादेन तापकेन कृशानुवत् ॥ ७५९ ॥
तत्तस्मिन्निर्ममे ताते कोऽयं ते मोहविप्लवः ।
तत्पदप्रतिबिम्बे तु दृष्टे साक्षात्स वीक्षितः ॥ ७६० ॥
निशम्येति वचस्तस्य सान्तःपुरपरिच्छदः ।
सुनन्दानन्दनस्तातपदबिम्बान्यवन्दत ॥ ७६१ ॥
मा स्म कोऽपि प्रभोः पादौ पद्भ्यां स्पृशतु जातुचित् ।
इतीवाशातनाभीत्या, श्रीबाहुबलिभूपतिः ॥ ७६२ ॥
अष्टयोजनविस्तारमेकयोजनमुच्चकैः ।
धर्मचक्रं सहस्रारं, मणीमयमकारयत् ॥ ७६३ ॥ युग्मम् ॥
तत्राष्टौ दिवसान् यावत्पूजां नवनवोत्सवैः ।
विधाय वसुधाधीशो, व्यावृत्त्यागान्निजां पुरीम् ॥ ७६४ ॥
यवनादिषु देशेषु, विहरन्नुपसर्गजित् ।
सहस्रमेकं वर्षाणामतिचक्राम नाभिभूः ॥ ७६५ ॥
अथायोध्यामहापुर्या, उपपत्तनमुत्तमम् ।
स्वामी पुरिमतालाख्यमलञ्चक्रेऽरिचक्रजित् ॥ ७६६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्रोद्याने **शकटास्ये, न्यग्रोध**स्य तरोस्तले ।
कृताष्टमतपाः कायोत्सर्गमादिजिनोऽतनोत् ॥ ७६७ ॥
गुणस्थानान्यप्रमत्तप्रमुखाणि श्रयन् प्रभुः ।
शुक्लध्यानसमालीनो, घातिकर्माणि सोऽक्षिणोत् ॥ ७६८ ॥
फाल्गुनासितपक्षस्यैकादशीदिवसोदये ।
उत्तराषाढास्थे चन्द्रे **केवलज्ञान**माप सः ॥ ७६९ ॥
अथासनानां कम्पेन, समग्रा अपि वासवाः ।
केवलोत्सवमाधातुं, विभोस्तत्र समैयरुः ॥ ७७० ॥
सुरा **वायुकुमारा**ख्या, योजनप्रमितां भुवम् ।
प्रभोः समवसरणहेतवे सममार्जयन् ॥ ७७१ ॥
महीं **मेघकुमारा**ख्याः सिषिचुर्गन्धिवारिणा ।
हेमरत्नमणीरम्यां वेदीं च व्यन्तरा व्यधुः ॥ ७७२ ॥
तत्राधोमुखवृन्तानि, पञ्चवर्णानि सर्वतः ।
प्रसूनानि सुगन्धीनि, व्यकिरन् व्यन्तरामराः ॥ ७७३ ॥
भवनाधिपतिज्योतिःपतिकल्पनिवासिनः ।
रूप्यैरैरत्नघटितं, वप्रत्रयमसूत्रयन् ॥ ७७४ ॥
तेषामुपरि भवनज्योतिःकल्पनिवासिनः ।
हेमरत्नमणीरम्यां, कपिशीर्षावलीं व्यधुः ॥ ७७५ ॥
वप्रे वप्रे विशालानि चत्वारि गोपुराण्यभुः ।
प्रतिवप्रं धूपघट्यो वाप्यश्च स्वर्णपङ्कजाः ॥ ७७६ ॥
प्रतिप्रतोलि कलशा ध्वजा वन्दनमालिकाः ।
पञ्चालिकास्तोरणानि मङ्गलान्यष्टधारुचन् ॥ ७७७ ॥
मध्येद्वितीयवप्रस्य कोण ईशानसंज्ञके ।
तीर्थंकरनिवासार्थं देवच्छन्दमसूत्रयन् ॥ ७७८ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पूर्वद्वार्यादिमे वप्रे द्वारस्थौ तस्थतुः सुरौ ।
व्यन्तरौ दक्षिणे द्वारे, ज्योतिष्कौ पश्चिमे पुनः ॥ ७७९ ॥
उदग्द्वारे भवनेशौ हैमे वप्रे च द्वाःस्थिताः ।
जाता **जया** च **विजया जयन्ती चापराजिता** ॥ ७८० ॥ युग्मम् ॥
प्रान्त्ये वप्रे प्रतिद्वारं द्वाःस्थास्तस्थुस्तु **तुम्बरुः** ।
**खट्वाङ्गी नृशिराः स्त्रग्वी** जटामुकुटमण्डिताः ॥ ७८१ ॥
मध्येसमवसरणं व्यन्तरैश्चैत्यपादपः ।
क्रोशत्रयोन्नतश्चक्रे तस्याधो मणिपीठिकाः ॥ ७८२ ॥
तस्या ऊर्ध्वं छन्दकं च तदन्तःपूर्वदिग्गतम् ।
सपादपीठं माणिक्यासनं चक्रुर्नरप्रमम् ॥ ७८३ ॥
श्वेतच्छत्रत्रयं तस्योपरिष्टाद् व्यन्तरा व्यधुः ।
धारयाश्चक्रतुस्तत्र यक्षौ चामरयामलम् ॥ ७८४ ॥
स्वर्णाम्बुजस्थं समवसरणद्वारि भासुरम् ।
श्रीधर्मचक्रं चक्रुस्ते सहस्रांशुमिवापरम् ॥ ७८५ ॥
चतुर्धा देवकोटीभिः परितः परिवारितः ।
प्रभाते समवसर्तुं प्रतस्थे नाभिनन्दनः ॥ ७८६ ॥
देवन्यस्तेषु सौवर्णपद्मेषु नवसु क्रमौ ।
न्यसन् समवसरणं प्राग्द्वारि प्राविशत्प्रभुः ॥ ७८७ ॥
असी गत्यादानयोश्च, भ्वादिकोऽयं धातुः ।
प्रदक्षिणय्य चैत्यद्रुं तीर्थं नत्वा च प्राङ्मुखः ।
स्वामी सिंहासनं भेजे पूर्वाद्रिं भानुमानिव ॥ ७८८ ॥
प्रतिबिम्बत्रयं चान्यद्दक्षिणादिदिशां त्रये ।
विचक्रुरमराः स्वामिप्रभावादेव तादृशम् ॥ ७८९ ॥
तदैवाविरभून्मूर्ध्नः पृष्ठे भामण्डलं प्रभोः ।
पूरयंश्च नभो नादैर्ननाद दिवि दुन्दुभिः ॥ ७९० ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अयमेव जगन्नाथो, मा विकल्पं कृथा हृदि ।
इतीव ख्यापयल्ँलोके जिनस्याग्रे बभौ ध्वजः ॥ ७९१ ॥
प्रविश्य प्राच्यद्वारेण, कृत्वा तिस्रः प्रदक्षिणाः ।
जिनेश्वरं च तीर्थं च, नत्वा प्राकार आदिमे ॥ ७९२ ॥
साधूनां व्रतिनीनां च, स्थानं मुक्त्वा तदन्तरे ।
आग्नेयकोणके तस्थुरुर्ध्वस्थास्त्रिदशस्त्रियः ॥ ७९३ ॥ युग्मम् ॥
तथैवापाच्यद्वारेण प्रविश्य नैर्ऋताभिधे ।
कोणे तस्थुर्भवनेन्द्रज्योतिष्कव्यन्तराङ्गनाः ॥ ७९४ ॥
प्राग्वत् प्रविश्य प्रातीच्यद्वारेण मरुतो दिशि ।
भवनपतिज्योतिष्कव्यन्तरा न्यषदन्मुदा ॥ ७९५ ॥
तयैव रीत्योदग्द्वारा, प्रविश्यानन्दमेदुराः ।
ईशानकोणके तस्थुरमर्त्यनरनृस्त्रियः ॥ ७९६ ॥
न तत्राहंयुता नैव भयं न च विरोधता ।
न शोको नैव विकथा जीवानां जातु जायते ॥ ७९७ ॥
वप्रे द्वितीये तिर्यञ्चस्तिष्ठन्ति स्म प्रमोदतः ।
प्राकारस्य तृतीयस्याभ्यन्तरे वाहनानि च ॥ ७९८ ॥
अथ सौधर्मकल्पेन्द्रो योजिताञ्जलिकुड्मलः ।
नत्वा नुत्वा च नाभेयं स्वस्थाने समुपाविशत् ॥ ७९९ ॥
इतश्च श्रीविनीतायां नगर्यां भरतेश्वरः ।
प्रातः प्रणन्तुमायातो मरुदेवां पितामहीम् ॥ ८०० ॥
तां पुत्रविरहाश्रूत्थनीलिम्नालुप्तलोचनाम् ।
ज्येष्ठपौत्रो नमत्येष इत्युक्त्वाग्र उपाविशत् ॥ ८०१ ॥
स्वामिनी मरुदेवापि बाष्पसिक्तमुखाम्बुजा ।
चिरं जीवेत्याशिषयाभिनन्द्य भरतं जगौ ॥ ८०२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वत्स! त्वमनया राज्यश्रियालिङ्गितविग्रहः ।
न वेत्सि मम वत्सस्यातुच्छां दुस्थामवस्थितिम् ॥ ८०३॥
यदेकाकी निराहारः पदचारी निरावृतिः ।
शीतातपपराभूतः स भ्राम्यति वनं वनात् ॥ ८०४॥
तेन मे दूयते चेतो निश्चेतनतया न ते ।
नित्यं च मम तद्दुःखाद् वर्षलक्षायते क्षपा ॥ ८०५॥
श्रुत्वेति मरुदेवाया गिरो निर्वेदमेदुराः ।
यावत्प्रत्युत्तरेणैनां राट् तोषयितुमिच्छति ॥ ८०६॥
तावद् **यमकशमकौ,** प्रतीहारनिवेदितौ ।
समेत्य भरताधीशं, प्रणेमतुरुदञ्जली ॥ ८०७॥
यमकस्तमभाषिष्ट, देव! दिष्ट्याद्य वर्धसे ।
यदुद्याने **शकटास्ये,** प्रभोरजनि केवलम् ॥ ८०८॥
शमकोऽपि प्रजापालं प्राहोच्चैःस्वरपूर्वकम् ।
देव! त्वदायुधागारे चक्ररत्नमजायत ॥ ८०९॥
इतोऽभूत्केवलज्ञानं तातस्येतश्च चक्रकम् ।
पूर्वं कुर्वेऽर्चनां कस्येति दध्यौ भरतः क्षणम् ॥ ८१०॥
क्व विश्वाभयदः स्वामी क्व चक्रं जन्तुघातकम् ।
ध्यात्वेति तातपूजायै स्वानादिक्षदिलापतिः ॥ ८११॥
पारितोषिकदानेन तौ विसृज्य विशांपतिः ।
स्वामिनीमूचिवान् वाचा शोकशल्यविशल्यया ॥ ८१२॥
यतस्त्वं मां सदाप्येवमादिक्षः करुणाक्षरम् ।
अङ्गजो मे यदेकाकी भिक्षाभोज्यस्ति दुःखितः ॥ ८१३॥
तन्मातरधुना स्वीयसूनोस्त्रिभुवनप्रभोः ।
श्रियं विलोकयेत्युक्त्वारोहयत्तां गजं नृपः ॥ ८१४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कुञ्जरस्थैरश्ववारै रथिभिः पत्तिभिर्वृतः ।
सर्वदर्ध्या स्वामिनं नन्तुं, प्रतस्थे भरतेश्वरः ॥ ८१५ ॥
पुरो व्रजन् ध्वजं राजा दूराद्वीक्ष्याम्बिकामवक् ।
सुरैः समवसरणं, कृतं पश्य जगद्गुरोः ॥ ८१६ ॥
शृणु मातः! स्ववत्साग्रे, देवैः क्लृप्तं जयध्वनिम् ।
दुन्दुभेरपि निर्घोषं, क्षुभ्यत्क्षीराब्धिनादभम् ॥ ८१७ ॥
सुरासुरविमानानां, यातायातानि तन्वताम् ।
अम्बेऽमुं किंकिणीक्वाणं, शृणु श्रवणसौख्यकृत्* ॥ ८१८ ॥
हे मातर्देवदेवस्य स्वानुभूतामिमां गिराम् ।
सुधामिव निपीय त्वं विलोकय निजाङ्गजम् ॥ ८१९ ॥
इति श्रीमरुदेवायाः शृण्वत्या भगवद्गिरम् ।
आनन्दाश्रुजलैर्लुप्तो नीलिमाञ्जनवद् दृशोः ॥ ८२० ॥
स्वसूनोस्तीर्थकृल्लक्ष्मीं, पश्यन्ती सा विसिष्मिये ।
घातिकर्मक्षयाच्चाप, केवलज्ञानमुज्ज्वलम् ॥ ८२१ ॥
आरूढैव करिस्कन्धे, मरुदेवा समासदत् ।
अन्तकृत्केवलज्ञानिभावेन परमं पदम् ॥ ८२२ ॥
अमुष्यामवसर्पिण्यां सिद्धोऽसौ प्रथमोऽजनि ।
तस्याः कायश्च सत्कृत्य, क्षीराब्धौ चिक्षिपे सुरैः ॥ ८२३ ॥
तदादि मृतकाङ्गार्चा प्रावर्त्यत जनैर्भुवि ।
यतो महद्भिराचारः कृतः किं केन लुप्यते ॥ ८२४ ॥

ततोऽसौ मरुदेवात्मज्ञातनिर्वृतिसंगतिः ।
भरतो हर्षशोकाभ्यां युगपद् व्यानसे क्षणम् ॥ ८२५ ॥
संत्यज्य राज्यचिह्नानि, पादचारी नरेश्वरः ।
प्राविक्षदुत्तरद्वारा जिनभूषितभूतलम् ॥ ८२६ ॥

* 'श्रवणसौख्यदम्' इति संगतं भाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तिस्रः प्रदक्षिणा दत्त्वा नत्वा च वृषभध्वजम् ।
भक्त्या भरतभूजानिः स्तोतुमारभत प्रभुम् ॥ ८२७॥
जय श्रीनाभिराजेन्द्रकुलपङ्कजभास्कर ! ।
जय त्रिजगतीराजनतक्रम ! वृषध्वज ! ॥ ८२८॥
गुह्यनागे यथा मान्ति, रायां कोट्यस्तथैव ते ।
नाथ! योजनमानायामपि पर्षदि देहिनाम् ॥ ८२९॥
बद्धरोषा अपि क्षुद्रा, जन्तवो बान्धवा इव ।
स्वस्था यदत्र तिष्ठन्ति, तत्ते माहात्म्यवैभवम् ॥ ८३०॥
तव प्रसादकल्पद्रोः पुष्पं त्रैलोक्यसंपदः ।
फलं त्वविकलं तीर्थाधीश! निःश्रेयसश्रियः ॥ ८३१॥
नाथ! नाथामि नो राज्यं न चक्रित्वं न शक्रताम् ।
किन्त्वर्थयेऽर्थिकल्पद्रो! सेवां त्वत्पादपद्मयोः ॥ ८३२॥
इति तातमभिष्टुत्यापक्रम्य कतिचित्क्रमान् ।
शक्रपृष्ठे प्रतिशक्र इव क्ष्माप उपाविशत् ॥ ८३३॥
ततो योजनगामिन्या पञ्चत्रिंशद्गुणाढ्यया ।
सर्वभाषानुयायिन्या, वाण्या व्याख्यां व्यधाद् विभुः ॥ ८३४॥
भो भो भव्या भवाब्धौ विपदुदकभृते क्रोधभोगीन्द्ररौद्रे,
मानोद्यन्मीनपीने निकृतिमकरिकातीक्ष्णदंष्ट्राकराले ॥
लोभोल्लोलालिलोले विषयविषभरे मज्जनं मा तनुध्वम्,
किन्त्वेकं तं तरीतुं जिनपतिगदितं धर्मपोतं श्रयध्वम् ॥८३५॥ (स्रग्धरा)
स द्विधा यतिगृहस्थभेदतः पङ्क्तिभानुमितसद्व्रताञ्चितः ।
सम्यगेष भविकैर्निषेवितो जायते जगति सिद्धिहेतवे ॥८३६॥(स्वागतावृत्तम्)
इत्याकर्ण्य प्रभोर्धर्मदेशनां भरताङ्गभूः ।
नत्वा **ऋषभसेना**ख्यो भगवन्तं व्यजिज्ञपत् ॥ ८३७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मामस्माद् भवपाथोधेरापद्यादोऽतिदारुणात् ।
दीक्षातर्याः प्रदानेन, नाथ! तारय तारय ॥ ८३८॥
एवमस्मै ब्रुवाणाय, पञ्चशत्यैकहीनया ।
सप्तशत्या च भरतचक्रिणः पुत्रपौत्रयोः ॥ ८३९॥
सहिताय हिते मार्गे निरताय रतोज्झिने ।
स्वहस्तेन जिनो दीक्षां प्रददे मुक्तिदूतिकाम् ॥ ८४०॥ युग्मम्॥
स्वामिनः केवलज्ञानोत्सवं वीक्ष्यामरैः कृतम् ।
**मरीचि**रपि चारित्रं जग्राह भरताङ्गभूः ॥ ८४१॥
भरतेन विसृष्टाथ, ब्राह्म्यपि व्रतमग्रहीत् ।
सुन्दरी श्राविकाद्याभूद्, भरतक्षितिपाज्ञया ॥ ८४२॥
सम्यक्त्वमूलं भरतः श्रावकत्वं जनैः सह ।
उपादत्तापरे दीक्षां जिनान्ते च प्रपेदिरे ॥ ८४३॥
त्यक्त्वा कच्छमहाकच्छावन्ये राजन्यतापसाः ।
समेत्य स्वामिपादान्ते प्रव्रज्यां जगृहुः पुनः ॥ ८४४॥
चतुरशीतिसंख्यानां प्रज्ञातिशयशालिनाम् ।
श्रीमतामृषभसेनप्रमुखाणां महात्मनाम् ॥ ८४५॥
उत्पादविगमध्रौव्यसंयुतां संयतेश्वरः ।
पदत्रयीमुपादिक्षद् भवाम्भोधौ तरीमिव ॥ ८४६॥ युग्मम् ॥
ते त्रिपद्यनुसारेणैकादशाँङ्गीं* सपूर्विकाम् ।
क्षणाद्विरचयाञ्चक्रुर्मुनयो नयशालिनः ॥ ८४७॥
अथ प्रथमकल्पेन्द्रो वृत्तो देवैर्जिनान्तिकम् ।
करे कृत्वा दिव्यचूर्णपूर्णं स्थालमुपानयत् ॥ ८४८॥

---

* एकादशाङ्गीमिति चिन्त्यम् । द्वादशाङ्गीमिति संगतं भाति. तुलना-त्रिषष्टिशलाकापुरुषचरिते-
स चतुर्दशपूर्वाणि द्वादशाङ्गानि ते क्रमात् ।
ततो विरचयामासुस्तत्त्रिपद्यनुसारतः १।३।६६२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वाम्युत्थायर्षभसेनादीनां गणभृतां क्रमात् ।
चूर्णक्षेपं प्रकुर्वाणः सूत्रार्थतदुद्वयेन तु ॥ ८४९ ॥
गुणैर्द्रव्यैश्च पर्यायैर्नयैः सर्वैरपि स्वयम् ।
गणानुज्ञामनुयोगानुज्ञां च प्रददे मुदा ॥ ८५० ॥ युगलम् ॥
तेषामुपरि गीर्वाणा मानवा वनिता अपि ।
वासक्षेपं स्म कुर्वन्ति, गीतवादित्रपूर्वकम् ॥ ८५१ ॥
पुरो गणधरास्तस्थुर्योजिताञ्जलिकुड्मलाः ।
विभोर्वचांसि गृह्णन्तो मेघाम्भश्चातका इव ॥ ८५२ ॥
सिंहासनमथारुह्य पूर्ववत् प्राङ्मुखः प्रभुः ।
अनुशिष्टिमयीं व्याख्यां तदग्रे विदधे पुनः ॥ ८५३ ॥
व्यतीतायां तु पौरुष्यां कलमैस्तन्दुलैः कृतः ।
चतुष्प्रस्थमितः स्थालसंस्थो गन्धादिवासितः ॥ ८५४ ॥
प्रधानपुरुषोपात्तो भरतेश्वरकारितः ।
अन्वीयमानो ललनाजनैर्गीतिपुरस्सरम् ॥ ८५५ ॥
कलितो दुन्दुभिध्वनैः पौरैरपि परीवृतः ।
बलिः समवसरणं पूर्वद्वारा समाविशत् ॥ ८५६ ॥ युग्मम् ॥
प्रभुं प्रदक्षिणीकृत्य क्षिप्त ऊर्ध्वं बलिः पुरः ।
निपतन्नन्तरालेऽपि तदर्धो जगृहे सुरैः ॥ ८५७ ॥
तस्य भूमिगतस्यार्धादर्धं श्रीभरतोऽग्रहीत् ।
विभागीकृत्य शेषश्च शेषेवोपाददे नरैः ॥ ८५८ ॥
प्रागुत्पन्ना गदाः सर्वे क्षीयन्तेऽभिनवाः पुनः ।
षण्मासान्नैव जायन्ते तस्य माहात्म्यतो बलेः ॥ ८५९ ॥
सिंहासनादथोत्थाय भगवानुत्तराध्वना ।
विश्रामाय सुरैः सार्धं देवच्छन्दमशिश्रियत् ॥ ८६० ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततः श्रीऋषभसेननामा गणधराग्रणीः ।
उपविश्य विभोः पादपीठे व्याख्यानमातनोत् ॥ ८६१ ॥
व्याख्यानाद्विरते तस्मिन् सुरासुरनरेश्वराः ।
प्रभुं प्रणिपनीपत्य स्वं स्वं स्थानमगुर्मुदा ॥ ८६२ ॥
**गोमुखाख्यो** महायक्षो दक्षः संघस्य रक्षणे ।
श्रीमत्य**प्रतिचक्रा** चाभूतां शासनदेवते ॥ ८६३ ॥
अथातिशयवृन्देन प्रातीहार्याष्टकेन च ।
विस्मयाम्भोनिधौ विश्वजनचेतांसि मज्जयन् ॥ ८६४ ॥
साधुभिः साधुभिः साध्वीराजिभिश्च विराजितः ।
प्रभुः प्रबोधयन् भव्यान्, प्राप **शत्रुञ्जया**चलम् ॥ ८६५ ॥ युग्मम् ॥
तत्र द्युसद्भिः समवसरणे विहिते विभुः ।
सिंहासनमलङ्कृत्य कृत्यविद् देशनां व्यधात् ॥ ८६६ ॥
संपूर्णायां तु पौरुष्यां देवच्छन्दं गतेऽर्हति ।
**पुण्डरीकः** प्रभोः पादपीठस्थो देशनां व्यधात् ॥ ८६७ ॥
द्वितीयस्यां तु पौरुष्यां व्यतीयुष्यां गणेश्वरः ।
देशनां व्यसृजद्यस्मात्, समयज्ञा महर्षयः ॥ ८६८ ॥
विजिहीर्षुस्ततोऽन्येद्युर्भगवान्नाभिनन्दनः ।
पुण्डरीकं गणाधीशमूचे मधुकिरा गिरा ॥ ८६९ ॥
वत्स! स्वच्छमते! तिष्ठ, पञ्चकोटिमुमुक्षुयुक् ।
शत्रुञ्जये महातीर्थे, स्वर्मणाविव दुर्लभे ॥ ८७० ॥
क्षेत्रानुभावतोऽमुष्य, परिवारवृतस्य ते ।
केवलज्ञानमचिराद् भविष्यति विनिश्चितम् ॥ ८७१ ॥
तवात्र शैले शैलेशीध्यानमाश्रयतः सतः ।
परिवारपरीतस्य भावी निर्वृतिसंगमः ॥ ८७२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वाम्याज्ञां मुकुटीकृत्य मूर्ध्नि तस्मिन् स्थिते सति ।
युगादिदेवोऽन्यत्रागात् प्रतिबोधयितुं जनान् ॥ ८७३ ॥
ततोऽसौ सपरीवारः पुण्डरीकगणेश्वरः ।
चैत्रराकादिने शुक्लध्यानी केवलमासदत् ॥ ८७४ ॥
प्रान्ते स्थितः सितध्याने रुद्धयोगो महाशयः ।
मुमुक्षुभिर्युतः क्षीणकर्मा मोक्षमवाप सः ॥ ८७५ ॥
दिवो देवाः समागत्य निर्वाणगमनोत्सवम् ।
स्वामिनः पुण्डरीकस्य व्रतिनामपि चक्रिरे ॥ ८७६ ॥
यदत्राद्रौ पुण्डरीको मुक्तिमार्गमसाधयत् ।
ततोऽस्य **पुण्डरीके**ति नामाभूद् भुवि विश्रुतः ॥ ८७७ ॥
तत्र श्रीभरतः शैले भगवत्पुण्डरीकयोः ।
प्रतिमासहितं रत्नमयं चैत्यमकारयत् ॥ ८७८ ॥
नानाविधेषु देशेषु गोसहस्त्रैः प्रबोधयन् ।
सच्चक्रान् विजहार श्रीनाभेयो भानुमानिव ॥ ८७९ ॥
स्वामिनः केवलज्ञानादारभ्य मुनयोऽभवन् ।
चतुरशीतिसहस्त्राः साध्व्यो लक्षत्रयं तथा ॥ ८८० ॥
लक्षत्रयं समं पञ्चसहस्त्रैः* श्रावकोत्तमाः ।
श्राद्ध्यः सार्धं पञ्चलक्षाश्चत्वारिंशच्छतान्विताः ॥ ८८१ ॥
चत्वारि तु सहस्त्राणि, सप्तशत्या युतानि च ।
पञ्चाशताधिकान्यासन् श्रीचतुर्दशपूर्विणाम् ॥ ८८२ ॥
सहस्त्राणि नवाभूवन्नवधिज्ञानशालिनाम् ।
विंशतिसहस्त्रसङ्ख्याः, केवलज्ञानिनस्तथा ॥ ८८३ ॥
सहस्त्रविंशतिः षट्कशताढ्या वैक्रियश्रियाम् ।
द्वाविंशतिसहस्त्राण्यनुत्तरस्वर्गगामिणाम् ॥ ८८४ ॥

---

* सपञ्चाशत्सहस्त्रमिति संगतं भाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वादिनां च मनःपर्यायिणां षट्कशतान्विता ।
आसीद् द्वादशसाहस्री प्रभोः पञ्चाशता युता ॥ ८८५ ॥
व्यवहारं यथा पूर्वमस्थापयदिलातले ।
तथैवादिमतीर्थेशः श्रीमत्संघं चतुर्विधम् ॥ ८८६ ॥
प्रव्रज्यावसरात्पूर्वलक्षं स्वाम्यतिवाह्य सः ।
स्वमोक्षसमयं ज्ञात्वा प्रास्थिताष्टापदं प्रति ॥ ८८७ ॥
मुनीनां दशसाहस्र्या वृतो वृषभलाञ्छनः ।
मुक्तिश्रीसौधनिश्रेणिमारोहत् स्फटिकाचलम् ॥ ८८८ ॥
चतुर्दशेन भक्तेन, पादपोपगमाह्वयम् ।
प्रपन्नोऽनशनं स्वामी, तत्र चारित्रिभिर्युतः ॥ ८८९ ॥
तथास्थितं जिनाधीशं, विलोक्याचलपालकाः ।
समेत्य भरतेशाय, शीघ्रमेवं न्यवेदयन् ॥ ८९० ॥
सोऽप्याहारपरीहारमवगत्य जगद्गुरोः ।
सशल्य इव शोकेन, खेदमन्वभवन्नृपः ॥ ८९१ ॥
दुःखाभिभूतो भरतः सान्तःपुरपरिच्छदः ।
प्रतस्थे पादचारेण त्वरयाष्टापदं प्रति ॥ ८९२ ॥
तत्र शोकप्रमोदाभ्यां व्याकीर्णो भरतेश्वरः ।
ईक्षाञ्चक्रे तातपादान् पर्यङ्कासनसंस्थितान् ॥ ८९३ ॥
तातं प्रदक्षिणीकृत्य नमस्कृत्य च भूपतिः ।
सेवते स्म समीपस्थः प्रतिच्छन्द इव प्रभोः ॥ ८९४ ॥
अथासनप्रकम्पेन ज्ञानेनावधिना तथा ।
स्वामिनिर्वाणकल्याणं ज्ञात्वैयुस्तत्र वासवाः ॥ ८९५ ॥
तथाभूतं विभुं वीक्ष्य कृत्वा तिस्रः प्रदक्षिणाः ।
नत्वा चेन्द्राः स्थिता दुःखादालेख्यलिखिता इव ॥ ८९६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एतस्या अवसर्पिण्यास्तृतीयस्यारकस्य तु ।
एकोननवतिपक्षसङ्ख्ये शेषेऽवशेषिणि ॥ ८९७॥
माघकृष्णत्रयोदश्यां, पूर्वाह्णेऽभीचिगे विधौ ।
पर्यङ्कासनमासीनः शुक्लध्यानपरायणः ॥ ८९८॥
प्रोन्मूल्याखिलकर्माणि, गजेन्द्र इव भूरुहः ।
युगादिदेवो निर्वाणनायिकानायकोऽजनि ॥ ८९९॥ कुलकम् ॥
ऋषीणां दशसहस्री, प्रपन्नानशनापि सा ।
केवलज्ञानमासाद्य सद्यः शिवमशिश्रियत् ॥ ९००॥
स्वामिनिर्वाणकल्याणसमये श्वभ्रिणामपि ।
अजायत क्षणं सौख्यं का कथान्यशरीरिणाम् ॥ ९०१॥
तातशोकसमाविष्टमानसो भरतेश्वरः ।
छिन्नमूलद्रुम इव पपात पृथिवीतले ॥ ९०२॥
तद्विषादापनोदाय स्वयं सौधर्मनायकः ।
रुरोद रोदसीपूरं भरतं चान्वरोदयन् ॥ ९०३॥
ततः प्रभृति लोकेऽपि प्राणिनां शोकसंभवे ।
प्रवृत्तो रोदनस्याध्वा दुःखशल्यविशल्यकः ॥ ९०४॥
ततः संजातचैतन्यस्त्यक्त्वा धैर्यं स्वभावजम् ।
भूपालो विललापैवं भरतः करुणस्वरम् ॥ ९०५॥
हा तात! हा कृपासिन्धो! हा विश्वजनवत्सल! ।
मां विहाय भवाटव्यां, स्वयं मोक्षमसाधयः ॥ ९०६॥
तन्नाथ! मामनाथं द्रागानन्दपरया दृशा ।
विलोकयैकवेलं हि महान्तः करुणापराः ॥ ९०७॥
तातशोकवशादेवं विलपन्तमिलापतिम् ।
कथंचिद् बोधयाञ्चक्रे शक्रो जल्पन्ननित्यताम् ॥ ९०८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततः स्वाम्यङ्गसंस्कारहेतवे हरिचन्दनैः ।
ऐन्द्र्यामिन्द्रश्चितां वृत्तां रचयाञ्चकृवान् सुरैः ॥ १०९ ॥
इक्ष्वाकूणां चितां त्र्यस्त्रामृषीणां दक्षिणादिशि ।
सुराश्चक्रुः पश्चिमायां चान्येषां चतुरस्त्रिकाम् ॥ ११० ॥
दक्षिणादिशि-दक्षिणाशब्दो दक्षिणदिशाद्योतकमव्ययम् ।
सहस्त्रवाह्याः शिबिकास्तिस्त्रो रत्नैः सुरा व्यधुः ।
प्रभोरिक्ष्वाकुवंश्यानामन्यर्षीणां च हेतवे ॥ १११ ॥
निवेश्य तासु वर्ष्माणि, जिनादीनामनुक्रमात् ।
नीत्वा चितासु संस्कारं वह्निदेवैरकारयन् ॥ ११२ ॥
यावद् धातुषु दग्धेषु मुक्त्वास्थीनि चितानलैः ।
तावद् व्यध्यापयन्मेघकुमारास्ताः पयोऽम्बुभिः ॥ ११३ ॥
दंष्ट्रादीन्यस्थिवृन्दानि यथावदमरेश्वराः ।
लात्वा स्वस्वसभास्तम्भे, श्रेयसोऽर्थं न्यवेशयन् ॥ ११४ ॥
चितास्थानत्रयरत्नस्तूपानि त्रिदशेश्वराः ।
नन्दीश्वरेऽष्टाह्निकां च कृत्वा स्वां स्वां दिवं ययुः ॥ ११५ ॥
भरतोऽपि परिवारपरीतो वृषभप्रभुम् ।
पावनै स्तवनै स्तुत्वा विनीतां नगरीमगात् ॥ ११६ ॥
इत्थं प्राग्धनसार्थवाहजनने सत्पात्रदानं घृतैः,
कृत्वा बोधितरोः सुमानि दिविषद्भूपालसौख्यानि च ।
भुक्त्वा मुक्तिफलं यथार्जि वृषभाङ्केणार्हता तत्तथा,
कर्त्तव्यं कृतिभिः सदैव मुदितैर्निश्रेयसश्रेयसे ॥ ११७ ॥
(शार्दूलविक्रीडितम्)

इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीद्रेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ सत्पात्रघृतदानविषये श्रीयुगादिदेवचरित्रं समाप्तम् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सत्पात्रदानाद् बोधिबीजावाप्तिनिबन्धनं, श्रीऋषभदेवचरित्रमुक्त्वा सप्तक्षेत्रीविषये दानफलमुपदिशन्नाह-

**मघवावि घरे तेसिं पूरेइ सिरिं च कुणइ गुणगहणं ।**
**वावंति णियं सुद्धं जे वित्तं सत्तखित्तेसु ॥ ७॥**

व्याख्या-ये भव्याः सप्तक्षेत्रेषु-जिनभवन-जिनबिम्ब-जिनागम-लेखन-साधु-साध्वी-श्रावक-श्राविकारूपेषु, शुद्धं-न्यायोपार्जितम्, निजं-स्वीयम्, वित्तं-द्रव्यम्, वपन्ति-वित्तवपनिकां कुर्वन्ति, तेषां-कृतसुकृतानाम्, गृहे-मन्दिरे, आस्तां तावद्वैश्रवणादयः किन्तु मघवाऽपि-नाकिनिकायनायकोऽपि, स्वयमात्मनैव श्रियं-लक्ष्मीम्, पूरयति-चकारात्तेषां गुणग्रहणमपि करोति यतोऽमी धन्या मानवा ये प्रत्यहं निजभुजोपार्जितवित्तेन सत्पात्राणि पोषयन्ति वयं त्वधन्या येषां कणमात्रमपि देवपिण्डत्वेनाग्राह्यत्वान्महात्मनां न कल्पत इति गाथार्थः ॥ अथानुक्रमेण सप्तक्षेत्र्यां धनवपनस्वरूपं गाथाचतुष्टयेनाह-

**उत्तुंगचंगतोरणविरायमाणं सहस्सथंभमयं ।**
**णाणामंडवरयणापगुणं भवणं जिणिंदाणं ॥ ८॥**
**उल्लसिरकिरणमाला, णिणासियदुविहतिमिरपब्भारे ।**
**तिहुयणगुरुण बिंबे पवालमणिरययकणयमये ॥ ९॥**
**जिणआगमाण अंगोवंगाणं पुत्थयाणि विविहाणि ।**
**सिरिसमणसमणिसावयसावियजणपूयणं चेव ॥ १०॥**
**णाओवज्जियविहवेण करेइ जो कारवेइ भावेणं ।**
**सो भरहणरवरो इव भुंजिय रज्जं सिवं लहइ ॥ ११॥**

व्याख्या-उत्तुंगित्ति, उत्तुङ्गानि-अभ्रंलिहानि, अत एव चङ्गानि-जनमनश्चित्रकारीणि यानि तोरणानि तैर्विराजमानं-शोभमानम्, पुनः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किंविशिष्टम् ? सहस्सित्ति सहस्रसंख्या-अनेका ये स्तम्भास्तैर्निर्वृत्तं-तन्मयम्, यत स्तम्भानामेव प्रसादाधारत्वात् , पुन: किंविशिष्टम् ? नाणित्ति, नानाप्रकारा-अनेकधा ये मण्डपास्तेषां या रचना-न्यासविशेषस्तया प्रगुणं-प्रधानम्, न हि मण्डपैर्विना प्रासादस्य कापि शोभा स्यात् अत एवंविधं जिनेन्द्राणां भवनं-चैत्यम्, तच्च पञ्चधा-यदुक्तमागमे-

[१]भत्ती [२]मंगलचेइय [३]णिस्सकड अणिस्सकड [४]चेइयं वावि ॥
[५]सासयचेइय पंचममुवइट्ठं जिणवरिंदेहिं ॥ १ ॥
गिहिजिणपडिमाए भत्ति[१]चेईयं उत्तरंगघडियम्मि ।
जिणबिंबे मंगल[२]चेईयंति समयण्णुणो बिंति ॥ २ ॥
निस्सकडं जं गच्छस्स [३]संतियं तदियरं अणिस्स[४]कडं ॥
सिद्धाययणं च इमं[५] चेइयपणगं विणिदिट्ठं ॥ ३ ॥

[बृहत्कल्पभाष्ये १७७१-७२-७३]
[प्रवचनसारोद्धारे-६५९-६०-६१]

करोति कारयति वेति क्रियासंबन्धोऽग्रेतनगाथायां ज्ञेय: ।
एतत्कारापणस्य किमुच्यते फलम्, उक्तं च-

यस्तृणमयीमपि कुटीं कुर्याद् दद्यात्तथैकपुष्पमपि ।
भक्त्या परमगुरुभ्य: पुण्योन्मानं कुतस्तस्य ॥ १ ॥

उल्लसिरत्ति, उल्लसन्ती-ऊर्ध्वं प्रसर्पणशीला या किरणमाला-तेज:परंपरा तया निर्नाशितानि-क्षयं नीतानि यानि द्विविधानि-बाह्याभ्यन्तररूपाणि, तिमिराणि-तमांसि तेषां प्राग्भारा-निकरा यैस्तानि, पुन: किंभूतानि? पवालित्ति, प्रवाला-विद्रुमा, मणय:-इन्द्रनील-वैडूर्य-सूर्यकान्त-चन्द्रकान्त-ज्योतीरसाद्या, रजतं-रूप्यम्, कनकं-सुवर्णम्, तन्मयानि तैर्निर्वृत्तानि तानि कानीत्याह तिहुयणित्ति, त्रिभुवनगुरूणां-जिनेन्द्राणां, बिम्बानि-प्रतिमा: करोति कारयति वेति क्रियासंबन्धोऽग्रेतनगाथायामवसेय: ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एतत्कर्तारः किं किं न फलमुपभुञ्जन्ति? यदागमः-

जो कारवेइ पडिमं जिणाण जियराग-दोस-मोहाणं ।
सो पावइ अन्नभवे सुहजणणं धम्मवररयणं ॥१॥ [सूक्तमुक्तावली-६२/२१]
दालिद्दं दोहग्गं कुजाइकुसरीरकुगइकुमईओ ।
अवमाणरोग(य)सोगा न हुंति जिणबिंबकारीणं ॥ २॥
[सूक्तमुक्तावली-६३/३]

जिणागमित्ति, जिनागमानां-तीर्थंकरप्रणीतशास्त्राणां, किंरूपाणाम् ? अङ्गोपाङ्गानां-तत्राङ्गा-आचाराङ्गाद्येकादशाङ्गीरूपा उपाङ्गा-औपपातिकप्रभृत्युपाङ्गलक्षणास्तेषां पुस्तकानि, किंभूतानि? विविधानि पञ्चप्रकाराणि तानि चामून्यागमोक्तानि-

[1]गंडी [2]कच्छवि [3]मुट्ठी [4]संपुडफलए तहा [5]छिवाडी य ॥
एयं पुत्थयपणगं वखाणमिणं भवे तस्स ॥ १॥
बाहल्लपुहुत्तेहिं गंडीपुत्थो उ तुल्लगो दीहो ।
कच्छवि अंते तणुओ मज्झे पिहुलो मुणेयव्वो ॥ २॥
चउरंगुलदीहो वा वट्टागिइ मुट्ठिपुत्थगो अहवा ।
चउरंगुलदीहोच्चिय चउरंसो होइ विण्णेओ ॥ ३॥
संपुडगो दुगमाई फलया वुच्छं छिवाडिमित्ताहे ।
तणुपत्तोसियरूवो होइ छिवाडी बुहा बिंति ॥ ४॥
दीहो वा हस्सो वा जो पिहुलो होइ अप्पबाहल्लो ।
तं मुणियसमयसारा छिवाडिपुत्थं भणंतीह ॥ ५॥
[प्रवचनसारोद्धारे ६६४-६५-६६-६७-६८]

यदाहुः-तत्कारापणफलं प्रभुश्रीजिनवल्लभसूरिपादाः-

संसारार्णवनौर्विपद्घनदवः कोपाग्निपाथोनिधि-
र्मिथ्यावासविसारिवारिदमरुन्मोहान्धकारांशुमान् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तीव्रव्याधिलताशितासिरखिलान्तस्तापसर्पत्सुधा-
सारः पुस्तकलेखनं भुवि नृणां सज्ज्ञानदानप्रपा॥ १॥

(शार्दूलविक्रीडितम्)

उत्तरार्धमाह-सिरिसमणित्ति, श्रीश्रमणाः-पुण्डरीकगौतम-प्रमुखमुनयः, श्रमण्यो-ब्राह्मी-चन्दनबालाप्रभृतिव्रतिन्यः, श्रावकाः-श्रेयांसानन्द-कामदेवाद्याः, श्राविकाः-सुन्दरी-सुलसाप्रमुखास्तेषां जनः-समवायस्तस्य पूजनं-वसनाशनाच्छादनवन्दनलक्षणं करोति कारयति वेति क्रियासंबन्धोऽग्रेतनगाथायां[1] ज्ञेयः, चः-समुच्चये, एवशब्दो निश्चयार्थः। यदुक्तमेतत्पूजनफलं पूर्वाचार्यैः-

अनघे संघक्षेत्रे श्रद्धाजलसिक्तमुप्तमल्पमपि ।
जनयति फलं विशालं विटपिनमिव वटतरोर्बीजम् ॥ १॥

णाओवज्जियत्ति। न्यायेन-छलच्छिद्रवञ्चनावर्जितेनार्जित-उपार्जितो यो विभवो-वित्तं तेन, कृत्वा यो विवेकच्छेकः पूर्वोक्तानि सप्त-क्षेत्राणि, भावेन धन्योऽहं कृतसुकृतोऽहं सुलब्धजन्माहमित्यादि चित्तो-ल्लासलक्षणेन करोति स्वयं निर्मिमीते, कारयत्यपरेण निर्मापयति । स प्राणी भरतनरवर इव श्रीयुगादिदेवाद्यनन्दन इव, राज्यं-षट्खण्ड-भरतक्षेत्राधिपत्यम्, भुक्त्वा-अनुभूय, शिवं-मोक्षम्, लभतेऽवाप्नोतीति गाथाचतुष्कार्थः ॥

भावार्थः कथानकगम्यस्तच्चेदम्-

सदा पैररयोध्यायाम**योध्यायां** महापुरि ।
श्रीनाभेयतनूजोऽभूद् **भरतो** भरताधिपः ॥ १॥
सोऽन्यदा संसदासीनः शस्त्रागाराधिकारिणा ।
विज्ञप्तः **शमकेनेश**! चक्रोत्पत्त्याद्य वर्ध्यसे ॥ २॥

---

१. गाथया. V।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इमां तद्गिरमाकर्ण्य प्रमोदभरनिर्भरः ।
प्रीतिदानं सुवर्णस्य कोटीस्तस्मै ददौ नृपः ॥ ३ ॥
चक्रालोकनसोत्कण्ठस्तमग्रेकृत्य पार्थिवः ।
अगादायुधशालायां, गुहायामिव केसरी ॥ ४ ॥
तत्र चक्रं विलोक्योच्चैरनंसीदीश्वरो विशाम् ।
वाससा विरजीचक्रे स्नपयामास चाम्भसा ॥ ५ ॥
गोशीर्षचन्दनै राजारीरचत्* स्थासकावलीः ।
धूपैः पुष्पैरलङ्कारैर्वस्त्रैश्च तमपूपुजत् ॥ ६ ॥
स्थासकावलीः-कुङ्कुमहस्तस्थापनापङ्क्तीः ।
तत्पुरस्तन्दुलै रूप्यनिर्वृत्तैरष्टमङ्गलीम् ।
लिलेख दिक्षु स्वयशःप्रशस्तिमिव पार्थिवः ॥ ७ ॥
तत्रार्षभिः कृतावासो, दिनान्यष्टौ महोत्सवम् ।
पूजापूर्वं वृतः पौरैश्चक्रे चक्रस्य चक्रभृत् ॥ ८ ॥
तत्फलं दिग्जयं जानन्, भूजानिर्जग्मिवान् गृहम् ।
स तत्र स्नापितो वारस्त्रीभिः सुरभिवारिभिः ॥ ९ ॥
कृतमङ्गलनेपथ्यः सर्वभूषणभूषितः ।
चान्दनं तिलकं भाले बिभ्रच्छत्रं च मूर्धनि ॥ १० ॥
चामराभ्यां वीज्यमानो, बन्दिक्लृप्तजयारवः ।
पूरयन् रोदसीरन्ध्रं वाद्यद्वादित्रनिस्वनैः ॥ ११ ॥
तुरङ्गैर्वायुरंहोभिर्विन्ध्याचलनिभैरिभैः ।
रथैर्महारथोपेतैः पत्तिभिश्चारुशक्तिभिः ॥ १२ ॥
षोडशसहस्रसंख्यैर्यक्षैश्च परिवारितः ।
भरतस्तुरगारूढश्चचालैन्द्रीदिशं प्रति ॥ १३ ॥ चतुर्भिः कलापकम् ॥

*सिद्धहेममते अररचत् रूपं भवति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तस्य सेनापुरो यक्षसहस्राधिष्ठितं रवेः ।
बिम्बं जेतुमिवाचालीच्चक्ररत्नं नभोङ्गणे ॥ १४॥
**सुषेण**नामा सेनानी दण्डरत्नं करे दधत् ।
तुरङ्गरत्नमारूढोऽभवच्चक्रानुगामुकः ॥ १५॥
पुरोधा वर्धकिः सूदश्छत्रं चर्म च काकिणी ।
मणिः खड्गः समं राज्ञा रत्नान्येतान्यथाचलन् ॥ १६॥
शकुनैरनुकूलैः स प्रेरितश्चक्रवर्त्मगः ।
प्रत्यहं योजनं गच्छन् मागधं तीर्थमासदत् ॥ १७॥
तत्र पूर्वाब्धिवेलान्ते, नवद्वादशयोजनीम् ।
सेनां विस्तारदीर्घाभ्यां, स्थापयामास भूपतिः ॥ १८॥
वर्धकिः सैन्यलोकानामावासानकृताद्भुतान् ।
एकां पौषधशालां च पुण्यद्रोर्वाटिकामिव ॥ १९॥
तत्रागत्य करिस्कन्धात्, समुत्तीर्य विशांपतिः ।
चित्ते मागधतीर्थेशं, कृत्वाष्टमतपो व्यधात् ॥ २०॥
दर्भसंस्तारके स्थित्वा, पौषधं भरतोऽकरोत् ।
अष्टमान्ते च संपूर्णपौषधो निरगात्ततः ॥ २१॥
समेत्य स्वगृहे स्नात्वा, बलिं कृत्वा यथाविधि ।
जैत्रं च रथमारुह्याचालीन्मागधपं प्रति ॥ २२॥
स्थापयित्वा रथं नाभिदघ्नेऽम्भसि पयोनिधौ ।
सौवर्णं निजनामाङ्कं देवताधिष्ठितं शरम् ॥ २३॥
चापे रिपुकृताकम्पे समारोप्य नरेश्वरः ।
नीत्वा कर्णान्तमत्याक्षीन्मागधस्वामिनं प्रति ॥ २४॥ युग्मम् ॥
स योजनान्यतिक्रम्य द्वादशानिलवेगकृत् ।
शरो वज्रमिवापप्तन्मागधेशस्य पर्षदि ॥ २५॥

Jain Education International          For Personal & Private Use Only          www.jainelibrary.org

**मागधेश**स्तमालोक्य कोपाटोपादवोचत ।
आः कस्य शमनो रुष्टो योऽत्रेषुं प्राहिणोत्कुधीः ॥ २६ ॥
तद् भोः त्वरध्वं युद्धाय वीराः! पौरुषशालिनः! ।
यथा श्राक् छिद्यते तस्य शिरः कमलनालवत् ॥ २७ ॥
यावदेवं ब्रुवन् योद्धुमासनादयमुत्थितः ।
तावत्तत्सचिवो बाणेऽक्षरमालामवाचयत् ॥ २८ ॥
जीविताशास्ति चेद्वस्तद् भरतस्याद्यचक्रिणः ।
सेवां कुर्वीत सर्वस्वदानेनेत्यादिशत्ययम् ॥ २९ ॥
तदक्षरार्थं विज्ञाय ज्ञानेनावधिनाथ सः ।
स्वामिने दर्शयन् बाणमेवमाह स्म धीसखः ॥ ३० ॥
देवाभूद् भरतक्षेत्रे ऋषभस्वामिनन्दनः ।
भरतः प्रथमश्चक्री तस्मात्सेव्योऽयमादरात् ॥ ३१ ॥
ततो मागधतीर्थेशो मन्त्रिवाक्योपशान्तरुट् ।
सोपदं शरमादाय समागाद् भरतान्तिकम् ॥ ३२ ॥
नत्वा विज्ञपयामास, भरतं मगधेश्वरः ।
अतः परं त्वमीशो मे त्वद्दासोऽस्मि प्रसीद तत् ॥ ३३ ॥
इत्युदित्वार्पयाञ्चक्रे, चक्रिणोऽसौ सुरः शरम् ।
मौलिकुण्डलतीर्थाम्भोयुतं सोऽप्यग्रहीदमुम् ॥ ३४ ॥
चक्री सत्कृत्य तं देवं व्यावृत्यागान्निजां चमूम् ।
तत्रासौ पारणं कृत्वाष्टाहिकामहमातनोत् ॥ ३५ ॥
चक्रवर्त्यनया युक्त्या याम्यां श्री**वरदामपम्** ।
प्रतीच्यां च **प्रभासेशं** निजाज्ञावशगौ व्यधात् ॥ ३६ ॥
ततश्चक्रानुगश्चक्री, **सिन्धु**सिन्धुतटं ययौ ।
तद्देवीं स्ववशीचक्रेऽष्टमेन तपसा स च ॥ ३७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदाज्ञावशगा सापि, भूपायैत्योपदामदात् ।
अष्टोत्तरं रत्नकुम्भसहस्रं भूरिभास्वरम् ॥ ३८ ॥
तां विसृज्याष्टाहिकाञ्च कृत्वा पारणकं व्यधात् ।
ततः प्रगत्य **वैताढ्ये,** चक्रीसेनां न्यवेशयत् ॥ ३९ ॥
चक्रिणस्तपसाकृष्टः, श्रीवैताढ्यकुमारकः ।
रत्नानि रत्नालङ्कारान्, देवदूष्याणि चार्पयत् ॥ ४० ॥
तं विसृज्य ततश्चक्री कृतपारणकक्रियः ।
**तमिस्राख्यगुहापार्श्वे,** स्कन्धावारं न्यवेशयत् ॥ ४१ ॥
चक्रेऽष्टमतपः क्ष्मापः **कृतमालामरं** प्रति ।
सोऽप्येत्य भरतं नत्वा, प्राभृतं पुरतोऽमुचत् ॥ ४२ ॥
स्त्रीरत्नार्थमलङ्कारानंशुकानि च भुभुजे ।
सोऽदाच्चक्र्यपि सत्कृत्य कृत्यविद् व्यसृजत्सुरम् ॥ ४३ ॥
राजा कृताष्टाह्निकादिः सुषेणं पृतनापतिम् ।
सिसाधयिषयादिक्षत् सिन्धुदक्षिणनिष्कुटम् ॥ ४४ ॥
सोऽपि शासनमादाय भरतेशस्य सैन्ययुक् ।
चर्मरत्नं समारुह्योदतारीत् सिन्धुवाहिनीम् ॥ ४५ ॥
**सिंहलान् बर्बरांस्तत्र कङ्कणान् कालवक्त्रकान्** ।
**म्लेच्छांश्च योनिकाभिक्षान्** सुषेणो जितवान् युधि ॥ ४६ ॥
तेऽपि हेममणीवाजिरथेभादिकमादरात् ।
उपढौक्य शिरस्याज्ञां चक्रिणोऽधारयन्नताः ॥ ४७ ॥
सुषेणोऽपि विधायैतानुत्खातप्रतिरोपितान् ।
पूर्ववत्सिन्धुमुत्तीर्य, भरतेशमुपागतः ॥ ४८ ॥
म्लेच्छेभ्य आहृतं दण्डं, दण्डनाथः प्रजेशितुः ।
अर्पयामास तेनापि सत्कृतः स गृहं गतः ॥ ४९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अन्येद्युरादिशद् दण्डनेतारं भरतेश्वरः ।
तमिस्रायाः कपाटौ त्वमुद्घाटय भटोत्कट! ॥ ५० ॥
ओमिति प्रतिपद्यासौ कृतमालं सुधाभुजम् ।
चित्ते निधाय सेनानी चकृवानष्टमं तपः ॥ ५१ ॥
ततः स विहितस्नानः श्वेतसंव्यानवान् करे ।
बिभ्राणो धूपदहनं तमिस्राद्वारमाययौ ॥ ५२ ॥
सोऽष्टाह्निकामहं कृत्वा दण्डरत्नेन ताडयन् ।
त्रिर्वारं तत्कपाटौ द्राग् वज्राभावुदघाटयत् ॥ ५३ ॥
तेनास्मिंश्चक्रिणे गत्वा स्वरूपे कथिते सति ।
सोऽपीभरत्नमारुह्य तमिस्राद्वारमासदत् ॥ ५४ ॥
योजनान्ते योजनान्ते, तमिस्रापार्श्वयामले ।
गोमूत्रिकानुकारेण, काकिण्या मण्डलानि सः ॥ ५५ ॥
लिखन्नेकोनपञ्चाशत् ज्योतिष्मन्ति चमूवृतः ।
चक्री चक्रानुगः सिन्धू **प्रापोन्मग्नानिमग्निके** ॥ ५६ ॥ युगलम् ॥
सिन्धू-नद्यौ ।
राजा वर्धकिरत्नेन तयोः पद्यामबन्धयत् ।
तया स सुखमुत्तीर्य, गुहोदग्द्वारमाप्तवान् ॥ ५७ ॥
गुहाया उत्तरद्वारे कपाटोद्घटनावति ।
निरगाद् भरतश्चक्री, चक्रपृष्ठे स्वचक्रयुक् ॥ ५८ ॥
उदग्भरतसंभूताः किराता वीक्ष्य तद्बलम् ।
स्वसारगर्वादहसन्निर्धनो धनिनं यथा ॥ ५९ ॥
किरातास्तेऽथ संभूय, कोपाटोपारुणेक्षणाः ।
उदतिष्ठन्त युद्धाय भरतेशबलं प्रति ॥ ६० ॥
सैन्यद्वयस्य योद्धारः, खण्डयन्तः परस्परम् ।
नानारूपाणि शस्त्राणि, कस्य न त्रासहेतवे ॥ ६१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भिल्लमल्लैर्महाशल्यैराहत्य त्रासिता भटाः ।
रक्ष रक्षेति जल्पन्तो भरतेशमुपाययुः ॥ ६२ ॥
कोपाटोपोत्कटश्चक्री यावदुत्तिष्ठते युधे ।
तावत्सुषेणसेनानीर्नत्वा नाथं व्यजिज्ञपत् ॥ ६३ ॥
स्वामिन्नेषु किरातेषु कोऽयं वो रणसंभ्रमः ।
मादृशोऽपि भवत्पादरेणुरेतान् विजेष्यते ॥ ६४ ॥
इति ब्रुवाणो भरतानुज्ञातो ज्ञातपौरुषः ।
सुषेणोऽसिकरो वाजिरत्नारूढोऽभि तानगात् ॥ ६५ ॥
तैः किरातैः समं युद्धं, कुर्वाणः शिबिरेश्वरः ।
केषांचिच्चूर्णयाञ्चक्रे, सहसारथिकान् रथान् ॥ ६६ ॥
केषांचिद् त्रासयामास तुरगान् हरिणानिव ।
केषांचित्खण्डशोऽकार्षीद्वारणानंह्रिपानिव ॥ ६७ ॥
केषांचिदच्छिनच्छस्त्रश्रेणीं तृणमिवोच्चकैः ।
केषांचिच्च शिरांसीलापीठेऽलोठयदायुधैः ॥ ६८ ॥ कुलकम् ॥
इत्थं सुषेणसेनान्या कान्दिशीकत्वमापिताः ।
प्रपलाय्याखिला म्लेच्छा अगच्छन् सिन्धुरोधसि ॥ ६९ ॥
ते तत्रैकत्र मिलिताः पर्यालोच्य परस्परम् ।
देवान् **मेघमुखां**श्चित्ते कृत्वाष्टमतपो व्यधुः ॥ ७० ॥
ते तेन तपसाकृष्टा आविर्भूयोचिरेतराम् ।
किं वः प्रयोजनं ब्रूतेत्युक्तास्ते तान् समालपन् ॥ ७१ ॥
पूर्वं केनाप्यनाक्रान्ते, देशे योऽस्त्यरिरागतः ।
तथा यूयं कुरुध्वं स, यथा निर्गत्य गच्छति ॥ ७२ ॥
किरातैरिति विज्ञप्ता देवा मेघमुखा जगुः ।
भरतश्चक्रवर्त्येष सुरासुरनराजितः ॥ ७३ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यद्यप्यजय्यः सोऽस्माभिस्तथापि भवदाग्रहात् ।
तस्योपसर्गं कर्त्तार इत्युक्त्वा ते तिरोऽभवन् ॥ ७४॥
ततो मेघमुखा देवा ऐन्द्रजालिकवत्क्षणात् ।
विकृत्य वारिदं चक्रभृच्चक्रमुदवेजयन् ॥ ७५॥
ते धाराधरधाराभिराकुलाः पृतनाजनाः ।
प्लाव्यामहे वयं वार्भिरिति पूच्चक्रुरीश्वरम् ॥ ७६॥
राजाप्यरिष्टवृष्टिं तां विभाव्य शिबिरं निजम् ।
संस्थाप्य चर्मरत्ने तदूर्ध्वं छत्रमताडयत् ॥ ७७॥
छत्रदण्डोपरि ध्वान्तध्वंसाय ध्वान्तशत्रुभम् ।
ज्योतिर्नूनं मणीरत्नं, विशामीशो न्यवेशयत् ॥ ७८॥
चर्मरत्ने प्रातरुप्ता येऽन्नवल्लिद्रुमादयः ।
सायं तेषां फलैः सैन्यं, गृहिरत्नमभोजयत् ॥ ७९॥
कल्पान्तकालकल्पान्तवृष्टिसृष्टिं वितन्वताम् ।
तेषां मेघकुमाराणां, सप्तघस्त्री व्यतीयुषी ॥ ८०॥
केऽमी दुराशयाः क्षुद्रोपद्रवं कर्तुमुद्यताः ।
भरतस्येदृशं भावं, विभाव्य बलशालिनी ॥ ८१॥
यक्षषोडशसाहस्त्री, सदा संनिहिता प्रभोः ।
संनह्य चलिता जेतुं वृष्टिकृद्दैवतं प्रति ॥ ८२॥ युग्मम् ॥
रे रे दुराशयाः ! केऽयं, संरम्भो निजघातकृत् ।
भवद्भिर्विहितश्चक्रवर्तिनि द्वेषिपेषिणि ॥ ८३॥
चेदस्ति जीवितव्याशा, तदा भरतचक्रिणम् ।
सुरासुरनराजेयं, यूयमाश्रयत द्रुतम् ॥ ८४॥
इत्याकर्ण्य भयान्मेघमुखाः संहृत्य वारिदम् ।
किरातानां पुरश्चक्रिसेवामुक्त्वा तिरोदधुः ॥ ८५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततो म्लेच्छाः प्रभग्नेच्छा हयरत्नाद्युपायनम् ।
गृहीत्वा भरतं भेजुर्ग्रहा इव दिनेश्वरम् ॥ ८६॥
भरतोऽप्यात्मसत्कृत्य, तान् सत्कृत्य विसृज्य च ।
साधयामास सेनान्या सिन्धोरुत्तरनिष्कुटम् ॥ ८७॥
ततश्चक्राध्वगश्चक्री द्राग् **क्षुद्रहिमवद्गिरेः** ।
नितम्बे दक्षिणे सैन्यमावास्य व्यधिताष्टमम् ॥ ८८॥
चतुर्थेऽह्नि रथारूढः स क्षुद्रहिमवद्गिरिम् ।
त्रिर्वारं स्यन्दनाग्रेण, ताडयामास पार्थिवः ॥ ८९॥
**हिमाचल**कुमाराय प्रहितस्तेन सायकः ।
द्वासप्ततिं योजनानि व्यतीत्याग्रेऽस्य सोऽपतत् ॥ ९०॥
तं नामलाञ्छितं बाणं, वीक्ष्योपायनसंयुतः ।
स क्षुद्रहिमवन्नाथः पृथिवीनाथमभ्यगात् ॥ ९१॥
नत्वा ह्रदाम्भो-देवद्रुसुमदाम-महौषधीः ।
गोशीर्षचन्दनं बाहुरक्षौ चादान्महीभुजे ॥ ९२॥
अहं ते सेवकोऽस्मीति, ब्रुवन् सत्कृत्य भूभुजा ।
स व्यसर्जि स्वयं राज**र्षभकूट**मुपागमत् ॥ ९३॥
तं त्रिर्वारं रथाग्रेणाहत्यादाय च काकिणीम् ।
तत्पूर्वकटके नाम, स्वं लिलेख जिगीषुराट् ॥ ९४॥
ततो व्यावृत्य कटकं, समेत्य धरणीश्वरः।
चकाराष्टाह्निकापूर्वं, पारणं कारणं श्रियः ॥ ९५॥
अथ चक्रानुगश्चक्री, प्राप्तो वैताढ्यपर्वतम् ।
तदीयोत्तरगे वप्रे, निजं सैन्यं न्यवेशयत् ॥ ९६॥
राज्ञा स्वाह्वाङ्कितं बाणं, प्रेषितं वीक्ष्य खेचरौ ।
**श्रीनमिविनमी** योद्धुं प्रतस्थाते बलान्वितौ ॥ ९७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विद्यादृप्तौ खेचरेन्द्रावाह्वयेतां नृपं युधे ।
सोऽपि द्वादशवार्षिक्याजैषीत्तौ रणलीलया ॥ ९८ ॥
नृपेण स्वं जितं ज्ञात्वा, तावागत्य विनत्य च ।
भरतं नमिविनमी, प्रक्रान्तौ स्तोतुमक्रमम् ॥ ९९ ॥
राजन्नादौ यथा नाथे, वृषभोऽभूत्तथाधुना ।
त्वमीशो नो यतः सेवा, न ह्रियै स्वामिनन्दने (?नः) ॥ १०० ॥
नमिर्विद्याधराधीशो रत्नानि विनमिः पुनः ।
स्वां **सुभद्रा**भिधां पुत्रीं स्त्रीरत्नं चक्रिणे ददौ ॥ १०१ ॥
तेनापि सत्कृतौ तौ च राज्यं दत्त्वा स्वपुत्रयोः ।
संवेगाद् ऋषभस्वामिपार्श्वे जगृहतुर्व्रतम् ॥ १०२ ॥
अथानुचक्रं चक्रीन्द्रो व्रजन् **मन्दाकिनी**तटे ।
**गङ्गा**देवीगृहाभ्यर्णे, स्थापयामासिवांश्चमूम् ॥ १०३ ॥
सिन्धुवज्जाह्नवीं तीर्त्वा, सुषेणो भरताज्ञया ।
साधयित्वाययौ सैन्यं, गङ्गामुत्तरनिष्कुटम् ॥ १०४ ॥
अथाष्टमतपस्तुष्टा, गङ्गा सिंहासनद्वयम् ।
साष्टोत्तररत्नकुम्भसहस्रं चक्रिणे ददौ ॥ १०५ ॥
तं सस्मरा स्मराकारं निरीक्ष्य भरतेश्वरम् ।
भोगार्थं भोगिनी भोगगेहे प्रार्थ्यानयन्नदी ॥ १०६ ॥
गङ्गादेव्या समं राजा सलीलं विलसन्नलम् ।
एकाहमिव वर्षाणां सहस्रं सोऽत्यवाहयत् ॥ १०७ ॥
तां कथंचिदनुज्ञाप्य चलितः कलितो बलैः ।
**खण्डप्रपातां** स प्रापदखण्डितपराक्रमः ॥ १०८ ॥
तदीशस्तपसाकृष्टो, **नाट्यमाला**ह्वयः सुरः ।
राज्ञे ददावलङ्कारान् प्रजेशो व्यसृजच्च तम् ॥ १०९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सुषेणोद्घाटितद्वारां, तमिस्त्रामिव तां गुहाम् ।
उल्लङ्घ्यास्थापयत्सेनां, स गाङ्गे पश्चिमे तटे ॥ ११० ॥
धराधिपः समाराद्धुं, निधीनष्टममातनोत् ।
तेऽपि यक्षसहस्त्रेणाश्रिताः प्रकटतां गताः ॥ १११ ॥
नैसर्पः पाण्डुकश्चापि, पिङ्गलः सर्वरत्नकः ।
महापद्मः कालमहाकालौ माणवशङ्खकौ ॥ ११२ ॥
तेषामधीशास्तन्नामधेया देवा नृपं जगुः ।
देव! त्वदीयभाग्येन, वयं जाता वशंवदाः ॥ ११३ ॥
तद् देव! भुङ्क्ष्व वित्तानि स्वैरं दानानि देहि च ।
इति ब्रुवाणास्ते राज्ञा, विसृष्टाः स्वास्पदं ययुः ॥ ११४ ॥
तदर्थं चक्रिणा चक्रे दिनाष्टकमहामहः ।
असाध्यत च सेनान्या गङ्गादक्षिणनिष्कुटः ॥ ११५ ॥
अथ प्रसाधिताशेषभरतो भरतेश्वरः ।
चक्रानुगः परायोध्यामयोध्यां प्रति सोऽचलत् ॥ ११६ ॥
शुभे दिने शुभे लग्ने, प्रयाणसमयान्नृपः ।
षष्टिवर्षसहस्त्राणि, कृत्वा दिग्विजयं जयी ॥ ११७ ॥
मञ्चातिमञ्चकलितां, तोरणध्वजमालिताम् ।
वाद्यमानपञ्चशब्दपूर्वकं प्राविशत्पुरीम् ॥ ११८ ॥ युग्मम् ॥
सप्तभूमिकमासाद्य, प्रासादं मेदिनीपतिः ।
पितुः सिंहासनं भेजे, पूर्वाचलमिवार्यमा ॥ ११९ ॥
ततो यक्षैरिलापालैः, पौरैश्च द्वादशाब्दिकः ।
राज्याभिषेकमहिमा, चक्रे श्रीचक्रवर्त्तिनः ॥ १२० ॥
स्त्रीरत्नं मे भवित्रीयं, येत्यासीत् स्थापिता पुरा ।
सोऽन्यदान्तःपुरे भ्राम्यंस्तां कृशां वीक्ष्य सुन्दरीम् ॥ १२१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नृपः सकोपस्तान् भृत्यानूचे किं रे मदोकसि ।
धान्यादि सर्वथा नष्टं, यदीदृग् दृश्यते त्वियम् ॥ १२२॥ युग्मम्॥
ते प्रणत्योचिरे यूयं यदादि प्रस्थिता इतः ।
तदादि सुन्दर्याचाम्लादितपः कर्तुमुद्यता ॥ १२३॥
तस्मादियं कृशाङ्ग्यासीदित्युक्ते तैः प्रजाप्रभुम् ।
समेत्य सुन्दरी रङ्गत्संवेगा श्राग् व्यजिज्ञपत् ॥ १२४॥
भ्रातः! स्याच्चेत्तवादेशः स्वीकुर्वे चरणं तदा ।
तेनाप्यसावनुज्ञाता तातमूले व्रतं ललौ ॥ १२५॥
एकदा संसदासीनो भरतः स्वान्नियोगिनः ।
प्रोचे मदभिषेकार्थं, के के भूपाः समैयरुः ॥ १२६॥
तैरूचे सोदरान्मुक्त्वा सर्वेऽप्यत्रागता इति ।
श्रुत्वाष्टानवतिभ्रात्रर्थं दूतान् प्राहिणोन्नृपः ॥ १२७॥
यदि राज्यश्रिया कार्यं श्रयध्वं भरतं तदा ।
दूतैरितीरितास्तेऽपि, पर्यालोच्यावदन्निदम् ॥ १२८॥
राज्यं विभज्य तातेन दत्तं नो भरतस्य च ।
सेव्यमानः किमस्माकं सोऽधिकाय भविष्यति ॥ १२९॥
न सेवां न च संग्रामं, तेनामा कुर्महे वयम् ।
तातादेशं विनेत्युक्त्वा ययुस्ते वृषभान्तिकम् ॥ १३०॥
अमा-सह ।
जिनं विनम्य ते मूर्ध्नि घटिताञ्जलिकुड्मलाः ।
स्तुतिं विधाय विज्ञप्तिं चक्रुर्वक्रेतराशयाः ॥ १३१॥
दीक्षायाः समये तातपादै राज्यानि यानि वः ।
दत्तानि तानि भरतोऽस्मत्त आच्छेत्तुमिच्छति ॥ १३२॥
तात! त्वदङ्गजीभूय, वयं क्लीबा इवाधुना ।
भरतस्य कथं सेवां, कुर्महे मानमर्दिनीम् ॥ १३३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चेदाज्ञा तातपादानां, तदा तेन समं वयम् ।
कुर्मो रणाङ्गणं यस्मान्मार्गोऽयं धैर्यशालिनाम् ॥ १३४॥
ततस्तानृषभस्वामी, पुत्रानाह महाशयाः! ।
समं भावारिवारेण, कुरुध्वं युद्धमुद्धतम् ॥ १३५॥
येन वो विश्वविश्वानामैश्वर्यं जायतेऽचिरम् ।
अतो विनश्वरं राज्यं, त्याज्यं स्वहितहेतवे ॥ १३६॥
इत्यर्हद्वाक्यमाकर्ण्य रङ्गत्संवेगवेगतः ।
तेऽष्टानवतिसोदर्यास्तातान्ते जगृहुर्व्रतम् ॥ १३७॥
असिधाराव्रतमिव पालयन्तो महाव्रतम् ।
घातिकर्मक्षयात्प्रापुः केवलं वृषभाङ्गजाः ॥ १३८॥
अहो धैर्यमहो सत्त्वमहो संवेगरङ्गता।
इति दूताश्चिन्तयन्तस्तद्वृत्तं स्वामिने जगुः ॥ १३९॥
सभायां पुनरन्येद्युरासीनो भरतेश्वरः ।
श्रीसुषेणेन सेनान्या, प्रणिपत्येत्यभाष्यत ॥ १४०॥
षट्खण्डभरतक्षेत्रे, जितेऽपि भवता विभो! ।
केनापि हेतुनाद्यापि, चक्रं नैत्यायुधालयम् ॥ ४१॥
भरतः प्राह किं सोऽपि, भरतेऽद्यापि विद्यते ।
वीराग्रणीर्मदीयाज्ञां, यो न धत्ते स्वमूर्धनि ॥ १४२॥
सेनान्या पुनरप्यूचे, देव! सर्वेऽपि पार्थिवाः ।
त्वया विनिर्जिताः कामदेवेनेवेह देहिनः ॥ १४३॥
किन्त्वेको वृषभस्वामिनन्दनोऽस्त्यनुजस्तव ।
**बहलीशो बाहुबलिः** स्वबाहुबलगर्वितः ॥ १४४॥
यस्य प्रचण्डदोर्दण्डचण्डतां वीक्ष्य वैरिषु ।
धुतं न स्वशिरं कैः कैर्देवदानवमानवैः ॥ १४५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

देवास्मिन्नजिते जिग्ये किं त्वयेति निशम्य सः ।
दूतं **सुवेगं** धीसिन्धुं प्राहिणोद् बान्धवं प्रति ॥ १४६ ॥
सोऽपि स्यन्दनमारूढः परिवारपरीवृतः ।
वार्यमाणोऽप्यशकुनैश्चचाल बहलीं प्रति ॥ १४७ ॥
घोषान् ग्रामसमान् ग्रामान्नगरीसन्निभान् पुरः ।
स्वःपुरीजित्वरीः पश्यन्निति चेतस्यचिन्तयत् ॥ १४८ ॥
एतद्देशश्रियामग्रेऽस्माकं भूपस्य संपदः ।
तृणायन्ते ह्यतो बाहुबलिरेव नरेश्वरः ॥ १४९ ॥
आर्षभ्यारक्षितां **तक्षशिलां** श्रीशालिशालिताम् ।
पश्यन् दूतो ययौ राजकुलं राजन्यसंकुलम् ॥ १५० ॥
सभायामासनासीनं शक्रवद्विबुधाश्रितम् ।
सौनन्देयं नमश्चक्रे दूतो द्वाःस्थनिवेदितः ॥ १५१ ॥
दूतं भरतभूभर्तुरुपवेश्योचितासने ।
सप्ताङ्गराज्यकुशलं भ्रातुः पप्रच्छ भूपतिः ॥ १५२ ॥
दूतोऽपि तं प्रणम्याह राजन्! भरतचक्रिणः ।
कुतो भीर्विद्यते तस्य त्वादृशो यस्य बान्धवः ॥ १५३ ॥
षष्टिवर्षसहस्रेण कृत्वा दिग्जयमार्षभिः ।
विनीतामागतो भूपैरभिषिक्तः सवासवैः ॥ १५४ ॥
स द्वादशाब्दिके राज्याभिषेके बान्धवान्निजान् ।
पश्यन्ननागतान् प्रीत्याह्वातुं प्रैषीत्तरां नरान् ॥ १५५ ॥
केनापि हेतुना तेऽष्टानवतिश्चक्रिबान्धवाः ।
भरतं नाययुः किन्तु तातान्ते जगृहुर्व्रतम् ॥ १५६ ॥
तदेहि देव! सेवाभिः प्रमोदय निजाग्रजम् ।
पिशुनानां प्रवेशश्च युवयोर्मा स्म भूत् क्वचित् ॥ १५७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वीरोऽस्म्यहमिति त्वं चेदवजानासि नः प्रभुम् ।
तदा ससैन्यस्तत्सैन्यसमुद्रे मङ्क्षु मङ्क्ष्यसि ॥ १५८॥
यस्यैकेनापि सेनान्या कम्पिता ससुरा मही ।
तस्यापतन्तीं पृतनां निरोद्धुं कः क्षमो भटः ॥ १५९॥
यस्य कोशं पूरयन्ति विभवैर्निधयो नव ।
चतुर्दश च रत्नानि, दृष्ट्वेन्द्रोऽपि स्पृहायते ॥ १६०॥
रथवारणतार्क्ष्याणां, लक्षाश्चतुरशीतयः ।
ग्रामाणां च पदातीनां कोट्यः षण्णवतिप्रमाः ॥ १६१॥
यक्षषोडशसाहस्री तया द्विगुणिता नृपाः ।
नीवृतस्तत्प्रमाणाश्च ताभ्यो द्विगुणयोषितः ॥ १६२॥
द्वासप्ततिसहस्राणि पुराणां कोटयस्त्रयः ।
नियोगिनां हलानां च तत्तुल्यास्ते न कोऽधुना ॥ १६३॥
बिभ्रतोऽस्य करे चक्रं स्थास्नुः शक्रोऽपि नो पुरः ।
तत्कुबुद्धिं परित्यज्य राजन्! श्रीभरतं भज ॥ १६४॥
इत्युक्त्वा विरते दूते, कल्पान्तक्षुब्धवार्धिवत् ।
उच्चैस्वरमभाषिष्ट, राजा बाहुबलिर्बली ॥ १६५॥
साधु रे दूत! वक्तासि, यदित्थं वक्षि मत्पुरः ।
यादृशाः खलु नेतारस्तादृशाः सेवका अपि ॥ १६६॥

---

स ज्यायान् वयसद्ध्य्रा च बान्धवैरल्पवैभवैः ।
समेतैस्त्रपते तेन, न यामो भरतान्तिकम् ॥ १६७॥
बन्धूनां तातदत्तानि, साम्राज्यानि जिघृक्षया ।
अहो प्रकटिता प्रीतिः सुवेग! स्वामिना तव ॥ १६८॥
ज्यायसा बन्धुना सार्धं न योद्धुमुचितं हि नः ।
मत्वेति राज्यं मुक्त्वा च कनिष्ठास्तातमन्वगुः ॥ १६९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथैव तव नाथेन दूत! त्वत्प्रेषणान्मयि ।
प्रेम प्रथयता सत्यं दुर्जनोपमताश्रिता ॥ १७० ॥
सेन्द्रा देवगणा यस्यादरं ददति संमदात् ।
तत्तातस्यैव माहात्म्यं न तु तस्य त्वदीशितुः ॥ १७१ ॥
आवयोः सरयूतीरे तातागे्र क्रीडतोर्मिथः ।
यदरे दूत! भरतः प्रत्यक्षं द्युसदां मया ॥ १७२ ॥
उत्क्षिप्य नभसोऽधस्तान्निपतन् करकुड्मले ।
धृतः कृपालुना तत्किं विस्मृतं भवदीशितुः ॥ १७३ ॥ युग्मम् ॥
किं सेनान्या समृद्ध्या किं, किं चम्वा च बिभेषि माम् ।
मयि रुष्टेऽखिलं ह्येतदन्तरिक्षारविन्दवत् ॥ १७४ ॥
तातस्य तस्य पुत्रत्वादियत्कालमुपेक्षितः ।
यन्मया दूत! तेनाभूद् भरतो भरताधिपः ॥ १७५ ॥
तद् दूत! त्वरितं गत्वा कथयैतन्निजप्रभोः ।
यथा सोऽप्येत्य दोर्दण्डविक्रमं दर्शयेन्मम ॥ १७६ ॥
बलिना बाहुबलिना दूत इत्थं निराकृतः ।
गत्वा भरतभूभर्त्रे तत्स्वरूपं न्यवेदयत् ॥ १७७ ॥
तच्छ्रुत्वा भरतो भम्भां प्रयाणस्याश्वताडयत् ।
चतुरङ्गचमूयुक्तः प्रतस्थे चानुजं प्रति ॥ १७८ ॥
रथैस्तुरङ्गमैरुष्ट्रैर्वारणैर्वेसरैरपि ।
चलद्भिरचलापीठं, निर्वाहनमभूदिव ॥ १७९ ॥
चक्ररत्नानुगश्चक्रवर्ती तक्षशिलापुरः ।
सविधे शिबिरावासान् प्रविधाय स तस्थिवान् ॥ १८० ॥
अथ बाहुबलिक्ष्मापः कृतप्रस्थानमङ्गलः ।
यात्राढक्कां वादयित्वा चचाल भरतं प्रति ॥ १८१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कुमारैर्मन्त्रिभिर्भूपैः सुभटैरुद्भटैरपि ।
समन्तात्परिवव्रेऽसौ कलभैरिव यूथपः ॥ १८२॥
सुनन्दानन्दनश्चक्रिपृतनासविधे निजम् ।
कटकं स्थापयामास संपासंपातभं द्विषाम् ॥ १८३॥
चमूयामलयोद्धानां युयुत्सूनां परस्परम् ।
कथंचन त्रियामापि कोटियामाजनि ध्रुवम् ॥ १८४॥
उदयाद्रिं गते भानौ सैन्ययोरुभयोरपि ।
रणतूर्यध्वनिरभूदुत्साह इव जङ्गमः ॥ १८५॥
कल्पान्तकालसंक्षुब्धदुग्धाब्धिध्वानसंनिभाः ।
उल्लेसुर्वरवीराणां सिंहनादाः परस्परम् ॥ १८६॥
उदायुधा महायोधा युद्धमाधातुमुद्यताः ।
यावत्तावत्सुरै रुद्धाः श्रीनाभेयजिनाज्ञया ॥ १८७॥
स्वस्वामिभक्ता हे वीरास्तावत्तिष्ठत सुस्थिताः ।
बोधयामस्तमां यावद्वयं भवदधीश्वरौ ॥ १८८॥
इतीरिताः सुरैर्वीरास्तथैवास्थुस्तयाज्ञया ।
जाङ्गुलीविद्यया बाढं स्तम्भिता भुजगा इव ॥ १८९॥
अथ श्रीभरतो बाहुबलिश्च भ्रातराविमौ ।
विहितस्नाननेपथ्यौ जिनमाराद्धुमुद्यतौ ॥ १९०॥
गन्धधूपाक्षतसुमदीपामिषफलाम्बुभिः ।
युगादिदेवमर्चित्वा तुष्टौ तुष्टुवतुर्नृपौ ॥ १९१॥
जयादिमजिनाधीश! जय विश्वैकवत्सल! ।
जय वन्दारुदेवेन्द्र! जय संसारपारग! ॥ १९२॥
तात! त्वदंह्रिरजसा, भालं तिलकयन्ति ये ।
मन्ये त्रिलोकीतिलकीभावं भव्या भजन्ति ते ॥ १९३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्यादि देवं संस्तूय कुञ्जरौ राजकुञ्जरौ ।
आरुह्यासह्यविक्रान्ती स्वं स्वं शिबिरमेयतुः ॥ १९४॥
तौ बन्धू स्वस्वसैन्येन यावद् योद्धुं समुद्यतौ ।
तावद् व्योमस्थिता देवा इत्यूचुर्जयवादिनः ॥ १९५॥
हंहो न युज्यते योद्धुं युवयोः स्वामिपुत्रयोः ।
तदयं समरारम्भस्त्याज्यः प्राज्यजनान्तकृत् ॥ १९६॥
अथवा राज्यलुब्धौ चेत्तदा युद्धं निरायुधम् ।
दृगाद्यैः कुरुतं येन कार्यसिद्धिर्न नृक्षयः ॥ १९७॥
ओमित्यङ्गीकृते ताभ्यां ततो देवा दिवि स्थिताः ।
दूरीभूय तयोर्युद्धं विलोकयितुमुद्यताः ॥ १९८॥
कुञ्जरादवरुह्याथ तावुभौ राजकुञ्जरौ ।
मल्लाविवाप्रतिमल्लौ प्रविष्टौ समराजिरम् ॥ १९९॥
उभावपि महौजस्कौ कम्पयन्तौ महीं क्रमैः ।
दृष्टियुद्धेन योद्धव्यमित्युक्त्वा संमुखं स्थितौ ॥ २००॥
तौ बन्धू निर्निमेषाक्षौ सौधर्मेशानराजयोः ।
लीलां ललन्तौ लेखैश्च पुरुषैश्च निरीक्षितौ ॥ २०१॥
श्रीबाहुबलिवक्त्रेन्दोः प्राप्येवोदयमार्षभेः ।
आद्यस्य नयनाम्भोजं संकोचं श्रागशिश्रियत् ॥ २०२॥
पुष्पवृष्टिः सुरैश्चक्रे दृष्ट्वा बाहुबलेर्जयम् ।
**सोमप्रभा**दिभिर्वीरैर्हर्षकोलाहलस्तथा ॥ २०३॥
बलिना बाहुबलिना निर्जिते भरते सति ।
सूर्यापाय इवाम्भोजैर्निदद्रे चक्रिसैनिकैः ॥ २०४॥
पुनस्ताभ्यां वचोयुद्धेऽन्योन्यमङ्गीकृते सति ।
ततश्चक्री चकारोच्चैः क्ष्वेडां जितघनारवाम् ॥ २०५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्स्पर्धया सिंहनादे सौनन्देयेन निर्मिते ।
चुक्षुभुर्वार्द्धयः कम्पमापतुः शेषकूर्मकौ ॥ २०६ ॥
देवाङ्गना भयभ्रान्ता मुमूर्च्छुः कातराः पुनः ।
भेजुर्देवा दिगन्तानि साचलापि चलाचला ॥ २०७ ॥
एवं कुर्वाणयोः सिंहनादान् वादजिगीषया ।
चक्रिवाक्तटिनी मग्ना बहलीशरवार्णवे ॥ २०८ ॥
उक्तिप्रत्युक्तियुक्तेन वाग्युद्धेन विपश्चिता ।
श्रीबाहुबलिवीरेण विजिग्ये भरतेश्वरः ॥ २०९ ॥
अथ तौ बाहुयुद्धेन युध्यमानौ गजाविव ।
निरीक्ष्य केषां वीराणां निरगालि मदेन न ॥ २१० ॥
चक्री बाहुबलेर्बाहौ लग्नः कपितुलां ललौ ।
सौनन्देयश्च तद्दोसं मृणालवदनामयत् ॥ २११ ॥
श्रीबाहुबलिना बाहुयुधा भरतचक्र्यपि ।
जिग्येतमां यत्तदहो रणस्य विषमा गतिः ॥ २१२ ॥
नियुद्धेऽथ समारब्धे मुष्टिना भरतेश्वरः ।
बन्धोरताडयद्रक्षः शिशुः कन्दुकवद् भुवम् ॥ २१३ ॥
श्रीबाहुबलिना मुष्ट्या ताडितो हृदि मूर्च्छितः ।
चक्री पपात भूपीठे छिन्नमूल इव द्रुमः ॥ २१४ ॥
सौनन्देयः स्वोत्तरीयं व्यजनीकृत्य मूर्च्छितम् ।
चक्रिणं वीजयाञ्चक्रे स्नेहस्याहो विजृम्भितम् ॥ २१५ ॥
भरतः प्राप्तचैतन्यो भृत्यवद् भ्रातरं पुरः ।
निरीक्ष्याधोमुखस्तस्थौ महतां हि स्वतस्त्रपा ॥ २१६ ॥
कोपात्पुनर्नवीभूतो दण्डरत्नेन चक्रभृत् ।
निष्कृपोऽहन् शिरो भ्रातुरहो लोभविजृम्भितम् ॥ २१७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्प्रहारेण भूमध्येऽमज्जदाजानु चानुजः ।
ततश्च निर्गतो रेजेतमामभ्रादिवार्यमा ॥ २१८ ॥
सौनन्देयोऽपि दण्डेन यमलाममलं वहन् ।
रुषारुणेक्षणो मूर्ध्नि जघान भरतेश्वरम् ॥ २१९ ॥
तद्दण्डस्याभिघातेन भरतः पृथिवीतले ।
क्षणादमज्जदाकण्ठपीठं निर्घातगोलवत् ॥ २२० ॥
मूर्च्छाया विगमे भूमेः क्षणेन भरतेश्वरः ।
निःससार सरिन्नाथादिव कैरविणीपतिः ॥ २२१ ॥
अथोद्विग्नमनाश्चक्री चेतसीति व्यचिन्तयत् ।
जितोऽमुनाखिलैर्युद्धैः किं चक्री न भवाम्यहम् ॥ २२२ ॥
तदा तदीयविज्ञातस्वान्तैर्यक्षकदम्बकैः ।
सूर्यमण्डलवद् दीप्तं चक्रं चक्रिकरेऽर्पितम् ॥ २२३ ॥
चक्रं चक्रभृता मुच्यमानं वीक्ष्यर्षभाङ्गभूः ।
दध्यौ किमेतद् दण्डेनाङ्गारवच्चूर्णयाम्यहम् ॥ २२४ ॥
यद्वास्य रक्षकान् यक्षान् दलयामि किमब्जवत् ।
अथवास्यापि पश्यामि, क्षणमेकं पराक्रमम् ॥ २२५ ॥ युग्मम् ॥
एवं विमृशते तस्मै चक्रिणा चक्रमुज्झितम् ।
प्रदक्षिणां चकाराशु सुश्रावक इवार्हतः ॥ २२६ ॥
प्रभविष्णु न चक्रं हि सामान्येऽपि स्वगोत्रजे ।
किं पुनस्तादृशे शूरे चरमाङ्गधरे नरे ॥ २२७ ॥
प्रतिज्ञायाशस्त्रयुद्धं मयि शस्त्रविवर्जिते ।
त्यक्तसन्धो राज्यलुब्धश्चक्रं चक्री मुमोच यत् ॥ २२८ ॥
चक्रिपाणिं गते चक्रे तुरङ्ग इव मन्दुराम् ।
सुनन्दानन्दनः कोपादिति चेतस्यचिन्तयत् ॥ २२९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यदेनं चक्रिणं चक्रसहितं चूर्णयाम्यहम् ।
इति ध्यात्वार्षभिर्मुष्टिमुद्यम्यागात्तदन्तिकम् ॥ २३० ॥
दध्यौ चेमां धियं धिग्मे बान्धवध्वंसधाविनीम् ।
धिक् च राज्यश्रियो ह्येता यदर्थं युध्यते जनैः ॥ २३१ ॥
निहन्ति पितरं पुत्रस्तनयं जनकः पुनः ।
यदर्थमत्यसंतुष्टस्तद्राज्यं त्याज्यमेव हि ॥ २३२ ॥
ते कनिष्ठा अपि ज्येष्ठा ये तातचरणान्तिके ।
तृणवद्राज्यमुत्सृज्य भ्रातरो जगृहुर्व्रतम् ॥ २३३ ॥
तन्नाभेयसुतीभूय त्यक्त्वा राज्यमनर्थदम् ।
तातेनाङ्गीकृतं मार्गमव्ययश्रियमाश्रये ॥ २३४ ॥
उत्पाटितोऽयं मुष्टिर्मे निष्फलो मा भवत्विति ।
निश्चित्य स्वकचांस्तेनैवोच्चखानर्षभाङ्गभूः ॥ २३५ ॥
व्रतज्येष्ठकनिष्ठानां कथं वन्दे पदाम्बुजान् ।
इत्यहंकृत्य चित्तेऽसौ कायोत्सर्गेण तस्थिवान् ॥ २३६ ॥
अहो धैर्यमहो सत्त्वमहो वैराग्यधीरिति ।
स्तुवानास्त्रिदशाः पुष्पवृष्टिं तदुपरि व्यधुः ॥ २३७ ॥
भरतस्तं तथाभूतं स्वं च दृष्ट्वा तथाविधम् ।
नम्रीभूतः क्षमयितुं, श्रीबाहुबलिमस्तवीत् ॥ २३८ ॥
धन्यस्त्वमेव योऽत्याक्षी राज्यं मदनुकम्पया ।
अहं तु पापो यदसंतुष्टस्त्वामभिभूतवान् ॥ २३९ ॥
पुत्रस्त्वमेव तातस्य येन तन्मार्ग आदृतः ।
तातपुत्रोऽप्यहं स्यां चेद् बोभवीमि भवादृशः ॥ २४० ॥
इत्थं बाहुबलिं स्तुत्वा चक्री राज्येऽस्य नन्दनम् ।
निवेश्य **सोमयशसं,** विनीतायां समागमत् ॥ २४१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शीतोष्णवातवर्षादीन्, सहमानः परीषहान् ।
अकम्पिताङ्गो भगवांस्तस्थिवान् सानुमानिव ॥ २४२॥
वल्लीभिर्वेष्टितो दर्भाङ्कूरैर्विद्धपदद्वयः ।
नीडजैश्च कृतावासो नाचलत्तपसो मुनिः ॥ २४३॥
निराहारोऽपि राजर्षिर्वर्षं यावदवस्थितः ।
न प्राप केवलज्ञानमहो मानविजृम्भितम् ॥ २४४॥
अथ प्रथमतीर्थेशः शिष्ये ब्राह्मीं च सुन्दरीम् ।
श्रीबाहुबलिबोधायानुशिष्य प्राहिणोल्लघु ॥ २४५॥
ते व्रतिन्यौ मुनेः पार्श्वं गत्वा तमभिनम्य च ।
प्रोचतुर्भ्रातरारूढैरिभं न ज्ञानमाप्यते ॥ २४६॥
इत्युदित्वा गते साध्व्यौ यथास्थानं ततो यतिः ।
तद्वाक्यं चिन्तयामास परमब्रह्म योगिवत् ॥ २४७॥
चरणस्थायिनो मेऽद्य त्यक्तसावद्यकर्मणः ।
क्व गजारोहणं साध्व्यौ चेमे नासत्यजल्पिके ॥ २४८॥
आ ज्ञातं यन्मयाचिन्ति लघून् बन्धून् मुनीन् कथम् ।
वन्दिष्य इत्यहं जाने मानेभारोहणं हि तत् ॥ २४९॥
दुश्चिन्तितमिदं गत्वाधुनापि क्षमयाम्यहम् ।
इति ध्यात्वा पदं यावदुदस्थापयदार्षभिः ॥ २५०॥
तावद् व्रततिवद् घातिकर्मसु त्रुटितेष्वथ ।
श्रीबाहुबलिराजर्षेरभूत्केवलमुज्ज्वलम् ॥ २५१॥
उत्पन्नकेवलज्ञानविलोकितजगत्त्रयः ।
सौनन्देयोऽर्हतः पार्श्वे, जगामेन्दू रवेरिव ॥ २५२॥
प्रभुं प्रदक्षिणीकृत्य तीर्थाय प्रणिपत्य च ।
पर्षदं केवलज्ञानभाजां बाहुबलिः श्रितः ॥ २५३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इतश्च ऋषभस्वामी, पुण्डरीकादिसाधुयुक् ।
भव्यान् प्रबोधयन् प्राप स्फटिकाचलचूलिकाम् ॥ २५४॥
देवैः समवसरणं सिंहासनयुतं कृतम् ।
भगवांस्तदलञ्चक्रे पूर्वाचलमिवार्यमा ॥ २५५॥
तथास्थं वृषभं वीक्ष्य वनपालाः समागताः ।
चक्रिणं वर्धयाञ्चक्रुर्जिनागमनवार्तया ॥ २५६॥
तांश्च दानेन संतोष्य भरतः सपरिच्छदः ।
वन्दितुं तातपादाब्जानगादष्टापदं नगम् ॥ २५७॥
संत्यज्य राज्यचिह्नानि कृत्वा तिस्रः प्रदक्षिणाः ।
जिनं नत्वोपविश्यापि सोऽशृणोद्धर्मदेशनाम् ॥ २५८॥
देशनान्ते मुनीन् भ्रातृन्, पुत्रान् पौत्रांश्च चक्रभृत् ।
विलोक्य प्रोल्लसत्प्रेमा चेतस्येवमचिन्तयत् ॥ २५९॥
बन्धून् विना भुज्यमाना, भोगा रोगोपमा मम ।
तदात्तराज्यदानेन पुनः संतोषयामि तान् ॥ २६०॥
इति निश्चित्य भरतो निजान् भ्रातॄन्निमन्त्रयन् ।
निषिद्धः स्वामिना तस्थौ, स्तम्भयन्त्रितदन्तिवत् ॥ २६१॥
यदमी मुनयः शान्ताः क्षान्ता दान्ता गतस्पृहाः ।
किं ते राज्येन कुर्वन्ति, सिद्धिसाम्राज्यलिप्सवः ॥ २६२॥
इति श्रुत्वा ततश्चक्री भोज्यादि मदुपाहृतम् ।
प्राणधाराय भोक्ष्यन्तेऽमी यताश्चिन्तयन्निदम् ॥ २६३॥
शकटानां पञ्चशतीं भृत्वा भोज्यै रसोत्तरैः ।
आनाय्य पूर्ववत्साधून् भ्रातृन् भक्त्या न्यमन्त्रयत् ॥ २६४॥ युग्मम् ॥
तदाह भगवान् राजन्! राजपिण्डं न कल्पते ।
भोक्तुं मुनिजनस्येति श्रुत्वा खेदमगान्नृपः ॥ २६५॥

Jain Education International	For Personal & Private Use Only	www.jainelibrary.org

अधन्यानां शिरोरत्नमहमेव महीतले ।
यस्यान्नमात्रमपि नोपकरोति महात्मनाम् ॥ २६६ ॥
एवं विषादविधुरं भरतं वीक्ष्य वासवः ।
प्रणामपूर्वमप्राक्षीद् भगवन्तमवग्रहान् ॥ २६७ ॥
प्रभुः प्राहावग्रहाः स्युः पञ्चधा विबुधाधिप! ।
शक्रचक्रिनृपागारिसाधुसंबन्धभेदतः ॥ २६८ ॥
एतेष्वद्भुतपुण्येषु बाध्यन्ते पूर्व उत्तरैः ।
इत्युक्ते स्वामिना शक्रः कृताञ्जलिपुटो जगौ ॥ २६९ ॥
लोकार्द्धे दक्षिणे नाथ! ये सन्ति यतिसत्तमाः ।
अहंताननुजानामि निजावग्रहदानतः ॥ २७० ॥
इत्युक्त्वा विरते शक्रे भरतश्चक्रवर्त्त्यपि ।
भरतावग्रहानुज्ञां तातान्ते व्रतिनां ददौ ॥ २७१ ॥
सधर्मचारिणं शक्रं पप्रच्छ भरतेश्वरः ।
मुनिमुक्तैरिमैर्भोज्यैः किं करोमि सुरेश्वर! ॥ २७२ ॥
सोऽप्याहोत्तमपात्रेभ्यो देहीति गदितो नृपः ।
साधून् विहाय कान्यत्र पात्राण्येवमचिन्तयत् ॥ २७३ ॥
आ ज्ञातं सन्ति मत्पुर्यां श्रमणोपासका जनाः ।
अतस्तेषु नियोज्यैतत् सुकृतान्यर्जयाम्यहम् ॥ २७४ ॥
श्रीयुगादिजिनं नत्वा भरतो नगरीं गतः ।
वासनावासितस्वान्तः, श्राद्धान् भोज्यैरभोजयत् ॥ २७५ ॥
तानुक्तवांश्च यन्नित्यं भोक्तव्यं मम भोजनम् ।
प्रतिप्रातः समेत्यैवं पठनीयं च मत्पुरः ॥ २७६ ॥
जितो भवान् वर्धते भीस्तस्मान्मा हन मा हन ।
प्रपद्येति तथाचक्रुः श्राद्धाः स्वाध्यायतत्पराः ॥ २७७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रमद्वरोऽपि तद्वाक्ये, श्रवणातिथिताङ्गते ।
सोऽक्षेपं भरतो दध्यावसंबद्धमिदं हि किम् ॥ २७८ ॥
हुं ज्ञातं विषयैर्जिग्ये, वर्धते तत एव भीः ।
मा हन्यां प्राणिनस्तस्मात्साधु भोः स्मारितोऽस्म्यहम् ॥ २७९ ॥
इत्थं श्राद्धान् प्रकुर्वाणान्, भुञ्जानांश्च नृपौकसि ।
वीक्ष्यापरेऽप्यौदरिका भूयांसस्तैः सहामिलन् ॥ २८० ॥
तद्भोजनकृतौ श्रान्ताः सूदाः श्रीभरतं जगुः ।
स्वामिन्! सत्यैरसत्यैर्वा श्राद्धैरुद्वेजिता वयम् ॥ २८१ ॥
तच्छ्रुत्वा भरतः श्राद्धानाकार्य च परीक्ष्य च ।
काकिणीरेखया शुद्धश्राद्धोरस्त्रिरलाञ्छयत् ॥ २८२ ॥
प्रतिषण्मासि भूशक्रो व्रताद्यैस्तान् विमृश्य सः ।
काकिणीनामरत्नेनालाञ्छयत् त्रिरुपासकान् ॥ २८३ ॥
जिनस्तुतियतिश्राद्धसामाचारीनिवेदकान् ।
तत्स्वाध्यायकृते चक्री वेदानार्यांश्चकार सः ॥ २८४ ॥
ते माहनाः क्रमादत्र विश्रुता ब्राह्मणा इति ।
**काकिणीरत्नरेखाश्च** गता यज्ञोपवीतताम् ॥ २८५ ॥
क्रमाद् भरतसन्तानभ**वादित्ययशोमुखैः** ।
रैरूप्यसूत्रनिर्वृत्तोपवीतैस्ते च लाञ्छिताः ॥ २८६ ॥
वीतरागस्तुतियतिश्राद्धधर्मपवित्रिताः ।
वेदाः पश्चाद्याज्ञवल्क्याद्यैरनार्या विनिर्मिताः ॥ २८७ ॥
दानं ददानः श्राद्धेभ्यो विदधद् जिनपूजनम् ।
भुञ्जानो भङ्गुरान् भोगांश्चान्वशाद् भरतः प्रजाम् ॥ २८८ ॥
युगादिदेवमन्येद्युरायातं स्फटिकाचले ।
निशम्य भरतो नन्तुं जगाम सपरिच्छदः ॥ २८९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जिनं नत्वाद्भुतामृद्धिं प्रभोर्वीक्ष्य क्षमाप्रभुः ।
पप्रच्छ त्वादृशोऽर्हन्तो मादृशाश्चक्रिणः कति ॥ २९० ॥
भविष्यन्त्यवसर्पिण्यां ततः प्राह प्रभुर्नृप! ।
अजितः संभवोऽभ्यग्रनन्दनः सुमतिर्जिनः ॥ २९१ ॥
पद्मप्रभः सुपार्श्वश्च श्रीमांश्चन्द्रप्रभः प्रभुः ।
सुविधिः शीतलः श्रेयान् वासुपूज्यजिनेश्वरः ॥ २९२ ॥
विमलोऽनन्तजिद्धर्मः शान्तिः कुन्थुररो जिनः ।
श्रीमल्लिः सुव्रतनमी श्रीनेमिः पार्श्वपारगः ॥ २९३ ॥
श्रीवीरश्चेति विख्यातास्त्रयोविंशतितीर्थपाः ।
यथावद्वर्णमानकोपेता मत्सदृशर्द्धयः ॥ २९४ ॥ पञ्चभिः कुलकम् ॥
सगरो मघवा सनत्कुमारः शान्तिकुन्थ्वराः ।
सुभूमः पद्महरिषेणौ जयो ब्रह्मदत्तराट् ॥ २९५ ॥
इत्येकादश षट्खण्डभरतेशा भवत्समाः ।
भवितारोऽपरांश्चार्धचक्र्यादीन् भूपते! शृणु ॥ २९६ ॥
त्रिद्विपृष्ठौ स्वयंभूश्च पुरुषोत्तमसिंहकौ ।
श्रीपुरुषपुण्डरीको दत्तो नारायणो हरिः ॥ २९७ ॥
अचलो विजयो भद्रः सुप्रभश्च सुदर्शनः ।
आनन्दो नन्दनः पद्मो रामो विष्णुद्विषस्त्वमी ॥ २९८ ॥
अश्वग्रीवस्तारकश्च, मेरुकोवधिरोपि चँ ।
निशुम्भबलिप्रह्लादलङ्केशमगधेश्वराः ॥ २९९ ॥
इत्थं दशार्हा हलिनस्तद्द्विषश्च नवप्रमाः ।
भरतार्धे भविष्यन्ति शलाकापुरुषास्त्वमी ॥ ३०० ॥
इति श्रुत्वा प्रभोर्वाणीं पुनरप्याह चक्रभृत् ।
नाथ! कोऽपि समाजेऽस्मिन्नर्हज्जीवोऽस्ति वा नवा ॥ ३०१ ॥

* मेरको मधुरोऽपि च इति पाठः समीचीनो भाति ।
तुलना–अभिधानचिन्तामणिनाममाला । ३।६९९।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वाम्याह विद्यते वत्स! मरीचिस्तव नन्दनः ।
त्यक्तव्रतस्त्रिदण्ड्याद्योऽर्धचक्री पोतने पुरे ॥ ३०२॥
प्रत्यग्विदेहे मूकाग्रविदेहापुरि चक्रभृत् ।
भरतेऽस्मिन्नेव भावी श्रीवीरश्चरमो जिनः ॥३०३॥ युग्मम् ॥
इत्याकर्ण्य स उत्थाय, मरीचेः सविधं गतः ।
भोस्त्रिदण्डिन्न ते वेषं, न व्रतं नार्धचक्रिताम् ॥ ३०४॥
न चक्रित्वं च वन्देऽहं किंतु यत् त्वं जिनोऽन्तिमः ।
भावी श्रीवीर इत्युक्त्वा तं नत्वा चक्र्यगाद् गृहम् ॥ ३०५॥
मरीचिरपि तच्छ्रुत्वोर्ध्वीकृत्य भुजयामलम् ।
नृत्यन्नित्थमभाषिष्ट जिनेष्वाद्यः पितामहः ॥ ३०६॥
चक्रिष्वाद्यः पिताहं तु वासुदेवेषु चक्र्यपि ।
जिनेषु चरमश्चाहो! मदीयं कुलमुत्तमम् ॥ ३०७॥
इति मदान्नीचैर्गोत्रं, बद्धं कर्म मरीचिना ।
उपार्ज्यतासंख्यकालवेद्यं गर्वो हि दुर्वहः ॥ ३०८॥
अन्यदा भरतश्चक्री श्रीनाभेयजिनेशितुः ।
निर्वाणस्थानकाभ्यर्णेऽष्टापदाद्रौ समागतः ॥ ३०९॥
श्रीमद्वर्धकिरत्नेन चतुर्गव्यूतिविस्तरम् ।
क्रोशत्रयसमुच्छ्रायं सर्वरत्नशिलामयम् ॥ ३१०॥
निजश्रियाहसदिव स्वर्विमानपरंपराम् ।
चैत्यं **सिंहनिषद्या**ख्यं कारयामास चक्रभृत् ॥ ३११॥ कुलकम् ॥
स तदन्तर्निजनिजोच्चत्ववर्णाङ्कलक्षिताः ।
चतुर्विंशतिदेवानां मूर्ती रात्नीर्न्यवेशयत् ॥ ३१२॥
तदग्रे नवनवतिभ्रातृमूर्तीरकारयत् ।
तासां पुरश्च स्वां मूर्त्तिं भरतस्तदुपासिकाम् ॥ ३१३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तीर्थरक्षाकृते यन्त्रप्रयोगास्तेन तेनिरे ।
दण्डेन दन्तकांश्छित्त्वाकारि दुःसरो गिरिः* ॥ ३१४॥
मेखलाष्टकयुक्तोऽसौ यच्चक्रे चक्रवर्त्तिना ।
ततो**ऽष्टापद** इत्याख्या जगत्यामस्य गीयते ॥ ३१५॥
तन्मूर्तीनां नमस्कारस्नपनार्चनसंस्तुतीः ।
कृत्वा प्रमोदवांश्चक्री विनीतानगरीमगात् ॥ ३१६॥
स्वामिनिर्वाणतः पूर्वपञ्चलक्षीं व्यतीयुषीम् ।
नाज्ञासीद् भरतो भोगाभोगयोगैः सुरेन्द्रवत् ॥ ३१७॥
एकदा विहितस्नानः कृतश्रीखण्डलेपनः ।
धूपधूपितवासांसि संवसानो मृदूनि सः ॥ ३१८॥
मौलौ मौलिमलं बिभ्रत् कर्णयोर्मणिकुण्डले ।
ग्रैवेयकमधिग्रीवं तारं हारमुरःस्थले ॥ ३१९॥
बाहुभूषायुगं बाह्वोः करयोर्वीरकङ्कणान् ।
अङ्गुलीष्वङ्गुलीयानि पदोश्च पदभूषणे ॥ ३२०॥
चतुःषष्टिसहस्रान्तःपुरीभिः परितो वृतः ।
वेत्रिणा दर्श्यमानाध्वा राजादर्शगृहं ययौ ॥ ३२१॥ चतुर्भिः कलापकम्॥
तत्र संक्रान्तसर्वाङ्गोपाङ्गस्य क्षितिशासितुः ।
अङ्गुलीयकमङ्गुल्या एकस्या अपतद् भुवि ॥ ३२२॥
वापीमिव गताम्भोजां भ्रष्टपत्रां लतामिव ।
अङ्गुलीमङ्गुलीयेन विनापश्यत्स निष्प्रभाम् ॥ ३२३॥
किमित्येषाङ्गुली शोभारहितेति विचिन्तयन् ।
अपश्यत्काश्यपीपीठेऽङ्गुलीयं पतितं नृपः ॥ ३२४॥
निःश्रीकाणि किमङ्गान्यन्यान्यप्याभरणैर्विना ।
इति मोक्तुमलङ्कारान् सर्वानप्युपचक्रमे ॥ ३२५॥

---

* इदं चरणं सर्वप्रतिषु सप्ताक्षरीयमेव दृश्यते ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्रमाद्विमुक्तसर्वाङ्गविभूषणगणां तनूम् ।
निःश्रीकां भरतोऽद्राक्षीद् दिवा शशिकलामिव ॥ ३२६॥
अचिन्तयच्च धिगहो वपुषो भूषणैः प्रभाम् ।
तस्मादस्मिन्नसारेऽङ्गे को रज्यति विवेकवान् ॥ ३२७॥
सप्तधातुमयस्यास्य, सबाह्याभ्यन्तराशुचेः ।
देहस्य चिन्त्यमानं हि न हारि किमपीक्ष्यते ॥ ३२८॥
अमुष्याङ्गस्य संसर्गाच्चन्दनादिविलेपनम् ।
क्षणान्मलिनतामेति मषीमेलादिवोदकम् ॥ ३२९॥
धन्यास्ते बान्धवा भोगान् रोगानिव विहाय यैः ।
निरपेक्षतयाङ्गस्य तेपे सिद्धिफलं तपः ॥ ३३०॥
मया तु भोगातृप्तेन प्रमादेनातिदुर्लभम् ।
चिन्तारत्नमिव प्राप्तं नरत्वं हारितं हहा ॥ ३३१॥
इत्थं विचिन्तयन् सम्यगपूर्वकरणक्रमात् ।
क्षपकश्रेणिमारूढः शुक्लध्यानपरायणः ॥ ३३२॥
घातिकर्मक्षयात् प्राप केवलं भरतेश्वरः ।
प्रकाशं वासराधीशः पर्जन्यापगमादिव ॥ ३३३॥ युग्मम् ॥
अथासनप्रकम्पेन, दत्तावधिर्ऋभुप्रभुः ।
चक्रिणः केवलज्ञानोत्सवं कर्तुमुपागमत् ॥ ३३४॥
ऋभुप्रभुः-देवेन्द्रः ।
ऊचे चर्षभपुत्रत्वात्केवलित्वाच्च यद्यपि ।
नमस्योऽसि तथापि त्वं द्रव्यलिङ्गमलङ्कुरु ॥ ३३५॥
ततः श्रीभरतो बाहुबलिवत् पञ्चमुष्टिकम् ।
लोचं चकार प्रव्रज्यासूचकं क्लेशमोचकम् ॥ ३३६॥
तदा शासनदेव्याशूपकृतिं समुपाहृताम् ।
रजोहृतिप्रभृतिकीं जग्राह भरतो जिनः ॥ ३३७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भरतं मुनिमानम्य भावभावितचेतसा ।
केवलज्ञानमहिमा चक्रे शक्रेण सादरम् ॥ ३३८॥
नृपाणां दशसाहस्री भरतानुपदं व्रतम् ।
जग्राह तादृशो भर्तुः सेवा किं नो सुखावहा ॥ ३३९॥
शक्रोऽपि चक्रिणः पुत्रं श्री**आदित्ययशो**भिधम् ।
स्थापयित्वा पितू राज्ये स्वयं स्वं त्रिदिवं ययौ ॥ ३४०॥
ततो देशेषु सर्वेषु राजर्षिर्विहरंश्चिरम् ।
देशनामृतसेकेनोदलासयदिलावनीम् ॥ ३४१॥
केवलज्ञानसमयात् पूर्वलक्षे व्यतीयुषि ।
अष्टापदगिरिं प्राप श्रीमान् भरतकेवली ॥ ३४२॥
तत्र मासिकभक्तेन, शशाङ्के श्रवणस्थिते ।
क्षीणकर्मा यतियुतो भरतः शिवमासदत् ॥ ३४३॥
इत्थं यथा भरतचक्रधरेण सप्त-
क्षेत्रेषु वित्तवरबीजमनिन्द्यमुप्तम् ॥
भव्यैस्तथैव वपनीयमिदं हि तेषु,
स्युर्येन निर्वृतिफलानि करस्थितानि ॥३४४॥ (वसन्ततिलका)

॥ इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्य-श्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ सप्तक्षेत्रीदानविषये श्रीभरतचक्रिकथा समाप्ता ॥

सप्तक्षेत्रीदानवैषयिकं श्रीभरतेश्वरदृष्टान्तमुक्त्वैहिकं दानफलमाह-

**इहलोए दाणाओ लहंति भव्वा सुहं च सोहग्गं ।**
**जसपसरं ससिसरिसं रज्जं चउरंगबलकलियं ॥ १२॥**

व्याख्या- इहलोकेऽस्मिन् भवे, भव्या-विवेकिनो, दानात्-सत्पात्रदानात्, सुखं-कलत्रपुत्रमित्रेभ्यः संजातं सातम्, सौभाग्यं-सर्वजनप्रियत्वम्, यशःप्रसरं-कीर्त्तिपूरम्, शशिसदृशं-सुधाकरसहोदरम्, राज्यं-प्राज्यग्रामाकरनगरकर्बटमडम्बद्रोणाद्याधिपत्यम्, चतुरङ्गबलकलितं-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

करि-तुरग-रथ-पदातिसहितम्, लभन्ते-प्राप्नुवन्ति । चः-समुच्चये, यतः पात्रदानादिह तत्किं यन्न स्यात् । उक्तं च-

तत्किमपि वस्तुजातं न दृश्यते श्रूयतेऽथवा जगति ।
सत्पात्रदानमाहात्म्यतः सतां यन्न संभवति ॥१॥ इति गाथार्थः ॥

ऐहिकं सत्पात्रदानफलमुक्त्वा पारलौकिकं सत्पात्रदानफलमाह-

**परलोए सुररमणीसंभोगसुहाणि अणुहवेऊण ।**
**दाणपरा परिपालिय चरणं साहिंति सिद्धिपहं ॥ १३॥**

व्याख्या-दानपराः-दानप्रवणाः, परलोके-देवलोके, सुररमणी-संभोगसुखानि-देवाङ्गनासुरतसौख्यानि, अनुभूय-भुक्त्वा, ततो नर-भवेऽवतीर्य चरणं-चारित्रम्, परिपाल्य-सम्यगाराध्य, सिद्धिपथं-मुक्तिमार्गम्, साधयन्ति-स्वकरतलशयालुतां प्रापयन्तीति गाथार्थः ॥

दानदातॄणामुत्कर्षं प्रख्यापयन्नाह -

**जे माणदुद्धरमणा कस्स वि सीसं णियं ण णामंति ।**
**ते वि हु दाणपराणं चाडुयवयणाणि भासंति ॥ १४॥**

व्याख्या-ये पुरुषा मानदुर्धरमनसोऽहङ्कारोद्रिक्तचित्ताः, कस्यापि निजं-स्वकीयम्, शीर्षं-मूर्धानम्, न नामयन्ति-मनागपि नावनतीकुर्वन्ति, तेऽपि नराः खु-निश्चितम्, दानपराणां-दानशौण्डानाम्, चाटुकवचनानि-तत्कुलादिगुणव्यावर्णनख्यानि, भाषन्ते-जल्पन्तीति गाथार्थः ॥

अदातॄणामिहलोकेऽपि लाघवमाह-

**माणंसिणो वि धणसालिणो वि मणुया मणे सकरुणावि ।**
**अवि गुणरयणनिहाणा, दाणेण विणा तिणसमाणा ॥ १५॥**

व्याख्या-आस्तां तावच्छठा अपितु मनस्विनोऽपि-पर-चित्ताभिप्रायवेदिनोऽपि, धनशालिनोऽपि-वैभवाभिभूतवैश्रवणा अपि,

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मनसि-हृदये, सकरुणा अपि-कारुण्यरसरञ्जिता अपि, गुणरत्ननिधाना अपि-कवित्ववक्तृत्वादिकलासेवधयोऽपि, मनुजा-मनुष्या, दानेन विना तृणसमानास्तूलतुल्या भवन्तीति गाथार्थः ॥

सामान्यतो दानस्वरूपमुक्त्वा, सत्पात्रदानप्रभावमाविर्भावयन्नाह-

**जह रयणाणं चिंतारयणं कप्पद्दुमो जह दुमाणं ।**
**तह दाणाणं पउरं सुपत्तदाणं जिणा बिंति ॥ १६ ॥**

व्याख्या-यथा रत्नानां वज्र-वैडूर्य-पद्मराग-मसारगल्ल-हंसगर्भ-पुलक-सौगन्धिक-ज्योतीरस-अञ्जनपुलक-रजत-जातरूप-सुभग-अङ्क -स्फटिक-अरिष्ट-(चन्द्रप्रभ)जातीयानां षोडशसंख्यानां मध्ये चिन्तामणिः, द्रुमेषु (वृक्षेषु आम्रादिषु) कल्पद्रुमः-सुरतरुः प्रशस्यः, तथा दानानां मध्ये, सुपात्रदानं प्रवरं-प्रधानं जिनास्तीर्थंकरा, ब्रुवते-कथयन्तीति गाथार्थः ॥

सत्पात्रदानदातृणां महार्घत्वमाह-

**के के कुपत्तजणदाणदाइणो इह न संति पाणिगणा ।**
**ते पुण विरला पत्ते जे णियविहवं पउंजंति ॥१७॥**

व्याख्या-के के प्राणिगणा-लोकनिकराः, कुपात्रजनदानदायिनो नटभटविटादिनरवितरणप्रगुणा न सन्ति-न विद्यन्तेऽपितु परःशता एवेति भावः । ते पुनर्विरला द्वित्रा एव ये मनुष्या निजविभवं पात्रे प्रयुञ्जते-निवेशयन्तीति ॥ यदुक्तं-

कोटाकोटिरिहोद्भटाः पटुगुणास्ते कोटिशो लक्षशः,
श्रीशाः ख्यातिजुषः सहस्रगुणिताः, शूरास्तथोच्चैःशतम् ।
वक्तारो दश पञ्च शुद्धतपसः, सप्ताष्टकाः पञ्चषाः,
ब्रह्मज्ञाः शुभपात्रदानरसिका, द्वित्राः कलौ स्युर्न वा ॥ १ ॥ इति गाथार्थः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दृष्टान्तगर्भां गाथां प्रथयन्नाह-

**अरजिणवरस्स जीवं जिणदासेणं पराइ भत्तीए ।**
**परमन्नेणं पाराविऊण पत्ताइं सुक्खाइं ॥ १८ ॥**

व्याख्या- अरजिनवरस्याष्टादशतीर्थंकरस्य, जीवं-चरणधारिणम्, जिनदासेन परया-प्रकृष्टया, भक्त्या-आदरेण, परमान्नेन-क्षीरेय्या, पारयित्वा-पारणं कारयित्वा, सौख्यानि-नरसुरसंभवानि सुखानि, प्राप्तानि-लब्धानीति गाथार्थः ॥ भावार्थः कथानकादवसेयस्तच्चेदम्,

**जम्बू**वृक्षाङ्किते द्वीपे **प्राग्विदेह**विभूषणम् ।
पुरं **रत्नपुरं** नाम पुंरत्नैरस्ति भासुरम् ॥ १ ॥
यत्र नीलमणीधामतुङ्गशृङ्गाग्रभूमिषु ।
क्षिपन्ति वदनं दूर्वाभ्रान्त्या रवितुरङ्गमाः ॥ २ ॥
तत्र श्री**जिनदासा**ख्यः श्रेष्ठी श्रेष्ठगुणोल्बणः ।
वासरान् भासुरांश्चक्रे श्रीजिनेश्वरपूजया ॥ ३ ॥
गाम्भीर्यौदार्यधैर्यादिगुणश्रीभिः स्वतोऽधिकम् ।
यं मत्वा श्रीपतिः श्रीयुक् ह्रीणोच्चैः कोणमाश्रितः ॥ ४ ॥
**भविष्यदरतीर्थेश**जीवो मुनिवरोऽन्यदा ।
चतुर्मासोपवासान्ते, जिनदासगृहेऽविशत् ॥ ५ ॥
श्रेष्ठी तमागतं दृष्ट्वा कल्पद्रुमिव जङ्गमम् ।
उत्थायानन्दितस्वान्तो भक्त्यानमदुवाच च ॥ ६ ॥
प्रभो! प्रभूतसंभूतक्षैरेय्या दानतो मयि ।
कृपां कुरु यतः सन्तः प्रार्थितार्थप्रसाधकाः ॥ ७ ॥
दोषैरदुष्टां क्षैरेयीं तेन दत्तामुपाददे ।
मुमुक्षुर्मोक्षपद्माक्षीसंगमे दूतिकामिव ॥ ८ ॥
ततो मुनिवरोऽन्यत्र, गत्वा पारणकं व्यधात् ।
तेन पुण्येन च श्रेष्ठी, **ब्रह्मलोके** सुरोऽभवत् ॥ ९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्रानुभूय भूयांसि, सौख्यानि स ततश्च्युतः ।
**जम्बूद्वीपस्यैरवते, काम्पील्ये** श्रेष्ठिभूरभूत् ॥ १० ॥
स तत्र सुकृतं कृत्वा, मृत्वा सौख्याच्युतेऽच्युते ।
देवलोके समृद्ध्याभूच्छक्रसामानिकः सुरः ॥ ११ ॥
ततश्च्युत**स्तामलिप्त्यां,** पुर्या**मृषभदत्त**भूः ।
**वीरभद्रो**ऽजनि युवा, युवतीजनरञ्जनः ॥ १२ ॥
एकदा समये सार्थरचनां विरचय्य सः ।
श्रेष्ठी ऋषभदत्तोऽगात् **पद्मिनीखण्ड**पत्तनम् ॥ १३ ॥
सदा कलावदासेव्यो, दुर्गाधीशः प्रसिद्धिमान् ।
श्रीईशान इ**वेशानचन्द्र**स्तत्रास्ति भूपतिः ॥ १४ ॥
श्रेष्ठी **सागरदत्तो**ऽपि तस्मिन् वसति सातवान् ।
यस्यर्द्धिं वीक्ष्य भाषन्ते निर्धनं धनदं जनाः ॥ १५ ॥
यथार्थनामिकास्यास्ति प्रिया **जिनमतिः** प्रिया ।
शीलसूर्योदयाद्यस्या, निर्दोषमभवज्जगत् ॥ १६ ॥
तयोः सुता चतुःषष्टिकलाकौशलशालिनी ।
लावण्यपुण्यतारुण्या, द्विधापि **प्रियदर्शना** ॥ १७ ॥
श्रेष्ठी ऋषभदत्ताख्यः कुर्वन् पण्यस्य विक्रयम् ।
हट्टे सागरदत्तस्य समियायान्यदा मुदा ॥ १८ ॥
तयोः परस्परं प्रीतिरजनिष्ट विशिष्टयोः ।
यामिनीकामिनीकान्तकैरवारामयोरिव ॥ १९ ॥
सागरस्तमभाषिष्ट प्रसद्य मम मन्दिरम् ।
निजागमनकर्पूरपूरैस्त्वमधिवासय ॥ २० ॥
ऋषभेणापि तद्वाक्यममन्दानन्दसुन्दरम् ।
निशम्य तत्तथा मेने स्वभावोऽयं यतः सताम् ॥ २१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स तत्र भोजनं कुर्वन्नादरेण रसोत्तरम् ।
चिरं विलोकयामास तत्पुत्रीं प्रियदर्शनाम् ॥ २२ ॥
कस्येयं तनयास्तीति ऋषभोक्ता स सागरः ।
प्राहैषा मे सुता श्रेष्ठिन्! पृच्छ्यते केन हेतुना ॥ २३ ॥
अतो ऋषभदत्ताख्य आचख्यौ श्रेष्ठिपुङ्गवम् ।
ममास्ति तनयो वीरभद्रो भद्राकृतिः कृती ॥ २४ ॥
जयन् जयन्तं रूपेण कलाभिः शर्वरीश्वरम् ।
वाचा वाचस्पतिं वीणावादनेन च नारदम् ॥ २५ ॥
गुटिकानां प्रयोगेण कामरूपाभिधामरम् ।
आश्चर्यचर्यया चेतो न रञ्जयति कस्य सः ॥ २६ ॥ युग्मम् ॥
गवेषयन्नपि क्वापि नाप्नुयां तद्गुणोचिताम् ।
कन्यां धन्यामिदानीं तु तद्योग्येयं विलोकिता ॥ २७ ॥
सागरोऽप्यवदत्क्वापि वरो नाप्तः सुतोचितः ।
अत स्तादनयोर्योगो, गौरीशङ्करयोरिव ॥ २८ ॥
ऋषभोऽपि वधूप्राप्त्या तुष्टो गत्वा निजां पुरीम् ।
जन्ययात्रायुतं वीरभद्रं तत्रानयत्पुरे ॥ २९ ॥
सागरोऽपि वरं वीक्ष्य साक्षादेव दिवस्पतिम् ।
हर्षात्प्रावेशयत्पुर्यां महोत्सवपुरःसरम् ॥ ३० ॥
पाणिग्रहः शुभे लग्ने मङ्गलध्वनिपूर्वकम् ।
संजज्ञे वीरभद्रस्य, प्रियदर्शनया समम् ॥ ३१ ॥
हिरण्यरत्नवस्त्राद्यैः सत्कृत्य कृतिनां वरम् ।
वरं स प्रेषयामास स्वां पुरीं श्रेष्ठी सागरः ॥ ३२ ॥
सोऽपि स्वपत्तनं गत्वा कलारञ्जितसज्जनः ।
रममाणस्तया सार्धं निनाय दिवसान् बहून् ॥ ३३ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एकदा वीरभद्रोऽयं चिन्तयाञ्चकृवानिति ।
किममूभिः कलाभिर्मे गुप्ताभिर्गुरुभीतितः ॥ ३४॥
तदुल्लासविलासाय, यामि देशान्तरं परम् ।
गुणागुणविभागो हि, तद्दते नोपसर्पति ॥ ३५॥
उक्तं च-
जो ण णियइ परिभमिउं महिवलयमणेगकोउगाइण्णं ।
सो कूवदद्दुरो इव सारासारं ण याणेइ ॥ ३६॥
श्रेष्ठिसूर्यामिनीयामयामलेऽथ व्यतीयुषि ।
छेकोक्तिरञ्जनापूर्वं स रेमे प्रियदर्शनाम् ॥ ३७॥
प्रसुप्तां सुरतश्रान्तां वीरभद्रोऽवगत्य ताम् ।
जगाम धामतः स्वीयात्पतत्री पञ्जरादिव ॥ ३८॥
प्रातः पतिमपश्यन्ती शुष्यन्ती विरहोष्मणा ।
सीतेव रामसंत्यक्ता रुरोद प्रियदर्शना ॥ ३९॥
सापृच्छ्य सुतदुःखेन दुःखितौ श्वशुरौ ततः ।
पितृवेश्मन्यगाद् यस्मात्कुलस्त्रीणामियं स्थितिः ॥ ४०॥
सोऽपि गेहाद्विनिर्गत्य गुटिकायाः प्रयोगतः ।
रूपवर्णपरावृत्तिं कृत्वा नट इवात्मनः ॥ ४१॥
कलाकलापव्यापेनानन्दयन्निन्दुवन्नरान् ।
पुरग्रामादिषु भ्राम्यन्निर्भीको धीरवीरवत् ॥ ४२॥
**सिंहलद्वीप**मासाद्य ययौ **रत्नपुरं** वरम् ।
**गुणरत्नाकर**क्ष्मापगुणरत्नाकरोल्बणम् ॥ ४३॥ कुलकम् ॥
तत्र भ्रमन्नसौ **शङ्ख**श्रेष्ठिनो गुणशालिनः ।
हट्टे न्यषीदत्पृष्टश्च तेन भद्रागतिः कुतः? ॥ ४४॥
वीरभद्रोऽवदत्तात! तामलिप्तीपुरादहम् ।
पित्रा रुषित्वा निर्यातः पर्यटन्नत्र चागतः ॥ ४५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शङ्खो बभाण हे वत्स! न सुष्ठु भवता कृतम् ।
यतो हितेषु पूज्येषु रोषावेशौ न शस्येते ॥ ४६ ॥
उक्तं च-
गुरवस्ताडयन्तोऽपि भवन्ति हितहेतवः ।
घनाहतानां द्रम्माणां भवत्यक्षरसंक्रमः ॥ ४७ ॥
अनुशिष्येति तं गेहे नीत्वाच्छादनभोजनैः ।
सत्कृत्य कृत्यवेदी, सोऽवादीत्प्रेमार्द्रया गिरा ॥ ४८ ॥
वत्स! स्वच्छमते! वत्साभावेनात्यन्तदु:खितम् ।
त्वं मां पुत्रवतां धुर्यं, कुरु मद्गृहवासतः ॥ ४९ ॥
कृतार्थय श्रियो भोगैर्भज श्रीमत्सु धुर्यताम् ।
देहि दानानि दीनेभ्यो, यशश्च समुपार्जय ॥ ५० ॥
सोऽकृत्रिमैकमाधुर्यां, तस्य वाणीं सुधामिव ।
निपीय विनयानम्रो, योजिताञ्जलिरब्रवीत् ॥ ५१ ॥
तात! प्रमाणमित्युक्त्वा, स शङ्खश्रेष्ठिवेश्मनि ।
वसन्नानाविनोदेन, रञ्जयामास नागरान् ॥ ५२ ॥
वीरभद्रोऽन्यदोपात्तताम्बूलां भूषणोल्बणाम् ।
दृष्ट्वा **विनयवत्**याख्यामाख्यच्छङ्खस्य नन्दिनीम् ॥ ५३ ॥
स्वसः! क्व गमने वाञ्छा, तवेत्थं तेन भाषिता ।
सा प्राहात्र पुरे भ्रातः!, **श्रीरत्नाकर**भूपतिः ॥ ५४ ॥
तस्यास्ति परमाभीष्टा, तनया विनयान्विता ।
**अनङ्गसुन्दरी** रूपनिर्जितानङ्गसुन्दरी ॥ ५५ ॥
पुरुषद्वेषशालिन्यास्तस्याः पार्श्वे निरन्तरम् ।
प्रयाम्यहं यतः सा मे, द्वितीयमिव जीवितम् ॥ ५६ ॥
कलासु कासु नैपुण्यं, श्रयते ते सखी स्वसः! ।
इत्युक्ता वीरभद्रेण, वीणाद्यैरिति साभ्यधात् ॥ ५७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यद्येवं तर्हि हे यामे! यामिनीकामुकाननाम् ।
अनङ्गसुन्दरीं द्रष्टुं, चित्तमुत्कण्ठते मम ॥ ५८॥
हे यामे! -हे भगिनि!।
विहस्य साह हे बन्धो! द्रष्टव्या सा कथं त्वया ।
प्रवेशं यत्र बालोऽपि, नाप्नोत्यन्यस्य का कथा ॥ ५९॥
सोऽप्यूचे भग्नि! स्त्रीरूपं, कृत्वायामि त्वया समम् ।
यद्येवं कुरुषे तत्त्वमेहीत्युक्तः स तत्क्षणात् ॥ ६०॥
नारीभूतस्तया तत्र निन्येऽथानङ्गसुन्दरी ।
तां प्राह सखि! कैषेति, पृष्टा सोवाच मत्स्वसा ॥ ६१॥ युग्मम्॥
तदा राजाङ्गजा वर्णैर्विचित्रैश्चित्रपट्टके।
लिखितुं हंसिकां शोकम्लानवक्त्रां प्रचक्रमे ॥ ६२॥
स्वकलां ज्ञापनायैष तामुवाच वियोगिनी ।
हंस्यलेखि त्वया त्वस्याः कृतं दृष्ट्यादि नोचितम् ॥ ६३॥
सस्मया नृपतेः पुत्री फलकं वर्णकैर्युतम् ।
तस्यै दत्त्वेत्यवादीत्त्वं समालिख मरालिकाम् ॥ ६४॥
वीरभद्रस्तथावस्थां लिखित्वा हंसिकां ततः ।
तस्यै प्रदर्शयामास सापि तां वीक्ष्य विस्मिता ॥ ६५॥
चित्रकृच्चित्रमालोक्य भावचेष्टाभिरद्भुतम् ।
नृपाङ्गजा हस्तिनीव निर्मदैवमचिन्तयत् ॥ ६६॥
अहो अस्या मुखं म्लानं हिमप्लुष्टारविन्दवत् ।
दृष्टिर्जलदमालेव बहुबाष्पाम्बुवर्षिणी ॥ ६७॥
चञ्चूपुटतटं मन्दमन्दोपात्तमृणालकम् ।
अधः पतदिवावन्यां शिथिलं गलकन्दलम् ॥ ६८॥
पक्षयुग्ममनुत्पातक्षमं तद्दिनजातवत् ।
चिन्तयेव विहस्तायाः पदन्यासः परिस्खलन् ॥ ६९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शून्यावस्थां च मुषितसर्वस्वाया अशंसयम् ।
ब्रवीति विरहावस्थां दुःस्थामकथितामपि ॥ ७० ॥ चतुर्भिः कलापकम्॥
तामुपालभतानङ्गसुन्दरी किमिति स्वसः! ।
चिन्तामणीव संस्थाप्य नानीतेयं मदन्तिके ॥ ७१ ॥
अत्रान्तरेऽवदद्वीरभद्रो नास्त्येव कारणम् ।
गुरूणां शङ्कया किन्तु नानैषीन्मामिह स्वसा ॥ ७२ ॥
भूपाङ्गजाह हे हञ्जे! सदैतव्यं मदन्तिके ।
किं नामास्ते च ते वीरभद्रो वीरमतीत्यवक् ॥ ७३ ॥
भूयोऽपि भूपभूरूचे श्रीशङ्खश्रेष्ठिनन्दिनीम् ।
अन्या अपि कलाः काश्चित् जानीते भगिनी तव ॥ ७४ ॥
साप्याख्यत् क्षितिभृत्पुत्रि! संस्तवात् ज्ञास्यसि स्वयम् ।
यतः कस्तूरिकामोदः शपथैः किं प्रतीयते ॥ ७५ ॥
तत्कलाकौशलाज्जातप्रमोदा नृपनन्दिनी ।
तया विनयवत्यामा तां सत्कृत्य व्यसर्जयत् ॥ ७६ ॥
इन्द्रजालिकवद्वीरभद्रः सहजामात्मनः ।
रूपं स्वीकृत्य हट्टेऽगात्किमसाध्यं कलावताम् ॥ ७७ ॥
शङ्खः सस्नेहमाचख्यौ वत्स! क्वेयच्चिरं स्थितः ।
यत् खेदितस्तवोदन्तप्रच्छकैः सुहृदां गणैः ॥ ७८ ॥
कौटिल्यत्वादुवाचासौ,[1] तात! लीलावनेऽगमम् ।
तन्निशम्य जहर्षैष धूर्तैः को न हि वञ्च्यते ॥ ७९ ॥
पुनस्तयैव रीत्यायं द्वितीयेऽपि दिने गतः ।
ददर्श वादयन्तीं तां विपञ्चीं नृपनन्दिनीम् ॥ ८० ॥
स वक्त्रं कूणयन्नाह, सशल्या वल्लकी सखि! ।
यदमुष्यां मनुष्यस्य केशः क्लेश इवास्ति किम् ॥ ८१ ॥

१. कौटिल्यवानु० V.।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स कथं हि त्वयाज्ञायि, तदुक्तः प्राह तां प्रति ।
भवतारब्धरागस्य खण्डनादवजग्मुषी ॥ ८२ ॥
ततः सकौतुका तस्यै, तामदान्नृपकन्यका ।
सोऽप्यस्यै तन्त्रिकामध्यादुद्धृत्याऽदर्शयत्कचम् ॥ ८३ ॥
सज्जयित्वा ततो वीणां स्वरतानादिसुन्दराम् ।
सकलं कलयाञ्चक्रे, रागं निष्कलमप्ययम् ॥ ८४ ॥
अनङ्गसुन्दरी तस्या, वीणावादनकौशलम् ।
निशम्य हरिणीवासीत् क्षणं व्यामोहिताशया ॥ ८५ ॥
चेतस्यचिन्तयच्चेति धिग्मे जन्मानया विना ।
हेममुद्रापि सश्रीका रत्नेनैव हि जायते ॥ ८६ ॥
इन्दुवद् दर्शयामास कलाः सैष यथा यथा ।
जहारानङ्गसुन्दर्या, मनस्तापं तथा तथा ॥ ८७ ॥
वीरभद्रोऽपि तां ज्ञात्वा स्वानुरक्तां नृपाङ्गजाम् ।
अवादीदेकदा शङ्खं तं वृत्तान्तं रहस्यवत् ॥ ८८ ॥
यदहं तात! विनयवत्या, सह निरन्तरम् ।
यामि भूमिपते पुत्र्याः, पार्श्वे युवतिरूपभाक् ॥ ८९ ॥
तत्तात! भीर्न कर्तव्या, धर्तव्याश्च मुदो हृदि ।
न कोऽप्यपायो भवतां, भावी प्रत्युत गौरवः ॥ ९० ॥
कदाचनापि भूपो वाँ* दातुं प्रार्थयते सुताम् ।
तदा तदाग्रहादेतन्मन्तव्यं वचनं पितः! ॥ ९१ ॥
शङ्खोऽप्युवाच हे वत्स! विधातव्यं तथा त्वया ।
यथा मम तवापि स्यात्, श्रेयः किं बहुजल्पितैः ॥ ९२ ॥
एकदा संसदासीने रत्नाकरनरेश्वरे ।
सभासदो मुदोपेता, वार्त्तयन्ति स्म ते मिथः ॥ ९३ ॥

* वो इति युक्तं भाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कश्चिद्वैदेशिकस्तामलिप्तीतः शङ्खवेश्मनि ।
समेतोऽस्ति युवा सोऽपि, गुणैः पुरमरञ्जयत् ॥ ९४॥
न परिज्ञायते ज्ञातिस्तस्याखिलकलानिधेः ।
परं तदाकृतिर्वक्ति निष्कलङ्कमलं कुलम् ॥ ९५॥
तन्निशम्य विशामीशो, विममर्श स्वमानसे ।
यदेष योग्यो मत्पुत्र्या विवाहाय वरो वरः ॥ ९६॥
यद्येषा पुरुषद्वेषवत्यमुं वृणुते वरम् ।
तदा प्रजासृजः सृष्टिघटना स्यात्पटीयसी ॥ ९७॥
तदैकान्तेऽब्रवीद् वीरभद्रः सोऽनङ्गसुन्दरीम् ।
भोगान् भोगानिवात्याक्षीर्वयसीदृशि किं सखि! ॥ ९८॥
सापि प्राह हले! सत्यं भोगाः कस्य न वल्लभाः।
परं दुराप एवैकः स्वानुरूपो वरः परः ॥ ९९॥
रोहिणीव निशानाथं, पद्मिनीव दिनेश्वरम् ।
लक्ष्मीरिव मुरारातिं गौरीव वृषवाहनम् ॥ १००॥
सवित्रीव विधातारं रेवतीवाच्युताग्रजम् ।
चेल्लभेयादृभुतं कान्तं पतीयामि तदा मुदा ॥ १०१॥ युग्मम् ॥
नोचितं पतिमद्राक्षमेतावन्तमनेहसम् ।
अतो वरं मे कौमारव्रतं न कुपतिर्वृतः ॥ १०२॥
परं कदाचिच्चेद् धाता, विधत्ते भवतीं नरम् ।
तदा प्रवर्त्तते चेतो, विषयेष्वमृतेष्विव ॥ १०३॥
वीरभद्रोऽपि तामूचे, चेदेवं स्यात्कदाचन ।
तथापि पुरुषद्वेषवती नो रंस्यसे नरम् ॥ १०४॥
अनङ्गसुन्दरी वीरमतीं प्रोवाच हे सखि! ।
किं मां मिथ्यावचोभङ्ग्या, विप्रतारयसि स्फुटम् ॥ १०५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यदि सत्यमिदं तत्त्वं, निजं रूपं प्रदर्शय ।
येन तारुण्यलावण्यकलाः स्युः सफला मम ॥ १०६ ॥
तयेति गदितो वीरभद्रो रूपमदर्शयत् ।
सापि संजातरोमाञ्चा, प्रोचे कान्तस्त्वमेव मे ॥ १०७ ॥
सोऽप्यूचेऽतः परं नाहमेष्यामि भवदन्तिकम् ।
अयं चार्थस्त्वया प्राप्यः, स्वपितुः श्रुतिकोटरे ॥ १०८ ॥
उपरुध्य यथा शङ्खं, स भूपः साध्यमावयोः ।
साधयेदिति जल्पित्वा, वीरभद्रोऽगमद् गृहम् ॥ १०९ ॥
अनङ्गसुन्दरी सद्यः, समाहूय स्वमातरम् ।
प्रोचे वरार्थमत्यर्थं खेदितौ पितरौ मया ॥ ११० ॥
अधुना तु वरः श्रेष्ठः, शङ्खश्रेष्ठिसुतो मया ।
उपलब्धोऽस्ति देयाहं, तस्मै गुणमहाब्धये ॥ १११ ॥
स्वरूपमेतत्तातस्य, निवेद्यं स यथा नृपः ।
शङ्खमत्यर्थमभ्यर्थ्य, मम कार्यं प्रसाधयेत् ॥ ११२ ॥
इति तद्वाक्यमाकर्ण्य, राज्ञी प्रमुदिताशया ।
सुताया वरलाभेनावर्धयत्प्राणवल्लभम् ॥ ११३ ॥
यन्नाथानङ्गसुन्दर्या, सौन्दर्यौदार्यधैर्यवान् ।
स्वयं परीक्षितो वीरभद्रः शङ्खाङ्गभूर्वरः ॥ ११४ ॥
राजा प्राह प्रिये! साधु, वत्सया चिन्तितो वरः ।
मयाप्याकर्णितो लोकाद् गुणरत्ननिधिः स तु ॥ ११५ ॥
ततो राज्ञा समाहूय, शङ्खोऽसंख्यवणिग्वृतः ।
कृतप्रणतिरप्युच्चासनेऽसावुपवेशितः ॥ ११६ ॥
सादरं मेदिनीजानिर्जगाद श्रेष्ठिपुङ्गवम् ।
तामलिप्त्याः समायातो, युवा कोऽप्यस्ति ते गृहे ॥ ११७ ॥
स चाश्रावि मया सर्वकलाकौशलवानलम् ।
सौभाग्यभाग्यभङ्गीभिः, किंकरीकृतमन्मथः ॥ ११८ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अतः श्रेष्ठिंस्तदर्थं मे, तनया प्रतिगृह्यताम् ।
संयोगस्त्वनयोर्योग्यो, गङ्गासागरयोरिव ॥ ११९ ॥
जगौ जगद्विभुं शङ्खस्त्वं स्वामी सेवकस्त्वहम् ।
अतो युक्तो न संबन्धः, स च भात्येव तुल्ययोः ॥ १२० ॥
महीशः प्राह हे श्रेष्ठिन्नीदृग्वचनभङ्गिभिः ।
निषेधयसि किं त्वं मां, सद्यः साध्यं च साधय ॥ १२१ ॥
नृपाज्ञामुररीकृत्य, कृत्यवेदी गृहं गतः ।
वीरभद्राय भूमीन्द्रवचनं स न्यवेदयत् ॥ १२२ ॥
शुभे दिने शुभे लग्ने, पाणिग्रहमहोत्सवः ।
अनङ्गसुन्दरीवीरभद्रयोर्ववृतेऽद्भुतः ॥ १२३ ॥
रत्नाकरधराधीशस्तयोर्यौतकपर्वणि ।
रत्नस्वर्णांशुकग्रामालङ्काराश्वादिकं ददौ ॥ १२४ ॥
अवर्धिष्ट तयोः प्रेम, दिवसे दिवसे तथा ।
यथा निदर्शनीभूतं, तद् गौरीहरयोरपि ॥ १२५ ॥
उपदिश्यार्हतं धर्मं, निसर्गस्वर्गसिद्धिदम् ।
स तां सुश्राविकां चक्रे, सत्संगः कस्य नो हितः ॥ १२६ ॥
चतुष्प्रकारं श्रीसंघं, जिनेन्द्रप्रतिमामपि ।
चित्रयित्वा पटे व्यक्तं, स प्रियाया अदर्शयत् ॥ १२७ ॥
प्रेमस्थेमपरीक्षायै, वीरभद्रः परेद्यविः ।
नानाविधवचोभङ्ग्या, बभाषेऽनङ्गसुन्दरीम् ॥ १२८ ॥
त्वां विहाय प्रिये! नान्यो, वल्लभो* मे तथापि हि ।
त्वां पृष्ट्वा दुःखिनोः पित्रोर्मिलनाय प्रयाम्यहम् ॥ १२९ ॥

---

* एष प्रयोगश्चिन्त्यः, नान्या वल्लभेति समीचीनं प्रतिभाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तावत्त्वयात्र स्थातव्यं, यावदायाम्यहं पुनः ।
न क्षणं त्वां विना स्थाता, मालतीमिव षट्पदः ॥ १३० ॥
सापि म्लानमुखी प्राह, प्राणेश! तव साधुगीः ।
श्रुतिं गतापि या मेऽसून्, भिनत्ति करपत्रवत् ॥ १३१ ॥
वज्रादपि कठोरास्मि यन्निशम्येदृशं वचः ।
एरण्डफलवन्नाथ! विदीर्णं हृदयं न मे ॥ १३२ ॥
स भीत इव तामूचे, प्रिये! मा कोपमुद्वह ।
केलिरेव कृतः किन्तु त्वां विना यामि न क्वचित् ॥ १३३ ॥
आश्वास्येति प्रियारत्नं, रत्नाकरनरेश्वरम् ।
स्वदेशगमनायासौ, सनिर्बन्धं व्यजिज्ञपत् ॥ १३४ ॥
यदि श्रीतातपादानामादेशः स्यात्तदास्म्यहम् ।
मदेकपुत्रयोः पित्रोर्मिलनाय व्रजाम्यलम् ॥ १३५ ॥
तन्निशम्य नृपः प्राघूर्णकैर्वसति नो गृहम् ।
ज्ञात्वेति व्यसृजद् वीरभद्रं निजसुतान्वितम् ॥ १३६ ॥
यशोहसितशङ्खश्रीः, शङ्खं तातं स पूर्ववत् ।
व्यजिज्ञपदथो तेन, विसृष्टस्तुष्टचेतसा ॥ १३७ ॥
ततो विसृज्य पूर्लोकं, दानसन्मानपूर्वकम् ।
सप्रियो वीरभद्रोऽब्धौ, पोतमारोहति स्म सः ॥ १३८ ॥
यथा शरासनान्मुक्तः, शरो यात्यतिवेगतः ।
तथाब्धिलोलकल्लोलेरितः पोतोऽचलत्तराम् ॥ १३९ ॥
यावत्कियन्तमध्वानं, वाहनं समलङ्घयत् ।
तावत्कल्पान्तकालाभः, प्रोल्ललास समीरणः ॥ १४० ॥
वातेन तेन संक्षुब्धोऽब्धिर्लोललहरीकरैः ।
वहनं कन्दुकमिव, समन्तादुदलालयत् ॥ १४१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मुहुर्मुहुः समुच्छाल्यमानो भ्रान्त्वा दिनत्रयम् ।
पोतः पतित्वा ग्रावाग्रकोटौ घट इवास्फुटत् ॥ १४२ ॥
भग्ने प्रवहणे पुण्ययोगतोऽनङ्गसुन्दरी ।
तदा तदीयफलकं, प्राप बोधिमिवाङ्गभाक् ॥ १४३ ॥
लोलकल्लोलमालाभिः, प्रेरिता फलके स्थिता ।
अहोभिः पञ्चभिर्लेभे, तीरं तरुलतान्वितम् ॥ १४४ ॥
पतिमातृपितृभ्रातृवियोगविधुराशया ।
ऊर्मिघातक्षुधातृषार्दिता तत्र मुमूर्च्छ सा ॥ १४५ ॥
अत्रान्तरे भ्रमन् कोऽपि, तापसः सकृपाशयः ।
तां तथास्थां समुत्थाप्य गुर्वन्तिकमुपानयत् ॥ १४६ ॥
सुधामुधाविधायिन्या सोऽप्याश्रमगुरुर्गिरा ।
तां स्वपुत्रीमिवाश्वास्य, तापसीभ्यः समार्पयत् ॥ १४७ ॥
शुश्रूष्यमाणा वृद्धाभिस्तापसीभिरहर्निशम् ।
तत्रस्था सुस्थिता कालं, कियन्तं सात्यवाहयत् ॥ ४८ ॥
निरीक्ष्यानङ्गसुन्दर्या, रूपं रतिविजित्वरम् ।
व्रतिनां व्रतभङ्गायात्र स्थिता मा स्म भूदसौ ॥ १४९ ॥
इति ध्यात्वाश्रमगुरुर्गिरा मधुरयाह ताम् ।
समीपेऽस्त्याश्रमादस्मात् **पद्मिनीखण्ड**पत्तनम् ॥ १५० ॥ युगलम् ॥
तद्वत्सेऽस्मद्गिरा गच्छ तापसैः सह तत्र च ।
तवाल्पेनैव कालेन, भर्तुः सङ्गो भविष्यति ॥ १५१ ॥
इत्थं तेन समादिष्टा सापि तापससंयुता ।
जगाम पद्मिनीखण्डपत्तनासन्नभूमिकाम् ॥ १५२ ॥
न स्पृशामो हलाकृष्टां भुवमित्यभिधाय ते ।
तामनुज्ञाप्य च स्वीयं, तापसा जग्मुराश्रमम् ॥ १५३ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नास्मिन् पुरेऽस्मत्संबन्धी कोऽपीत्याकुलिताशया ।
चिक्षेप दिक्षु चक्षुः स्वं यूथभ्रष्टा मृगीव सा ॥ १५४ ॥
तदा शरीरचिन्तायै, व्रतिनीभिर्विभूषिताम् ।
आगच्छन्तीं **सुव्रता**ख्यां, गणिनीं सा न्यभालयत् ॥ १५५ ॥
पत्या पटे लिखित्वा या दर्शिता मम ता इमा ।
व्रतिन्य इति निश्चित्य, सुव्रतामियमानमत् ॥ १५६ ॥
ऊचे च भगवत्यद्य, **सिंहलद्वीप**संस्थिताः ।
जिनेश्वराणां प्रतिमा मद्वाक्येन नमस्कुरु ॥ १५७ ॥
सुव्रताप्यवदद् भद्रे! सिंहलद्वीपतस्तव ।
सुकृतैकसहायिन्याः, किमागमनकारणम् ॥ १५८ ॥
सुस्था सती निजं सर्वं, वृत्तं कथयितास्म्यहम् ।
एवं वदन्तीं तां साध्वी निनाय स्वमुपाश्रयम् ॥ १५९ ॥
तत्र सागरदत्तस्य तनया प्रियदर्शना ।
तपोधना नमस्यन्ती, ददर्शानङ्गसुन्दरीम् ॥ १६० ॥
साध्व्या सुव्रतया पृष्टा, प्रियदर्शनया च सा ।
आमूलचूलं स्वोदन्तं, कथयामास तत्पुरः ॥ १६१ ॥
श्रेष्ठिपुत्र्याथ सा प्रोचे, वीरभद्रकलादिकम् ।
संवदत्यखिलं किन्तु, तस्यऽवर्णोऽस्ति कीदृशः ॥ १६२ ॥
श्यामवर्णस्तया प्रोचे, श्रेष्ठिपुत्री बभाण ताम् ।
वर्णस्यैव विसंवादः सखि! ते जीवितेश्वरे ॥ १६३ ॥
सुव्रताप्यवदद्वत्से! तिष्ठात्र सुकृते रता ।
प्रियदर्शनया धर्मभगिन्या सह सुस्थिता ॥ १६४ ॥
सुव्रतावचसा तत्र, स्थिता सानङ्गसुन्दरी ।
प्रियदर्शनया तुल्यैर्वात्सल्यैश्चातितोषिता ॥ १६५ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सुव्रताव्रतिनीपार्श्वे, पालयन्त्यौ सतीव्रतम् ।
सोदरे इव ते प्रीत्या, कुर्वाते धर्ममार्हतम् ॥ १६६ ॥
अथ गोचरचर्यायां साध्वीव्राते गते सति ।
अकस्मात्सुव्रताऽश्रौषीद् दारुणं रुदितध्वनिम् ॥ १६७ ॥
निर्गत्य गणिनी सार्द्रहृदयोपाश्रयाद् बहिः ।
ददर्श कामिनीमेकां, बाष्पप्लावितभूतलाम् ॥ १६८ ॥
बभाण गणिनी भद्रे! कासि त्वं कुत आगता ।
कथमेकाकिनी केन, हेतुना चात्र रोदिषि ॥ १६९ ॥
साप्यांह तां नमस्कृत्य मातर्वैताढ्यभूभृतः ।
विद्याधरसुता **रत्नप्रभा**गामिह सप्रिया ॥ १७० ॥
जिनार्चनचिकीः कान्तो मां मुक्त्वा स्नानहेतवे ।
गतः सोऽद्यापि नायातस्तेन स्वामिनि! रोदिमि ॥ १७१ ॥
स मां विना प्रियो नैव, स्थातुं क्षणमपि क्षमः ।
चिरं जातं गतस्यास्य, शङ्कते तेन मे मनः ॥ १७२ ॥
सुव्रताप्यब्रवीद् भद्रे! भयं कुरु कुतोऽपि मा ।
यावदायाति ते कान्तस्तावत्तिष्ठ ममान्तिके ॥ १७३ ॥
संबोध्यैवं गणिन्यासौ, नीत्वा च सुकृताश्रयम् ।
तृतीया मीलिता साधर्मिकीकृत्य तयोर्द्वयोः ॥ १७४ ॥
अन्योन्यं वार्त्तयन्तीभ्यां, ताभ्यां पृष्टा मणिप्रभा ।
स कीदृगस्ति कान्तस्ते, यं स्मृत्वा सखि! रोदिषि ॥ १७५ ॥
साप्याख्यद् **बुद्धिदासा**ख्यः, सख्यौ! गौरः कलाकलः ।
सिंहलद्वीपवास्तव्यो, मद्वरः स्मरसुन्दरः ॥ १७६ ॥
मत्प्रिये संवदत्येवमुवाच प्रियदर्शना ।
बुद्धिदासाभिधा नैव, न तु सिंहलवासता ॥ १७७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनङ्गसुन्दरी चाख्यत् सखि! गौरत्वनामनी ।
हित्वा मत्प्राणनाथेऽन्यत्सर्वं संगतिमङ्गति ॥ १७८ ॥
तपोनियमदेवार्चातत्परास्तदुपाश्रये ।
सोदर्य इव तिष्ठन्ति तिस्रस्ताः शीलशालिताः ॥ १७९ ॥
अन्यदेशानचन्द्रस्य सदसीदृगभूत्कथा ।
यदस्मिन् पत्तने साध्व्याः सुव्रताया उपाश्रये ॥ १८० ॥
अस्ति स्त्रीत्रितयं रूपसंपद्रतिविजित्वरम् ।
सतीव्रतसरित्स्रोतःपवित्रितमहीतलम् ॥ १८१ ॥ युगलम् ॥
आस्तामियं कथा दूरे, यः कश्चिच्चालयेद् व्रतात् ।
स कोऽपि भूतले नास्ति, यस्ता भाषयितुं प्रभुः ॥ १८२ ॥
अत्रान्तरे धराधीशसभामण्डपमण्डनम् ।
केलिपात्रं कलासत्रं, विद्यते कोऽपि वामनः ॥ १८३ ॥
तासां व्यावर्णनं तादृग् तत् श्रुत्वा कूणितानन: ।
कुर्वन्नुर्वीमवज्ञां स, खर्वोऽभाष्यत भूभुजा ॥ १८४ ॥
रे वामन! किमेतासां, चरित्रं चित्रकारणम् ।
अवजानासि सोऽप्याह प्रतिज्ञां शृणु मे प्रभो! ॥ १८५ ॥
चेदिमा मामजल्पन्तं जल्पयन्त्यबला बलात् ।
तदा कला कलावत्सु, प्रमाणं मेऽन्यथा न हि ॥ १८६ ॥
तदावज्ञापरै राजलोकैः कतिपयैर्वृतः ।
सुव्रताव्रतिनीधर्मशालां प्रति चचाल सः ॥ १८७ ॥
सोऽशिक्षयज्जनान् साध्वीनमस्कारादनन्तरम् ।
अस्मत्पुरः कथां ब्रूहीति प्रष्टव्योऽहमादरात् ॥ १८८ ॥
प्रमाणमिति तैरुक्ते, वामनः सुकृतालयम् ।
गतः श्रीसुव्रतामुख्या, व्रतिनीरानमन्मुदा ॥ १८९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वेला भूपालसेवायाः, क्षणेनैव भविष्यति ।
तावदत्रैव तिष्ठाम, इति नृनाह वामनः ॥ १९० ॥
तत्रोपविष्टास्ते पूर्वशिक्षितास्तं बभाषिरे ।
खर्वशाख! वदापूर्वां, कथां कामपि संप्रति ॥ १९१ ॥
खर्वशाख! -हे वामन!।
सोऽप्यूचे तानहं वच्मि, प्राक्पुंसां चरिताद्भुताम् ।
कथां निजानुभूतं वा वृत्तकं क्वास्ति वः स्पृहा ॥ १९२ ॥
तेऽप्यूचुश्चरितैर्घृष्टपृष्टैः किमु चिरन्तनैः ।
किन्तु त्वं वृत्तकं ब्रूहि, येन चित्रीयते जनः ॥ १९३ ॥
ततोऽसौ वामनः प्राह श्रूयतामस्ति भारते ।
तामलिप्तीपुरी सर्वश्रीणामास्थानमण्डपः ॥ १९४ ॥
तस्यामृषभदत्तोऽस्ति, श्रेष्ठी वैश्रमणोपमः ।
सोऽन्यदा व्यवसायार्थं, पद्मिनीखण्डमीयिवान् ॥ १९५ ॥
तत्र सागरदत्तस्य, तनयां प्रियदर्शनाम् ।
वीरभद्रं निजं पुत्रं, स श्रेष्ठी पर्यणाययत् ॥ १९६ ॥
वीरभद्रस्तया साकं, भोगाननुबभूव सः ।
निशीथे छद्मना सुप्तामुदजागरयच्च ताम् ॥ १९७ ॥
मामुत्पन्नशिरोर्त्तिं मा, खेदयेशेति सावदत् ।
कस्यागुणेन सा तेऽस्ति, स्वामिंस्त्वद्दोषतोऽजनि ॥ १९८ ॥
तेन स्वदोषं पृष्टा सा, जगाद प्रियदर्शना ।
नाथेदृक्समये केयं तव वक्रोक्तियुक्तिता ॥ १९९ ॥
नैवं भूयो विधातेति जल्पन् सोऽरीरमत्प्रियाम् ।
सुप्तां त्यक्त्वाथ तन्नाथस्ततो देशान्तरं गतः ॥ २०० ॥
अत्रान्तरे वामनोऽसावुदतिष्ठत्ससंभ्रमः ।
ममाधुना राजसेवाक्षणो यातीत्युदीरयन् ॥ २०१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तं यान्तं सहसोत्थाय जगाद प्रियदर्शना ।
वद वामन! देशे क्व वीरभद्रस्ततोऽगमत् ॥ २०२॥
हहा नाहं परस्त्रीभिः समं जल्पन्निजं कुलम् ।
अमलं मलिनं कुर्वे स तामेवमवोचत ॥ २०३॥
सा प्राह युक्तमेवैतत् कुलीनानां भवादृशाम् ।
परं परप्रार्थनाया, भङ्गं सन्तो न कुर्वते ॥ २०४॥
भद्रे! त्वदाग्रहात् प्रातर्वक्तास्म्युक्त्वेति सोऽगमत् ।
तस्य वार्त्तां च भूभर्त्ता श्रुत्वाजनि सविस्मयः ॥ २०५॥
वामनोऽह्नि द्वितीयेऽपि तथैव तदुपाश्रयम् ।
समेत्य पुरतस्तासां, वीरभद्रकथां जगौ ॥ २०६॥
गुटिकायाः प्रयोगेण, श्यामं रूपं विधाय सः ।
कलाः प्रकटयन् स्वस्य, ग्रामाद् ग्रामं पुरात् पुरम् ॥ २०७॥
पर्यटन् सिंहलद्वीपे पुरं रत्नपुरं गतः ।
पुपुत्रीयिषता शङ्खश्रेष्ठिना स्थापितो गृहे ॥ २०८॥ युग्मम् ॥
नागरान् विस्मयस्मेरान् कुर्वन्विविधकौतुकैः ।
समं विनयवत्यासौ, वनितावेषधारकः ॥ २०९॥
अन्तपुरं गतोऽनङ्गसुन्दरीं राजनन्दिनीम् ।
वीणाकलानुरक्तां तां पित्रा दत्तामुदूढवान् ॥ २१०॥ युगलम् ॥
अन्यदा सप्रियस्यास्य, तामलिप्तीं यियासतः ।
समुद्रे वहनं भग्नं, हस्तप्रस्रस्तकुम्भवत् ॥ २११॥
अतिक्रामति भूशक्रसेवायाः समयो मम ।
इति प्रोच्य स उत्तिष्ठन्नूचे नृपतनूजया ॥ २१२॥
श्रुतपूर्वमिदं सर्वं, निखर्वाख्याहि सोऽधुना ।
क्वास्ते प्रातः प्रवक्तास्मीत्युक्त्वा सोऽगान्नृपान्तिकम् ॥ २१३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सुसंचरवरज्ञातवृत्तान्तेन महीभुजा ।
प्रशंसितस्तृतीयेऽपि, दिने तत्र स ईयिवान् ॥ २१४॥
श्रेष्ठिसूराजपुत्रीभ्यां पृष्टः स स्पष्टमालपत् ।
स वार्धौ वहने भग्ने दैवात्फलकमासदत् ॥ २१५॥
सप्तमेऽह्नि तथावस्थं, विलोक्य **रतिवल्लभः** ।
विद्याधरमहाराजो, वैताढ्याद्रौ निनाय तम् ॥ २१६॥
स पुत्रीकृत्य तं पत्न्यै **मदनायै** मुदा ददौ ।
सापि निर्भरया प्रीत्या, पुपोष प्रतिवासरम् ॥ २१७॥
वार्धेरुद्धारवेलायां स श्यामत्वविधायिनीम् ।
निष्कास्य गुटिकामास्याद् गौरं रूपमुपाददे ॥ २१८॥
वीरभद्रो वसंस्तत्र बुद्धिदासाभिधां निजाम् ।
प्रजासु प्रथयामास कलाः, प्रतिपदिन्दुवत् ॥ २१९॥
पृष्टः पितृभ्यां सोऽवादीत् सर्वं चरितमात्मनः ।
अपृच्छच्च तदा तात! तादृक्कष्टादरक्षिषि ॥ २२०॥
परं न वेद्मि सा क्वास्ति, मत्प्रियानङ्गसुन्दरी ।
इति विज्ञप्त आभोगिन्या तां ज्ञात्वाह खेचरः ॥ २२१॥
वत्स! स्वच्छमतेऽत्रैव पद्मिनीखण्डपत्तने ।
सुव्रतायास्तपस्विन्याः सुकृताश्रयसंस्थिता ॥ २२२॥
भवता हि पुरोदूढप्रियदर्शनया समम् ।
क्षेमेणास्ति तवानङ्गसुन्दरी जीवितेश्वरी ॥ २२३॥
कलत्रकुशलोदन्तं, निशम्य रतिवल्लभात् ।
प्रीत्योल्ललास स श्रीमानब्धिरिन्दूदयादिव ॥ २२४॥
कन्यां वेगवतीजातां, सुरूपां रतिवल्लभः ।
रत्नप्रभाभिधां बुद्धिदासं तं पर्यणीणयत् ॥ २२५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

समं स रत्नप्रभया, भोगाननुभवंश्चिरम् ।
अपश्यदेकदा विद्याधरान् संभूय गच्छतः ॥ २२६ ॥
क्वामी जवेन यान्तीति, तेन प्रियतमोदिता ।
साहात्रैव गिरौ नन्तुं, प्रतिमाः शाश्वतार्हताम् ॥ २२७ ॥
तत्र कौतूहलेक्षार्थं यामो वयमपि प्रिये! ।
इत्युक्त्वा बुद्धिदासोऽद्रिमारुरोह तया समम् ॥ २२८ ॥
तत्र शाश्वतबिम्बानि, बुद्धिदासो मुदाऽनमत् ।
रत्नप्रभापि भावेन, तत्पुरो नृत्यमातनोत् ॥ २२९ ॥
सोऽजानान इव प्राह प्रिये! सिंहलवासिना ।
सुगतानुगतेनेदृग् देवो नैक्षि क्वचिन्मया ॥ २३० ॥
तद्भाववेदिनी रत्नप्रभा प्राह प्रियं प्रति ।
स्वामिन्नेष चतुःषष्टिसुरेन्द्रैर्वन्दितक्रमः ॥ २३१ ॥
प्रस्फुरत्केवलज्ञानलोकालोकप्रकाशकः ।
संसारसागरोत्तारतरी देवो जिनेश्वरः ॥ २३२ ॥ युग्मम् ॥
रागद्वेषप्रमादादिदूषितैस्तैरुपासितैः ।
सुगताद्यैर्भवेयुः किं, शाश्वत्यः शर्मसम्पदः ॥ २३३ ॥
येऽमुं देवं सदा दोषै, रहितं सहितं गुणैः ।
सेवन्ते तान् स्वयं मुक्तिवनिता वृणुतेतमाम् ॥ २३४ ॥
सोऽपि प्राह प्रिये! साधूपदेशो मे त्वया ददे ।
अतः परं ममाप्येष एव देवः सदा मुदे ॥ २३५ ॥
परस्परं रसोल्लासाद् गङ्गासागरयोरिव ।
तयोः प्रीतिजुषोर्भूयान् कालः क्षणमिवागमत् ॥ २३६ ॥
बुद्धिदासोऽन्यदावादीत्, प्रिये! दक्षिणभारते ।
पत्तने पद्मिनीखण्डे, प्रयावो वन्दितुं जिनान् ॥ २३७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथाप्यङ्गीकृते तौ च नभस्युत्पत्य विद्यया ।
सुव्रताव्रतिनीधर्मशालाद्वारे समीयतुः ॥२३८॥
तत्र स्थित्वा क्षणं बुद्धिदासो भार्यामभाषत ।
यावत्स्नात्वाहमायामि तावत्स्थेयमिह त्वया ॥२३९॥
तत्स्वरूपनिरीक्षायै गत्वा कियदिलातलम् ।
प्रच्छन्नीभूय तस्थौ सोऽञ्जनसिद्धपुमानिव ॥२४०॥
गणिन्या रुदतीं पत्युर्वियोगेन प्रबोध्य ताम् ।
नीतां स्वोपाश्रये मत्वा कुतुकी क्वापि सोऽगमत् ॥२४१॥
भूपोऽधुना सभासीनो भवितेति निगद्य सः ।
उत्थितस्ताभिरूचे च भद्र! क्वास्ति स संप्रति ॥२४२॥
श्वः समेत्य प्रवक्ष्यामीत्युक्त्वागात्स नृपान्तिकम् ।
राजापि सचमत्कारः सच्चकारोच्चकैस्तकम् ॥२४३॥
अस्माकमेकः कान्तोऽस्ति, त्रिवेणीसंगतीर्थवत् ।
इति तिस्रोऽपि ता ज्ञात्वा, बिभराञ्चक्रिरे मुदः ॥२४४॥
अस्मिन्नवसरे श्रीमान्, **श्रीअरः** परमेश्वरः ।
विहरन् पद्मिनीखण्डपुरखण्डममण्डयत् ॥२४५॥
प्राकारत्रितयोपेतं, प्रातीहार्यविराजितम् ।
निर्ममे निर्ममेशस्य, त्रिदशैर्देशनासदः ॥२४६॥
तत्र सिंहासनासीनः श्रीअरः परमेश्वरः ।
ईशानचन्द्रराजेन्द्राद्यग्रे व्याख्यानमातनोत् ॥२४७॥
तत्र सागरदत्ताख्यः, श्रेष्ठी तं परमेष्ठिनम् ।
नमस्कर्तुं समायातं, खर्वशाखं व्यलोकयत् ॥२४८॥
व्याख्यानाद्विरते नाथे, **कुम्भो** गणधराग्रणीः ।
दिदेश देशनां क्लेशनाशिनीं शर्मदेशिनीम् ॥२४९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

व्याख्यान्तेऽवसरं प्राप्य, श्रेष्ठी सागरदत्तकः ।
प्रणत्य मस्तकन्यस्तहस्तः कुम्भं व्यजिज्ञपत् ॥ २५० ॥
भगवन्नेकदाश्रौषमिति यत्ते सुतापतिः ।
सुप्तां प्राणप्रियां हित्वा, क्वापि देशान्तरे गतः ॥२५१॥
तदा जातज्वर इव दुःखमन्वभवं महत् ।
ततः पुत्रीं समानाय्यास्थापयं निजवेश्मनि ॥२५२॥
सोऽधुना मम जामाता, वीरभद्रः क्व विद्यते।
इति प्रसद्य सद्यस्त्वं, स्वामिन्नाख्याहि मत्पुरः ॥२५३॥
अथ कुम्भोऽब्रवीच्छ्रेष्ठिन्निविष्टो यस्त्वदन्तिके ।
वामनो दृश्यते सोऽयं, जामाता भवतः स्फुटम् ॥२५४॥
स्वामिन्! किमित्ययं खर्वभावं भेजे गुरुर्जगौ ।
श्रेष्ठिन्! स्वदयिताशीलपरीक्षायाः कृते कृती ॥२५५॥
वामनोऽपि निशम्यैवं, स्वचेतसि चमत्कृतः।
भक्तियुक्त्या नमस्कृत्य, कुम्भं गणधरं जगौ ॥२५६॥
भगवन्नेवमेवैतत्पूज्यपादैर्न्यगादि यत् ।
यद्वा ज्ञानेन विज्ञाते किं स्याद्वस्तुनि संशयः ॥२५७॥
ततो गणधरं नत्वा श्रेष्ठी सागरदत्तकः ।
वामनं सहकृत्वागात्, सुव्रताया उपाश्रयम् ॥२५८॥
तं वामनमथायातं, तास्तिस्रोऽपि पतिव्रताः ।
परिवव्रुः प्रियोदन्तवक्ता कस्य न हि प्रियः ॥२५९॥
श्रेष्ठी जगाद हे वत्सास्तिसृणां वो ह्ययं पतिः ।
कथं तातेति पृष्टस्तत्स्वरूपं सर्वमाह सः ॥२६०॥
वामनोऽपि निजादास्यान्निष्काश्य गुटिकां लघु ।
खर्वताममुचद्यस्मात्किमसाध्यं कलावताम् ॥ २६१ ॥
पूर्वं तादृग्विधोऽनङ्गसुन्दर्या यादृगीक्षितः ।
पश्चात्स्वाभाविकं गौरं, रूपं स्वीकृतवानयम् ॥ २६२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तिस्रोऽपि हि निजं कान्तमभ्रान्तमवगत्य ताः ।
अस्तोकशोकशङ्कायाः, प्रवितेरुर्जलाञ्जलिम् ॥ २६३ ॥
गणिनी सुव्रतापीदृक् स्वरूपं विनिरूप्य तम् ।
जगाद किमिदं सोऽपि तां नत्वेति व्यजिज्ञपत् ॥२६४॥
भगवत्यखिलं ह्येतद् देशान्तरदिदृक्षया ।
निरमायि मया सम्यक् नान्यत्किमपि कारणम् ॥२६५॥
सुव्रता प्राह हे भद्र! वीरभद्र! त्वया पुरा ।
किमप्यपूर्वं सुकृतं, कृतं तेन तव श्रियः ॥२६६॥
तदेतस्य परिज्ञानहेतवेऽरं जिनेश्वरम् ।
गत्वा संप्रति पृच्छामः, कथयिष्यति स प्रभुः ॥२६७॥
ततः सा सुव्रतासाध्वी, श्रेष्ठी सागरदत्तकः ।
वीरभद्रोऽपि कान्तायुक् जग्मुर्जिनवरान्तिकम् ॥२६८॥
अरनाथं नमस्कृत्य, सुव्रता प्राह हे प्रभो!।
पुरा जन्मनि किं वीरभद्रेण सुकृतं कृतम् ॥२६९॥
प्रभुः प्राह भवादस्मात्तृतीये जन्मनि स्फुटम् ।
जिनदासभवेऽनेनास्म्यर्हन्मासिकपारणे ॥२७०॥
प्रवर्धमानभावेन, परमान्नेन पारितः ।
तेनास्य वीरभद्रस्य, जज्ञिरे भोगसंपदः ॥ २७१ ॥ युग्मम् ॥
तच्छ्रुत्वा वीरभद्रोऽपि, जातजातिस्मृतिर्निजान् ।
प्राग्भवानस्मरद् विन्ध्याचलारामानिव द्विपः ॥ २७२ ॥
वीरभद्रः प्रभुं नत्वा, ज्ञातदानफलोदयः ।
समं सागरदत्तेन प्रियायुग् गृहमागतः ॥ २७३ ॥
श्रेष्ठी सागरदत्तोऽपि, वीरभद्रं प्रियान्वितम् ।
सच्चकार यतः पुत्रीपतिः सत्कारमर्हति ॥ २७४ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अन्यदा तमनुज्ञाप्य वीरभद्रः प्रियान्वितः ।
स्वपित्रोर्मिलनायागात्तामलिप्तीं महापुरीम् ॥ २७५ ॥

पित्रोर्मनोरथमयं परिपूर्य तत्र, संपूज्य दानविधिना जिनसाधुसंघान् ।
वैताढ्यभूधरवरे गमनं विधाय सद्धर्मबुद्धिरगमद्दिवि वीरभद्रः ॥२७६ ॥

(वसन्ततिलका)

इति पात्रेषु यथा कृतवान् दानविधिं जिनदासः।
भव्यास्तं विदधीत तथा येन भवेच्छिववासः॥ २७७॥

इति रुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ परमान्नदानविषये श्रीजिनदासश्रेष्ठिदृष्टान्तः समाप्तः॥

श्रीअरपरमेश्वरजीवनियुक्तपरमान्नदानवैषयिकं श्रीजिनदासश्रेष्ठिदृष्टान्त-मुक्त्वा पुनस्तदेव दानं दीयमानं कया युक्त्या सफलं स्यादित्याह-

**तं चित्तवित्तपत्ताण, भेयओ जायए महासहलं ।**
**एयं तिवेणिसंगमतित्थं समए पवित्तयरं ॥ १९॥**

व्याख्या-तद्दानं चित्तवित्तपात्राणां भेदतो महासफलं जायत इत्यर्थः। यत एतत्त्रिवेणीसङ्गमतीर्थं पवित्रकरं यथा किल लोके मन्दाकिनी-यमुना-सरस्वतीस्रोतःसंगतिरूपं त्रिवेणीसंगमतीर्थमनन्त-भवजनित-पातकसंघातसंघातनत्वेन पावनात्मकमिति गाथार्थः॥

आदौ तावच्चित्तस्वरूपं प्ररूपयन्नाह-

**ते धन्ना सकयत्था तेसिं सहलं च माणुसं जम्मं ।**
**संपिच्छिऊण मुणिणो जेसिं चित्तं समुल्लसइ ॥ २०॥**

व्याख्या-ते प्राणिनो धन्याः-पुण्यात्मका अत एव सत्कृतार्थाः कृतकृत्यास्तेषां च मानुषं जन्म सफलं-फलेग्रहि, येषां चित्तं मुनीन्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

संप्रेक्ष्य समुल्लसति धन्योऽहं कृतपुण्योऽहमित्युच्चावचमनोरथश्रेणि-निश्रेणिशिखराधिरूढं स्यादिति गाथार्थः॥

अथ वित्तस्वरूपमाह -

**जं उत्तमसंगेणं समज्जियं वज्जियं च कवडेणं ।**
**तं पत्तदाणजुग्गं वित्तं संजायइ पवित्तं ॥ २१॥**

व्याख्या-यदुत्तमसंगेन-प्रधानपुरुषसंबन्धेन, अर्जितम्-उपार्जितम्, यच्च पापिजनसंगत्यागार्जितं स्यात्तत्सुविहितदानयोग्यम्, न गर्हितत्वात्। उक्तं च -

खस-ताइय-सबर-पुलिंदियाण संगेण जं विढत्तं तु ।
तण्ण धणं धम्मट्ठाण, कप्पए जं सुविहियाणं ॥१॥

तथा कपटेन कूटतुला-कूटमान-चौर्य-न्यासापहारादिना वर्जितं रहितं स्यात्, तद्वित्तमशन-पान-खादिम-स्वादिम-वस्त्र-पात्र-कम्बल-शय्या-संस्तारकादिवस्तुरूपं पात्रदानयोग्यं सुविहितजनवितरणोचितं पवित्रं दातुर्ग्रहीतुरप्यनन्तपातकघटाविघटनत्वेन नैर्मल्यकृद् भवतीति गाथार्थः॥

इदानीं गाथाषट्केन सत्पात्रगुणश्लाघां प्रख्यापयन्नाह-

**पंचमहव्वयकलियं अक्खलियं णाणदंसणचरित्ते ।**
**अट्ठमयविप्पमुक्कं जियदुसहपरीसहसमूहं ॥ २२॥**

**जियकोहं जियमाणं जियमायं तहय चेव जियलोहं ।**
**जियकामं जियमोहं जियणिद्दापंचयं णिच्चं ॥ २३॥**

**सोमाकारं सव्वंगसुंदरं जणियजणमणाणंदं ।**
**कल्लाणवल्लिपल्लवपल्लवणघणाघणारंभं ॥२४॥**

**मंदरगिरिमिव धीरं ससहरमिव सोमलेसया सहियं ।**
**सायरमिव गंभीरं दिणयरमिव दित्ततेइल्लं ॥ २५॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**विहियमइं तवचरणे बहिरंतरभेयबारसविहंमि ।**
**उवएसदाणपगुणं सरणं भवभीयजंतूणं ॥ २६ ॥**
**एरिसगुणोववेयं सुपसिद्धं सिद्धिरमणिकयबुद्धिं ।**
**सिरिवइरसामिसरिसं पत्तं साहंति जिणवसहा ॥२७॥**

व्याख्या-पंचमहव्वयत्ति, पञ्चसंख्यानि यानि महाव्रतानि, प्राणातिपात-मृषावादादत्तादान-मैथुन-परिग्रहपरिहारलक्षणानि, तैः कलितं तदासेवनसावधानमानसम् । अक्खलियंति-अस्खलितम्, क्व? ज्ञानदर्शनचारित्रे, ज्ञानं च दर्शनं च चारित्रं चेति द्वन्द्वः। तत्र ज्ञानं मतिश्रुतावधिमनःपर्यायकेवलभेदेन पञ्चप्रकारम्, दर्शनमौपशमिक-क्षायोपशमिकक्षायिकसास्वादनमिश्रादिभेदम्, अथवा कारक-रोचक-दीपकभेदवत्। चारित्रं-पञ्चसमितित्रिगुप्त्यात्मकम्, अथवा-

पञ्चाश्रवाद्विरमणं पञ्चेन्द्रियनिग्रहः कषायजयः ।
दण्डत्रयविरतिश्चेति संयमः सप्तदशभेदः ॥१॥

इत्येवंविधे ज्ञानदर्शनचारित्रेऽस्खलितम्-अतीचारस्खलनारहितम्।

अट्ठमयत्ति-अष्टौ अष्टसंख्या ये मदा जाति-कुल-रूप-बहु(ल)-श्रुत-तपो-लाभैश्वर्योत्कर्षोत्थास्तैर्विप्रयुक्तं विमुक्तं, यतो मदा हि क्रियमाणा अशुभाय संभवन्ति ।

यदुक्तं-

जाइ-कुल-रूव-बल-सुय-तव-लाभेसिरियअट्ठमयमत्तो ।
एयाइं चिय बंधइ असुहाइं बहुं च संसारे ॥१॥

[उपदेशमाला-गा.३३०]

जियदुसहत्ति, जितः-पराभूतो, दुःसहानां-सोढुमशक्यानाम्,

Jain Education International For Personal & Private Use Only www.jainelibrary.org

परीषहाणां समूहः क्षुत्-पिपासा-शीतोष्ण-दंशमशक-नाग्न्यारति-स्त्री-चर्या-निषद्याशय्याक्रोश-वध-याच्ञालाभ-रोग-तृणस्पर्श-मल-सत्कार-पुरस्कारप्रज्ञाज्ञाना( ?न)दर्शनरूपो येन तत्। जिय कोहंति-जितः क्षयं नीतः क्रोधो रोषो येन तत्। जियमाणंति-जितो मानो अहङ्कार-विकारो येन तत्, जियमायंति-जिता माया परवञ्चनारूपा येन तत्, तथैव च तेनैव प्रकारेण जितो लोभश्चतुर्थसंपरायो येन तत्, एतेषां पृथग्जयकरणमिति ज्ञापयति यदेषां मध्ये एकैकोऽपि संसारकान्तार-प्ररूढगूढभूमीरुहमूलसिञ्चनहेतुत्वात्। यदाहुः श्रीशय्यंभवाचार्यपादाः-

कोहो य माणो य अणिग्गहीया, माया य लोहो य पवड्ढमाणा ।
चत्तारि एए कसिणा कसाया, सिंचंति मूलाइं पुणब्भवस्स ॥१॥
[दशवै०८।४०।]

जियकामंति[जिताः कामाः शब्दादिलक्षणा येन तत्,] जियमोहंति-जितो मोहोऽज्ञानलक्षणो येन तत्, यतो मोहमहाग्रहग्रस्तः प्राणी युक्तायुक्तविवेचको न भवति। उक्तं च-

ण गणेइ कुलकलंकं, ण गुरुवएसं ण सीलगुणभंसं ।
ण य जसकित्तिविणासं गहिओ मोहग्गहेण णरो ॥ १॥

जियणिद्दंति-जितं निद्रापञ्चकं निद्रा[1]-निद्रानिद्रा[2]-प्रचला[3]-प्रचलाप्रचला[4]-स्त्यानर्द्धी[5]-रूपं येन तत्, निद्रा प्रमादो भवपाताय जायते। यदुक्तं-मज्जं विसयकसाया णिद्दा विकहा य पंचमी भणिया ।
एए पंच पमाया जीवं पाडंति संसारे ॥१॥ [संबोधसत्तरी गा०७७]
नित्यमिति ज्ञापयति यदेतेषां जयविधौ सर्वदैव यतनीयमिति ॥

सोमाकारंति-सौम्योऽरौद्रत्वात् सर्वजनमनःप्रसत्तिकृदाकार आकृतिर्यस्य तत्, आकृतिरेव सकलगुणमूलत्वात् ॥ यतः-

यत्रोदकं तत्र पतन्ति हंसा, यत्रामिषं तत्र पतन्ति गृध्राः।
यत्रार्थिनस्तत्र भवन्ति वेश्या यत्राकृतिस्तत्र गुणा भवन्ति ॥ १॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सव्वंगत्ति-सर्वाण्यपि-समस्तान्यपि यान्यङ्गान्युत्तमाङ्गादीनि तैः सुन्दरं-मनोहरम्, अङ्गविकलोऽपि लोकेऽप्रशंसाभाजनं स्यादत एवेदं हृद्यं विशेषणम् । जणियत्ति, जनित-उत्पादितो जनमनस्सु-भविकचेतस्सु आनन्दो येन तत्। कल्लाणत्ति, कल्याणानीहपरलोकसुखकारीणि यानि श्रेयांसि तान्येव वल्लयो-वल्लर्यस्तासां ये पल्लवाः-किसलयानि, तेषां यत् पल्लवनं-किसलयनं तत्र घनाघनारम्भ इव-वर्षाकाल इव तत्, यथा घनागमे निखिलवनस्पतीनामुल्लासस्तथा सत्पात्रागमेऽप्यतुल्य-कल्याणसंभव इति ॥

मंदरत्ति-मन्दरगिरिमिव धीरम्, यथा कनकाचलं प्रबलतरा-निलप्रेङ्खोलनाश्चलयितुं न शक्नुवन्ति, तथा सुविहितमपि परीषहोपसर्गाः सन्मार्गान्न चालयन्तीति । ससहरत्ति-शशधरमिव सौम्यलेश्यया सहितम्, यथा चन्द्रं सकलजननयनानन्ददायिविशदचन्द्रिकया युक्तम्, तथा मुनिमपि परमार्थामन्दानन्दनिस्यन्दसुन्दरशुक्ललेश्यया युतमिति। सायरत्तिसागरमिव गम्भीरम्, यथा समुद्रं प्रचुरतरवारिणा अगाधम्, तथा साधुमपि अप्रतिश्राविगुणत्वेनापरैरलब्धमध्यमिति। दिणयरत्ति-दिनकरमिव दीप्ततेजस्कं-दीप्तं तेजोऽस्येति स्वार्थे कश्च वेति प्राकृतसूत्रेण डिल्लप्रत्ययः, यथा किल सकलग्रहेष्वधिकतरतेजः-प्रसरभास्वरं भास्करं, तथा मुनिमप्यतिदुस्तपतपस्तेजसा देदीप्यमानमिति॥

विहियमइत्ति-अनशनावमौदर्य-वृत्तिसंक्षेप-रसपरित्याग-काय-क्लेशाङ्गोपाङ्गसंलीनतेति बाह्यम्, तथा प्रायश्चित्त-विनय-वैयावृत्य-स्वाध्याय-ध्यान-कायोत्सर्गेत्यान्तरम्, तयोर्योऽस्यैव भेदः षट्षट्प्रकार-स्तेन द्वादशविधे तपश्चरणे विहितमतिं कृतबुद्धिम् । उवएसत्ति-उपदेशो विशुद्धसिद्धान्ताविरुद्धधर्मदेशनालक्षणस्तस्य दानं निस्पृहत्त्वेन च वितरणम्, तत्र प्रगुणं सावधानम्, उवएसपरो य आयरिओ इति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वचनात् । सरणत्ति-भवश्चतुर्गतिकसंसारस्तत्रानेकप्रकारदुःखपरंपरया भीताः कान्दिशीका ये जन्तवो जीवास्तेषां शरणम्-प्राणत्राणकरणम्॥ यतः-

पिता माता भ्राता प्रियसहचरी सूनुनिवहः,
सुहृत् स्वामी माद्यत्करिरथभटाश्वः परिकरः॥
निमज्जन्तं जन्तुं नरककुहरे रक्षितुमलम् ।
गुरोर्धर्माधर्मप्रकटनपरात् कोऽपि न परः ॥१॥ [सिन्दूरप्रकरः१५]

एरिसत्ति-ईदृशगुणसमुपेतं-पूर्वोक्तमहाव्रतादिगुणपरिकलितम्, सुप्रसिद्धं-स्वसमयपरसमयविदितम्। सिद्धिरमणिकृतबुद्धिम् -सिद्धि-र्मुक्तिः सैव रमणी वधूस्तस्यां कृता बुद्धिर्धिषणा येन तत्, यतः-

परलोकहितायैव प्रवर्त्तते मध्यमः क्रियासु सदा ।
मोक्षायैव तु घटते विशिष्टमतिरुत्तमः पुरुषः ॥ १ ॥

श्रीवज्रस्वामिसदृशं चरमदशपूर्वधरप्रतिमं पात्रं जिनवृषभास्तीर्थंकराः साहन्ति-कथयन्तीति गाथावृन्दार्थः॥

भावार्थः कथानकगम्यस्तच्चेदम्,

**भरतेऽवन्ति**देशश्रीशिरःशेखरतां गतम् ।
अस्ति **तुम्बवन**स्थानं, निधानमिव संपदाम् ॥ १ ॥
तत्रेभ्यतनयो न्यायी, नाम्ना **धनगिरि**र्धनी ।
यं निरीक्ष्यामरगिरी ह्रीतोऽन्यक्षेत्रमासदत् ॥ २ ॥
सदा मनोवचःकायैर्धर्मकर्मणि कर्म्मठः ।
स यौवनश्रियं प्राप, मुमुक्षुरिव निर्वृतिम् ॥ ३ ॥
तद्विवाहकृते यां यां याचेते पितरौ कनीम् ।
तां तां निषेधयामास, स दीक्षाग्रहणोन्मुखः ॥ ४ ॥

---

* अमरगिरिर्ह्रीणो इति पाठः समीचीनो भाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ श्री**धनपालस्य सुनन्दा**नामनन्दिनी ।
दृष्ट्वा धनगिरिं भाग्यसौभाग्यैकनिकेतनम् ॥ ५ ॥
प्रतिज्ञामकरोदेवं, यावज्जीवममुं विना ।
मनसापि पतीयामि, जातुचिन्नापरं नरम् ॥ ६ ॥ युग्मम् ॥
सुनन्दा धनपालाय, प्रोच्याभिप्रायमात्मनः ।
उपयेमे धनगिरिमनिच्छुमपि सस्पृहम् ॥ ७ ॥
गतकामोऽपि तामाप्तकालां बालामभुङ्क्त सः ।
यस्मादवश्यभोगेभ्यः कर्मभ्यः कः पलायते ॥ ८ ॥
तदा पुण्यजनश्च्युत्वा धनदाभः श्रिया सुरः ।
तस्याः कुक्षिमलञ्चक्रे द्विरेफ इव मञ्जरीम् ॥ ९ ॥
आपन्नसत्त्वामापृच्छ्य प्रियां धनगिरिः सुधीः ।
गुरोः सिंहगिरेः पार्श्वे, विरक्तो व्रतमाददे ॥ १० ॥
सुनन्दासोदरे**णार्यसमितेन** समन्वितः ।
स जग्राह गुरोर्विद्यां, रत्नराजीमिवार्णवात् ॥ ११ ॥
पूर्णमासा सुनन्दाथ शुभे लग्ने शुभे दिने ।
सुखेन सुषुवे सूनुं प्राचीव दिवसाधिपम् ॥ १२ ॥
जन्ममङ्गलगीतानि गायन्त्यो हरिणेक्षणाः ।
दर्शं दर्शममुं बालमित्यालपुः परस्परम् ॥ १३ ॥
नादाप्स्यत पितैतस्य शिशोर्यदि पुरा व्रतम् ।
तदाद्य जन्ममङ्गल्यमतुल्यं सोऽकरिष्यत ॥ १४ ॥
समर्थोऽपि विना कान्तं किं विधत्ते वधूजनः ।
नायकेन विना सैन्यमन्यचक्रं हि किं जयेत् ॥ १५ ॥
संलापमेवमेतासां श्रावं श्रावं स बालकः ।
जातजातिस्मृतिर्दीक्षाकक्षीकारपरोऽभवत् ॥ १६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मातेयं मद्‌गुणैः प्रीता दीक्षायै मां न मोक्ष्यति ।
अतो रुरोद तत्खेदोत्पादनायानिशं शिशुः ॥१७॥
न क्रीडनैर्न चोल्लापैर्न गीतश्रवणैरपि ।
व्यरंसीद्रोदनान्नैष पूतनापीडिताङ्गिवत् ॥ १८॥
इत्थं *रुरोदतस्तस्य षण्मास्या व्यतिचक्रमे ।
सुनन्दापि निरानन्दा सूनुना तेन साजनि ॥ १९॥
अथैयुर्धनगिर्यार्यसमितादियतियुताः ।
तत्र स्थाने धनास्थाने **श्रीसिंहगिरि**सूरयः ॥ २०॥
नत्वा गुरुं धनगिरिः श्रीआर्यसमितान्वितः ।
संसारिणो वन्दयितुमापप्रच्छ तदा मुदा ॥ २१॥
तत्कालं किंचिदाचार्यो विचार्य शकुनं धिया ।
व्याजहार चमत्कारकारिणीं मधुरां गिरम् ॥ २२॥
लाभोऽस्ति युवयोरद्य गरीयान् गम्यतामतः ।
किंत्वचित्तं सचित्तं च लब्धं त्याज्यं न भैक्षकम् ॥ २३॥
ओमित्युक्त्वा गतौ गेहं सुनन्दाया महामुनी ।
तत्र तौ वीक्ष्य तत्सख्यः सहासमवदन्नदः ॥ २४॥
समेतः सखि! ते कान्तः सूनुरस्मै प्रदीयताम् ।
यथैनं प्राप्य दुःखस्य संविभागी भवेदयम् ॥ २५॥
तदा सुनन्दा निर्वेदमापन्ना शिशुरोदनात् ।
कराभ्यां तमुपादायावादीद् धनगिरेः पुरः ॥ २६॥
हे महात्मन्नियत्कालं सक्लेशं पालितः सुतः ।
इदानीं चैनमादायोद्धर मां दुःखसागरात् ॥ २७॥
गुरोर्गिरं धनगिरिः स्मृत्वा स्मित्वा च तां जगौ ।
कल्याणि! करणीयं ते साध्ववश्यं वचो मया ॥ २८॥

---

* रोरुदतस्तस्य इति पाठः संगतो भाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सहसा तु सुतं दत्त्वा माशयेऽनुशयं कृथाः ।
पश्चाद्वस्तु स्वहस्तेन, दत्तं न प्राप्यते क्वचित् ॥ २९ ॥
तथापि भद्रे! कार्येऽस्मिन् क्रियन्तां साक्षिणो जनाः ।
यतः सन्तो विवादाय प्रवर्त्तन्ते कदापि न ॥ ३० ॥
तथा कृत्वा सुनन्दापि खिन्ना तस्मै ददौ सुतम् ।
सोऽपि तं निजहस्ताभ्यां चिन्तारत्नमिवाददे ॥ ३१ ॥
पात्रबन्धान्तरे न्यस्तो मुनिना करकोशतः ।
तत्कालमेव बालोऽयं निवृत्तः परिदेवनात् ॥ ३२ ॥
परिदेवनात्-रोदनात् ।
सुनन्दामन्दिरादेतौ गुर्वादेशवशंवदौ ।
नैषेधिकीं वितन्वानौ, प्रविष्टौ पौषधालयम् ॥ ३३ ॥
दृष्ट्वा धनगिरिं सूरिर्भारभुग्नभुजालतम् ।
स्वयमुत्थाय जग्राह, पात्रबन्धं मुनेस्ततः ॥ ३४ ॥
पात्रबन्धमहाभारकलनाद् गुरवो जगुः ।
वज्रं वज्रमितीवास्य शिशोर्वज्राभिधाभवत् ॥ ३५ ॥
वज्रम्-बालः ।
तं वीक्ष्य सुन्दराकारमिति दध्युर्मुनीश्वराः ।
यदेष सत्यतां नेता गुरुतां नः शिशूत्तमः ॥ ३६ ॥
अनेन गुरुसारेण, तेजसा चातिशायिना ।
युगप्रधानताधारो ध्रुवं भाव्येष शासने ॥ ३७ ॥
बालः पाल्यः प्रयत्नेन संघाधारोऽयमित्यलम् ।
विमृश्य पालनायालं साध्वीभ्यो गुरवो ददुः ॥ ३८ ॥
साध्व्योऽपि निधिवच्छय्यातरस्त्रीभ्यस्तमार्पयन् ।
ता अप्याददिरे बालमबालं गुणसंपदा ॥ ३९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्तन्यपानस्नानभूषाविलेपनकक्रीडनैः ।
स्वपुत्रमिव तं बालमपुषच्छ्राविकाजनः ॥४०॥
पुण्याभिरेव क्रीडाभी रममाणो निरन्तरम् ।
प्रासुकान्नं च भुञ्जानः साध्वीनां सोऽहरन्मनः ॥४१॥
सुनन्दापि तमालोक्य सत्रागारमिव श्रियाम् ।
पुत्रोऽयमिति मे श्राद्धानयाचत पुनः पुनः ॥४२॥
तैरप्यूचे न जानीमो घटनां युवयोरिमाम् ।
गुरूणां किन्त्वयं न्यासोऽस्मास्वतः पाल्यतेतराम् ॥४३॥
तैरेव न्यक्कृता गाढं, सुनन्दानन्दवर्जिता।
तमालुलोके दूरस्था स्तेनीवान्यौकसो धनम् ॥४४॥
सुनन्दा वत्सवात्सल्यविवशा श्रावकाश्रये ।
कदाप्यागत्य धात्रीव स्तन्यपानमकारयत् ॥ ४५॥
**अथाचलपुरा**सन्नतटिनीद्वितयान्तरे ।
**कन्यापूर्णा**ह्वयं तीर्थं, विद्यते तापसाश्रितम् ॥ ४६॥
तेष्वेकस्तापसो लेपविद्यां विन्यस्य पादुके ।
पदोरगाधपानीये बम्भ्रमीति बकोटवत् ॥ ४७॥
स नित्यमुत्तरन्नित्थं सरितं लेपविद्यया।
मुग्धानाश्चर्ययाञ्चक्रे, शक्रजालिकवन्नरान् ॥ ४८॥
सोऽन्यदा प्राह हे श्राद्धाः! शासने भवतामपि ।
विद्यते मादृशः कश्चिन्माहात्म्यश्रीमहोदधिः ॥ ४९॥
इत्थं निरन्तरं श्राद्धास्तद्वाक्यैः क्रकचैरिव ।
दारुवद् दीर्यमाणाङ्गा, गमयन्ति स्म वासरान् ॥ ५०॥
अस्मिन्नवसरे तत्र, श्रीवज्रस्वामिमातुलाः।
श्रीआर्यसमिताचार्या ऐयुर्विद्याविशारदाः ॥ ५१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्रावकास्तत्कृतां निन्दां, नत्वा सूरीन् व्यजिज्ञपन् ।
तेऽपि ज्ञानेन तद्युक्तिं, ज्ञात्वा तानेवमादिशन् ॥ ५२॥
शक्तिस्तपोमयी का स्यादज्ञाने तापसब्रुवे ।
किन्तु केनापि लेपेन, मूढानाश्चर्ययत्ययम् ॥ ५३॥
तस्मादमुष्य विज्ञानलेशे श्रावकपुंगवाः!।
विस्मयं मा कुरुध्वं नः कुरुध्वं चेति भाषितम् ॥ ५४॥
स निमन्त्र्य निजे गेहे, तस्य चाङ्घ्री सपादुकौ ।
प्रक्षालनीयौ नीरेण भक्तिदम्भात्पुनः पुनः ॥ ५५॥
जैनापभ्राजनाभेत्त्री मायापि हितहेतवे ।
अतो भवद्भिरादेशः प्रमाणीक्रियतामयम् ॥ ५६॥
ओमिति प्रतिपद्याथ श्राद्धाः श्रद्धाभरादिव ।
तं तापसं समभ्यर्थ्य भोजनार्थं न्यमन्त्रयन् ॥ ५७॥
सोऽपि तद्भक्तिसञ्जातहर्षः पौरजनान्वितः।
एकस्य श्रावकस्यौकोऽभ्यगादुत्सवपूर्वकम् ॥ ५८॥
तेऽप्याहुरद्य धन्याः स्मो युष्मदागमनादतः ।
सिंहासनमलङ्कृत्य, भगवन्नः कृतार्थय ॥ ५९॥
नूनमस्मद्गृहे शान्तिर्भविता त्वत्पदोदकात् ।
इति ब्रुवाणाश्चाटूनि, ते पानीयमढौकयन् ॥ ६०॥
अनिच्छतोऽपि तस्यामी, तथा प्राक्षालयन् पदौ ।
यथा लेपस्य लेशोऽपि, नास्थान्मार्जितपात्रवत् ॥ ६१॥
यथा यथा क्रमौ तस्य, श्राद्धा लिम्पन्ति चन्दनैः।
तथा तथास्य हृदयं, चित्रं ज्वलति वह्निवद् ॥ ६२॥
तेऽपि तं भोजयन्ति स्म, भोज्यं सरसमादरात् ।
यद्वा स्वसाध्यसिद्ध्यर्थं स्कन्धे नारोप्यते खरः ॥ ६३॥
स स्वांह्रिलेपनाशेन, नदीब्रुडनशङ्कितः।
नाज्ञासीद् भोजनास्वादं, मन्दः सूक्तरसं यथा ॥ ६४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अद्यापि भविता कोऽपि, लेपांश इति साहसात् ।
स भोज्यान्ते सरित्तीरमगात्पौरनरैर्वृतः ॥ ६५ ॥
तापसेन तपःशक्त्या, नामिताः श्रावका अपि ।
श्रुत्वेति भोजभूजानिस्तस्य पार्श्वमुपागतः ॥ ६६ ॥
सूरयोऽपि तदा तत्र जैनधर्मसमुन्नतिम् ।
चिकीर्षवः कुद्दग्मार्गनिरासाय समैयरुः ॥ ६७ ॥
अहो पश्यत माहात्म्यं, तापसेन्द्रस्य संप्रति ।
यदसौ हंसवत्पद्भ्यां, तरिष्यतितरां नदीम् ॥ ६८ ॥
इत्युद्दीपकवाक्यैः, स प्रेर्यमाणो जनव्रजैः ।
द्दषत्खण्ड इवामज्जद् भीतोऽपि त्रपया जले ॥ ६९ ॥
तं नद्यां ब्रुडितं द्दष्ट्वा हस्ततालापुरःसरम् ।
जहास जनता सर्वा विब्रुवाणेति भारतीम् ॥ ७० ॥
अहो कथं तापसेन दम्भेन तरता नदीम् ।
वयं मुषितसर्वस्वाश्चौरेणेव विनिर्मिताः ॥ ७१ ॥
इतश्च कूलिनीकूलं सूरयोऽभ्येत्य सत्वरम् ।
भोजभूपजनाध्यक्षमाख्यन्नित्यद्भुतं वचः ॥ ७२ ॥
वत्से! कूलिनि! पन्थानं यच्छ सावद्यवर्जितम् ।
यियासवः स्मस्ते पारं संसारस्येव निर्ममाः ॥ ७३ ॥
शिवयोरिव तत्कालं, कूलयोर्मेलमीयुषोः ।
सूरिः ससंघभूजानिजनः प्राप परं तटम् ॥ ७४ ॥
गुरुमाहात्म्यमालोक्य संघो हर्षं नृपादयः ।
सम्यक्त्वं तापसाश्चापि, दीक्षामवितरु*र्मुदा ॥ ७५ ॥
तत्र **ब्रह्माभिधे** द्वीपे, यैरग्राहि व्रतिव्रतम् ।
**ब्रह्मदीपिका**शाखाभूत्तेभ्यः समयविश्रुता ॥ ७६ ॥

* दीक्षामवतेरुर्मुदा इति संगतम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ तुम्बवनस्थाने वज्रे जाते त्रिवार्षिके ।
मुनयो धनगिर्याद्या विहरन्तः समैयरुः ॥ ७७॥
तदा धनगिरेः पार्श्वात्सुनन्दा नन्दनं निजम् ।
न्यासीकृतं निधिमिव ययाचे स्नेहमोहिता ॥ ७८॥
महात्माह मुधा मुग्धे! प्रलापं कुरुतेतराम् ।
दत्त्वा ससाक्षिकं सूनुं, याचमाना न लज्जसे ॥ ७९॥
सापि प्राह तदा पृष्टो न मया स्वजनो जनः।
अतस्तदननुज्ञातं सुतं मे को जिघृक्षति ॥ ८०॥
सुनन्दाया मुमुक्षोश्च पक्षौ वादचिकीर्षया ।
वज्रमादाय संप्राप्तौ भोजभूजानिपर्षदि ॥ ८१॥
राज्ञापि दक्षिणे पार्श्वे श्रीसंघ उपवेशितः।
दक्षिणेतरपार्श्वे च, सुनन्दायाः सुतोऽभवत् ॥ ८२॥
पक्षद्वयस्य वाक्यानि, श्रुत्वा भूपो जगाविदम् ।
यस्याकारित एत्येष शिशुस्तस्येति मे मतम् ॥ ८३॥
अस्मिन्न्याये भुवो भर्तुरुभाभ्यां संमतीकृते ।
स्त्रीपक्षीयास्तदा पूर्वं नृपमेवं व्यजिज्ञपत् ॥ ८४॥
देवायं व्रतिनीमध्ये वृद्धिमाप नवेन्दुवत् ।
अतस्तदनुगं सूनुमादावाह्वयतु प्रसूः ॥ ८५॥
ओमित्युक्ते विशां पत्या सुनन्दानन्दमेदुरा ।
बाललोभनयोग्यानि वस्तून्यग्रे न्यवेशयत् ॥ ८६॥
ततो माता मरालीव सत्पक्षोल्लासशालिनम् ।
सुधामधुरया वाचा बालहंसं समाह्वयत् ॥ ८७॥
एहि वत्स! ममोत्सङ्गसरो भूषय हंसवत् ।
भोज्यान्येतान्युपादत्स्व, यच्छातुच्छां मुदं तथा ॥ ८८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वृषैरिभैरथैरश्वैर्हंसैः कोकैर्बकैः शुकैः ।
मृगैश्च क्रीडनं कुर्वन्ममोल्लासय मानसम् ॥ ८९ ॥
तात! ते मुखचन्द्रस्य, भवामि नियतं बलिः ।
न्युञ्छनं चाक्षियुग्मस्य, तदेत्योज्जीवयाशु माम् ॥ ९० ॥
मा मां दीनाननां मुञ्च वत्स! स्वच्छमते! प्रसूम् ।
गर्भाधारणपोषणादात्मानमनृणीकुरु ॥ ९१ ॥
यद्यपि त्वं विरक्तोऽसि, तथाप्येत्यैकदा सुत!।
एकाकिनीमनाथां मां सनाथीकुरु सत्कृप! ॥ ९२ ॥
एवं मातृवचोवृन्दैः पटुचाटुपरैरपि ।
वज्रस्य न मनोऽभेदि, वज्रस्येवोग्रहेतिभिः ॥ ९३ ॥
ततो वज्रो निजे चित्ते, चिन्तयामासिवानिति ।
यत्सती जननी मान्या, गौरवैर्जनकादपि ॥ ९४ ॥
क्रियमाणे प्रसूवाक्ये श्रीसंघोल्लङ्घनं भवेत् ।
तस्मिंश्च विहितेऽनन्तभवाम्भोधिनिमज्जनम् ॥ ९५ ॥
परमाराधयन् संघं करिष्ये जननीहितम् ।
यतः सा मद्वियोगार्त्ता व्रतमादास्यते द्रुतम् ॥ ९६ ॥
एवं विचारचातुर्यमहार्यं हृदि स स्मरन् ।
न्यधान्मातरि नो दृष्टिं, मध्याह्ने रविमूर्त्तिवत् ॥ ९७ ॥
ततो धनगिरिः पृथ्वीपतिना प्रेरितः सुधीः ।
धर्मध्वजं तत्त्वमिव करे कृत्वेत्यभाषत ॥ ९८ ॥
हे वत्स! यदि वाञ्छास्ति, श्रामण्यग्रहणे तव ।
तदा मुक्त्यङ्गनादूतीमङ्गीकुरु रजोहृतिम् ॥९९ ॥
इदमाकर्ण्य कर्णाभ्यां वज्र उत्प्लुत्य वेगतः ।
रजोहरणमादत्त, शिवकल्पलताफलम् ॥ १०० ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्तेनोपाददानेन, हेलया बालहेलिना ।
चक्रे संघाम्बुजं स्मेरं, म्लानं च जननीकुवम् ॥१०१॥
कपोलतलविन्यस्तहस्ता कृत्वा मनो दृढम् ।
सुनन्दा विगतानन्दा चेतस्येवमचिन्तयत् ॥१०२॥
पूर्वं भ्राता ततो भर्त्तातः परं च तनूद्भवः ।
प्राव्राजिषुरतो गेहवासे किमु फलं मम ॥१०३॥
ततः सुनन्दा विच्छायवदनागान्निजं गृहम् ।
हृष्टा वज्रं गृहीत्वागुर्मुनयोऽपि स्वमाश्रयम् ॥१०४॥
संघोन्नतिकरं वज्रं, भावद्रव्यानगारिणम् ।
श्रीसूरयोऽर्पयामासुः साध्वीभ्यः पुनरप्यमुम् ॥१०५॥
वैराग्यतः सुनन्दापि दीक्षामक्षीणसम्पदम् ।
श्रीसिंहगिरिसूरीणां पदमूले समाददे ॥१०६॥
लब्ध्या पदानुसारिण्यैकादशाङ्गीरसं मुदा ।
साध्वीमुखारविन्देभ्यो वज्रो भृङ्ग इवापिबत् ॥१०७॥
अथाष्टवार्षिकं दीक्षाजुषं वज्रमृषीश्वराः ।
सहादाय विजह्रुः श्रीअवन्तीनगरीं प्रति ॥१०८॥
मार्गान्तराले तन्वाने, वृष्टिं धाराधरे सति ।
सूरयोऽप्कायरक्षायै क्वाप्यस्थुर्यक्षमन्दिरे ॥१०९॥
श्रीवज्रस्य पुराजन्मसुहृदो जृम्भकाः सुराः ।
तत्सत्त्वस्य परीक्षार्थं, वृष्टिमल्पां वितेनिरे ॥११०॥
आवासितं महासार्थं ते विकुर्व्य स्वयं पुनः ।
नैगमीभूय सूरीन्द्रान् प्रणत्येति व्यजिज्ञपन् ॥१११॥
वज्रोऽयं प्रातराशाय सार्थे नः प्रेष्यतां प्रभो! ।
गुर्वादिष्टः स भिक्षार्थं, श्रीवज्रस्तैः समं गतः ॥ ११२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पततोऽम्भःकणानीक्ष्य व्यावृत्तोऽवद्यभीतितः ।
ज्ञात्वा चावस्थितां वृष्टिं भूयः स सह तैर्ययौ ॥११३॥
तत्र तार्णकुटीरेषु भोज्यान्यकालिकान्यलम् ।
विलोक्य विस्मितो द्रव्याद्युपयोगमदान्मुनिः ॥११४॥
समयेऽस्मिन्नसंभाव्यं विभाव्येति तदानने ।
निर्निमेषदृशौ दृष्ट्वा विबुधांस्तानबुद्ध सः ॥११५॥
देवपिण्डो ह्यकल्प्योऽयमतो व्याववृते व्रती ।
तद्वृत्ततुष्टाः प्रकटीभूय देवास्तमस्तुवन् ॥११६॥
नमस्ते जैनसिद्धान्तसुधासिन्धो! क्षमानिधे! ।
श्रीवज्र! वज्रजिद्धैर्याप्रमादिमुनिसत्तम! ॥११७॥
इति स्तुत्वा सुरास्तस्मै लब्धिं वैक्रियिकीं ददुः ।
तद्वृत्तश्रवणाद् बाढं, गुरवोऽपि चमत्कृताः ॥११८॥
वणिग्भूयान्यदा ज्येष्ठे मासि तैरेव जृम्भकैः ।
घृतपूरप्रदानाय, पुनर्वज्रो न्यमन्त्र्यत ॥११९॥
पूर्ववद् देवपिण्डोऽयं ज्ञात्वेति वलिते मुनौ ।
ते नभोगामिनीं विद्यां, तस्मै दत्त्वा तिरोदधुः ॥१२०॥
स पठद्भ्यो मुमुक्षुभ्यः, श्रुत्वा प्रज्ञाबलादलम् ।
एकादशाङ्गीं सोपाङ्गां वज्रो वज्रोपमां व्यधात् ॥१२१॥
प्रेरितोऽध्येतुमाचार्यैः स्वां प्रज्ञामप्रकाशयन् ।
तदुक्तस्यानुवादित्वं केवलं स्वीचकार सः ॥१२२॥
विहर्तुं यतिभिः प्राप्ते आचार्ये च बहिर्भुवम् ।
एकाकी पौषधागारे, तस्थौ वज्रर्षिरेकदा ॥१२३॥
पाठस्थानेषु साधूनां क्रमाद् विन्यस्य वेष्टिकाः ।
वज्रः प्रारब्धवान् दातुं, वाचनां गुरुवत्स्वयम् ॥१२४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रत्यावृत्ता बहिर्भूमेर्गुरवो गुरुशब्दितम् ।
श्रुत्वा तस्य शिशोर्दूराच्चेतस्येवमचिन्तयन् ॥१२५॥
किमद्य भिक्षवो भिक्षां कृत्वा शीघ्रं समागताः ।
अस्मानमी प्रतीक्षन्ते, स्वाध्यायविधितत्पराः ॥१२६॥
वसतिद्वारमायाताः सूरयो वज्रमेव तम् ।
ददानं वाचनामङ्गादीनां, दृष्ट्वा चमत्कृताः ॥१२७॥
चित्ते च चिन्तयाञ्चक्रुर्धन्या एव वयं भुवि ।
यन्नः करे समारुक्षदेष शिष्यः सुरद्रुवत् ॥१२८॥
अहो प्रज्ञाप्रकर्षोऽस्य शिशोः सुरगुरोरिव ।
यत्पपाठाखिलाङ्गानि, कर्णाकर्णनमात्रतः ॥१२९॥
एष नो वीक्ष्य मा यातु, जातु मन्दाक्षतां मुनिः ।
अतः सूरीश्वरा नैषेधिकीमुच्चेरुरुच्चकैः ॥१३०॥
सोऽपि संहृत्य तत्सर्वं गुरुपादौ प्रमार्ज्य च ।
आकारगोपनं कृत्वा कूर्मवत् पुरतः स्थितः ॥१३१॥
मुमुक्षवोऽस्य मावज्ञां, कुर्वन्तु क्षुल्लकस्त्विति ।
यद्वा रत्नं रजश्छन्नं, पद्भ्यां कैः कैर्न घट्यते ॥१३२॥
अवधार्येत्यथाचार्याः स्वयं ग्रामे समीपगे ।
वज्रो वो वाचनां दाता निगद्येति प्रतस्थिरे ॥१३३॥
सविस्मया गुरोराज्ञां तथैव प्रतिपद्य ते ।
वज्रस्याग्र उपाविक्षन्, वाचनार्थं गुरोरिव ॥१३४॥
नोल्लङ्घनीया गुर्वाज्ञा, विदुषेति विमृश्य सः ।
तेभ्यो यतिभ्यः साश्चर्यचित्तेभ्यो वाचनां ददौ ॥१३५॥
एकवेलं स बालोऽपि ददानः श्रुतवाचनाम् ।
अबोधयद्वचोलब्ध्या मुनीन्मन्दमतीनपि ॥१३६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथाचार्या बहिर्ग्रामादागम्य कतिचिद्दिनैः ।
पप्रच्छुर्वाचनासौख्यं मुनीन्मधुकिरा गिरा ॥१३७॥
तेऽपि व्यजिज्ञपन् सूरीनस्माकं वाचनागुरुः ।
प्रसद्य दीयतामेष, एव बोधनलब्धिमान् ॥१३८॥
*यदेष श्रुतपारीणोऽवज्ञया ददृशे पुरा ।*
तत्पातकमिदानीं वः पुर आलोचयामहे ॥१३९॥
गुरवोऽप्यूचिवांसो वो बोधायेदं प्रदर्शितम् ।
अननुज्ञातसूत्रोऽयं नोचितो वाचनां प्रति ॥१४०॥
ततस्तस्मै निजाधीतश्रुतपारङ्गताय ते ।
उत्सारकल्पमाचख्युः सिद्धान्तस्थितिहेतवे ॥१४१॥
विहरन्तोऽन्यदाचार्या, गत्वा **दशपुरं** पुरम् ।
विचार्य हृदये किञ्चिद्वज्रं सानन्दमादिशत् ॥१४२॥
वत्स ! **श्रीभद्रगुप्ताख्याः** सांप्रतं दशपूर्विणः ।
विहरन्तो हरन्तोऽघमवन्त्यामागताः श्रुताः ॥१४३॥
तेषां शिष्यो न चास्माकं, त्वां विनान्योऽस्ति कश्चन ।
यः पूर्णदशपूर्वाणि स्वात्मसात्कुरुतेतराम् ॥१४४॥
तद्वत्सोज्जयिनीं गत्वा, तान्यधीष्व तदन्तिके ।
पठतस्ते च साहाय्यं कर्त्र्यः शासनदेवताः ॥१४५॥
इति प्रपद्य गुर्वाज्ञां, सौनन्देयो मुदा मुनिः ।
यतियुग्मयुतोऽचालीत्सूर्यवत्सौम्यशुक्रयुक् ॥१४६॥
मार्गमुल्लङ्घ्य सन्ध्यायां वज्रोऽवन्त्या बहिःस्थितः ।
तदा रात्राविति स्वप्नो भद्रगुप्तैरदृश्यत ॥१४७॥
कोऽपि प्रतीच्छकोऽद्यर्षिरित्यास्मत्करकोशतः ।
पतद्ग्रहं पयःपूर्णमादायातृप्त्यपाल्लघु ॥१४८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तन्मन्येऽद्यातिथिः कोऽपि साधुरेष्यति धीधनः ।
दशपूर्वीं ससूत्रार्थां, यो मत्पार्श्वाद् ग्रहीष्यति ॥१४९॥
तस्माद् धन्येषु मे रेखा, यदेषा दशपूर्विका ।
नूनं सत्पात्रयोगेन मय्युच्छेदं न यास्यति ॥१५०॥
इत्थं सुप्तोऽत्थितः सूरिर्यतीनां पुरतो जगौ ।
प्रातस्तद्वसतौ वज्रश्चागान्नैषेधिकीं ब्रुवन् ॥१५१॥
प्रायो वज्रं विना नान्य ईदृग्लावण्यवान् मुनिः ।
इति ध्यात्वा मनस्युच्चैर्गुरवो मुदमादधुः ॥१५२॥
यावदालिङ्गितुं सूरिः, कराभ्यामेनमीहते ।
तावद्वज्रोऽपि तत्पादपद्मे भृङ्ग इवालगत् ॥१५३॥
तेऽपि वज्रसमायोगजातरोमाञ्चकञ्चुकाः ।
व्रतकृत्येषु कल्याणं, तं पप्रच्छुः प्रमोदतः ॥१५४॥
वत्स! स्वच्छमते! हित्वा गुरूणां पदपङ्कजम् ।
किं ते मालवदेशेषु विहारकरणोद्यमः ॥१५५॥
इत्युक्तो गुरुणा सोऽपि, नम्रमौलिरदोऽवदत् ।
विभो! गुर्वाज्ञयाध्येतुं, दशपूर्वीमिहागमम् ॥१५६॥
सा च सिन्धाविव सुधा त्वय्येव वसति प्रभो! ।
तत्पानदानतस्तृष्णां, कृत्स्नां छिन्द्धि प्रसद्य मे ॥१५७॥
तत्प्रश्रयोक्तियुक्त्या ते सानन्दाः सूरयस्ततः ।
श्रीवज्रं दशपूर्वाणि पाठयाञ्चक्रिरेतराम् ॥१५८॥
अधीतपूर्वी वज्रोऽपि, भद्रगुप्तप्रसादतः ।
पुनर्दशपुरं प्राप, नन्तुं सिंहगिरीन् गुरून् ॥१५९॥
अथ वज्राय ते हृष्टाः सूरयो दशपूर्विणे ।
पूर्वानुज्ञान्वितां गच्छानुज्ञां विज्ञतमा ददुः ॥१६०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तस्मिन्महोत्सवे वज्रसुहृदो जृम्भकामराः।
तेनुः सुमनसां वृष्टिं, सृष्टिं तद्यशसामिव ॥१६१॥
ततः सिंहगिरिः सूरिर्विहितानशनक्रियः।
योगनिश्रेणिमार्गेणारुरोह स्वर्गमन्दिरम् ॥१६२॥
अथ श्रीवज्रनामानः सूरयो गुणसूरयः।
साधुपञ्चशतीयुक्ता व्यहरन्नवनीतलम् ॥१६३॥
श्रीवज्रस्वामिनो यत्र यत्रातिशयशालिनः ।
विजहुस्तत्र तत्रैव, जनो हर्षमयोऽजनि ॥१६४॥
इतश्च **पाटलीपुत्रे** वज्रस्य व्रतिनीजनः ।
**श्रीधन**श्रेष्ठिनो यानशालायां समवास्थित ॥१६५॥
तस्यास्ति **रुक्मिणी**पुत्री, रुक्मिणीरूपजित्वरी ।
सा च साध्वीसमायोगाद्विवेकास्पदतां गता ॥१६६॥
श्रीवज्रस्वामिनः शीललावण्यादिगुणामृतम् ।
साध्वीमुखारविन्देभ्यः पीत्वा रागं बभार सा ॥१६७॥
मुग्धा साध्वीसमक्षं च प्रतिज्ञामकरोदिति ।
वज्रमेव पतीयामि रुक्मिण्याः खल्वियं स्थितिः ॥१६८॥
विरक्तचित्ते श्रीवज्रे मरावाम्रफलादने ।
पिक्या इव मुधा मुग्धेऽभिलाषस्ते विलोक्यते ॥१६९॥
इत्यार्यिकाभिरुक्ता सा पुनः प्राहेति रुक्मिणी ।
हे तपस्विन्य आजन्म, शरणं वज्र एव मे ॥१७०॥
परमात्मनि योगिन्या, इव रत्या इव स्मरे ।
धनपुत्र्या मनोवृत्तिर्लग्ना वज्रमुनीश्वरे ॥१७१॥
वज्रार्थिन्या तया रूपस्मरोऽपि न परो वरः ।
दृशापि ददृशे हंसपत्न्या काकोलबालवत् ॥१७२॥
अथ श्रीपाटलीपुत्रे, वज्राचार्यान् समीयुषः ।
श्रुत्वा सहर्षं भूपालः सपौरः संमुखं ययौ ॥१७३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रभाप्रभावतोऽगण्यलावण्यरससागरान् ।
फड्डुके फड्डुके साधूनालोक्य वसुधाधवः ॥१७४॥
फड्डुके फड्डुके-वृन्दे वृन्दे ।
अयं वज्र उतायं वा, संशीतिमिति धारयन् ।
को भवत्सु भवध्वंसी, गुरुः पप्रच्छ तानिति ॥ १७५॥ युग्मम् ॥
मुनयोऽप्याहुरस्मासु, खद्योतनिकरेष्विव ।
वज्राचार्यस्य सूर्यस्येव राट्! कस्ते मनोभ्रमः ॥ १७६॥
एतेषु मुनिवृन्देषु, तारकाणां गणेष्विव ।
राजन्! राजेव यो भाति विद्याः श्रीवज्रमेव तम् ॥ १७७॥
विद्याः-जानीयाः ।
अथ श्रीवज्रमाचार्यमायान्तं दूरतो नृपः ।
साधुभिः कलभैर्युक्तं, गजराजमिवैक्षत ॥ १७८॥
भक्त्या भूपोऽनमद्वज्रं तस्य चाङ्घ्रिरजःकणाः ।
श्रीविशाले महीपालभाले तिलकतां गताः ॥ १७९॥
राजादिजनसंसेव्याः श्रीमन्तो वज्रसूरयः ।
पुरोद्यानमलंकृत्य, दिदिशुर्धर्मदेशनाम् ॥ १८०॥
तथाहि- सद्दानमूलोऽमलशीलशाखस्तपोविधानाद्भुतचित्रपत्रः ।
भावप्रसूनः सुकृताख्यशाखी, श्रेयःफलो हृद्भुवि रोपणीयः ॥ १८१॥
(उपजातिः)

इत्यादिदेशनावाणीपीयूषास्वादमेदुराः ।
राजाद्या वर्णयन्तस्तान् जग्मुर्धाम निजं निजम् ॥ १८२॥
ततः शुद्धान्तवध्वोऽपि श्रुत्वा तद्रूपवैभवम् ।
भूपालेनाभ्यनुज्ञाता नन्तुं सूरीश्वरं ययुः ॥ १८३॥
शुद्धान्तवध्वः-अन्तःपुरस्त्रियः ।
तदा धनाङ्गजापि श्रीवज्रमीक्षितुमुत्सुका ।
स मे समेतो जीवेश इत्याह पितरं प्रति ॥ १८४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अयमप्रतिबद्धश्चेद् गमिष्यत्यविवाह्य माम् ।
तन्मयापि वियोगिन्या कृशानुः स्वीकरिष्यते ॥ १८५॥
इत्याख्यातो धनश्रेष्ठी, सर्वाङ्गीणविभूषणाम् ।
रुक्मिणीं धनकोट्या चानैषीद्वज्रर्षिसंनिधौ ॥ १८६॥
मा पौरनारीविक्षोभो, भवेदिति यतिप्रभुः ।
शैलूष इव रूपं स्वं, परावृत्य समस्थित ॥१८७॥
कलाविलासिनमपि, कलावन्तमिव क्षितौ ।
विधात्रामुं कुरूपाङ्कं, सृजताहारि हा यशः ॥ १८८॥
इति ज्ञानेन विज्ञाय, जनानां जल्पनं मिथः ।
श्रीवज्रः सहजं रूपमग्रहीद्विश्वचित्रकृत् ॥ १८९॥
स हेमाम्भोजमध्यास्योदयाचलमिवार्यमा ।
उपदेशप्रकाशेन, सच्चक्राणां तमोऽहरत् ॥ १९०॥
अहो स्वाभाविकं रूपं, प्रभूणां स्मरजित्वरम् ।
इति जल्पन् जनोऽमज्जदानन्दामृतसागरे ॥ १९१॥
यथा स्वस्वान्तमुद्रायां वज्रवज्रं न्यवेश्यत ।
धन्यैव मम कन्येयमिति दध्यौ धनो हृदि ॥ १९२॥
व्याख्यान्ते स समुत्थाय, संयोज्य करकुड्मले ।
प्रणत्य च पदाम्भोजमिति वज्रं व्यजिज्ञपत् ॥ १९३॥
परपुष्टेव माकन्दं राजहंसीव मानसम् ।
त्वामेव देव! ध्यायन्ती, पाणिग्रहणहेतवे ॥ १९४॥
वरानपि वरानन्यान् सुभगान् दुर्भगानिव ।
निषेधयन्तीयत्कालं रुक्मिणी मत्सुता स्थिता ॥ १९५॥ युग्मम् ॥
त्वदेकशरणामेतामवजानासि चेद्विभो! ।
तदसौ त्वद्वियोगार्ता कर्ता स्वं भृशमग्निसात् ॥ १९६॥
स्त्रीजातिं भूषयत्येषा पुंजातिं च भवान् विभुः ।
तद्वां सङ्गमतो धाता, स्याद्वन्ध्यविधिश्रमः ॥ १९७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्प्रसद्य प्रपद्यामूं यौवनं सफलीकुरु ।
विज्ञा विज्ञापनां जातु, विफलीकुर्वते न हि ॥ १९८॥
स्वामिन्निस्सीमधामंस्ते रत्नकोटीरनेकशः ।
वितरिष्यामि रुक्मिण्याः पाणिमोचनपर्वणि ॥ १९९॥
धनोक्तमिदमाकर्ण्य वज्रप्रभुरभाषत ।
श्रेष्ठिन्नज्ञानधुर्योऽसि यदेवं मत्पुरोऽवदः ॥ २००॥
आ शैशवान्मया मुक्ता भोगाभोगा इवाहिताः ।
बुभुक्षुस्तांश्च भोः! श्वेव, वान्ताशी किं भवाम्यहम् ॥२०१॥
अनन्तसुखसंपत्तिसुभगां संयमश्रियम् ।
परिणीयापरां नारीं क इच्छेद् दुर्गतेः पदम् ॥२०२॥
यद्येषा धन! ते कन्या मयि प्रेमपरा तदा ।
चिन्तामणिमिवादत्तां मद्धितं श्रमणव्रतम् ॥२०३॥
संयोगैः किं वियोगान्तैः, किंपाकास्वादसोदरैः ।
परं परपदानन्दसंपदे यत्यते बुधैः ॥२०४॥
महामोहविषध्वंसि, सूरेरिति वचोऽमृतम् ।
निपीय रुक्मिणी सद्यः, प्रपेदे व्रतमार्हतम् ॥२०५॥
सत्यं वज्रः करेऽग्राहि, विज्ञया धनकन्यया ।
नो चेदसौ कथंकारमभिनन्मोहभूधरम् ॥२०६॥
तदा वज्रोपदेशाब्दैः, सिक्ता भव्यजनद्रुमाः ।
व्रतसच्छायतां प्राप्य, फेलुः शिवफलैर्न कैः ॥२०७॥
आकाशगामिनीं विद्यामथ श्रीवज्रसूरयः ।
**महापरिज्ञा**ध्ययनादुद्दध्रुः संघहेतवे ॥२०८॥
विद्येयं मानवक्षेत्रं, यावत्संचरणक्षमा ।
न कस्मैचित्प्रदेयेति, वज्रः संघपुरो जगौ ॥२०९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथो विहारमासूत्र्य, पूर्वदेशेषु सर्वतः ।
श्रीवज्रसूरयः प्रापुः क्रमेण दिशमुत्तराम् ॥ २१० ॥
तदा तत्र महारौद्रे दुर्भिक्षे भिक्षुसंकुले ।
संघो युगप्रधानं श्रीवज्रमेवं व्यजिज्ञपत् ॥ २११ ॥
प्रभो! कराले दुष्काले रङ्ककङ्कालसंकुले ।
धर्मकर्मकुलाचारांस्तत्यजुर्धनिनोऽपि हि ॥२१२॥
ध्यायन्ति केवलं धान्यध्यानं धनिजना हृदि ।
परात्मनीव दृष्टेऽस्मिन्, भजन्ते च मुदां पदम् ॥२१३॥
आहन्यमाना यष्ट्यापि रङ्कलोकाः क्षुधार्दिताः ।
पतन्ति भिक्षुभिक्षास्वपि वृकौघा अजास्विव ॥२१४॥
मुनीन् भिक्षार्थमायातो वीक्ष्य श्राद्धकुटुम्बिनः ।
मितम्पचा इव द्वारस्थगनं परितन्वते ॥ २१५ ॥
तस्मादस्मात्समुद्धर्तुं, कान्तारात्संघमर्हसि ।
नाथ! त्वदन्यो नैवास्ति, शासने लब्धिमान् यतः ॥२१६॥
एवं तद्वाक्यमाकर्ण्य, भगवानप्यचिन्तयत् ।
संघकार्ये नियोक्तव्या, विद्येति जिनजल्पितम् ॥२१७॥
ततः स साधुचक्रीशः समुत्तारयितुं नरान् ।
विचकार पटं स्फारं, चर्म्मरत्नमिव द्रुतम् ॥२१८॥
श्रीसंघसहितः सूरिरुपविश्य तदन्तरे ।
आकाशगामिनीं विद्यामनवद्यामयुङ्क्त सः ॥२१९॥
श्रीमतामर्हतां मार्गस्यौन्नत्यं ख्यापयन्निव ।
पटः पवनमार्गेऽसावचालीदचलादलात् ॥२२०॥
तदा शय्यातरः सूरेर्द्विजन्मा दत्तनामकः ।
*गतो बभूव गोक्षारिकार्ये तत्कालमाययौ ॥२२१॥*

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पटेन व्योमगं वीक्ष्य, श्रीवज्रं संघसंयुतम् ।
केशान् क्लेशानिवोन्मूल्य सोऽवादीदिदमूर्ध्वदृक् ॥२२२॥
पूर्वं शय्यातरोऽभूवम्, अतः साधर्मिकोऽधुना ।
तदनाथमिव त्यक्त्वा, मां मा याहि कृपानिधे! ॥२२३॥
तद्वाक्यमिदमाकर्ण्योत्खातकेशं तमीक्ष्य च* ।
श्रीवज्रसूरयोऽप्येवं, सिद्धान्तार्थमचिन्तयन् ॥२२४॥
ये स्वाध्यायपराः साधर्मिकाश्चरणधारिणः ।
प्रभावकाश्च ते तार्याः, सर्वशक्त्या मनीषिभिः ॥२२५॥
ततः श्रीसूरिणा शय्यातर आरोपिते सति ।
पटश्चचाल वेगेने धनुर्मुक्त इवाशुगः ॥२२६॥
चित्रयन् संघचेतांसि स्तूयमानोऽम्बरे सुरैः ।
भूरिसौगतलोकाढ्यं, पुरं प्राप **महापुरम्** ॥२२७॥
तस्मिन् देशे सुभिक्षाढ्ये सूरिपादप्रसादतः ।
श्रीसंघो धर्मकर्माणि निष्प्रत्यूहमसाधयत् ॥२२८॥
अथ ताथागतानां च जैनानां च परस्परम् ।
धर्मद्वेषाद्विरोधोऽभूदहीनां केकिनामिव ॥२२९॥
पुष्पादिपूजानिर्माणैरुत्सवैश्च नवैर्नवैः ।
रञ्जयन्तः प्रजाः श्राद्धा, बौद्धलोकान् विजिग्यिरे ॥२३०॥
त्वयि भक्तेऽपि शक्तेऽपि, राजंस्ताथागता वयम् ।
पराभूयामहे जैनैरित्यूचुस्ते विशांपतिम् ॥२३१॥
भूपोऽपि मालिकान् सर्वान्, समाहूयेत्थमादिशत् ।
यज्जैनेभ्यो न दातव्यं, पुष्पमात्रमपि क्वचित् ॥२३२॥
ततः काञ्चनकोटीभिरपि जैना जना न हि ।
पुष्पमात्रमपि प्रापुरभव्या इव निर्वृतिम् ॥२३३॥

---

* समीक्ष्य तम् इति संगतं भाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

धनिनोऽथ जिनस्याङ्गं, लिप्त्वा सद्यक्षकर्दमैः ।
समाधिनार्चिचन् पञ्चवर्णै रत्नैः सुमैरिव ॥२३४॥
इत्थं जितद्विषोऽप्येते परमुत्कर्षवाञ्छया ।
समेते शासनाभीष्टे, श्रीपर्युषणपर्वणि ॥२३५॥
प्रसूनैरद्भुतैः पूजां कर्तुकामा जगद्गुरोः ।
प्रभावनाकरं वज्राचार्यं व्यजिज्ञपन्निति ॥२३६॥ युग्मम् ॥
स्वामिन्! स्वाभाविकैः पुष्पैर्विना शोभां न गाहते ।
क्रियमाणापि देवार्चा ज्ञानशून्या क्रिया यथा ॥२३७॥
प्रभावकशिरोरत्ने, भगवंस्त्वयि जाग्रति ।
चेत्संघो न सहर्षस्तद्रवौ सति तमोभरः ॥२३८॥
तस्मात्प्रभो! समानीय सुमानि मुदमानतु?(य) ।
यद्वा भानुं विना कोऽन्यो जायते कोकशोकहृत् ॥२३९॥
इति श्रुत्वा वचस्तेषां, सावद्यमपि पापहृत् ।
अतः सूरिरगा**न्माहेश्वरी**पुरि नभोऽध्वना ॥२४०॥
**तत्रोद्यानेऽग्निदेवस्य** मालिक**स्तडिता**भिधः ।
मित्रं धनगिरेरस्ति सूरिस्तेन च संगतः ॥२४१॥
सोऽपि सूरीश्वरं दृष्ट्वा, नत्वा चेति व्यजिज्ञपत् ।
प्रभो! कृत्यं ममाख्याहि यथा स्यां पुण्यभाजनम् ॥२४२॥
श्रीवज्रोऽपि तमाचख्यौ संघादेशादुपागतः ।
पुष्पार्थं त्वं च तद्दाने, क्षमो माधवमासवत् ॥२४३॥
सोऽप्यूचे विंशतिर्लक्षाः सुमानां स्युरिह प्रभो! ।
यथेच्छं तानुपादाय मामत्यर्थं कृतार्थय ॥२४४॥
पुष्पाणि प्रगुणीकार्याणीत्थमुक्त्वा तु मालिकम् ।
ततः स्वयं गुरुः क्षुद्रं, **हिमवत्**पर्वतं ययौ ॥२४५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्राकृत्रिमचैत्यानि जिनानामभिनम्य सः ।
सिद्धैः समेतः **श्रीदेव्या** हृदं **पद्माभिधं** गतः ॥२४६॥
तदन्तरे भ्रमद्भृङ्गवाचालं हंसमालितम् ।
श्रीदेव्याः सदनाम्भोजं स मणीमयमैक्षत ॥२४७॥
ततः पद्मकरा **पद्मा** जिनार्चनचिकीर्षया ।
प्रस्थिता वज्रमालोक्य सप्रमोदा ननाम तम् ॥२४८॥
तेनाप्याशिषि दत्तायां श्रीराहादिश मां विभो! ।
सोऽथो सहस्रपत्राब्जं तत्करस्थमयाचत ॥२४९॥
पद्मानि लक्षसंख्यानि यच्छामि यदि वः स्पृहा ।
अस्मादिन्द्रवनादित्थमुक्त्वा श्रीः कमलं ददौ ॥२५०॥
सूरयोऽपि हि तत्पद्मापद्ममादाय वेगतः ।
व्यावृत्य वह्निदेवस्य, राममाराममाययुः ॥२५१॥
विकृत्य सुरवत्सूरिर्विमानं रत्नभासुरम् ।
तदन्तरे न्यधत्त श्रीदत्तं पद्मं सुमैः समम् ॥२५२॥
पद्मस्याधः स्वयं तस्थौ, छत्रस्येव तले नृपः ।
स्मृतायाताः परिवव्रुस्तदैनं चाशु जृम्भकाः ॥२५३॥
प्रसर्पत्किङ्किणीक्वाणमुखरीकृतदिग्मुखम् ।
गेयानुसारिवादित्रनादनृत्यत्सुकिन्नरम् ॥२५४॥
देदीप्यमानं रविवद्विमानमधिरुह्य सः ।
जृम्भकैः सहितोऽचालीन्महापुरपुरं प्रति ॥२५५॥ युगलम् ॥
अथायान्ति विमानानि व्योमतो वीक्ष्य सौगताः ।
नृपं प्राहुरहो बौद्धोदयं पश्यत पश्यत ॥२५६॥
यज्जैनेभ्यो न्यषेध्यन्त पुष्पाणि नृपते! त्वया ।
तेन सौगतचैत्येषु, देवा आयान्ति हर्षतः ॥२५७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ऊर्ध्वीकृत्य मुखं यावत्, विमानानि विहायसि ।
बौद्धाः स्मेरदृगम्भोजैः, पूजयन्त इव स्थिताः ॥२५८॥
तावत्तान्यर्हतां चैत्ये, गतानि विनिरीक्ष्य ते ।
ह्रियाधोवदना जाताश्चपेटाभिर्हता इव ॥२५९॥ युग्मम्॥
ततः सहर्षाः श्रीजैना जृम्भकत्रिदशा अपि ।
श्रीमत्पर्युषणापर्व चक्रुरुत्सवपूर्वकम् ॥२६०॥
श्रीवज्राचार्यसूर्यस्य निरीक्ष्य परमोदयम् ।
भृशं निस्तेजसोऽभूवन् बौद्धास्तारागणा इव ॥२६१॥
पुष्पामोदोन्मदैर्नादैर्भृङ्गा जिनगृहोपरि ।
श्रीवज्रस्वामिनः कीर्त्तिं, गायन्त इव रेजिरे ॥२६२॥
सूरेरद्वैतमाहात्म्यं, तदालोक्य नरेश्वरः ।
सजनोऽजनि जैनेन्द्रशासने भक्तमानसः ॥२६३॥
तत्रैव वज्रः **श्रीआर्यरक्षिताख्यं** प्रतीच्छकम् ।
सार्धानि नवपूर्वाणि, पाठयाञ्चकृवान् प्रभुः ॥२६४॥
इत्थं प्रभावनाद्वैतराज्यं प्राज्यं प्रवर्त्तयन् ।
बोधयंश्च प्रजा वज्रो दक्षिणामगमद्दिशम् ॥२६५॥
श्रीवज्रगुरवोऽन्येद्युरकस्माच्छ्लेष्मबाधिताः ।
शुण्ठी ग्राह्या भोजनोर्ध्वमिति तां श्रवणे न्यधुः ॥२६६॥
ततस्तेऽपि कृताहाराः, स्वाध्यायध्यानतत्पराः ।
तथैव श्रवणस्थस्य, नागरस्य न सस्मरुः ॥२६७॥
नागरस्य-शुण्ठ्याः ।
कुर्वाणानां प्रतिक्रान्तिं ताडिता मुखवाससा ।
शुण्ठी पपात तन्नादात्तेऽपि तामस्मरन्निशि ॥२६८॥
प्रमादमदिरोन्मादो हहास्मान् बाधतेऽधुना ।
अतो वयं तनुत्यागात्साधयामः परं भवम् ॥२६९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इतश्च **वज्रसेनाख्यं** दुर्भिक्षे द्वादशाब्दिके ।
गच्छाव्युच्छित्तयेऽन्यत्र व्यजीहरदरं गुरुः ॥२७०॥
तदन्तेवासिनो भिक्षामविन्दन्तस्ततः परम् ।
वितीर्णं गुरुभिर्भोज्यमज्ञाना इव भुञ्जते ॥२७१॥
श्रीवज्रगुरवः प्राहुर्गीतार्थान् संयतानथ ।
वत्सा भविष्यति व्यक्तं, दुष्कालं द्वादशाब्दिकम् ॥२७२॥
कृतघ्नस्यास्य देहस्य कृते किं हार्यते व्रतम् ।
तस्माद् गत्वा क्वचित्तीर्थे गृह्यतेऽनशनं मुदा ॥२७३॥
एवमालोच्य तत्कालं कालं कर्तुं क्वचिद् गिरौ ।
यतिभिः कतिभिः साकं, सूनुर्धनगिरेरगात् ॥२७४॥
कञ्चिल्लघुमुनिं सार्धमागच्छन्तं बलादपि ।
संस्थाप्य कृपया ग्रामे, शैलमारुरुहुः स्वयम् ॥२७५॥
मा भूद् गुरोरसंतोषो मयि शैलोर्ध्वगामिनि ।
इतीव तदधः साधुः, क्षुल्लोऽनशनमग्रहीत् ॥२७६॥
स मुनिः सुकुमाराङ्गस्तपनातपतापितः ।
प्रालेयवन्निजेगिल्य, ससमाधिरगाद्दिवम् ॥२७७॥
अथाहंपूर्विकया तान् समालोक्य दिवौकसः ।
किमित्यमी समायाता इति साधुभिरादरात् ॥२७८॥
पृष्टाः सूरिवराः प्रोचुस्तस्यानशनिनो मुनेः ।
स्वर्गतस्याङ्गसंस्कारकृतेऽत्रैते समैयरुः ॥२७९॥ युग्मम् ॥
मुनयः श्लाघयामासुस्तं साधु यदयं कृती ।
पश्चान्मुक्तोऽप्यभूदग्रेगा अस्मास्वखिलेष्वपि ॥२८०॥
तत्पर्याप्तं प्रमादेन दुर्गदुर्गतिहेतुना ।
मत्वेति तेऽशनत्यागं विदधुः सूरिभिः सह ॥२८१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कपटश्रावकीभूय, मिथ्यादृग्देवता तदा ।
मोदकान् दर्शयित्वा तान् लग्ना क्षोभयितुं मुनीन् ॥२८२॥
सापायं तं गिरिं मत्वा, हित्वा च यतिभिर्युताः ।
श्रीवज्रगुरवो जग्मुः सानुमन्यमहीभृतः ॥२८३॥
तत्र सम्यग्दृशो देव्या गृहीत्वावग्रहं गुरुः ।
संपूर्यानशनं साधुसहितो दिवमासदत् ॥२८४॥
अस्मिन्नवसरे शक्रो रथारूढः सुरैर्वृतः ।
श्रीवज्रकालशैलं तं, प्रदक्षिण्यकरोन्मुदा ॥२८५॥
तत्राद्यापि द्रुमाः सन्तिं तद्रथाघातनम्रिताः ।
तदाद्ययं **रथावर्त्तो** भूधरश्चेति विश्रुतः ॥२८६॥
वज्रादीनामन्त्यकृत्यं प्रकृत्य त्रिदशेश्वरः ।
सौवर्णी तच्चितास्थाने स्तूपश्रेणीं व्यधापयत् ॥२८७॥
तत्र वज्रगुरोर्मूर्त्तिं पूजयित्वा सुमादिभिः ।
स्तवैः स्तुत्वा च देवेन्द्रो, जगाम त्रिदशालयम् ॥२८८॥
इति रत्नत्रयभूषितगात्रं वज्राचार्यसमानं पात्रम् ।
मत्वा तत्र च भक्तिविधानं कार्यं कृतिभिः सुकृतनिदानम् ॥२८९॥

॥ इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ सत्पात्रदानविषये श्रीवज्रस्वामिकथा समाप्ता॥

सत्पात्रवैषयिकं श्रीवज्रस्वामिचरित्रमुक्त्वा ईदृग्विधगुणगणोपेतं पात्रमासाद्य च विवेकिना किं किं विधेयं तस्मिंश्च कृते का फलावाप्तिः स्यादित्याह॥

**अभिगमणमंसणेणं वंदणसक्कारपूयणेणं च ।**
**जे अणुवयंति मुणिणो ते सिवसुक्खाइं पावंति ॥ २८॥**

व्याख्या-अभिगमः काले तदभिमुखं यानं, नमस्करणमान्तर-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रीतिरभिगमश्च नमस्करणं च-अभिगमनमस्करणं-तेन । वन्दनं-द्वादशावर्त्तवन्दनकदानम्, सत्कारो-वस्त्रादिना प्रतिलाभनम्, पूजनं-चन्दनादिना गुरुचरणार्चनम्, वन्दनं च सत्कारश्च पूजनं च-वन्दन-सत्कारपूजनं तेन, च शब्दाद्विनयादिना ये भव्या मुनीन्-सुविहितान् अनुव्रजन्ति-अनुगमनं कुर्वन्ति ते शिवसौख्यानि-परमपदानन्दान् प्राप्नुवन्ति-लभन्त इति गाथार्थः ॥

ऐहिकफलावाप्तिहेतुनिगमनमाह -

**इइ तिविहभेयजुत्तं, दाणं चिंतामणिव्व अइदुल्लहं ।**
**तह आराहह सम्मं, भविया जह मूलदेवेणं ॥ २९॥**

व्याख्या-इति-पूर्वोक्तयुक्तिप्रकारेण, त्रिविधभेदयुक्तं-चित्त-वित्तपात्रसहितम्, दानं चिन्तामणिवदतिदुर्ल्लभं भव्याः ! सम्यग्मनो-वाक्कायैराराधयत-सेवध्वम् यथा-मूलदेवेन-वनराजपुत्रेण, सम्य-गिदमाराधितमिति। यथा किल चिन्तामणिः स्वाराधितः सकल-मनोवाञ्छितप्रदस्तथेदमपि स्वाराधितं सदखिलाभिलषितप्राप्तये स्यादिति गाथार्थः ॥६॥

भावार्थस्त्वयम्, तथाहि-

समस्तवस्तुविस्तारशस्तास्त्य**ुज्जयिनी** पुरी ।
दृश्यन्ते यत्र कादम्बाः सरोगा न तु मानवाः ॥ १॥
तत्राभूद्विक्रमाक्रान्तशात्रवः शिष्टतुष्टिकृत् ।
कर्त्तव्येन च नाम्ना च, **विचारधवलो** नृपः ॥ २॥
तस्यां च **देवदत्ता**स्ति, वेश्या लावण्यसेवधिः ।
या मनोभूमहाराजराजधानीव जङ्गमा ॥ ३॥
तत्र सार्थपतेः पुत्रः प्रतिज्ञातार्थनिश्चलः ।
**अचलो** नाम यः श्रीणामेकमोकः समुद्रवत् ॥ ४॥
एकदा तां गवाक्षस्थां, सुरूपां विनिरूप्य सः ।
जगाम कामबाणानां तत्क्षणादेव लक्षताम् ॥ ५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तादृक्कुलं च शीलं चावगणय्याचलश्चलः ।
स्मरार्त्तो देवदत्ताया वेश्म प्रविशति स्म सः ॥ ६ ॥
साप्युत्थायासने स्वीये निवेश्य तमवोचत ।
स्वामिन्निदं गृहं चेमाः श्रियश्चाहं च ते स्फुटम् ॥ ७ ॥
श्रुत्वेति रसभृद्देवदत्तावाप्यां कृताप्लवः ।
अचलः पञ्चबाणाग्नितापं शामयति स्म सः ॥ ८ ॥
वस्त्रैर्विचित्रैर्विन्त्रस्तदूषणैर्भूषणैरपि ।
वेश्यां स रञ्जयामास, पुरन्दर इवोर्वशीम् ॥ ९ ॥
तं निर्गुणमपि श्रीभिः सगुणं सा गुणोल्बणा ।
सिषेवे खलु वेश्यानामर्थ एव प्रियो न ना ॥ १० ॥
इतश्च **पाटलीपुत्र**पुरे धीरः पराक्रमी ।
रूपतारुण्यलावण्यपुण्याङ्गः सरलाशयः ॥ ११ ॥
गुणानुरागी रागीव दक्षो दाक्षिण्यमन्दिरम् ।
त्यागी भोगी सुगीरङ्गी विज्ञानी विनयी नयी ॥ १२ ॥
वक्ता शक्ताभिमानी च, क्षत्रगोत्रमहोदधौ ।
**मूलदेवो** बुधानन्दी पारिजात इवाभवत् ॥१३॥ त्रिभिर्विशेषकम्॥
किमन्यत्कथ्यतेऽस्माभिस्ताः काश्चिन्न कलाः कलाः ।
अहंपूर्विकया यास्तं सुधांशुमिव शिश्रियुः ॥ १४ ॥
किन्तु तस्य नलस्येव, कैतवव्यसनं घनम् ।
समजायत सर्वत्र, सर्वे न तु पुनर्गुणाः ॥ १५ ॥
पिता तमाह हे वत्स! द्यूतव्यसनतः पुरा ।
युधिष्ठिरनरेन्द्रोऽपि, प्राप्तवांस्तादृशीं दशाम् ॥ १६ ॥
अत एतत् श्रियामुच्चाटनमन्त्रमिवापरम् ।
परित्यजतरां नो चेद् यज्जानीषे कुरुष्व तत् ॥ १७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एतदाकर्ण्य कर्णाभ्यां, सोऽभिमानमहोदधिः ।
सुहृद्भिर्वार्यमाणोऽपि, निःससार पुराद् बहिः ॥ १८ ॥
उर्वीमुर्वीमतिक्रामन् क्रमचङ्क्रमणेन सः ।
क्रमेण कमलाशालां, **विशालां** पुरमासदत् ॥ १९ ॥
गुटिकायाः प्रयोगेण, गुणाखर्वोऽपि खर्वताम् ।
शिश्राय मूलदेवो हि, किमसाध्यं कलावताम् ॥ २० ॥
सकलाभिः स कलाभिर्विदुषामपि मानसम् ।
वामनो मोदयामास गुणिभिः को न रज्यते ॥ २१ ॥
अथ तत्र चतुःषष्टिकलाकौशलशालिनीम् ।
सामान्यजनदूरज्यां, देवदत्तां पणाङ्गनाम् ॥ २२ ॥
श्रुत्वा तस्यागृहासन्नशून्यदेवकुले स्थितः ।
वामनस्तन्मनःक्षोभहेतवे गीतमातनोत् ॥ २३ ॥ युग्मम् ॥
देवदत्तापि तच्छ्रुत्वा, सुधापानोपमं श्रुतेः ।
हहाहिहाहाहूहूनामपि गेयममन्यत ॥ २४ ॥
तं नरं परिजिज्ञासुर्देवदत्तातिवेगतः ।
तत्पार्श्वे प्रेषयामास विज्ञं प्रेष्याजनं निजम् ॥ २५ ॥
सोऽपि गत्वा परिज्ञाय समेत्य च यथास्थितम् ।
जगाद तत्पुरः कोऽपि, गेयं गायति वामनः ॥ २६ ॥
मन्ये माधवरूपेण माधवोऽयमितीव सा ।
तदाह्वानकृते प्रेष्यां, **माधवीं** प्राहिणोत्तमाम् ॥ २७ ॥
सा स्वभावेन कुब्जाङ्गी, विशिष्टा विनयेन च ।
एत्यामृतमुचा वाचा तमुवाच विचक्षणा ॥ २८ ॥
अये! वामन! ते गीतकलया कलया मम ।
स्वामिनी देवदत्ताशु हरिणीव विमोहिता ॥ २९ ॥
यथा कमलिनी तिग्मरश्मेर्दर्शनमीहते ।
तथा सा तव पुंरत्न! त्वद्गुणाकृष्टमानसा ॥ ३० ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्त्वं मे स्वामिनीं स्वीयागमनेनाभिनन्दय ।
लोकेऽपि श्रूयते यस्मात्सन्तः सर्वहितेच्छवः ॥ ३१ ॥
इत्याकर्ण्य सकर्णोऽसौ तामूचे साधु ते वचः ।
किन्तु वाराङ्गनागेहे, गमनं ह्रीकरं सताम् ॥ ३२ ॥
वेश्या दुर्जनमैत्रीव, परमार्थविघातिनी ।
परित्याज्या न संसेव्या, महतामिति संमतम् ॥ ३३ ॥
उक्तं च –
या विचित्रविटकोटिनिघृष्टा मद्यमांसनिरतातिनिकृष्टा ।
कोमला वचसि चेतसि दुष्टा तां भजन्ति गणिकां न विशिष्टाः ॥ ३४ ॥
सा सत्त्वघ्नी शतघ्नीव, शौनिकीव नृशंसिका ।
वञ्चिका ठगिनीवाङ्गीक्रियते कैः पणाङ्गना ॥ ३५ ॥
अधनः स्मररूपोऽपि, सरीसृप इवोज्झ्यते ।
धनी कुष्ठोऽपि वेश्याभिः सुरेन्द्र इव सेव्यते ॥ ३६ ॥
अतस्तदीयसङ्गे मे मानसं मानसं गतम् ।
हंसवद्रमते पङ्कसंकुले नड्वले न हि ॥ ३७ ॥
इत्युक्त्वा विरते तस्मिन्, माधव्याह विचक्षण ! ।
स्वामिनी रज्यतेऽस्माकं, सगुणे न तु निर्गुणे ॥ ३८ ॥
मत्स्वामिनीमनोरत्नं, त्वया गुणवताप्यहो ।
हृतं तया तदादातुं, प्रहिता भवदन्तिकम् ॥ ३९ ॥
विलम्बं त्यज तद्यच्छान्यथा त्वां पश्यतोहरम् ।
बलादपि हि नेष्यामि, देवदत्तापदान्तिकम् ॥ ४० ॥
श्रुत्वेति वामनो रुष्ट इव विद्याप्रयोगतः ।
आहत्यांह्रिप्रहारेण कुब्जिकां सरलां व्यधात् ॥ ४१ ॥
साप्यन्यादृशमात्मानं, रूपलावण्यसुन्दरम् ।
जन्मान्तरीभूतमिव विनिरीक्ष्य विसिष्मिये ॥ ४२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदा तदीयपदयोः, पूजां कर्तुमिव स्वकम् ।
शिरःसरोरुहं न्यस्य, माधवी तमवोचत ॥४३॥
देव! कुब्जाङ्किताङ्गीं मां वृद्धो वेधा व्यधात्पुरा ।
त्वयाधुना त्वहं नव्यवेधसा सरलीकृता ॥४४॥
भवन्तमन्तरेणान्यादृशाकृतिभृतो मम ।
व्रजन्त्याः स्वामिनीधाम्नि, प्रवेशोऽपि हि दुर्घटः ॥४५॥
तदार्य! मयि किङ्कर्यां विधाय सदयं मनः ।
मां प्रवेशय तद्गेहे, सन्तो न ह्यर्थनाभिदः ॥४६॥
इत्युक्तः स तयादत्तबाहुः स्वीयेन बाहुना ।
गृहीत्वा स्वामिनीगेहमादरेण प्रवेशितः ॥४७॥
कुब्जामन्यादृशीं दृष्ट्वा देवदत्ताह हे हले!।
कासीति पृष्टा सा सर्वं, खर्ववृत्तान्तमब्रवीत् ॥४८॥
साप्युत्थाय स्वयं तस्मै नयनानन्ददायिने ।
आसनं ढौकयामास सोऽपि तस्मिन्नुपाविशत् ॥४९॥
कुशलं वः समस्तीति, तया पृष्टः स शिष्टधीः ।
सप्रेमवाक्यभङ्गीभिस्तां रम्भोरूमरञ्जयत् ॥५०॥
अथैत्य वैणिको वीणामवादयदियं च तम् ।
प्रीतास्तावीदहो अस्य, विपञ्च्यां किल कौशलम् ॥ ५१॥
अहो अवन्तिलोकानां वैदग्ध्यमतिबन्धुरम् ।
तेनेत्युक्तेऽब्रवीद्देवदत्ता किं क्षूणमत्र भोः! ॥५२॥
क्षूणम्-क्षतिम्, देश्यशब्दोऽयम् ।
उवाच वामनस्तन्त्र्याः शुद्धो वंशो गुणोऽपि न ।
कथं ज्ञायत इत्युक्तस्तया सोऽप्याह दर्शये ॥५३॥
ततोऽस्मै विस्मितो वीणां वैणिकः प्रददे स तु ।
तामुपादाय वंशान्तःकर्करं गुणमध्यतः ॥ ५४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

केशं चाकृष्य वेश्यायै वैणिकायाप्यदर्शयत् ।
सम्यक् समारचय्यैनां, वादयामास चाद्भुतम् ॥ ५५ ॥ युग्मम् ॥
अनाकर्णितपूर्वा तत्क्वणितश्रवणादियम् ।
परिवारवृतालेख्यलेखितेवाजनि क्षणम् ॥ ५६ ॥
तं वेश्यावैणिकौ वीणाकलाकौशलशालिनम् ।
खर्वरूपेण कोऽप्येष गन्धर्व इति दध्यतुः ॥ ५७ ॥
वल्लकीवादकं वेश्या, सत्कृत्य च विसृज्य च ।
भोजनावसरे जाते, प्रजगादेति माधवीम् ॥ ५८ ॥
हंजेऽङ्गमर्दं वेगेन, समाकार्य समानय ।
विधीयते यथावाभ्यां, स्नानं दशगुणोल्बणम् ॥ ५९ ॥
खर्वः स्माहानुजानीहि, मां यथाभ्यङ्गमादधे ।
सा च प्रोवाच भवता, किमेतदपि बुध्यते ॥ ६० ॥
स प्राह ज्ञायते नैव, किन्तु विज्ञान्तिके स्थितः ।
तयाप्योमिति स प्रोक्तोऽभ्यङ्गाय प्रगुणोऽभवत् ॥ ६१ ॥
यथा प्रत्यङ्गमभ्यङ्गं, चक्रे वक्रेतराशयः ।
यथारामादिसौख्यात्सा परमानन्दभागभूत् ॥ ६२ ॥
अहो असदृशोऽमुष्य विज्ञानातिशयः स्फुटम् ।
अहो अदृष्टपूर्वा च करयोः सुकुमारता ॥ ६३ ॥
तदवश्यमहं मन्ये नायं भवति वामनः ।
किन्तु स्वात्मविनोदाय, वामनत्वमशिश्रियत् ॥ ६४ ॥
ध्यात्वेति देवदत्तेयं, स्मेरलोचनपङ्कजैः ।
पूजाचिकीरिवामुष्य, देवस्येवापतत्पदोः ॥ ६५ ॥
ऊचे च देव! त्वामीदृग्गुणैः प्रांशुकुलोद्भवम् ।
अवैमि तत्प्रसद्य द्राग् रूपं स्वाभाविकं भज ॥ ६६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तद्विज्ञप्तो निजादास्यान्निष्कास्य गुटिकामसौ ।
स्वभावरूपभृन्मूलदेवो, देव इवाभवत् ॥ ६७॥
सापि तं मन्मथाकारं, पारावारं गुणश्रियः ।
दृष्ट्वा सृष्टिकृतः सृष्टिश्रमं मेने फलेग्रहिम् ॥ ६८॥
पुनर्निपत्य तत्पादे, महानयमनुग्रहः ।
इत्युदीर्य तया स्वेन, साकं सोऽस्नप्यतादरात् ॥ ६९॥
देवदत्तात्मना सार्धं, तमाहारं रसोत्तरम् ।
भोजयित्वा दुकूले च, परिधाप्येत्यभाषत ॥ ७०॥
देव! त्वामन्तरेणान्यः कश्चनापि पुमान्न मे ।
मानसं मानसंपूर्णं, सुदूरज्यमरञ्जयत् ॥ ७१॥
को नाम नेक्ष्यतेऽक्षिभ्यां, केन साकं न संकथाः ।
यः पुनर्हृदयानन्दप्रदः स विरलो नरः ॥ ७२॥
अतो मे हर्म्यमागम्य, विश्रम्यं भवता सदा ।
तयेत्युदीरितः सोऽपि, तामुवाच वचस्विनीम् ॥ ७३॥
देवि! वैदेशिके द्रव्यहीनेऽस्मादृशि पूरुषे ।
अवश्यं न स्थिरः स्नेहः, कुशाग्रे जलबिन्दुवत् ॥ ७४॥
धनवानगुणज्ञोऽपि, गौरवाय भवेद् भुवि ।
निर्धनस्तु गुणज्ञोऽपि, तृणादपि लघुर्नरः ॥ ७५॥
तच्छ्रुत्वा देवदत्ताह, मैवं वद विशारद! ।
कलाविदां गुणिन्येवानुरागो न तु निर्गुणे ॥ ७६॥
तदेनां प्रार्थनां विज्ञानुमन्यस्व ततस्तयोः ।
स्नेहः प्रववृधेऽत्यर्थं, चन्द्रचन्द्रिकयोरिव ॥ ७७॥
अन्यदा संसदासीनविचारधवलप्रभोः ।
पुरतो देवदत्तातिचित्रं नृत्यमसूत्रयत् ॥ ७८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदैव दैवयोगेन, मूलदेवोऽप्युपागतः ।
तत्र चित्रकरैः पाटैः पटहं समवादयत् ॥ ७९ ॥
प्रीतः प्रजाप्रभुः प्रोचे, देवदत्ते! वरं वृणु ।
सापि स्माह महीपाल!, निधानीक्रियतामयम् ॥ ८० ॥
मूलदेवः सदा द्यूतव्यसनेनांशुकान्यपि ।
हारयन्नेकदा देवदत्तयाभिदधे स्फुटम् ॥ ८१ ॥
देव! त्वया कलाढ्येन सोमेनेव कलङ्कवत् ।
कैतवव्यसनं दोषाकरं कर्तुं न युज्यते ॥ ८२ ॥
इदं तु श्रीयशोनाशकारकं मानवारकम् ।
लोकद्वयविरुद्धं च, त्याज्यं प्राज्यशुभेच्छुभिः ॥ ८३ ॥
इत्थं तया हितं तथ्यं, जल्पितः सोऽत्यजन्न तत् ।
अथवा व्यसनासक्ते, न लगन्ति गुरोर्गिरः ॥ ८४ ॥
अथास्यामचलप्रेमाचलसार्थेश्वरोऽनिशम् ।
मूलदेवोपरि द्वेषं, वहंश्छिद्राणि पश्यति ॥ ८५ ॥
मूलदेवोऽपि तस्मिंश्च, सति नायाति तद्गृहे ।
यतस्तेन परायत्ता, देवदत्तास्ति संप्रति ॥ ८६ ॥
जनन्या स्वकुलाचारानुसारं सेति शिक्षिता ।
वत्सेऽचलं कलं लक्ष्मीं भजामुं त्वधनं त्यज ॥ ८७ ॥
सापि प्रोचेऽम्ब! मे द्रव्ये, नानुरागः परं गुणे ।
अक्काप्यवादीदहं मन्ये, के दृष्टाः कितवे गुणाः ॥ ८८ ॥
देवदत्तावदत्तां स, सुरूपसुभगो गुणी ।
प्रियंवदो विशेषज्ञो, दाक्षिण्यक्षीरसागरः ॥ ८९ ॥
अतोऽहं न त्यजाम्येनमीदृग्गुणगणाकरम् ।
श्रुत्वेत्यक्काप्यतिस्पष्टैर्दृष्टान्तैस्तामबोधयत् ॥ ९० ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रान्तमिक्षौ सुमे वृन्तं दुकूले स्थूलशाटकम् ।
कदम्बखण्डं श्रीखण्डे याचिते विततार सा ॥ ९१ ॥

प्रान्तम्-इक्षुकूर्चकम् ।

तया किमेतदित्युक्ता, साह यक्षानुसारतः ।
पूजोपचारस्तद्युक्तमेतेषामुपढौकनम् ॥ ९२ ॥
इयं ध्रुवं धने गृद्धा ध्यात्वैवं प्राह सा प्रसूम् ।
ममेक्षुभक्षणे वाञ्छेत्यचलाय निवेद्यताम् ॥ ९३ ॥
तत्पुरस्तात्तयेत्युक्तेऽचलस्तत्कालमेव हि ।
प्रेषयामास शकटमिक्षुभिर्निभृतं भृतम् ॥ ९४ ॥
यदेवमचलः प्रैषीदिक्षुभिः शकटं भृतम् ।
तदहं किं पशुः साहसत्तूदारतराशयः ॥ ९५ ॥
माधवीं देवदत्ताह स्पृहा मेऽस्तीक्षुभक्षणे ।
त्वयेति मूलदेवाग्रे गत्वा सद्यो निगद्यताम् ॥ ९६ ॥
तयापि हि तथैवोक्ते मूलदेवो धियां निधिः ।
इक्षुयष्टीः समानीयापनीय त्वचमुच्चकैः ॥ ९७ ॥
पर्वाणि प्रोज्झ्य खण्डानि, द्व्यङ्गुलानि विधाय च ।
चतुर्जातकचूर्णेन भावयित्वा ततः परम् ॥ ९८ ॥
सारेण घनसारेणाधिवास्य निशितास्यकैः ।
विभिद्य कण्टकैः स्तोकं कुम्भकारगृहादथ ॥ ९९ ॥
सरावयुगलं कौरं, लात्वैकस्मिन्निधाय सः ।
द्वितीयेन समाच्छाद्य, प्राहिणोन्माधवीकरे ॥ १०० ॥ कलापकम् ॥
तयापि विज्ञया वेगादागत्य निजमन्दिरे ।
देवदत्तापुरस्तात् तन्निधिपात्रमिवाधृत ॥ १०१ ॥
वर्धमानं मुदादाय प्रियेण प्रहितं हितम् ।
अम्बामाकार्य सा तस्या अदर्शयदुवाच च ॥ १०२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मातः! पश्यान्तरं पुंसामतोऽहं गुणरागिणी ।
तयाप्यचिन्ति यदियं स्नेहेनामुं न मुञ्चति ॥ १०३॥
तत्करोमि कमप्याशूपायं तन्मानहानिदम् ।
येनासौ लज्जितोऽन्यत्र प्रयाति स्वयमेव हि ॥ १०४॥
ध्यात्वेति कपटे पट्वी कुट्टिनी विजनेऽचलम् ।
प्राहासत्यं प्रवासत्वं कृत्वा त्वं गेहमेहि मे ॥ १०५॥
मूलदेवो यदात्रैति तदासावुद्भटैर्भटैः ।
समं समेत्य रोद्धव्यो, धर्षितव्योऽपि च त्वया ॥ १०६॥
ततो गताभिमानः सन् सोऽत्र स्थातुमनीश्वरः।
तयेत्युक्तस्तथैवास्थादचलश्छलनिश्चलः ॥ १०७॥
मूलदेवं तया देवदत्तयादरपूर्वकम् ।
सेव्यमानं समीक्ष्याक्काचलस्याग्रे न्यवेदयत् ॥ १०८॥
श्येनम्पात इवामुष्मिन्नकस्मात्समुपेयुषि ।
तया भिया स्वपल्यङ्काधस्तात्सास्थाप्यत द्रुतम् ॥ १०९॥
मूलदेवं तथा संस्थं, विज्ञायाचलसार्थपः ।
तल्पोपरि निविष्टः संस्तामभाषिष्ट दुष्टधीः ॥ ११०॥
देवदत्ते! कुरु स्नानसामग्रीमेवमस्त्विति ।
साहाभ्यङ्गार्थमुत्तिष्ठ, वरासिं परिधेहि च ॥ १११॥
स प्राह यन्मया तल्पस्थेनेमैरंशुकैः समम् ।
स्नातमित्यद्य यामिन्यां, स्वप्नोऽवश्यमदृश्यत ॥ ११२॥
सा प्राह प्राणनाथेत्थं कृते सर्वं विनश्यति ।
सोऽप्युवाच प्रदास्यामि, तूलिकाद्यपरं परम् ॥ ११३॥
प्रमाणमिति कुट्टिन्या प्रोक्तेऽसौ देवदत्तया ।
तैलेनाभ्यज्य खल्या चोद्वर्त्यास्नाप्यत वारिभिः ॥ ११४॥
देवदत्तामूलदेवमिथःस्नेहजलाञ्जलिम् ।
अचलः स्नानपानीयच्छलेन प्रददौ किल ॥ ११५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

खल्याविलजलक्लिन्नाङ्गेऽस्मिन् जाते तयाक्कया ।
समाहूताः समायाता योधा स्फूर्जदुदायुधाः ॥ ११६ ॥
अचलेन निकृष्टेन समाकृष्टः शिरोरुहैः ।
कोऽधुना शरणं तेऽस्तीत्यभाष्यत स शिष्टधीः ॥ ११७ ॥
सोऽपि स्वं वेष्टितं स्पष्टं विज्ञाय भटकोटिभिः ।
स्माचष्टे नष्टचेष्टस्तं, यज्जानीषे कुरुष्व तत् ॥ ११८ ॥
अचलश्चिन्तयामासाकृतिरेवास्य देहिषु ।
वक्त्युत्तमत्वं तन्मन्ये स्खलितं स्यान्न कस्यचित् ॥ ११९ ॥
उक्तं च -
को इत्थ णिच्चसुहिओ कस्स य लच्छी अखंडियच्छाया ।
कस्स थिरं पिम्मसुहं खलियं ण समागयं कस्स ॥ १२० ॥
इति ध्यात्वाचलः प्रोचे, दुस्थावस्थागतो भवान् ।
यथामोचि मया तद्वत्त्वया मोच्योऽहमापदि ॥ १२१ ॥
मूलदेवो गतानन्दो निर्गत्याशु तदालयात् ।
अन्त्यजेन स्पृष्ट इव, सचेलोऽस्नात्सरोवरे ॥ १२२ ॥
व्यचिन्तयदयं मानी, क्वापि गत्वास्य विप्रिये ।
उपायचिन्तनं कुर्वे, नो चेन्मे पौरुषं वृथा ॥ १२३ ॥
यतः- उवयारं उवयारीण वेरणिज्जायणं च वेरीणं ।
काउं जो न समत्थो धिगत्थु पुरिसत्तणं तस्स ॥ १२४ ॥
ततोऽसौ समयाभिज्ञो भिक्षया प्राणवृत्तिकृत् ।
प्रतस्थे सौख्यरत्नौघघटं **बेन्नातटं** प्रति ॥ १२५ ॥
क्रमादुल्लङ्घयन् वर्त्माटवीं द्वादशयोजनाम् ।
संप्राप्तो निःसहायोऽसौ, चिन्तयामासिवानिति ॥ १२६ ॥
यदि कोऽपि पुमान् मार्गे, द्वितीयो वचसा पि हि ।
तदापदिव दुर्लङ्घ्याप्याशूल्लङ्घ्याटवी भवेत् ॥ १२७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एवं विमृशतस्तस्य **टक्क**जातिभवो द्विजः ।
शम्बलस्थगिकां स्कन्धे, धारयन्नाययौ रयात् ॥ १२८॥
भद्र! क्व यास्यसीत्युक्तो मूलदेवेन सोऽवदत् ।
गन्ताटव्याः परे पारेग्रामं **वीरनिधानकम्** ॥ १२९॥
सुन्दर! त्वं क्व गन्तेति पृष्टस्तेन द्विजन्मना ।
भद्र! यास्याम्यहं बेन्नातटं नाम महापुरम् ॥ १३०॥
यद्येवं तर्हि मार्गोऽयमावयोरेक एव हि ।
ततस्तौ परमप्रीत्या कलितौ चलितौ पुरः ॥ १३१॥
तस्यामटव्यां गच्छन्तौ, तौ दिवायामयामले ।
पुरस्सरः समालोक्य विश्रान्तौ श्रान्तिभित्तये ॥ १३२॥
स्नानं कृत्वा पयः पीत्वा, छायाशालितटद्रुमम् ।
मूलदेवे स्थिते टक्कोऽच्छादयच्छम्बलस्थगीम् ॥ १३३॥
शक्तून्निष्काश्य कांस्यस्य पात्रे प्रक्षिप्य वारिणा ।
आर्द्रीकृत्य ततो भोक्तुं विप्रः प्रववृत्ततराम् ॥ १३४॥
अचिन्तयदयं मूलदेवः प्रायो द्विजन्मनाम् ।
स्वभावो यत्स्वयं भुक्त्वाऽन्यस्मै पश्चाद्ददत्यमी ॥ १३५॥
तदयं क्षुधयाक्रान्तो, मार्गश्रान्तोऽधुना स्वयम् ।
तृप्तीभूय ततो मह्यं, शक्तूनेतान् प्रदास्यति ॥ १३६॥
विप्रस्तान् भुक्त्वा बद्ध्वा च, स्थगीं पथ्यचलत्पुरः ।
सायं दातेति निश्चित्य, मूलदेवस्तमन्वगात् ॥ १३७॥
तदाप्यदत्ते श्वो दाता, मह्यमित्याशया व्रजन् ।
निशि सुष्वाप तेनासौ समं वटतरोस्तले ॥ १३८॥
द्वितीयेऽप्यह्नि तौ वर्त्मोल्लङ्घ्यास्थातां दिनार्धके ।
पूर्ववद्वाडवोऽभुक्त, न तु तस्मै किमप्यदात् ॥ १३९॥
तृतीये दिवसे मूलदेवश्चेतस्यचिन्तयत् ।
शक्तूनद्य प्रदातास्मै, यतोऽल्पास्त्यटवी पुरः ॥ १४०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तस्मिन्नपि दिने टक्को भुक्त्वासौ भस्त्रिकामुखम् ।
बबन्ध मूलदेवोऽपि भोज्याशावनितामुखम् ॥ १४१ ॥
लङ्घितायामथाटव्यां द्विमार्ग्यां तं द्विजो जगौ ।
मम ग्रामस्य मार्गोऽयमयं बेन्नातटस्य च ॥ १४२ ॥
मूलदेवोऽवदद्विप्र! त्वत्साहाय्यादिहागमम् ।
अतो विद्धि सखे! मूलदेव इत्यभिधां मम ॥ १४३ ॥
यदा कदाचिन्मे कार्यं दैवात् सिध्येत् तदा त्वया ।
बेन्नातटं समेतव्यमाख्यामाख्याहि चात्मनः ॥ १४४ ॥
स प्राह प्रोच्यते पित्रा **सद्धडे**त्यभिधा मम ।
लोकै**र्निर्घृणशर्मे**ति श्रुत्वाऽसौ विस्मितोऽभवत् ॥ १४५ ॥
टक्के स्वस्थानकं प्राप्ते मूलदेवोऽग्रतोऽचलत् ।
ययौ च कुत्रचिद् ग्रामेऽरण्यस्याभ्यर्णवर्त्तिनि ॥ १४६ ॥
सोऽत्र प्रतिगृहं भ्राम्यन् कुल्माषानाप नापरम् ।
कृतकृत्यः सरस्तीरे, भोजनाय जगाम च ॥ १४७ ॥
सोऽस्मिन्नवसरे शुष्कगात्रं पात्रं तपःश्रियः ।
मासक्षपणिनं साधुं समायान्तमवैक्षत ॥ १४८ ॥
व्यचिन्तयच्च तत्सत्यं, कल्पद्रुरतरौ मरौ ।
अनभ्रा वृष्टिसृष्टिश्च प्रसूनेन विना फलम् ॥ १४९ ॥
चिन्तामणिमहारत्नागमो रोरगृहाङ्गणे।
यदीदृक्समये साधुसङ्गमो रङ्गमोदकृत् ॥ १५० ॥ युगलम् ॥
ग्रामे प्रकृत्या निःशूका लोका दानपराङ्मुखाः ।
अतस्तपःकृशस्तत्र, गत्वा क्लिश्यतु मा मुनिः ॥ १५१ ॥
अहं पुनरितोऽन्यत्र ग्रामे निकटवर्त्तिनि ।
भिक्षामाप्स्यामि तन्माषानेतान् यच्छामि साधवे ॥ १५२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चित्तं भावयुतं वित्तं कुल्माषाः प्रासुकाः किल ।
पात्रं चेदृगतो रत्नत्रयमेतत्सुदुर्लभम् ॥ १५३ ॥
तदेतदतिदुष्प्रापं प्राप्य प्राक्पुण्ययोगतः ।
अवश्यमेव मयका विधातव्यं फलेग्रहि ॥ १५४ ॥
ध्यात्वेति मूलदेवस्तं, प्रोवाच भगवन्मम ।
पारणेऽष्टमभक्तस्यादत्स्व माषान् दयानिधे! ॥ १५५ ॥
महात्मापि विशुद्धांस्तान् कुल्माषान् वीतकल्मषः ।
निरूप्य दायकस्याग्रे पतद्ग्रहमधारयत् ॥ १५६ ॥
मुनये भावनासारं, ददत्तानिति सोऽपठत् ।
नृणां पुण्यवतां माषाः साधोः पारणकेऽभवन् ॥ १५७ ॥
अत्रान्तरे विहायःस्था साधुभक्ता सुरी जगौ ।
मूलदेव! त्वया साधु कृतं यत्पारितो मुनिः ॥ १५८ ॥
तदिदानीं त्वयि प्रीतास्म्यतो यत्तव रोचते ।
तत्त्वं श्लोकाङ्घ्रियुग्मेन मनोभीष्टं वरं वृणु ॥ १५९ ॥
सोऽवादीद्यदि देवि! त्वं संतुष्टासि तदा मुदा।
राज्यं गजसहस्राढ्यं, देवदत्तां च देहि मे ॥ १६० ॥
देवी जगाद हे वत्स! तिष्ठ निश्चिन्तमानसः ।
मुनिप्रसादादेतत्ते रयादेव भविष्यति ॥ १६१ ॥
एवमस्त्विति स प्रोच्य, नत्वा च मुनिमग्रतः ।
प्रतस्थेऽथ मुनिर्गत्वोद्याने पारणकं व्यधात् ॥ १६२ ॥
ग्रामेऽन्यत्र भ्रमन्मूलदेवः प्राप्तान्यभोजनः ।
भुक्त्वा बेन्नातटे देश्यकुट्यां सायमियाय सः ॥ १६३ ॥
तत्र प्रसुप्तः स्वप्नेऽसौ चरमप्रहरे निशः ।
मुखे विशन्तं संपूर्णं, पूर्णिमाचन्द्रमैक्षत ॥ १६४ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कोऽपि कार्पटिकोऽप्येवं वीक्ष्यान्येभ्यो न्यवेदयत् ।
तैः प्रोचे घृतखण्डाढ्यमद्य मण्डकमाप्स्यसि ॥ १६५ ॥
स तथैवासदत्त्वापि गृहाच्छादनपर्वणि ।
न ह्यभाग्यवतां तादृगपि स्वप्नः फलप्रदः ॥ १६६ ॥
प्रातर्मूलसुरो गत्वोद्यानमुद्यानपालकम् ।
प्रसूनोच्चयसाहाय्यदानादानन्दयत्सुधीः ॥ १६७ ॥
हर्षादारामिकस्तस्मै, प्रादात्पुष्पफलादिकम् ।
सोऽपि स्नानं विधायागात् स्वप्नपाठकवेश्मनि ॥ १६८ ॥
भक्त्या नैमित्तिकं नत्वा, धृत्वा चाग्रे कलं फलम् ।
सम्यक् स्वप्नफलं मूलदेवोऽपृच्छदतुच्छधीः ॥ १६९ ॥
तच्छ्रुत्वा मुदितो मूलदेवं दैवज्ञिकोऽवदत् ।
सुमुहूर्ते भणिष्यामि, किन्त्वस्माकं भवातिथिः ॥ १७० ॥
संस्नाप्योष्णाम्भसा नव्यदुकूले परिधाप्य च ।
भोजयामास तं मूलदेवं दैवज्ञपुंगवः ॥ १७१ ॥
ऊचे च वत्स! मत्पुत्रीं, नवयौवनशालिनीम् ।
पाणिग्रहणनिर्माणविधिनाधिनुतात् स्फुटम् ॥ १७२ ॥
मूलदेवोऽवदत्तातापरिज्ञातकुलादिना ।
मया समं सुतोद्वाहसंबन्धोऽयं न बन्धुरः ॥ १७३ ॥
दैवज्ञः प्राह हे प्राज्ञ! स्वाचारेण कुलादिकम् ।
विज्ञायते यतो लोकेऽप्येवमाकर्ण्यते स्फुटम् ॥ १७४ ॥
आचारः कुलमाख्याति, देशमाख्याति जल्पितम् ।
संभ्रमः स्नेहमाख्याति वपुराख्याति भोजनम् ॥ १७५ ॥
तदेनां प्रार्थनां मामकीनां स्वीकुरु सुन्दर! ।
न हि साधुषु कोऽप्यर्थः कथ्यमानो वृथा भवेत् ॥ १७६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततोऽसौ मूलदेवेन स्वपुत्रीं पर्यणाययत् ।
सप्ताहान्तर्नृपो भावीति स्वप्नफलमाह च ॥ १७७ ॥
श्रुत्वेति मुदितस्तत्र तिष्ठन् स्वप्नात् स सप्तमे ।
दिने पुराद् बहिर्गत्वा चम्पकद्रुतलेऽस्वपत् ॥ १७८ ॥
अथो रुजा प्रजापाले, तत्रापुत्रे दिवं गते ।
पुरोधसाऽध्यवास्यन्त पञ्च दिव्यानि मन्त्रिभिः ॥ १७९ ॥
तानि बम्भ्रम्यमाणानि, निरगुर्नगराद् बहिः ।
आगुश्च तत्र यत्रास्ति स भाग्यैकमहोदधिः ॥ १८० ॥
गजो गर्जारवं चक्रे हयो हेषितमातनोत् ।
श्वेतातपत्रं तन्मूर्ध्नि निराधारमवास्थित ॥ १८१ ॥
गङ्गातरङ्गचङ्गाभ्यां, चामराभ्यामवीज्यत ।
श्रीशातकुम्भकुम्भेनाभिषिक्तश्च स पुण्यवान् ॥ १८२ ॥
जाते जयजयारावे कुम्भी कुम्भस्थलोपरि ।
स्वयमारोप्य तं पुर्यां प्रावेशयदसंशयम् ॥ १८३ ॥
तदेति जगदे देव्या, व्योमसंस्थितया तया ।
नाम्ना **विक्रमराजो**ऽयं, राजा देवप्रभावभाक् ॥ १८४ ॥
यो दुष्टोऽस्य भुवो भर्तुः शासनं लङ्घयिष्यति ।
तमवश्यमहं छेत्स्यामीत्युक्त्वा सा तिरोदधे ॥ १८५ ॥
श्रुत्वेत्यमात्यसामन्तपौरैरादरपूर्वकम् ।
सिंहासने निविष्टस्यास्याभिषेको विनिर्ममे ॥ १८६ ॥
अढौक्यन्त च लावण्यपुण्याङ्गा अङ्गजा निजाः ।
चतुरास्तुरगाश्चापि सिन्धुरा नदबन्धुराः ॥ १८७ ॥
ऊचिरे च त्वमेवातः परमस्माकमीश्वरः ।
वयं च भवदादेशकारिणः किङ्करा इव ॥ १८८ ॥
तथा कथंचित् सत्पात्रदानभूमीरुहोऽमुना ।
भव्यभावाम्भसा सिक्तो यथेहापि फलेग्रहिः ॥ १८९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यथा चित्तादिसामग्र्यासाधि पुण्यं पुरामुना ।
तथोत्साहादिशक्त्या द्रागधुनाप्यरिमण्डलम् ॥ १९० ॥
ऐरावणोपमानेभसहस्रेण विराजितम् ।
राजा विक्रमराजाख्यो राज्यं प्राज्यं शशास सः ॥ १९१ ॥
रूपापहस्तितस्वःस्त्रीपरमन्तःपुरं नृपः ।
देवदत्तागतस्वान्तः सर्वं शून्यममन्यत ॥ १९२ ॥
विचारधवलक्षोणीपालेन सह पार्थिवः ।
प्राभृताम्भोमुचा प्रेमवल्लीमुल्लासिनीं व्यधात् ॥ १९३ ॥
इतश्च मूलदेवस्य भर्तुस्तादृग्विडम्बनाम् ।
दृष्ट्वा विरक्तहृद्देवदत्ता प्राहाचलं प्रति ॥ १९४ ॥
रे धृष्ट! दुष्ट! पापिष्ठ! वेश्याहं न तु ते प्रिया ।
तदितो व्रज नेदृक्षः क्षुद्रोऽस्माभिर्गवेष्यते ॥ १९५ ॥
इत्युक्त्वा तत्क्षणाद्देवदत्ता गत्वा नृपं जगौ ।
स्वामिन्! स मे वरः सद्यः प्रसद्याद्य प्रदीयताम् ॥ १९६ ॥
याचस्वेति नरेन्द्रेण पृष्टाभाषिष्ट सा स्फुटम् ।
राजन्नतः परं मूलदेवः प्राणप्रियोऽस्तु मे ॥ १९७ ॥
अचलो गृहमागच्छन्निषेध्यश्च सुनिश्चितम् ।
भूपः प्राह भवत्वेवं, किमिदं तन्निवेदय ॥ १९८ ॥
साचलद्वेषिणी मूलदेवस्य स्वच्छचेतसः ।
आमूलचूलं वृत्तान्तं नृपस्याग्रे न्यवेदयत् ॥ १९९ ॥
तन्निशम्य विशामीशो भ्रकुटीविकटाननः ।
वेगादचलमाकार्याचचक्षे परुषाक्षरम् ॥ २०० ॥
रे! पाप! यदिमावस्मत्प्राणेभ्योऽप्यतिवल्लभौ ।
पराभवसि निस्त्रिंशस्तत्किं स्वामी त्वमेव हि ॥ २०१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदवश्यमसौ वध्य इत्युक्ते पृथिवीभुजा ।
साह नाथामुना श्वानसमेन निहतेन किम् ॥ २०२॥
राजोचेऽस्या गिरा मुक्तोऽस्यतस्त्वं तं कलानिधिम् ।
संगवेष्यानयत् क्षिप्रं प्रवेशोऽपरथा न ते ॥ २०३॥
नृपं नत्वा पुनर्जातमिव जानन् स्वकं ततः ।
तं गवेषयितुं मूलदेवं द्राग्निर्गतोऽचलः ॥ २०४॥
अचलोऽपि तदप्राप्त्या तत्र स्थातुमशक्नुवन् ।
प्रच्छन्नं वहनान्याशु, भृत्वा नानाक्रयाणकैः ॥ २०५॥
आपूर्य चाम्बुमार्गेण, परीवारपरीवृतः ।
निजानुकूलं कूलं स ययौ **पारस**नामकम् ॥ २०६॥
बेन्नातटपतिर्ज्ञात्वा, तद्वृत्तं चरपूरुषैः ।
प्रियायै देवदत्तायै, लेखमेवं लिलेख सः ॥ २०७॥
स्वस्ति बेन्नातटस्थानान्मूलदेवः क्षितीश्वरः ।
श्रीमान् विक्रमराजेत्यपरपर्यायविश्रुतः ॥ २०८॥
वल्लभां देवदत्तां स्वप्राणेभ्योऽप्यतिवल्लभाम् ।
स्तनोपपीडमाश्लिष्यादिशत्यादरपूर्वकम् ॥ २०९ ॥ युगलम्॥
श्रेयःश्रेणिरिहास्माकं साकं परिजनेन तु ।
शुभवत्या भवत्यापि, विज्ञाप्यं निजकौशलम् ॥ २१०॥
कार्यं च मयका दानं मुनये प्रददे मुदा ।
तद्भक्ता देवता प्रीता, प्रोचे वत्स! वरं वृणु ॥ २११॥
मयापि भवती देवदत्ता, मत्तेभगामिनी ।
राज्यं चेभसहस्रेण, विराजितमयाच्यत ॥ २१२॥
तयोक्तमचिरेणेदं, भविता भवतः स्फुटम् ।
चिरन्तननृपेऽपुत्रे, धर्मराजगृहं गते ॥ २१३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततश्च सचिवैः पञ्चदिव्यैर्द्रागधिवासितैः ।
सामन्तादिजनाध्यक्षमहं राज्ये निवेशितः ॥ २१४॥
तदा देवतया व्योमगतया हितया तया ।
चक्रे विक्रमराजेति नाम मे भुवि विश्रुतम् ॥ २१५॥
तद्राज्यं त्वां विना देवि! न मे संतोषपोषदम् ।
अतस्त्वया नृपं पृष्ट्वा, सनाथीक्रियतामिदम् ॥ २१६॥
एवं लिखित्वा लेखं स प्रेष्यहस्ते प्रियां प्रति ।
प्रैषीद्विचारधवलभूपाय प्राभृतम् तथा ॥ २१७॥
सोऽपि तत्र गतो देवदत्तायै लेखमार्पयत् ।
सापि तं वाचयित्वाभूदमन्दानन्दमेदुरा ॥ २१८॥
तं भोजयित्वा संदेशहारकं भूर्जपत्रकम् ।
प्राभृतं च समादाय देवदत्ता ययौ नृपम् ॥ २१९॥
सा प्राह देव! श्रीमूलदेवभूपस्य मानवः ।
स्वरूपं मत्कृते युष्मत्कृते प्राभृतमानयत् ॥ २२०॥
तदिदं भूर्जपत्रं च प्राभृतं चावधार्यताम् ।
राजापि तं निरूप्याह, रम्भोरु! शृणु मद्वचः ॥ २२१॥
न त्वमेव तदीयासि मद्राज्यमपि तस्य तु ।
अतस्तत्र गतापि त्वं न मे खेदाय जायसे ॥ २२२॥
स्वामिन्! महाप्रसादोऽयमिति प्रोक्ते तया नृपः ।
देवदत्तां महाभूत्या युतां प्रैषीत्तकं प्रति ॥ २२३॥
मूलदेवनृदेवोऽपि तां निशम्य समागताम् ।
गत्वा च संमुखं प्रावेशयत् स्वपुरि सोत्सवम् ॥ २२४॥
तेन राज्ञातिविज्ञेन, राज्ञीषु सकलास्वपि ।
सा पट्टमहिषी चक्रे गौरवाय यतो गुणाः ॥ २२५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उक्तं च- गौरवाय गुणा एव न तु ज्ञातेयडम्बरः ।
वानेयं गृह्यते पुष्पमङ्गजस्त्यज्यते मलः ॥ २२६॥
वानेयम्-वने जातम् ।
नृपस्तया समं पञ्चोपचाररुचिरांश्चिरम् ।
भुञ्जानो भङ्गुरान् भोगान्, कालं गमयति स्म सः ॥ २२७॥
इतश्च व्यवसायार्थमचलः सार्थपार्थिवः ।
आययौ नगरं बेन्नातटं पारसकूलतः ॥ २२८॥
जनं कमपि पार्श्वस्थं, नृपाख्यां पृच्छति स्म सः ।
राजा विक्रमराजोऽत्र जयवानिति सोऽब्रवीत् ॥ २२९॥
भृत्वा रत्नैस्ततः स्थालं भूपालमिलनाय सः ।
ययौ ननाम चामुष्मै राजासनमदापयत् ॥ २३०॥
निविष्टो विष्टरे श्रेष्ठी प्रत्यभिज्ञायि भूभुजा ।
न तु तेनाचलेनायमवनीवनितापतिः ॥ २३१॥
राजा प्राह कुतः श्रेष्ठिन्! सोऽवक् पारसकूलतः ।
ततो नृपेण ताम्बूलादिनासौ बह्वमन्यत ॥ २३२॥
पण्यदानकृते पञ्चकुलं न्यायकलं प्रभो! ।
आदिशेत्युदिते तेन, राजाह स्वयमेम्यहम् ॥ २३३॥
महाप्रसाद इत्युक्ते श्रेष्ठिना तत्र पार्थिवः ।
ययौ शुल्ककृते गूढकोपः पञ्चकुलान्वितः ॥ २३४॥
शङ्खश्रीखण्डमञ्जिष्ठादन्तपूगीफलादिकम् ।
क्रयाणकं वणिक् पञ्चकुलाध्यक्षमदर्शयन् ॥ २३५॥
भूपः प्राहैतदेतावदेवं सोऽप्यूचिवानथ ।
राजाधिकारिणः प्रोचेऽस्यार्धः शुल्को विधीयताम् ॥ २३६॥
किन्तु पण्यं ममाध्यक्षं तुलायां तोल्यतामिदम् ।
तैस्तत्तथाकृतं स्फारं भारं मत्वा नृपो जगौ ॥ २३७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रे रे विदार्यन्तां पण्यग्रन्थयस्तैस्तथाकृते ।
मुक्ताप्रवालरैरूप्यादिकमाविरभूत्ततः ॥ २३८ ॥
तन्निरूप्य नृपः कोपाद् बभाषे पुरुषान्निजान् ।
अरे! निबध्यतां बाढमेष प्रत्यक्षतस्करः ॥ २३९ ॥
चौरवत्कम्पमानाङ्गे तस्मिन् बद्धे धराधिपः ।
शिक्षामारक्षकेभ्यः श्राग् दत्त्वा प्रासादमासदत् ॥ २४० ॥
अन्तश्चतुष्पथं तैः स हन्यमानः पुनः पुनः ।
पौरैः सकरुणं वीक्ष्यमाण आनिन्यिरे* नृपम् ॥ २४१ ॥
तं गाढं बन्धनैर्बद्धं, विबुध्य श्लथबन्धनम् ।
व्यधापयन्नृपो यस्मान्महान्तः सदयाशयाः ॥ २४२ ॥
प्रोचे चाचल! मां वेत्सि वा न वा सोऽब्रवीदिति ।
देव! त्वामवनीनाथं को न वेद महीतले ॥ २४३ ॥
नरेश्वरो जगौ श्रेष्ठिन्! पटुभिश्चटुभिः कृतम् ।
सत्यं वदाथ सोऽवादीद् देव! सम्यग् न वेद्म्यहम् ॥ २४४ ॥
राज्ञापि संज्ञयाहूता सर्वाङ्गीणविभूषणा ।
देवदत्तcraftाययौ तस्यार्द्धासने निषसाद च ॥ २४५ ॥
तां वीक्ष्याऽमन्दमन्दाक्षावशेनाधोमुखेऽचले ।
संजाते देवदत्तेति तमुवाच वचस्विनी ॥ २४६ ॥
सोऽयं श्रीमूलदेवो यो भवताभिहितस्तदा ।
यत्त्वयापि विमोच्योऽहं दैवाद् व्यसनतां गतः ॥ २४७ ॥
तन्मूलदेवभूपालः कृपालुस्त्वां विपद्गतम् ।
मुमोचेति निशम्याशु तौ प्रणत्याचलोऽब्रवीत् ॥ २४८ ॥
यद् दूषणं मया देव! चक्रे तत्क्षम्यतामिदम् ।
प्रायः प्रणामपर्यन्तः स्यात् कोपो हि महात्मनाम् ॥ २४९ ॥

---

* आनिन्यानो नृपम् इति पाठः संगतो भाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

या देव्यज्ञानतोऽवज्ञा निरमायि मया त्वयि ।
सा न स्मार्या यतो मूढा, न युक्तायुक्तवेदिनः ॥ २५० ॥
यद्वा हे स्वामिनौ! सत्यं जन्मतोऽप्यस्म्यचेतनः ।
अतः पितृभ्यामचलेत्यभिधा विदधे मम ॥ २५१ ॥
इत्युक्त्वा भूतलन्यस्तमस्तकः सोऽब्रवीत्पुनः ।
देवानेनागसावन्तीशेन निःसारितः पुरात् ॥ २५२ ॥
तन्मामगतिकमिव बम्भ्रमन्तमितस्ततः ।
स्वस्थानवासदानेन त्वं कृतार्थय पार्थिव! ॥ २५३ ॥
तद्वचःश्रवणोत्पन्नकारुण्यरसरञ्जितः ।
मूलदेवनृपः श्रेष्ठिपृष्ठे हस्तमदान्मुदा ॥ २५४ ॥
देवदत्तापि संस्थाप्य भोजयित्वा च सादरम् ।
दुकूलान्यचलं पर्यधापयन्मुदिताशया ॥ २५५ ॥
राज्ञासौ मुक्तशुल्कोऽगादवन्त्यां तद्गिरा स च ।
विचारधवलक्ष्माभृदचलं बह्वमानयत् ॥ २५६ ॥
विप्रो निर्घृणशर्मापि भूपीभूतं निशम्य तम् ।
आगाद् ग्रामं तमेवास्यादृष्टास्यस्य नृपो ददौ ॥ २५७ ॥
अदृष्टास्यस्य-अदृष्टमास्यं यस्य सः, तस्य।
अथ नागरिकाः सर्वे चिन्ताचान्तहृदो मिथः ।
मिलित्वा नृपतिं गत्वा, नत्वा चैवं व्यजिज्ञपन् ॥ २५८ ॥
देव! शासति साम्राज्यं त्वयि चौरेण केनचित् ।
अस्माकमपि सर्वेषां लुण्ट्यन्ते प्रत्यहं गृहाः ॥ २५९ ॥
तत्प्रसद्य प्रभोऽन्यत्र स्थानेऽस्मान् प्रेषय द्रुतम् ।
तत्रस्थैरपि ते नाम्ना, स्वोदरं पूरयिष्यते ॥ २६० ॥
एवमाकर्ण्य वर्णानां राजावोचदतः परम् ।
सुस्थास्तिष्ठत यूयं तं निग्रहीष्यामि तस्करम् ॥ २६१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्युक्त्वा तांश्च सत्कृत्य कृत्यविद् व्यसृजत्ततः ।
आहूय मङ्क्षु नगरारक्षं साक्षेपमब्रवीत् ॥ २६२॥
रे दुष्ट! पुरलुण्टाकं मलिम्लुचमुपानय ।
नो वा भवन्तं तत्स्थाने निग्रहीष्याम्यसंशयम् ॥ २६३॥
मलिम्लुचम्-चौरम् ।
इत्याकर्ण्य पुरारक्षो विलक्षो भाषते स्म तम् ।
देव! तद्धृतयेऽनेके मयोपाया विनिर्मिताः ॥ २६४॥
किन्तु तस्मिंस्तडिद्दण्ड इव द्राग् दृष्टनष्टके ।
प्रयुक्ता अपि ते बाढं न लगन्ति करोमि किम् ॥ २६५॥
ततः सायं स्वयं राजा प्रावृतान्धपटः स्फुटम् ।
परमोषिपरिच्छित्त्यै निरगान्नगराद् बहिः ॥ २६६॥
परमोषिपरिच्छित्त्यै-चौरज्ञप्त्यै ।
मठादिशून्यस्थानेष्वटन्नृपो नाप तस्करम् ।
अभव्य इव संसारकान्तारे बोधिसेवधिम् ॥ २६७॥
चौरानवाप्तिसंतप्तमानसो मानसागरः ।
क्वापि देवकूले शून्ये श्रान्तो विश्रान्तिमातनोत् ॥ २६८॥
तदाकस्मादभीश्चण्डो **मण्डिक**स्तस्करेश्वरः ।
कोऽत्र प्रसुप्त इत्युच्चैर्वदंस्तत्र समागमत् ॥ २६९॥
राजाप्याकृतिमात्रेण, स्तेनं मत्वेत्यभाषत ।
सुप्तोऽस्म्यहं कार्पटिकोऽस्मादृशां स्थानमीदृशम् ॥ २७०॥
रे कार्पटिक! निर्भाग्यागच्छ दौस्थ्यं छिनद्मि ते ।
स्यादितीरिते तेन, नृपस्तत्केटकेऽलगत् ॥ २७१॥
तत्केटके-तत्पृष्ठे । देश्यशब्दोऽयम् ।
स्तेनस्तेन समं क्वापि, महेभ्यसदने गतः ।
मुषित्वा स्वर्णरत्नादि, नगरान्निरयाद्रयात् ॥ २७२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स पारिपन्थिको ग्रन्थिं, बद्ध्वा तन्मूर्ध्न्यधारयत् ।
सोऽपि तत्स्थानकज्ञप्त्यै तमुवाह महामतिः ॥ २७३॥
पारिपन्थिकः-चौरः।
गतौ तौ नगराभ्यर्णजीर्णारण्ये गुहामुखात् ।
शिलां विशालामुत्सार्य प्रविष्टौ हृष्टचेतसौ ॥ २७४॥
अस्य प्राघूर्णकस्य त्वं प्रक्षालय पदाविति ।
चौरेण स्वस्वसादिष्टा, कौमारव्रतधारिणी ॥ २७५॥
उपकूपमियं भूपमासने विनिवेश्य तम् ।
क्रमौ प्रक्षालयन्ती तद्रूपश्रीविस्मिताजनि ॥ २७६॥
अमुष्य नररत्नस्य विनाशो मा स्म भूदिति ।
विचिन्त्य सा कृपासारं वचस्तत्पुरतो जगौ ॥ २७७॥
देव! पूर्वं मया कूपेऽस्मिन्नङ्घ्रिप्रक्षालनच्छलात् ।
बहवः पातिता लोकाश्चौराणां हि कुतः कृपा ॥ २७८॥
क्षेप्त्री न त्वामहं कूपेऽतस्त्वं मदुपरोधतः ।
इतो व्रज जवान्नो चेदावयोः कुशलं न हि ॥ २७९॥
ततो विक्रमराजोऽयं निरगात् तद्गिरा त्वरा ।
यतो हितोपदेशाः स्युः कस्य नानन्ददायिनः ॥ २८०॥
गते च तस्मिन् स्वक्षूणरक्षार्थं याति यात्ययम् ।
इति सा पूच्चकारोच्चैरहो मतिमतां मतिः ॥ २८१॥
स्वक्षूणरक्षार्थम्-निजक्षतिरक्षणार्थम् ।
प्रचण्डो मण्डिकश्चौरश्चण्डधारासिदण्डभृत् ।
विश्वंभराभुजः पृष्ठे निकृष्टोऽधावदुच्चकैः ॥ २८२॥
चौरं राजा निजाभ्यर्णमायातमवगत्य सः ।
चत्वरस्थोपलस्तम्भपृष्ठभागे न्यलीयत ॥ २८३॥
स एवायमिति ज्ञात्वा कोपान्धो मण्डिकोऽसिना ।
तं दृषत्स्तम्भमाहत्य व्यावृत्य च गतो गृहम् ॥ २८४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नरेश्वरोऽपि चौरस्य प्राप्त्या रञ्जितमानसः ।
वेश्मन्यगाद्यतः पुंसामिष्टलब्धिर्न किं मुदे ॥ २८५ ॥
जाते प्रातःक्षणे राजपाटिकाव्याजतो नृपः ।
गजारूढोऽनु तत्स्थानं प्रतस्थे सपरिच्छदः ॥ २८६ ॥
अन्तश्चतुष्पथं गच्छन्नृपो दूष्यापणे स्थितम् ।
पट्टकैर्बद्धजङ्घोरुं कुर्वाणं तूर्णनक्रियाम् ॥ २८७ ॥
सशंकं निक्षिपन्तं स्वां दृशं दिक्षु विदिक्षु च ।
तमेव तस्करं मत्वा ववले स्वालयं प्रति ॥ २८८ ॥ युग्मम् ॥
क्षोणिपस्तत्क्षणादेव स्थानाभिज्ञानपूर्वकम् ।
आदिदेश निजप्रेष्यांस्तदानयनहेतवे ॥ २८९ ॥
तेऽपि तस्यान्तिकं गत्वा प्रोचुर्हे भद्र! भूपतिः ।
त्वामाह्वयति केनापि, हेतुना तत्त्वमेहि भोः! ॥ २९० ॥
सशङ्कचित्तोऽनुत्पन्नापरोपायः स तैः सह ।
सर्वंसहामहाराजं, जगाम च ननाम च ॥ २९१ ॥
स निवेश्यासने भूमीभुजा मधुकिरा गिरा ।
बभाषे भद्र! मह्यं त्वं, निजां भग्नीं समर्पय ॥ २९२ ॥
चौरो दध्यौ ध्रुवं कार्पटिकवेषेण मे स्वसा ।
अनेनादर्शि यामिन्यामन्यथा वेत्त्यसौ कथम् ॥ २९३ ॥
तद्ददामीति निश्चित्य चौरः प्रोचे नरेश्वर! ।
एनामादत्स्व यद् धात्रा त्वत्कृतेऽकारि सा स्फुटम् ॥ २९४ ॥
गुहातस्तां समानाय्य नरेन्द्रः परिणीतवान् ।
मण्डिकाय महामात्यपदवीं विततार च ॥ २९५ ॥
धूर्त्तो विश्वंभराभर्त्रा तद्वाक्येन ततोऽन्वहम् ।
रूप्यरत्नहिरण्यादिवस्तून्यानाययत्यलम् ॥ २९६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कियत्यपि गते काले किमप्यद्यापि विद्यते ।
इति भूपेन सा पृष्टा प्राह स्वामिन्न किञ्चन ॥ २९७॥
ततस्तं मण्डिकस्तेनं छद्मना केनचिन्नृपः ।
व्यापादयाम्बभूवाशु राज्ञां धर्मोऽयमेव हि ॥ २९८॥
श्रीमूलदेवभूमीन्द्रः स्थाने स्थाने जिनालयान् ।
कारयन् दानशालाश्च, राज्यश्रीफलमाददे ॥ २९९॥
राजा सुखेन साम्राज्यं पालयन्नायुषः क्षये ।
मृत्वा समाधिसंयुक्तः स्वर्गश्रियमशिश्रियत् ॥ ३००॥
इत्थं यथा दुर्लभचित्तवित्तसत्पात्रयोगद्रुरयं फलाढ्यः ।
श्रीमूलदेवेन सुदानवारा चक्रे तथान्यैरपि संविधेयः ॥ ३०१॥

(इन्द्रवज्रा)

इति रुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ चित्तवित्तसत्पात्रसामग्रीदानविषये श्रीमूलदेवनृपकथा समाप्ता ॥३०२॥

चित्तवित्तसत्पात्रसामग्रीवैषयिकं श्रीमूलदेवनरेन्द्रप्रबन्धमुक्त्वा प्राग्जन्मकृतदानसुकृतानां कीदृग् फलावाप्तिः स्यादित्याह॥

**णीरोगा गयसोगा पामियभोगा पणट्ठरिउवग्गा ।**
**रूवपराजियमयणा, हवन्ति भुवणम्मि कयदाणा ॥ ३०॥**

व्याख्या - नीरोगा न विद्यते रोगो ज्वरभर-भगन्दर-जलोदर-प्रभृतिसप्ताधिकशतव्याधिरूपो येषां ते। पुनः किंभूतास्ते? गतशोका गतः शोकः पुत्र-मित्र-कलत्र-भ्रातृ-स्वजनवियोगलक्षणो येषां ते। पुनः किंविशिष्टास्ते? प्राप्तभोगाः-प्राप्ता भोगाः स्पर्शन-रसन-घ्राण-चक्षुः-श्रोत्रेन्द्रियसुखदायित्वेन पञ्चप्रकारा यैस्ते । पुनरपि कीदृशास्ते? प्रणष्टरिपुवर्गाः-प्रणष्टः सर्वथा क्षयं गतो रिपुवर्गः शत्रुपक्षो येषां ते। अन्यच्च रूपपराजितमदना-रूपेण शरीरसौन्दर्येण पराजितः-किङ्करीकृतो

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मदनः-कामदेवो यैस्ते । एवंविधा भुवने-त्रिलोक्यां कृतदाना-विहितसत्पात्रदानाः प्राणिनो भवन्तीति गाथार्थः ॥

अदत्तदानसुकृतानां यत्स्यात् तदाह-

**गयमाणा दीणमणा, परिहीणधणा सया पराहीणा ।**
**गुणगणरहिया दुहिया, अदिण्णदाणजणा हुंति ॥ ३१ ॥**

व्याख्या-गतमाना-गतं प्रणष्टं मानं पूजासत्कारादिर्येषां ते। पुनः किंविशिष्टाः? दीनमनसो-दीनं दयावचनं मनो मानसं येषां ते। पुनः किंभूताः? परिहीणधनाः-परि-सामस्त्येन हीनं-प्रक्षीणं धनं-द्रव्यजातं येषां ते । पुनः कीदृक्षाः? सदा पराधीनाः-सदा-सर्वदा, पराधीनाः-परमुखप्रेक्षणपरायणाः। पुनः किंरूपाः? गुणगणरहिता-गुणा औदार्य-धैर्य-गाम्भीर्य-विनय-नयप्रभृतयस्तेषां यो गणः समवायस्तेन रहिताः-सर्वथा शून्या अत एव दुःखिताः-परगृहकर्मकरत्वेन सुखलवमप्यना-सादयन्तोऽदत्तदाना-अवितीर्णसत्पात्रदाना जना भवन्तीति गाथार्थः॥

तदेतद्दानं सत्पात्रनियुक्तं सत्किं फलं कुर्यादित्याशङ्क्याह-

**विसमभुयंगम-हरि-करि-मारि-जरा-समर-वेरि-दरणियरा ।**
**णासंति दूरओ खलु सुपत्तदाणाणुभावाओ ॥ ३२ ॥**

व्याख्या-विषमाश्च ते भुजङ्गमाश्च विषमभुजङ्गमाः-सर्पाः, हरयः -सिंहाः, करिणो-गजा, मारिर्मरकोपद्रवो, जरा-विस्रसा, समरः-संग्रामो, वैरिणः-शत्रवो, दरं-भयं, तेषां ये निकराः समूहास्ते सत्पात्र-दानानुभावात्, खलु-निश्चितं, दूरतो नश्यन्ति-विलयं यान्तीति गाथार्थः॥

श्रियश्चापल्याद्दानविधानं प्रचिकटयिषुराह-

**जलणिहितरंगतरलं, णलिणीदलगयजलंव्व अइचवलं ।**
**विहवं जाणिय दिज्जह दाणं भावेण भो भव्वा! ॥ ३३ ॥**

व्याख्या-जलनिधिः-समुद्रस्तस्य ये, तरङ्गाः-कल्लोलास्तद्वत्तर-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

लम्-चञ्चलम् । पुनर्विशिनष्टि नलिनी-कमलिनी तस्या दलं-पत्रं, तत्र गतं यज्जलं-वारि, तदिव अतिचपलम्-अतिशयेन क्षणिकं विभवं ज्ञात्वा भो भव्या! भावेन-त्रिकरणशुद्ध्या दानं ददीध्वं वितरणाय यत्नं कुर्वीध्वम् ॥

यदाहुः-परवादिद्विरदसिंहनादाः श्रीहेमचन्द्राचार्यपादाः।

आपातलिकावत् संपत्क्षणिकं प्राणितमप्यसुभाजाम् ।
इति मत्वा निश्चयपूर्वं, शाश्वतिकेऽर्थे यत्नमुपाध्वम् ॥१॥ इति गाथार्थः॥

दातृणां विशेषगुणश्लाघामाह-

**सव्वेवि दाणसूरा विहवे संते हवंति भुवणम्मि ।**
**वित्तरहियावि दाणं जे दिंति त एव दाणपरा ॥३४॥**

व्याख्या-सर्वेऽपि प्रायो विभवे-द्रव्ये सति भुवने दानशूरा-दानशौण्डा भवन्ति-जायन्ते। किन्तु ये पुरुषा वित्तरहिता अपि-द्रविणलवहीना अपि, दानं-सत्पात्रदानं, ददति-वितरन्ति, त एव दानपरा-दातारः॥ उक्तं च-

मित्राणि तानि विधुरेषु भवन्ति यानि, ते पण्डिता जगति ये पुरुषान्तरज्ञाः।
त्यागी स यः कृशधनोऽपि हि संविभागी, कार्यं विना भवति यः स परोपकारी।१।
इति गाथार्थः॥ (वसन्ततिलका)

तत्स्वरूपं दृष्टान्तेन स्पष्टयन्नाह-

**धण्णा चंदणबाला सा जयउ जिणस्स वद्धमाणस्स ।**
**पूरियमभिग्गहमिणं जीए कुम्मासदाणेण ॥ ३५॥**

व्याख्या-धन्या-कृतकृत्या, सा चन्दनबाला-श्रीदधिवाहननरेन्द्र-नन्दिनी, जयतु-सर्वोत्कर्षेण वर्त्तताम्, यया जिनस्य वर्धमानस्य-अपश्चिम-तीर्थकृतश्छद्मस्थमुद्रया विहरत एष जिनमतविदितोऽभिग्रहो द्रव्यक्षेत्र-कालभावरूपः, कुल्माषदानेन-सूर्पकोणाग्रगतमाषवितरणेन, पूरितः-परि-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पूर्णीचक्रे। अभिग्रहशब्दप्राकृतत्वान्नपुंसकलिङ्गता न दोषायेति गाथार्थः ॥

भावार्थस्तु कथया प्रथां नीयते, तथाहि-

अत्रैव **भरते** पूर्वदिग्विभागविभूषणम् ।
**वत्स**देशोऽस्ति भूकामधेनोर्वत्स इवापरः ॥ १ ॥
तत्र **कोशाम्बिका**नाम पुरी जगति विश्रुता ।
यत्राशोकाः सदा लोकाः, श्रूयन्ते तरवोऽपि च ॥ २ ॥
तां शशास महानीकः **शतानीकः** क्षितीश्वरः ।
यत्कीर्त्तिवल्लेः पुष्पाणि ताराश्चन्द्रः फलं पुनः ॥ ३ ॥
**चेटक**क्ष्मापपुत्रस्य जायाजनि **मृगावती** ।
या रूपसंपदामेकमोकोऽस्तोकगुणोल्बणा ॥ ४ ॥
तस्य भूमीपतेरासीत् **सुगुप्तः** सचिवाग्रणीः ।
यं शिश्रियुर्धियः सर्वाः कलावन्तं कला इव ॥ ५ ॥
स्ववर्गविहितानन्दा **नन्दा** तस्य सधर्मिणी ।
या देव्याः श्रीमृगावत्या जीवितव्यमिवापरम् ॥ ६ ॥
श्रेष्ठी **धनावह**स्तत्र धनेन धनदोपमः ।
तद्भार्यानार्यकार्यद्रुमूला **मूला**ऽभिधानतः ॥ ७ ॥
अथ **सिद्धार्थ**भूपाल**त्रिशला**नन्दनो जिनः ।
छद्मस्थोऽपि हि निश्छद्मा विहरन् वसुधातलम् ॥ ८ ॥
कौशाम्बीपुरमभ्येत्य कर्ममर्मभिदाकृते ।
पौषकृष्णाद्यनन्दायामित्यभिग्रहमग्रहीत् ॥ ९ ॥ युगलम् ॥
निबिडैर्निगडैर्नद्धपदान्तर्वर्त्तिदेहली ।
रुदती सुदती भद्राकृतकुन्तलमस्तका ॥ १० ॥
परप्रेष्यत्वमापन्ना कृताष्टमतपास्तथा ।
भिक्षुभिक्षाक्षणे क्षीणा, क्षोणिनायककन्यका ॥ ११ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सूर्पकोणस्थकुल्माषान् यदि मह्यं प्रदास्यति ।
तदा पारणकं कर्त्तान्यथास्तु नियमस्तु मे ॥ १२॥ युग्मम्॥
भिक्षार्थं तीर्थनाथः स प्रविवेश गृहे गृहे ।
प्रासुकं लभमानोऽपि, भैक्ष्यं नादादभिग्रही ॥ १३॥
अगृह्णति विभौ भिक्षामभिद्यत पुरीजनैः ।
किमाभिर्निष्फलाभिर्नो, लक्ष्मीभिरवकेशिवत् ॥ १४॥
एकदा श्रीमहावीरस्तपस्तेजःश्रियोल्बणः ।
भिक्षार्थी श्रीसुगुप्ताख्यमन्त्रिणः प्राविशद् गृहम् ॥ १५॥
प्रविशन्तं जिनाधीशं दृक्चकोरीनिशाकरम् ।
नन्दाभ्यानन्दितस्वान्ता ददर्श विममर्श च ॥ १६॥
अद्य मे मानुषं जन्म प्रबभूव फलेग्रहि ।
यत्स्वामी स्वयमायातः, कल्पद्रुरिव मद्गृहे ॥ १७ ॥
तद्भोज्यादीनि वस्तूनि, ढौकयित्वा प्रभोः पुरः ।
कृतार्थयामि स्वं यस्मान्नेदृक्षः प्राप्यतेऽतिथिः ॥ १८॥
तत उत्थाय सानन्दा सा नन्दा विहिताञ्जलिः ।
विभुं विज्ञपयामास, सुधामधुरया गिरा ॥ १९॥
इदं खाद्यमिदं स्वाद्यमिदं पेयमदोऽशनम् ।
प्रभो! प्रासुकमादाय मां तारय भवार्णवात् ॥ २०॥
अपूर्णाभिग्रहः स्वामी शुद्धमप्यशनादिकम् ।
हित्वा ततो निरैद्रोरगृहादिव महानिधिः ॥ २१॥
विधिवाताहतस्तस्या मनोरथमहीरुहः ।
पूर्वं पपात भूपीठे पश्चात्सा दुःखदुःखिता ॥ २२॥
क्षणेन प्राप्य चैतन्यं, तन्वी दध्यौ हृदि क्व मे ।
ईदृग्भाग्यं विधत्ते यत्पारणं मद्गृहे प्रभुः ॥२३॥ युग्मम् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मुहुर्मुहुरिदं पद्यं, ब्रह्मवद्योगिनीव सा ।
मन्त्रिजाया स्मरन्ती तद्दास्याभाष्यत सत्वरम् ॥ २४ ॥
भिक्षुरेषोऽनिशं भैक्ष्यमगृह्णन्नेति याति च ।
अतः स्वमानसे खेदं, मा स्वामिनि! कृथा वृथा ॥ २५ ॥
इति दास्या वचः श्रुत्वा नन्दा चेतस्यचिन्तयत् ।
अवश्यं स्वामिना कोऽपि जगृहेऽभिग्रहाग्रहः ॥ २६ ॥
तदा नन्दा निरानन्दा गृहायातेन मन्त्रिणा ।
अपृच्छ्यत प्रिये! किं ते केनाप्याज्ञाद्यखण्ड्यत ॥ २७ ॥
किं वाकारि मया कश्चिदपराधोऽथवा कुतः ।
किमप्यनिष्टमश्रावि यदेवं हृदि खिद्यसे ॥ २८ ॥ युगलम् ॥
ततो नन्दावदन्मन्त्रिमुद्राधर्त्तरि भर्त्तरि ।
त्वय्यर्त्तिहृति जागर्त्ति को मां खेदयितुं भुवि ॥ २९ ॥
किन्तु जीवेश! खेदस्य हेतुरेकोऽस्ति यद्विभुः ।
श्रीवीरोऽभिग्रहापूर्त्या भिक्षां संत्यज्य गच्छति ॥ ३० ॥
तत्प्राणनाथ! वीरस्याभिग्रहं कर्मनिग्रहम् ।
विद्धि यस्मादनुक्तोऽपि बुधैरर्थः प्रबुध्यते ॥ ३१ ॥
उक्तं च-उदीरितोऽर्थः पशुनापि बुध्यते, हयाश्च नागाश्च वहन्ति नोदिताः ।
अनुक्तमप्यूहति पण्डितो जनः परेङ्गितज्ञानफला हि बुद्धयः ॥ ३२ ॥
मन्त्री प्राह प्रिये! वेगात् खेदं त्यज मुदं भज ।
तथा यतिष्ये वीरस्य यथा ज्ञास्याम्यभिग्रहम् ॥ ३३ ॥
अथ केनापि कार्येण, तद्गृहागतया तया ।
मृगावत्याः प्रतीहार्या तत्सर्वमपि शुश्रुवे ॥ ३४ ॥
सापि गत्वा मृगावत्यास्तत्स्वरूपं व्यजिज्ञपत् ।
एतच्चाकर्ण्य कर्णाभ्यां सा सखेदाजनि क्षणम् ॥ ३५ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदा नरवरः प्राह प्रिये! किमिति संप्रति ।
प्रदोषे पद्मिनीवत्त्वं विलक्षास्या विलक्ष्यसे ॥ ३६ ॥
साभ्यधान्नाथ! यद्वीरः प्रतिधाम परिभ्रमन् ।
अभिग्रहेण केनापि भिक्षां गृह्णाति न क्वचित् ॥ ३७ ॥
तद् देव जगदीशस्याभिग्रहो ज्ञायतामयम् ।
अन्यथा बुद्धिमन्मन्त्रिप्राज्यराज्यश्रिया किमु ॥ ३८ ॥
निशम्येति विशामीशः प्राह प्राणप्रिये! त्वया ।
प्रमादनिद्रया सुप्तः साधु जागरितोऽस्म्यहम् ॥ ३९ ॥
प्रातः श्रीवर्धमानस्य विज्ञायाभिग्रहं प्रिये! ।
कारयिष्यामि तं व्यक्तं, पारणं गुणकारणम् ॥ ४० ॥
अथ तत्र समायातं सुगुप्ताभिधमन्त्रिणम् ।
पप्रच्छ पृथिवीनाथः प्रभुपारणकर्मणि ॥ ४१ ॥
उवाच सचिवः स्वामिन्नत्रार्थे निशिता अपि ।
न मे धियः प्रवर्तन्ते, वज्रभित्ताविवेषवः ॥ ४२ ॥
देव! द्रव्यादयो भेदा बहुधा जिनशासने ।
विना केवलिनं कोऽन्यो वेदितुं वक्तुमप्यलम् ॥ ४३ ॥
किन्तु राजेन्द्र! पौराणां पुरस्तादिति कथ्यते ।
यत्प्रभोः पारणार्थे भो! नानाभोज्यं विधीयताम् ॥ ४४ ॥
भूपोऽपि पौरानाकार्य तत्तथैव समादिशत् ।
तेऽपि प्रमाणमित्युक्त्वा मुदिता मन्दिरं ययुः ॥ ४५ ॥
प्रभौ भिक्षार्थमायाते, नागराः परमादरात् ।
नानाविधानि शुद्धानि भोज्यवस्तून्यढौकयन् ॥ ४६ ॥
तानि प्रावृड्जलानीव, राजहंस इव प्रभुः ।
हित्वा जगाम तेषां च हृदि खेदपदं व्यधात् ॥ ४७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एवं श्रीवर्धमानस्य जिनेन्द्रस्य सुदुस्तपम् ।
तपस्तपस्यतो मासाश्चत्वारो व्यतिचक्रमुः ॥ ४८ ॥
अथ **चम्पा**महापुर्याः पूर्वादिष्टो नरेश्वरः ।
समेत्य वत्सदेशेशं व्यजिज्ञपदिदं वचः ॥ ४९ ॥
देव! युष्मदरातिः श्री**दधिवाहन**भूपतिः ।
प्रक्षीणबलसंभारः, सुजेयस्तव संप्रति ॥ ५० ॥
इति श्रुत्वा धराधीशो, विक्रमाक्रान्तभूतलः ।
प्रयाणसूचिकां ढक्कां तत्क्षणात्समताडयत् ॥ ५१ ॥
शतानीको निजानीकं, नौष्वारोप्यैकया निशा ।
त्रिश्रोतःश्रोतसा गत्वा चम्पापुरमवेष्टयत् ॥ ५२ ॥
त्रिश्रोतःश्रोतसा-गङ्गाप्रवाहेण ।
बहिर्निस्वाननिस्वाना गम्भीरा जज्ञिरेतराम् ।
अन्तःपुरं पुरन्ध्रीणां करुणध्वनयोऽपि च ॥ ५३ ॥
हा हता हा हता व्यक्तमिति पौरगिरो मिथः ।
अजायन्ततरां फेरुफेत्कारा इव दारुणाः ॥ ५४ ॥
अकस्मादेव संजातकम्पश्चम्पाधिपस्तदा ।
जवादनश्यदेकाकी सिंहादिव महामृगः ॥ ५५ ॥
शतानीको भटानाह जीवन्तं दधिवाहनम् ।
वेगेन गत्वा धृत्वा च समानयत मत्पुरः ॥ ५६ ॥
तेऽपि योधाः स्फुरत्क्रोधा विविधायुधपाणयः ।
पुरीं गत्वा नृपं नष्टं, श्रुत्वा राज्ञे न्यवेदयत् ॥ ५७ ॥
प्रातःक्षणे शतानीकश्चम्पापुरिसरित्पतिम् ।
मथयित्वा पुरारातिरिव श्रियमुपाददे ॥ ५८ ॥
सैनिकैरपि लुण्टाकैः शेषा लक्ष्मीः शिलोञ्छिता ।
लूनक्षेत्रकणश्रेणिरिव कर्षुकपूरुषैः ॥ ५९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तन्मध्यात्केनचिद्वित्तनिमित्तं भ्रमता सता ।
औष्ट्रिकेण प्रणस्यन्ती दधिवाहनभूपतेः ॥ ६० ॥
औष्ट्रिकेण-उष्ट्रस्थायिसैनिकेन ।
पत्नी **श्रीधारिणीदेवी, वसुमत्य**ङ्गजान्विता ।
धृता वेगेन धावित्वा, व्याधेनेव कुरङ्गिका ॥ ६१ ॥ युग्मम् ॥
कृतकृत्ये शतानीके वलिते स्वां पुरीं प्रति ।
औष्ट्रिकः पथि तद्रूपाक्षिप्तचित्तोऽभ्यधादिति ॥ ६२ ॥
कृशोदरि! कनीमेनां विक्रीय त्वां च वल्लभाम् ।
निजां विधाय गार्हस्थ्यफलं भोक्ष्ये यथासुखम् ॥ ६३ ॥
इति तद्वचनं वज्रपातप्रायं निशम्य सा ।
धारिणी दुःखसंतप्ता, दैवमेवमतर्जयत् ॥ ६४ ॥
हा हताशविधे! कस्तेऽपराधो विहितो मया ।
यत्त्वं नानाविधैर्दुःखैर्मां खेदयसि निर्दय! ॥ ६५ ॥
एकश्चम्पाधिराजस्य निःसीमप्रेमवारिधेः ।
प्राणप्रियस्य तादृक्षो, विरहः खलु दुःसहः ॥ ६६ ॥
द्वितीयो राज्यतो भ्रंशस्तार्त्तीयैकः स्वयं पुनः ।
तादृग्भक्तपरीवारनाशः पाश इवाशुभः ॥ ६७ ॥
अन्यच्चोल्लण्ठवण्ठस्य कुवाक्तीक्ष्णशिलीमुखाः ।
शीलप्राणभिदो देहे लगन्तो व्यथयन्ति माम् ॥ ६८ ॥
तदरे दैव! मे दुःखमीदृग् जनयतस्तव ।
न किं मनोरथाः पूर्णा यच्छीलं हर्तुमीहसे ॥ ६९ ॥
परं ते धातरत्रार्थे पौरुषं ज्ञास्यतेऽधुना ।
यत्सत्याः परमं भूषाशीलं मम हरिष्यसि ॥ ७० ॥
यद्वैतत्सुष्ठु न ध्यातं किन्तु पूर्वकुकर्मणाम् ।
विजृम्भितमिदं तस्मान्मरणं शरणं मम ॥ ७१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति स्मरन्त्या धारिण्या वक्षःस्फोटः स कोऽप्यभूत् ।
येन सा सहसा प्राणैरमुच्यत महासती ॥ ७२ ॥
मातुर्विनाशसंजातशोका वसुमती तदा ।
रुरोद रोदसीपूरं स्त्रीणां हि रुदितं बलम् ॥ ७३ ॥
औष्ट्रिकोऽपि मृतां राज्ञीं विनिरीक्ष्य विलक्षधीः ।
रुदतीं सुदतीमाश्वासयन्मधुकिरा गिरा ॥ ७४ ॥
शतानीके नृपे प्राप्ते, कौशाम्ब्यां समहोत्सवम् ।
वण्ठो निनाय कन्यां तां विक्रयाय चतुष्पथे ॥ ७५ ॥
तदा **धनावहश्रेष्ठी** गच्छंस्तेनैव वर्त्मना ।
बालामालोकयामास नयनानन्ददायिनीम् ॥ ७६ ॥
अध्यायच्चैष विक्रेता कन्यां कामगवीमिव ।
न हीदृशामपुण्यानां कन्यारत्नं गृहे स्थिरम् ॥ ७७ ॥
अस्या आकृतिरेवाशु ज्ञापयत्युत्तमं कुलम् ।
अतो मे निःसुतस्यैषा नन्दिनी स्यान्मनोमुदे ॥ ७८ ॥
आसां कल्लोललोलानां संपदां खलु किं फलम् ।
यदापत्पतितप्राणिवर्ग उद्ध्रियते सदा* ॥ ७९ ॥
तदेता दैवदत्ता मे गेहे सन्त्यमिताः श्रियः ।
अतो वण्ठाद् विमुच्यैनां, नयेऽहं ताः कृतार्थताम् ॥ ८० ॥
इति निश्चित्य स श्रेष्ठी धनेन द्रुतमौष्ट्रिकात् ।
श्वपचादिव तां धेनुमिव बालाममोचयत् ॥ ८१ ॥
गङ्गयेव तया कन्या, कलितश्चलितः क्षणम् ।
श्रेष्ठी भगीरथक्षोणीपाललीलामलं ललौ ॥ ८२ ॥

---

* वर्गो नोद्ध्रियते सदा ॥ इति संगतो भाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तां पप्रच्छ च भद्रे! त्वं कासि कस्य सुजन्मनः ।
सुता किं ते कुलं किं च नाम कर्णामृतोपमम् ॥ ८३॥
श्रुत्वेति बाला तत्कालगलद्बाष्पाविलेक्षणा ।
मातर्धरित्रि! विवरं मत्प्रवेशकृते कुरु ॥ ८४॥
इतीव न्यग्मुखाम्भोजा, यावत्किमपि नो जगौ ।
तावत्सोऽचिन्तयद्यस्मान्नोत्तमाः स्वप्रकाशकाः ॥ ८५॥ युग्मम् ॥
श्रेष्ठी जगाद हे वत्से! खेदं त्यज मुदं भज ।
स्वमातृपितृगेहस्थमात्मानं च विदाङ्कुरु ॥ ८६॥
सापि तद्वचनं साक्षाद् द्राक्षापानोपमानकम् ।
निपीय परमानन्दमेदुरोदरतामयात् ॥ ८७॥
श्रेष्ठिश्रेष्ठोऽथ तां गेहे नीत्वा मूलां समालपत् ।
इयं ते निरपत्याया अपत्यत्वं श्रयत्वलम् ॥ ८८॥
सापि पत्यार्पितामेतां कन्यां कल्पलतामिव ।
प्रेमामृतेन संतोष्य परमां वृद्धिमापयत् ॥ ८९॥
सापि सर्वं परीवारमपारगुणसंपदा ।
सरङ्गा रञ्जयामास, मञ्जिष्ठेव सिचां चयम् ॥ ९०॥
सिचाम्-वस्त्राणाम् ।
चन्दनादपि शीतेन तच्चरित्रेण नन्दितः ।
श्रेष्ठी धनावहस्तस्याश्चन्दनेत्यभिधां व्यधात् ॥ ९१॥
अन्यदा चन्द्रबिम्बार्द्धभालां नीलाम्बुजेक्षणाम् ।
वक्त्रश्रीविजिताम्भोजां पक्वबिम्बाधरोष्ठिकाम् ॥ ९२॥
मृणालकोमलभुजां कम्बुकण्ठीं कृशोदरीम् ।
पीनोन्नतस्तनाभोगां, मरालगतिगामिनीम् ॥ ९३॥
रक्ताशोकदलाकारिकरक्रमनखप्रभाम् ।
बालामालोक्य तत्कालं मूला चेतस्यचिन्तयत् ॥९४॥ त्रिभिर्विशेषकम्॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कदाचिच्चेदिमां बालां स्वःस्त्रीरूपविजित्वरीम् ।
नवयौवनपुण्याङ्गीमनङ्गपरमायुधम् ॥ ९५॥
विनिरीक्ष्य मम प्राणवल्लभो वल्लभीयति ।
तदा मे मन्दभाग्याया भविता किल का गतिः ॥ ९६॥ युग्मम् ॥
ईदृक्षे सुन्दरीरत्ने मुनीनामपि मानसम् ।
पञ्चबाणेषुलक्षत्वं यात्यन्यस्य तु का कथा ॥ ९७॥
अथ पान्थप्रदत्तार्त्तौ ग्रीष्मर्त्तौ दिनयौवने ।
श्रेष्ठी हट्टाद् गलत्स्वेदबिन्दुः सदनमासदत् ॥ ९८॥
तदा गृहादिकार्येषु, व्यग्रे परिजनेऽखिले ।
चन्दना निजचेतोवदमलं पुष्कलं जलम् ॥ ९९॥
उपादाय पितुः पादौ प्रक्षालयितुमादरात् ।
प्रावर्त्तत यतः प्रांशुवंश्यानामीदृशी स्थितिः॥ १००॥ युगलम् ॥
को चित्तेइ मऊरं गइं च को कुणइ रायहंसाणं ।
वरहत्थीण य लीलं विणयं च कुलप्पसूयाणं ॥ १०१॥
ईदृक्कर्मानभिज्ञाया विज्ञाया अपि तत्क्षणात् ।
तस्या अलिकुलश्यामः केशपाशः पतन्नधः ॥ १०२॥
मा पङ्कपङ्किलोऽश्लीललीलामाकलयेदलम् ।
इतीव श्रेष्ठिना स्वीयकराभ्यां विधृतो मुदा ॥ १०३॥ युग्मम् ॥
तदा तदीयकेशौघास्तमालश्यामलत्विषः ।
अलिलीलां ललुस्तस्य श्रेष्ठिनः पाणिपङ्कजे ॥ १०४॥
मूला जालान्तरालस्था तत्सर्वं भर्तृचेष्टितम् ।
वीक्ष्याकारणकोपाग्निज्वलिताङ्गीत्यचिन्तयत् ॥ १०५॥
यन्मया चिन्तितं पूर्वं, तदेवाविरभूदिदम् ।
नो चेदस्याः कथं नाथो वेणीं नियमयेत्स्वयम् ॥ १०६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदवश्यमियं बाला बालापि विषवल्लिवत् ।
उच्छेद्या ह्यन्यथानर्थहेतवे भाविनी मम ॥ १०७॥
पूजां कृत्वा च भुक्त्वा च पत्यौ हट्टे गते सति ।
मूला नापितमाहूय तस्या मुण्डममुण्डयत् ॥ १०८॥
निगडीकृतपादान्तां क्षिप्त्वापवरकान्तरे ।
द्वारं दत्त्वा च दुष्टात्मा परिच्छदमदोऽवदत् ॥ १०९॥
रे! रे! यः कोऽपि युष्माकं, मध्ये वृत्तान्तमेतकम् ।
श्रेष्ठिनः पुरतो वक्ता तं प्राप्स्यामि यमालयम् ॥ ११०॥
तस्याः प्रकृत्याकृत्याया भीत्या भृत्या मृता इव ।
नोच्छ्वसन्ति न जल्पन्ति नादन्ति न पिबन्ति च॥ १११॥
सन्ध्यायामर्कवन्ध्यायामापणात्कृतमार्पणात् ।
हर्म्ये सत्संपदारम्ये समायातेन तेन सा ॥ ११२॥
कृतमार्पणात्-कृतलक्ष्मीसमर्पणात् ।
चन्दना दृश्यते नैवेत्युक्तः परिजनो निजः ।
मूलाभयभरभ्रान्तो यावत्किमपि नाब्रवीत् ॥ ११३॥ युग्मम् ॥
तावद्विमृष्टमिभ्येन, यदियं किल बालिका ।
स्वसखीभिः समं क्वापि रममाणा भविष्यति ॥ ११४॥
रजन्यां च पुनः पृष्टः श्रेष्ठिना स्वपरिच्छदः ।
नोवाच तेन चाचिन्ति यत्सुप्ता भाविनी कनी ॥ ११५॥
एवं दिने द्वितीयेऽपि श्रेष्ठिनोक्तो न सोऽब्रवीत् ।
ध्यातं च यदियं व्यग्रा भवित्र्यन्यत्र कुत्रचित् ॥ ११६॥
तृतीयेऽपि दिने बालामबालां गुणसम्पदा ।
अपश्यन् कोपतः श्रेष्ठी, परिवारमवोचत ॥ ११७॥
रे! रे! यः कोऽपि जानन्नो कन्यां प्रकटयिष्यति ।
तस्यात्यर्थमनर्थं श्राक्करिष्ये नात्र संशयः ॥ ११८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रौद्रां तद्गिरमाकर्ण्य सकलोऽपि परिच्छदः ।
किंकर्त्तव्यजडीभूय चेतसीति व्यचिन्तयत् ॥ ११९ ॥
चेद्वच्मीदं तदा मूला द्वेष्टि नो चेद् धनावहः ।
क्रियते कोऽधुनोपाय इतो व्याघ्र इतस्तटी ॥ १२० ॥
तदा परिच्छदस्यान्तरेका नारी जरद्गवी ।
विममर्श मनस्येवं जीविष्यामि कियच्चिरम् ॥ १२१ ॥
यदमुष्याः सुकेश्या मे प्राणैः सत्वरगत्वरैः ।
उपकारो भवेत्कोऽपि, किं न लब्धं तदा मया ॥ १२२ ॥
सा तस्या भयमुत्सृज्य धीरतामवलम्ब्य च ।
मूलादुश्चेष्टितं स्पष्टमाचष्ट श्रेष्ठिनः पुरः ॥ १२३ ॥
यत्र सा चन्दना कन्या विद्यतेऽवद्यवर्जिता ।
निधानमिव तत्स्थानं, स्थविरास्मा अदर्शयत् ॥ १२४ ॥
श्रेष्ठी तद्द्वारमुद्घाट्य रोदनोच्छूनलोचनाम् ।
प्रातश्चन्द्रमसो बिम्बमिव......वक्त्रिकाम्* ॥ १२५ ॥
ज्वलद्दवानलप्लुष्टलतामिव गतप्रभाम् ।
अयःशृङ्खलया बद्धपादां मुण्डितमस्तकाम् ॥ १२६ ॥
क्षुत्क्षामकुक्षिं तां वीक्ष्यासंख्यदुःखार्दिताशयः ।
वत्से! मा गा विषादं त्वमित्यभाषत चन्दनाम् ॥ १२७ ॥ कुलकम् ॥
श्रेष्ठी तद्भोजनस्यार्थं शीघ्रं रसवतीगृहे ।
गत्वा हृद्यानि खाद्यानि नापश्यद्दैवयोगतः ॥ १२८ ॥
केवलं तत्र कुल्माषान् मलिनान् खलचित्तवत् ।
सूर्पकोणे निधायाशु चन्दनायै समार्पयत् ॥ १२९ ॥
ऊचे च पुत्रि! कुल्माषांस्तावदास्वादयाधुना ।
यावत्ते निगडांश्छेत्तुमयस्कारमुपानये ॥ १३० ॥

---

*तिसृषु प्रतिषु पाठो नैव प्राप्यते...पाण्डुरवक्त्रिकाम् । इति प्रतिभाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततो धनावहे लोहकारगेहे गते सति ।
चन्दना भववैराग्यरङ्गितैवमचिन्तयत् ॥ १३१॥
दधिवाहनभूभर्तुर्दुहितापि यदीदृशीम् ।
दुरवस्थामहं प्राप्ता पारवश्यस्य तत्फलम् ॥ १३२॥
उक्तं च-सोच्छ्वासं मरणं, निरग्नि दहनं निःशृङ्खलं बन्धनम् ।
निष्पङ्कं मलिनं विनैव नरकं सैषा महायातना ।
सेवासञ्जनितं जनस्य सुधियो धिक् पारवश्यं यतः,
पञ्चानां सविशेषमेतदपरं षष्ठं महापातकम् ॥ १३३॥ (शार्दूलविक्रीडितम्)
चिन्तयाप्यनया पूर्णं, तूर्णं यदि कुतोऽपि हि ।
*षष्ठपारणके कोऽपि, मुनिरेति तदास्म्यहम् ॥ १३४॥
तस्मै विशुद्धान् कुल्माषान् दत्त्वा विगतकल्मषा ।
स्वयमद्मीति निश्चित्य द्वारदेशमसावगात् ॥ १३५॥ युगलम्॥
चन्दना भावनापूर्वमृषीक्षार्थमितस्ततः ।
निक्षिपन्ती दृशं बाष्पाविलां यावदवास्थित ॥ १३६॥
तावत्स्वयं महावीरजिनचन्द्रः पुरे भ्रमन् ।
भिक्षार्थं चन्दनानेत्रकैरवातिथितां ययौ ॥ १३७॥
बाला विलोक्य त्रैलोक्यनायकं हृद्यचिन्तयत् ।
क्व मेऽधुनेदृशं भाग्यं यदत्रायाति तीर्थकृत् ॥ १३८॥
भगवानपि तत्प्राज्यपुण्याकृष्ट इव प्रभुः ।
तत्रागतो यतो भाग्योदये पुंसां न किं भवेत् ॥ १३९॥
चन्दना निगडाबद्धपादान्तरितदेहली ।
सन्मुखं गन्तुमनलंभूष्णुः प्रभुमभाषत ॥ १४०॥
नाथ! यद्यपि कुल्माषा न योग्यास्तव पारणे ।
तथाप्येतानुपादाय त्वं मां तारय तारय ॥ १४१॥

---

*एतच्चिन्तनीयम्, 'अष्टमपारणे इति' च गम्यते दृश्यताम्-श्लो. ११. (पृ.२०१.)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भगवानपि हि द्रव्यादिभिः पूर्णमभिग्रहम् ।
विज्ञाय चन्दनाग्रे स्वं पाणिपात्रममण्डयत् ॥ १४२ ॥
अहो विलोक्यतां दानमाहात्म्यं यज्जिनोऽपि हि ।
दायकस्य पुरः स्वीयं पाणिपद्मं प्रसारयेत् ॥ १४३ ॥
तया भावनया क्षिप्ताः कुल्माषाः स्वामिनः करे ।
स्वर्णस्थालस्थनीलाश्मलीलामकलयन्नलम् ॥ १४४ ॥
तदा दिव्यानुभावेन बालाया मूर्ध्नि कुन्तलाः ।
प्रादुरासन् यथा मेघे वृष्टे भुव्यङ्कुरोत्कराः ॥ १४५ ॥
आयसो निगडस्तस्याः पदपङ्कजयामले ।
स्वर्णनूपुरतामापदस्तिर्भ्वादेशतां यथा ॥ १४६ ॥
तस्याः शीर्णानि वासांसि, देवदूष्यत्वमाप्नुवन् ।
अहो फलं हि सत्पात्रदानपुण्यमहीरुहः ॥ १४७ ॥
अस्मिन्नवसरे भक्तिभरनिर्भरचेतसः ।
देवा देवाङ्गनायुक्तास्तत्र धाम्नि समागमन् ॥ १४८ ॥
तदा दुन्दुभिनिर्घोषैश्चेलोत्क्षेपस्तथापरः ।
अहो दानमहो दानमेवं जयपरारवः ॥ १४९ ॥
अर्धत्रयोदशस्वर्णकोटेः सुमनसामपि ।
वृष्टिसृष्टिरिति व्यक्तं पञ्च दिव्यानि जज्ञिरे॥ १५० ॥ युग्मम् ॥
दृष्टिहस्तकटीपादविन्यासेनापि भासुरम् ।
लास्यं पद्मसमानास्या विदधुर्विबुधाङ्गनाः ॥ १५१ ॥
तानमानलयग्राममूर्च्छनाबन्धबन्धुरम् ।
रागरङ्गोद्धुरं गीतं, गायन्ति स्म सुरस्त्रियः ॥ १५२ ॥
आहतानाहता हस्तदण्डवाताहता इति ।
पञ्च शब्दा अताड्यन्त त्रिदशैरतिसंमदात् ॥ १५३ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अजातपूर्वे जातेऽस्मिन्नुत्सवे वत्सदेशराट् ।
शतानीको मृगावत्या समं तत्र समाययौ ॥ १५४॥
सदा मनसि सञ्जातानन्दया नन्दया समम् ।
समियाय सुगुप्तोऽपि समग्रसचिवाग्रणीः ॥ १५५॥
तं महान्तं महं श्रुत्वा लोहकारालयाद्रयात् ।
आगाद् धनावहः संपत्सुन्दरं निजमन्दिरम् ॥ १५६॥
पुरःसरोऽप्सरोवर्यक्रियमाणोरुनाटकः ।
सौधर्माधीश्वरस्तत्राजग्मिवान् मुदिताशयः ॥ १५७॥
भद्रेऽहं भवतीं मन्ये, कृतकृत्यां यया प्रभुः ।
पारणं कारितो वीरस्तेनेत्यस्तावि चन्दना ॥ १५८॥
चम्पाभङ्गेऽथ धारिण्याः कञ्चुकी **संपुटा**भिधः ।
धृतपूर्वो मृगावत्या सार्द्धं तत्र समागमत् ॥ १५९॥
स तां चम्पेशजां ज्ञात्वा, तत्पल्लग्नस्तथारुदत् ।
यथा पुरीनृणां नेत्रैरकालेऽपि घनायितम् ॥ १६०॥
रुदन्तं सौविदल्लं तं, दृष्ट्वाऽपृच्छन्नरेश्वरः ।
सोऽप्याहावहितीभूय देवेदं शृणु कारणम् ॥ १६१॥
सौविदल्लम्-कञ्चुकिनम् । अवहितीभूय-सावधानीभूय ।
दधिवाहनधारिण्योः सुतां वसुमतीमिमाम् ।
दुस्थावस्थागतां दृष्ट्वा, दुःखेन रुदितोऽस्म्यहम् ॥ १६२॥
नृपोऽवददिमां कन्यां धन्यां मन्ये महीतले ।
यया कुल्माषदानेन, पूरितोऽभिग्रहः प्रभोः ॥ १६३॥
मृगावत्यपि तां जामिपुत्रीं विज्ञाय हर्षतः ।
भज वत्से! मदुत्सङ्गमित्यभाषत चन्दनाम् ॥ १६४॥
अथ पञ्चदिनन्यूनषण्मास्यां कृतपारणः ।
वर्धमानजिनाधीशो विजहार वसुन्धराम् ॥ १६५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वसुवृष्टिं शतानीको, गृह्णन्निन्द्रेण वारितः।
अमुष्या न भवान् स्वामी, स्वामिनी चन्दना पुनः ॥ १६६ ॥
इयं यस्मै प्रमोदेन दत्ते तस्य त्विदं धनम् ।
न ह्यन्यवस्तुनः कश्चिदन्यः स्वामित्वमर्हति ॥ १६७॥
को वैभवमिदं वत्से! ग्रहीतेति महीभुजा ।
भाषिता चन्दना प्राह, तातास्येशो धनावहः ॥ १६८ ॥
येनासौ मत्पितावश्यं तादृशाद्वुण्ठमोचनात् ।
पालनाल्लालनात्पोषकरणाच्चरणादपि ॥ १६९ ॥
धनावहोऽपि जग्राह चन्दनावचनाद् धनम् ।
गुरुवक्त्राम्बुजाद् धर्मोपदेशमिव तत्त्ववित् ॥ १७० ॥
इन्द्रो जगाद राजेन्द्र! प्रथमा चरमप्रभोः ।
सञ्जाते केवलज्ञाने भवित्रीयं प्रवर्त्तिनी ॥ १७१ ॥
तस्मादस्माकमादेशात्पुण्यप्राप्यसमागमा ।
बालेयं कल्पवल्लीव, पालनीया त्वया नृप! ॥ १७२ ॥
इत्युक्त्वा नाकिनां नाथे सनाथीकृततাविषे ।
शतानीकोऽपि लोकोऽपि स्वं स्वं स्थानमुपेयिवान् ॥ १७३ ॥
कन्या शुद्धान्तमध्यस्था चन्दना जगदीशितुः ।
केवलोत्पत्तिमिच्छन्ती, वासरानत्यवाहयत् ॥ १७४ ॥
धनावहेन सा मूला गृहान्निष्काशिता सती।
भुङ्क्त्वा निजकुकर्माणि, श्वभ्रे सम्पत्स्यते मृता॥ १७५ ॥
स्वामिनो वर्धमानस्य, केवलोत्पत्तिसूचिका ।
किंवदन्ती कदायाता मत्कर्णामृतपानभा ॥ १७६ ॥
सन्ततं जनितासङ्ख्यहर्षं वर्षं तदेव हि ।
स एव महिमावासो, मासो दक्षः स पक्षकः ॥ १७७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तद्दिनं पावनं वेला सानुकूला च यत्र तु ।
प्रभुर्मदीये मूर्ध्नि स्वं कराम्भोजं निधास्यसि ॥ १७८॥
इति ध्यानविधानोद्यन्मना यावदभूदियम् ।
तावन्नभो ददर्शासौ विमानालिविमालितम् ॥ १७९॥ कलापकम् ॥
वृन्दारकविमानानां यातायातैर्जगद्गुरोः ।
ज्ञानोत्पत्तिं परिज्ञाय सा व्रतायोत्सुकाभवत् ॥ १८०॥
तदा सा चन्दनात्मानं देवताभिर्जिनान्तिके ।
उपनीतं निरीक्ष्याशु विस्मयं प्राप चेतसि ॥ १८१॥
मध्यमायां **महापुर्यां महासेन**वने स्थितः ।
वर्धमानः स्वहस्तेन तस्यै दीक्षामदान्मुदा ॥ १८२॥
अपरा अपि संसारवैराग्यरसरञ्जिताः ।
राजकन्यास्तया साकं, व्रतश्रियमशिश्रियन् ॥ १८३॥
ग्रहणासेवनाशिक्षादक्षाया भगवान् ददौ ।
प्रवर्त्तिनीपदं तस्या गौरवाय गुणाः खलु ॥ १८४॥
प्रपाल्य संयमं तीव्रमार्याश्रीचन्दनार्यिका ।
सर्वकर्मक्षयादापदक्षयं पदमव्ययम् ॥ १८५॥
इत्थमिदं परिभाव्य चरित्रं चन्दनबालाया अतिचित्रम् ।
भव्याः! साभिग्रहमुनिदानं कुरुत यथा स्याद्वो भुवि मानम् ॥ १८६॥
(मत्तावृत्तम्)

इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ कृताभिग्रहापश्चिमजिनदानविषये श्रीचन्दनबालाकथा समाप्ता॥

आभिग्रहिकसत्पात्रदानवैषयिकं श्रीचन्दनबालादृष्टान्तमुक्त्वा तदेव पात्रदानं नवप्रकारैः कृतं सत् किं फलं कुर्यादिति गाथाद्वयेनाह-

**रोमंचंचियगत्तो असणं पाणं च आसणं वसणं ।**
**वसही तह संथारं सुस्सूसा वंदणं तुट्ठी ॥ ३६॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**इइ णवविहदाणाओ पुण्णं अज्जेइ जो महासत्तो ।**
**कमला चवलावि सया तस्स घरे सासया वसइ ॥ ३७॥**

व्याख्या-यो महासत्त्वोऽधिकपुण्यो रोमाञ्चाञ्चितगात्रो-हर्षोत्कर्षेण पुलकिताङ्गः सन्, अशनं-परमान्नमोदकादि, पानं-प्रासुकजलम् , आसनं-मुनिष्वागतेषु सिंहासनदानम्, वसनं-वस्त्रकम्बलादि, वसतिः-शय्या, संस्तारकं-पीठफलकादि, शुश्रूषा-पर्युपास्तिः, वन्दनं-मुनिनमस्करणम्, तुष्टिर्मुनिजनविलोकनात्परमानन्दः, इत्यमुना प्रकारेण नवविधदानात् पुण्यं-सुकृतमर्जयति। तस्य पुरुषस्य गृहे [सदा-निरन्तरम्] कमला-श्रीश्चपलापि-गिरिसरित्तरङ्गतरलापि, शाश्वती-स्थिरस्थायिनी, वसति-निवासं करोतीति गाथायुगार्थः ॥

तत्रादावशनशुद्धिं प्रतिपिपादयिषुराह-

**उग्गमउप्पायणएसणाई सगयालदोसपरिसुद्धं ।**
**सिद्धंतभणियविहिणा उभयहियं तं भवे असणं ॥ ३८॥**

व्याख्या-उद्गमदोषाः षोडश गृहस्थकृताः, उत्पादनादोषाः षोडश यतिकृताः, एषणादोषा दश गृहि-यतिकृताः, आदिशब्दात् पञ्च ग्रासैषणा-दोषा मुनिकृताः, एवं सप्तचत्वारिंशद्दोषा आगमोक्तास्ते चामी॥

[१]आहाकम्मु[२]द्देसिय [३]पूईकम्मे य [४]मीसजाए य ।
[५]ठवणा [६]पाहुडियाए, [७]पाओयर [८]कीय [९]पामिच्चे ॥ १॥
[१०]परियट्टिए [११]अभिहड[१२]उब्भिण्णे [१३]मालोहडे य [१४]अच्छिज्जे ।
[१५]अणिसिट्ठे[१६]ऽज्झोयरए सोलस पिंडुग्गमे दोसा ॥ २॥
[पिण्डविशुद्धिः-३।४] [श्रीप्रवचनसारोद्धारः-५६३।६४]
[१]धाई [२]दूई [३]निमित्ते [४]आजीव [५]वणीमगे [६]तिगिच्छा य ।
[७]कोहे [८]माणे [९]माया [१०]लोहे य हवंति दस एए ॥ ३॥

Jain Education International                    For Personal & Private Use Only                    www.jainelibrary.org

पुव्विंपच्छासंथव-विज्जा-मंते य चुण्ण-जोगे य ।
उप्पायणा य दोसा सोलसमे मूलकम्मे य ॥ ४॥
[पिण्डनिर्युक्तिः-४०८।९] [श्रीप्रवचनसारोद्धारः-५६६।६७]
संकिय-मक्खिय-निक्खित्त-पिहिय साहरिय-दायगुम्मिस्से ।
अपरिणय-लित्त-छड्डिय, एसणदोसा दस हवंति ॥ ५॥
[पिण्डनिर्युक्तिः-५२०] [श्रीप्रवचनसारोद्धारः-५६८]
संजोयणापमाणे इङ्गाले धूमकारणे इति ।

उद्गमाश्च उत्पादनाश्च एषणाश्चादिशब्दाद् ग्रासैषणाश्च ये दोषास्तैः परिशुद्धं-रहितम्, यत्तदशनं-भुक्तम्, सिद्धान्तभणितविधिना-आगमोक्तयुक्त्या, उभयहितं-दातुरादातुश्च मोक्षावाप्तये भवेज्जायेतेति गाथार्थः ॥

निगमनप्ररूपिकां गाथामाह –

**एवंविहं सुपत्ते णिवेसए जो स दाणवंतेसु ।**
**पढमरेहं लहए लोए धणसेणसिद्धिव्व ॥ ३९॥**

व्याख्या-एवंविधं-पूर्वोक्तदोषरहितम्, अशनं यः पुण्यवान् सुपात्रे-रत्नत्रयालङ्कृते साधौ, निवेशयेल्लक्षणया दद्यात्, स-धार्मिको दानवत्सु-दानशौण्डेषु, प्रथमाम्-आद्यां रेखां लभतेऽवाप्नोति। क इव, **धनसेन**श्रेष्ठीव, यथा स किल दातृगणनाप्रस्तावे प्रथमां रेखामवाप्तवांस्तथा परोऽपि दाता पुमान् प्राप्नोतीति गाथार्थः ॥

भावार्थः कथानकादवसेयस्तच्चेदम्-

अस्ति स्वस्तिश्रियां धाम नगरं **विजयस्थलम्** ।
यन्निजस्वामिनः शत्रुविजयस्थलमेव हि ॥ १॥
तत्र नाम्ना च धाम्ना च, राजा **श्रीअरिमर्दनः** ।
अकुतोभयसञ्चारं, राज्यभारमधारयत् ॥ २॥

तस्य पृथ्वीपतेर्मान्योऽजनि श्रेष्ठी **सुमङ्गलः** ।
य एकविंशतिस्वर्णकोटीनामधिपो भुवि ॥ ३॥
यथा श्रीवासुदेवस्य, श्रीदेवी कमलाश्रया ।
तस्य सुमङ्गलस्यापि **श्रीदेवी** कमलाश्रया ॥ ४॥
तस्याः पत्या समं भोगान्, भुञ्जानाया यथासुखम् ।
कुक्षिपङ्केरुहे कोऽपि जीवो भृङ्ग इवावसत् ॥ ५॥
जातेषु नवमासेषु सार्धसप्तदिनेषु च ।
सम्पूर्णदौहदा बालाऽसूत सूनुं सुलक्षणम् ॥ ६॥
सुमङ्गलोऽप्यविधवागायद्धवलमङ्गलम् ।
जन्मोत्सवं व्यधात्सूनो**र्धनसेने**ति चाभिधाम् ॥ ७॥
लाल्यमानस्तथा पाल्यमानो धात्रीभिरादरात् ।
पित्रोर्मनोरथैः सार्धं सोऽवर्धिष्ट नवेन्दुवत् ॥ ८॥
जातेऽष्टवार्षिके पुत्रे जनकः पठनाय तम् ।
कलाचार्याय वर्याय ददौ सन्मानपूर्वकम् ॥ ९॥
सोऽपि क्रमात्कलाचार्यादध्यैष्ट सकलाः कलाः ।
लेभे च यौवनं बालाजनमानसमोहनम् ॥ १०॥
पिता निजतनूजस्य, **बन्धुदत्ता**ङ्गजातया ।
**प्रियदर्शनया** साकं, पाणिग्रहमकारयत् ॥ ११॥
अथात्रैव पुरे **लीलावती**वेश्याङ्गजाजनि ।
**अनङ्गसेना**नङ्गस्य सेनेवाङ्गेन सङ्गिनी ॥ १२॥
समाससाद सा सादरहिता सहिता गुणैः ।
कलाकेलिकलाकेलिनिलयां यौवनश्रियाम् ॥ १३॥
अपि शृङ्गारसर्वस्वतरङ्गैकतरङ्गिणी ।
केनापि हेतुना बाला रङ्गिणी न नरेष्वभूत् ॥ १४॥
तदीदृक् चेष्टितं ज्ञात्वा, शुम्भली विह्वलाशया ।
स्वकुलाचारचारूक्त्या पुत्रीं वक्तुं प्रचक्रमे ॥ १५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हे पुत्रि! यत् त्वयारब्धं व्रतं कुलवधूचितम् ।
तन्नः कुलकलङ्काय कलयालसलोचने! ॥ १६ ॥
तस्मात्कदाग्रहं त्यक्त्वा, धनवज्जनसङ्गमात् ।
समर्जितैर्धनैः स्वयं, कुटुम्बं परिपोषय ॥ १७ ॥
इति तस्या वचोऽनङ्गसेनाया हृदि नोपदम् ।
व्यधाद् यथा भुजङ्गस्य शिरोरत्ने महाविषम् ॥ १८ ॥
एकदा सा गवाक्षस्था, पथि यान्तं सुहृद्युतम् ।
धनसेनं निरीक्ष्यागादनङ्गाशुगवेध्यताम् ॥ १९ ॥
ततो वासगृहं प्राप्य बालानङ्गाग्नितापिता ।
लक्षयामाममंस्तालं त्रियामामपि यामिनीम् ॥ २० ॥
प्रातरेत्याक्कया प्रोचे, वत्से! का ते तनूव्यथा ।
साप्यभाषत हे मातरिदं मे शृणु कारणम् ॥ २१ ॥
यदाप्रभृति नेत्राभ्यां धनसेनो निरीक्षितः ।
तदाप्रभृति मच्चित्तं तदायत्तमजायत ॥ २२ ॥
अतस्तत्सङ्गमसुधासेकेन मदनाग्निजम् ।
निर्वापयाशु तापं मेऽन्यथा मज्जीवितक्षतिः ॥ २३ ॥
इत्याकर्ण्य प्रहृष्टा सा बभाषे तां निजाङ्गजाम् ।
मा खिद्य सद्य एवाद्य पूरयिष्ये तवेप्सितम् ॥ २४ ॥
ततः स्वयं स्वदासीभिस्तन्मित्रैश्चेभ्यनन्दनः ।
अभ्यर्थितोऽपि तद्वेश्मप्रवेशं नाभ्यमन्यत ॥ २५ ॥
लीलावत्यापि रुद्धैस्तत्सुहृद्भिश्छद्मनान्यदा ।
श्रेष्ठिभूस्तद्गृहद्वारं यावदानीयत द्रुतम् ॥ २६ ॥
तावत् तत्कृतसंकेतसंगराविभपालकौ ।
समकालं तमुद्दिश्य प्रेषयामासतुर्गजौ ॥ २७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदेभभीतेस्त्रायद्भिरिव तत्सुहृदां गणैः ।
लीलावत्या गृहं वेगाद् धनसेनः प्रवेशितः ॥ २८ ॥
तत्र श्रेष्ठिसुतः स्वर्णमयपल्यङ्कसंस्थिताम् ।
सम्पूर्णपूर्णिमाचन्द्रबिम्बजिष्णुमुखश्रियम् ॥ २९ ॥
विस्मेराम्भोरुहाकारदृशं कृशतरोदरीम् ।
मृणालाभभुजावल्लीमिभकुम्भनिभस्तनीम् ॥ ३० ॥
सर्वाङ्गसुन्दराकारां, नवयौवनशालिनीम् ।
सखीजनवृतां वीणाक्वणदत्तश्रुतिद्वयाम् ॥ ३१ ॥
अनङ्गराजसर्वस्वराजधानीं विलासिनीम् ।
अनङ्गसेनामालोक्य चेतस्येवमचिन्तयत् ॥ ३२ ॥ कलापकम् ॥
यदाद्यदर्शनेनापि ललनापि हरेन्मनः ।
तन्मन्ये प्रेयसी कापि सैषा मे पूर्वजन्मनः ॥ ३३ ॥
बालापि मन्मथाकारं तं वीक्ष्य मुदिताशया ।
उत्थाय निजपल्यङ्के धनसेनं न्यवेशयत् ॥ ३४ ॥
अन्यदा तारमैत्र्येण यत्सुखं समभूत्तयोः ।
तत्तावेव हि जानीतो ज्ञानवानथवा जनः ॥ ३५ ॥
परस्परं तयोर्भोगपरयोः शिवयोरिव ।
प्रजगाम त्रियामापि क्षणार्धमिव यामिनी ॥ ३६ ॥
सोऽपि तद्दिनमारभ्य, तद्विलासवशीकृतः ।
महाकार्येऽपि संजाते, तस्या गेहान्न निर्ययौ ॥ ३७ ॥
अनङ्गसेनया साकं भोगान् भुञ्जानमङ्गजम् ।
निशम्य भोगवस्तूनि तदर्थं प्राहिणोत्पिता ॥ ३८ ॥
कुट्टिनी धनसेनाह्वाङ्कितमुद्रां मुहुर्मुहुः ।
प्रेष्याग्रहीद् धनं सर्वमस्राणीव जलौकसः ॥ ३९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पितृप्रहितवित्तानि, भुञ्जानः स तया समम् ।
निनाय द्वादशाब्दानि, क्रीडानिष्ठो निमेषवत् ॥ ४० ॥
क्रमेण क्षीणसर्वस्वे, स्वःप्रयाते सुमङ्गले ।
मातापि तनयप्रेम्णा प्रैषीदाभरणादिकम् ॥ ४१ ॥
शुम्भली तत्समालोक्य प्रक्षीणाखिलवैभवम् ।
धनसेनं विदाञ्चक्रे, निर्वृष्टलघुमेघवत् ॥ ४२ ॥
अनङ्गसेनयान्येद्युः पदमण्डनहेतवे ।
यावके याचिते वेश्या प्रैषीन्नीरसयावकम् ॥ ४३ ॥
तं रङ्गरहितं बाला सालोक्य जननीं प्रति ।
कोपावेशवशादूचे, किमनेन विधीयते ॥ ४४ ॥
अक्काह नीरसालक्तप्रेषणव्याजतो मया ।
धनसेनस्वरूपं तेऽदर्श्यत पुत्र्यमुं त्यज ॥ ४५ ॥
बाला बभाण हे मातर्न वक्तव्यमिदं वचः ।
युगान्तेऽपि न मुञ्चामि धनसेनममुं प्रियम् ॥ ४६ ॥
पुत्र्यास्तस्मिन्नतिस्नेहं, मत्वा दासीभिरम्बिका ।
वासगेहात्तमानाय्य, रङ्कवन्निरवासयत् ॥ ४७ ॥
शाकिनीमुद्गलादीनां भवेत् काचित्प्रतिक्रिया ।
विश्रम्भघातिनीनां तु, न क्वचित्पणयोषिताम् ॥ ४८ ॥
इत्थं मुहुर्मुहुर्ध्यायन् यावद् याति निजालये ।
तावत्तदुद्वसं दृष्ट्वा नरमेकं स पृष्टवान् ॥ ४९ ॥
तस्माद् व्यतिकरं ज्ञात्वा पितुः स्वर्गमनादिकम् ।
स दध्यौ कुधियं धिग्मां, येनेदृगपि न श्रुतम् ॥ ५० ॥
क्षीयन्तां देहिनस्तस्य यौवनं जीवितं कलाः ।
यो भुङ्क्ते मरणं यावद्वित्तं पितुरुपार्जितम् ॥ ५१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एकविंशतिकोटीनां, स्वर्णानामीशितुः सुतः ।
द्वाचत्वारिंशतः कोटीर्यावन्नोपार्जयाम्यहम् ॥ ५२ ॥
तावन्नायामि धाम्नीति सन्धामाधाय मानसे ।
ततः पुण्यसखोऽचालीद् धीमान् देशान्तरं प्रति ॥ ५३ ॥
धनसेनो व्रजन् मार्गे पुरेऽगात्**पुण्ड्रवर्धने** ।
तत्पितुः सुहृदा **पद्म**श्रेष्ठिना च व्यलोक्यत ॥ ५४ ॥
मम मित्रस्य पुत्रोऽयमिति नीत्वा स्वमन्दिरे ।
भोजनाच्छादनाद्यैस्तं सच्चकार वणिग्वरः ॥ ५५ ॥
वात्सल्यात् श्रेष्ठिना श्रेष्ठिसूनुरागमकारणम् ।
पृष्टः सर्वं यथावृत्तं स्ववृत्तान्तं न्यवेदयत् ॥ ५६ ॥
निशम्य तन्मुखादेतद् दयार्द्रः सोऽब्रवीदिति ।
वत्स! त्वदीयमेवेदं वेश्म वित्तं च तिष्ठ तत् ॥ ५७ ॥
सोऽपि प्रमुदितो यावत्पल्यङ्के सुप्तवान्निशि ।
तावद् दग्धं हुताशेन श्रेष्ठिनः सधनं गृहम् ॥ ५८ ॥
शृङ्गिकस्तुरगो यत्र बध्यते तत्र निश्चितम् ।
हयान् हन्त निहन्तीति मत्वा सोऽग्रे ततोऽचलत् ॥ ५९ ॥
मार्गमुल्लङ्घयन् धीमान्, प्राप **मङ्गलपत्तनम्** ।
तत्रासौ पितृमित्रे**णाचलेना**नीयतालयम् ॥ ६० ॥
ज्ञातवृत्तेन तेनापि प्रोक्तं दास्यामि ते धनम् ।
तस्यां निश्येव सर्वस्वं तस्य चौरैरमुष्यत ॥ ६१ ॥
भज्यते सा ध्रुवं शाखा कपोतो यामधिश्रयेत् ।
इति ध्यात्वा विखिन्नास्यः सोऽचालीदचलालयात् ॥ ६२ ॥
भुवं भ्रमन् क्रमा**त्तामलिप्तीं** प्राप्तः सुधीः पितुः ।
सुहृदा **सुदर्शनेन** गृहमानीय सत्कृतः ॥ ६३ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भोजनानन्तरं चन्द्रशालां प्राप्तस्य तस्य सः ।
श्रेष्ठी तरलहाराख्यां मणिमालामदर्शयत् ॥ ६४॥
ततः प्रोवाच हे वत्सामुष्याः निष्कास्य कानिचित् ।
रत्नानि व्यवसायार्थं, प्रदातास्मि भवत्कृते ॥ ६५॥
एवमुक्त्वा मणीमालां, तस्य पार्श्वे विमुच्य सः ।
केनापि हेतुना चन्द्रशालातोऽधस्तलं ययौ ॥ ६६॥
अथ श्रेष्ठिसुतं दृष्ट्वा, व्यन्तरः कोऽपि कोपतः ।
आलेख्यलिखितां चेटीं कुब्जिकामध्यशिश्रियत् ॥ ६७॥
ततोऽवतीर्य सा वेगाद् धनसेनकरस्थिताम् ।
मणिमालां गिलित्वा तां पुनः स्वस्थानमाश्रिता ॥ ६८॥
विषादविस्मयोपेतः स निरीक्ष्येदृगद्भुतम् ।
अनुक्त्वा सत्रपस्तस्यागाराच्चौर इवागमत् ॥ ६९॥
पथि व्रजन्नसौ दध्यावहो पापोदयो मम ।
अन्यथा कथमेवं स्युरनर्थानां परम्पराः ॥ ७०॥
किन्त्वहं वेद्मि यत्पूर्वभवे दानं वितन्वता ।
भावोऽखण्ड्यत तेनैताः संपदो मम खण्डिताः ॥ ७१॥
यद्वा संपत्स्यते संपत्पुण्यात्पापात्तु हीयते ।
तथापि व्यवसाये धीर्न त्याज्या धीधनैर्जनैः ॥ ७२॥
इति ध्यायन्नयं प्राप **पद्मिनीखण्ड**पत्तनम् ।
ततः **सागरसेनेन,** साकं पोतमशिश्रियत् ॥ ७३॥
**सिंहल**द्वीपमासाद्य स एवं हृद्यचिन्तयत् ।
प्रायः क्षीणानि पापानि, यद् भग्नं वहनं न मे ॥ ७४॥
ततः सुमङ्गलश्रेष्ठिपुत्रो **रत्नपुरं** गतः ।
उपायान् रचयाञ्चक्रे, धनार्थं पार्थिवो यथा ॥ ७५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भाग्योदयवशादेष द्रव्यजातं समर्जयन् ।
दानेन प्रीणयन् सर्वान्, लोकान् विख्यातिमानभूत् ॥ ७६ ॥
एकदा स यदा वित्तोपार्जनोपायमद्भुतम् ।
स्वचित्ते चिन्तयामास तदा तेनेति शुश्रुवे ॥ ७७ ॥
यदत्रैव पुरे यक्षः **सुन्दरो** यो निषेवितः ।
दत्ते वित्तं प्रतिशतरूप्यवृद्ध्या तनूमताम् ॥ ७८ ॥
ततो दिने प्रशस्तेऽसौ गत्वा यक्षालये तथा ।
विधाय सुरभिद्रव्यैस्तस्य पूजां व्यजिज्ञपत् ॥ ७९ ॥
सुवर्णमयदीनारकोट्येका यक्ष! मद्गृहे ।
प्रवेश्या सा च देया ते कलान्तरयुता मया ॥ ८० ॥
इत्युक्त्वा स ययौ सोऽपि प्रोक्तस्थाने मुमोच ताम् ।
यक्षः कुसीदलुब्धो ही, लोभः कं कं न बाधते ॥ ८१ ॥
तया श्रीधनसेनोऽपि व्यवसायाननेकशः ।
तन्वानो द्विचतुःसङ्ख्याः स्वर्णकोटीरुपार्जयत् ॥ ८२ ॥
यथा पापाद् गता लक्ष्मीरुपेता पुण्यतस्तथा ।
इति ध्यायन् स पात्रादिदानाय प्रगुणोऽभवत् ॥ ८३ ॥
सोऽर्चापूर्वं ददे द्रव्यं, यक्षाय सकलान्तरम् ।
तस्मै तरलहाराभां सोऽपि रत्नावलीमदात् ॥ ८४ ॥
कृतकृत्योऽथ बोहित्थवृन्दमापूर्य वस्तुभिः ।
तीर्त्वाब्धिं तामलिप्त्यां स आगात्सौदर्शनं गृहम् ॥ ८५ ॥
श्रेष्ठ्यपि स्नानपानाद्यैस्तं सत्कृत्य निजां प्रियाम् ।
आदिशच्चन्द्रशालायाः समारचनहेतवे ॥ ८६ ॥
धनसेनं तदा दृष्ट्वा स पूर्वव्यन्तरोऽतुषत् ।
रुष्यत्यपुण्यैः सर्वोऽपि पुण्यैस्तु परितुष्यति ॥ ८७ ॥
तस्य प्रभावतः कुब्जावतीर्यालेख्यभित्तितः ।
मुक्त्वा तरलहारां तां स्वं स्थानं पुनरप्यगात् ॥ ८८ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रमार्जयन्ती सा चित्रशालां तां मणिमालिकाम् ।
दृष्ट्वा तदैव कान्ताय तत्स्वरूपं न्यवेदयत् ॥ ८९॥
स एष सत्यमेतस्य विलासः पुण्यपापयोः ।
ज्ञात्वेति स प्रियां प्राह, क्वापि नैतन्निवेद्यताम् ॥ ९०॥
श्रेष्ठिनं भोजनादूर्ध्वं, धनसेनोऽवदत्तदा ।
ततोऽनिवेद्य तां रत्नमालामादाय जग्मिवान् ॥ ९१॥
तस्याः प्रभावतोऽनल्पः संजातोऽयं धनोदयः ।
अतः प्रसत्तिमासूत्र्य, गृहाण मणिमालिकाम् ॥ ९२॥
सोऽचिन्तयदहो अस्य कापि सत्त्वैकशालिता ।
यदनेनागृहीतापि, मणिमाला प्रदीयते ॥ ९३॥
ग्रस्यमानामिमां वीक्ष्य वीक्षापन्न इवैषकः ।
असंभाव्यमिदं ज्ञात्वा नाभाषत ममाग्रतः ॥ ९४॥
उक्तं च-असंभाव्यं न वक्तव्यं, प्रत्यक्षं यदि दृश्यते ।
यथा वानरसंगीतं, तथा तरति सा शिला ॥ ९५॥
विभाव्येति निजे चित्ते तं प्रत्याह सुदर्शनः ।
असत्यवचनैः किं मां विप्रतारयसेऽनघ! ॥ ९६॥
श्रेष्ठी स्वजायया दृष्टमदृष्टश्रुतपूर्वकम् ।
सर्वं स्वरूपं तस्याग्रे कथयाञ्चकृवांस्ततः ॥ ९७॥
धनसेनोऽपि तस्याग्रे स्वं स्वरूपं यथास्थितम् ।
निवेद्य तद्गृहे कालं कियन्तमनयन्नयी ॥ ९८॥
सोऽस्मै दत्त्वा मणीमाले स्वपुरालोकनोन्मनाः ।
प्रस्थायदृध्यां गरीयस्या मङ्गलद्रङ्गमागमत् ॥ ९९॥
तत्र श्रीअचलश्रेष्ठी सादरं तं स्वमन्दिरे ।
नीत्वा गौरवयामास <u>सर्वत्राच्यां हि सज्जनाः</u> ॥ १००॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदा चिरमनावृष्टिरासीत्तत्र पुरे पुरा ।
धनसेने पुनः प्राप्तेऽचलक्षेत्रेष्वभूद् घनः ॥ १०१ ॥
तेभ्यो बभूवुर्धान्यानां राशयः शैलसंनिभाः ।
तांश्चालोक्याचलोऽज्ञासीन्माहात्म्यं धनसेनजम् ॥ १०२ ॥
कियन्मात्रं धनं तस्मै, विश्राण्य चलितस्ततः ।
श्रीपुण्ड्रवर्धने श्रेष्ठिपद्मसद्म समाययौ ॥ १०३ ॥
तेनापि सत्कृते तस्मिन्, धनसेने तदेव हि ।
माणिक्यस्वर्णसम्पूर्णनिधानं समवाप्यत ॥ १०४ ॥
पद्मः प्रोवाच हे वत्स! तव भाग्योदयादयम् ।
निधिर्लेभे मयातोऽमुं गृहाणानुगृहाण माम् ॥ १०५ ॥
धनसेनोऽपि तं तस्मै निधिमन्यत्तथा धनम् ।
प्रवितीर्य ततोऽवाप स्वपुरासन्नकाननम् ॥ १०६ ॥
तेन स्वधामशुद्ध्यर्थं **भद्रमूर्त्त्य**भिधो बटुः ।
प्रैषि सोऽपि ततोऽभ्येत्योदन्तमेवमवोचत ॥ १०७ ॥
देव! लीलावतीवेश्यागृहात्त्वयि विनिर्गते ।
अनङ्गसेनया त्यक्तमन्नपानं दिनत्रयम् ॥ १०८ ॥
तन्मृत्युभीता लीलावत्याह तस्याः सखीजनम् ।
तथा कार्यं यथा पुत्री, विधत्ते भोजनक्रियाम् ॥ १०९ ॥
सोऽपि तत्पार्श्वमभ्येत्याचख्यौ सखि! विषादताम् ।
मुञ्च भुङ्क्ष्व ततोऽप्यन्यो भावी ते प्रवरो वरः ॥ ११० ॥
स्थितिरेषा हि वेश्यानां यदेकस्मिन्नरे क्वचित् ।
आसक्तिः क्रियते नैव, तत्त्यजैनं कदाग्रहम् ॥ १११ ॥
बालाप्याह स्थितेरस्या वज्रं पततु मूर्धनि ।
ममेह जन्मनि प्रेयान् श्रेष्ठिसूरेव नापरः ॥ ११२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

परं यदीदं वाक्यं मे, मन्यतेऽम्बा तदाद्म्यहम् ।
स्मरामि चेति चेतोऽन्तश्छेकोक्तं सूक्तमुत्तमम् ॥ ११३॥
जीवन्त्यां मयि यद्युपैति दयितो मन्येऽकलङ्कस्तदा,
तस्मिन् स्निग्धजने वियोगिनि कथं प्राणान्निदध्यामहम् ॥
मृत्युश्चेन्न हि तत्समागमसुखं तस्यापि मृत्युर्ध्रुवम्,
कष्टं तद्विरहे विकल्पबहुलं दोलायते मे मनः ॥११४॥ (शार्दूलविक्रीडितम्)
तच्छ्रुत्वाचिन्तयन् सख्यो नेदृशी स्यात्पणाङ्गना ।
नूनं सतीव्रतस्वर्णकषपट्टनिभा त्वियम् ॥ ११५॥
इत्थं सखीमुखात्सर्वं, तत्स्वरूपं निशम्य सा ।
पुत्र्याः पतिव्रताभाव एव स्यादित्यमन्यत ॥ ११६॥
ततः सानङ्गसेनापि, पालयन्ती सतीव्रतम् ।
श्रीदेव्या धनसेनस्य मातुरन्तिकमाययौ ॥ ११७॥
निरन्तरक्षरद्बाष्पसलिलेनेव सादरम् ।
क्षालयन्ती निजश्वश्रूचरणौ साभ्यवन्दत ॥ ११८॥
व्यजिज्ञपच्च हे मातर्योग्या यद्यपि नास्म्यहम् ।
तथापि तेऽन्तिके स्थात्री यावदेति भवत्सुतः ॥ ११९॥
धनसेनजनन्येष, परिच्छद इदन्धनम् ।
इदं मे जीवितं चैतत्सर्वं त्वद्वशमेव हि॥ १२०॥
इमां तद्गिरमाकर्ण्य श्रीदेवी हृद्यचिन्तयत् ।
इयं जात्येव वेश्यास्ति, कर्त्तव्येन पुनर्न हि ॥ १२१॥
स एव मामकीनोऽङ्गजन्मा धन्यतमो भुवि ।
यस्येदृग्गुणसुन्दर्या सुन्दर्या सह सङ्गतिः ॥ १२२॥
ततः सा प्राह हे वत्से! त्वमेवासि वधूर्मम ।
तिष्ठन्त्यां त्वयि मद्धाम प्रशस्यं च श्रियामिव ॥ १२३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति श्वश्रूवचः श्रुत्वा वेणिबन्धं विधाय सा ।
शुभ्रे च वाससी पर्यधत्त माङ्गल्यमण्डनम् ॥ १२४॥
देवानानर्च साक्षीणं नाद्राक्षीन्मृगलाञ्छनम् ।
प्रियसंयोगमन्त्रं च सस्मार प्रतिवासरम् ॥ १२५॥
एवं विदधती बाला नयन्ती समयं रयात् ।
त्वदीयागमनेनैषा, मयावर्ध्यत हे सखे! ॥ १२६॥
भवदागमनं श्रुत्वा तथा तोषं ततान सा ।
यथा सहस्रजिह्वोऽपि वक्तुं शक्तोऽस्ति वा न वा ॥ १२७॥
ततो मह्यं सुवर्णस्य जिह्वा दत्त्वा प्रमोदतः ।
कलशध्वजदामाद्यैः सा मन्दिरममण्डयत् ॥ १२८॥
श्रीदेवीप्रमुखाः सर्वे स्वजना भवदागमम् ।
समाकर्ण्य समुत्कर्णा जाता उत्कण्ठिताशयाः ॥ १२९॥
भद्रमूर्तिमुखादेवं निशम्य श्रेष्ठिनन्दनः ।
पितुरुज्ज्वलयन् कीर्त्तिं दानैः स्वगृहमागमत् ॥ १३०॥
भक्तितो मातरं नत्वा, स चासाद्य तदाशिषम् ।
व्यधादनङ्गसेनाया वेणीबन्धस्य मोक्षणम् ॥ १३१॥
धनसेनस्ततोऽनङ्गसेनाख्यप्रियदर्शने ।
दयिते रञ्जयामास भोगयोगैरभङ्गुरैः ॥ १३२॥
जज्ञिरेऽनङ्गसेनायाः **श्रीषेण**प्रमुखाः सुताः ।
तथा **विजयसेना**दीनसूत प्रियदर्शना ॥ १३३॥
अन्यदा प्राप्तमुद्याने मुनिं श्रुत्वा **स्वयंप्रभम्** ।
धनसेनोऽनङ्गसेनासहितो वन्दितुं ययौ ॥ १३४॥
नत्वा श्रुत्वा तथा व्याख्यां स पप्रच्छ मुनिप्रभुम् ।
खण्डिता मे किमित्यासन्, श्रियस्तद् भगवन्! वद ॥ १३५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मुनिराह पुरा **गङ्गा**विषये विषयोत्तमे ।
**शालिशीर्षा**भिधो ग्रामोऽभिरामो धान्यसम्पदा ॥ १३६ ॥
तत्र लोके सदा सातशालिन्यपि हि कश्चन ।
प्रकृत्या भद्रको नाम्ना **सुमित्रो**ऽस्ति सुदुर्गतः ॥ १३७ ॥
स भृशं कृशवित्तोऽपि दानश्रद्धापरायणः ।
यस्मै तस्मै किमप्येष, दत्त्वा भुङ्क्तेऽन्यथा न हि ॥ १३८ ॥
स चित्ते मन्यते दानं, दत्तं नैवान्यजन्मनि ।
तेनाहं दुःखितो दीनोऽजनिषीह महीतले ॥ १३९ ॥
उपायाभावतोऽन्येद्युर्गृहीत्वा शम्बलस्थगीम् ।
दुर्गतश्चारुदारूणि ग्रहीतुमटवीमगात् ॥ १४० ॥
तस्यां परिभ्रमन्नद्रिशिखरोपरि दुर्गतः ।
कायोत्सर्गस्थितं साधुमपश्यद् धर्मपुञ्जवत् ॥ १४१ ॥
तदुपास्तिं वितन्वानो यावदस्थात्सुमित्रकः ।
तावन्मासतपस्तस्य तूर्णं पूर्णं महात्मनः ॥ १४२ ॥
पारयित्वा मुनिः कायोत्सर्गं पारणहेतवे ।
पात्रादिकमुपादायाचलद् ग्रामं प्रति प्रभुः ॥ १४३ ॥
तस्य पारणकं ज्ञात्वा, सुमित्रो हृष्टमानसः ।
प्रासुकैरन्नपानाद्यैर्न्यमन्त्रयदृषीश्वरम् ॥ १४४ ॥
मुनिनापि धृते पात्रे भोज्यस्यार्धं ददौ सुधीः ।
दूरे ग्राम इति ध्यात्वाऽस्थापयच्चात्मनेऽर्धकम् ॥ १४५ ॥
अन्नार्धेन न मे तृप्तिर्न मुनेरपि भाविनी ।
इति ध्यात्वा सुधीः शेषमप्यदान्मुनये मुदा ॥ १४६ ॥
मुनिदानप्रभावेण भावेनापि च तादृशा ।
सोऽर्जयित्वा निधिमिव पुण्यं स्वं गेहमागतः ॥ १४७ ॥

Jain Education International　For Personal & Private Use Only　www.jainelibrary.org

ततो दिनात्समारभ्य, सुमित्रस्य गृहे घनाः ।
धनधान्यर्द्धयोऽभूवन्नहो दानतरोः फलम् ॥ १४८॥
अस्मिन्नवसरे ग्रामे, मुनिर्**भुवनमित्रकः** ।
आत्मप्रत्यक्षमीदृक्षमुग्राभिग्रहमग्रहीत् ॥ १४९॥
द्रव्यं तु मण्डका ग्रामेऽत्राह:पश्चिमयामके ।
दूरदेशादुपायातो, धूलीधूसरिताङ्गकः ॥ १५०॥
दार्वश्वयुगलारूढः पाणिपद्मयुगेन मे ।
यदीदृशः पुमान् दाता, तदा पारयितास्म्यहम् ॥ १५१॥ युग्मम् ॥
ततः केनापि कार्येण ग्रामेऽन्यत्र सुमित्रकः ।
गतः प्रत्यागतः सप्तमास्या निजनिकेतनम् ॥ १५२॥
तस्मिन्नवसरे तस्य सुहृद्गेहे करग्रहः ।
तेन स्थालासनादीनि, नीतानि निखिलान्यपि ॥ १५३॥
तदा तदीयजायापि, भोजनाय सुहृद्गृहे ।
गतासीदिति वृत्तान्तं, सुमित्रोऽप्यवजग्मिवान् ॥ १५४॥
क्षुधार्तोऽह्नोऽन्तिमे यामे, सोऽपश्यन्नाशनं क्वचित् ।
संयोज्याश्वयुगन्दारुनिर्वृत्तमुपविश्य च ॥ १५५॥
पूर्वग्रामहृतानेतान्मण्डकानेव केवलान् ।
मुक्त्वाग्रे चिन्तयामास, हातिथिर्नाद्य वीक्षितः ॥ १५६॥ युगलम् ॥
अथो भुवनमित्राख्यश्चरन् गोचरचर्यया ।
षण्मासीमतिचक्राम, संपूर्णाभिग्रहाग्रहः ॥ १५७॥
तद्ग्रामवासिलोकेन, नानाद्रव्यादिवस्तुकम् ।
ददानेनापि नापूरि स तस्याभिग्रहो मुनेः ॥ १५८॥
तदा स दैवात् स्वागारे प्रविशन् वीक्ष्य हर्षतः ।
मुनिः सादरमुत्थाय, सुमित्रेण निमन्त्रितः ॥ १५९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रभो! मयि दयां कृत्वा, शुद्धानादत्स्व मण्डकान् ।
भवकोटिभवैः पुण्यैः सत्पात्रं प्राप्यते यतः ॥ १६० ॥
मुनिर्द्रव्यादिभिः पूर्णं, ज्ञात्वा निजमभिग्रहम् ।
पात्रं ह्यमण्डयत्सोऽपि, कराभ्यां मण्डकानदात् ॥ १६१ ॥
अत्रान्तरे गृहं प्राप्ता **सुसेना** तस्य वल्लभा ।
तस्मै महर्षये दानं ददानं प्रियमैक्षत ॥ १६२ ॥
हर्षादचिन्तयच्चैवं धन्योऽयं मम वल्लभः ।
घोराभिग्रहधार्येष कारितो येन पारणम् ॥ १६३ ॥
अभ्यन्तरे विशुद्धोऽपि किमेवं बाह्यवर्ष्मणि ।
मुनिर्मलं बिभर्तीति जुगुप्सां तस्य साकरोत् ॥ १६४ ॥
कृतकृत्यो मुनिः स्थानं गत्वा पारणकं व्यधात् ।
सुमित्रोऽपि तदा लोकैर्धन्योऽयमिति शंसितः ॥ १६५ ॥
कल्पद्रुमादिवागण्याद् दानपुण्याद् घनं धनम् ।
उपार्ज्य जीर्णचैत्यानामुद्धारं सोऽकरोन्मुदा ॥ १६६ ॥
स सुमित्रो विपद्यायुःक्षये श्रीविजयस्थले ।
सुमङ्गलश्रेष्ठिगृहे धनसेनो भवानभूत् ॥ १६७ ॥
जुगुप्सातः सुसेनापि मृत्वा वाराङ्गनागृहे ।
अनङ्गसेना सञ्जज्ञे ही निन्दानर्थभाजनम् ॥ १६८ ॥
यत्सान्तरेण भावेन, भक्तं दत्तं सुसाधवे ।
पूर्वजन्मनि तेनात्राभूवंस्ते खण्डिताः श्रियः ॥ १६९ ॥
अतस्त्वयान्वहं भावशुद्ध्या दानमखण्डितम् ।
सत्पात्रेषु नियोक्तव्यं, येन श्रीः स्यान्निरन्तरा ॥ १७० ॥
एवं मुनिमुखाच्छ्रुत्वा, जातपूर्वभवस्मृती ।
तौ दम्पती तदभ्यर्णे जगृहाते गृहिव्रतम् ॥ १७१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततो यतिपतिं नत्वानङ्गसेनाप्रियान्वितः ।
धनसेनाभिधः श्रेष्ठी निजं सदनमासदत् ॥ १७२॥
ततः प्रभृति सत्पात्रादिषु दानं न्यधात्तथा ।
धनसेनो यथा दातृवर्गे सोऽभून्निदर्शनम् ॥ १७३॥
तौ दम्पती सुखेनायुः प्रतिपाल्य दिवं गतौ ।
ततः क्रमेण निर्वाणपदवीमप्यवाप्स्यतः ॥ १७४॥
इति भव्यजना विभाव्य तद्धनसेनस्य चरित्रमद्भुतम् ।
विदधीततमामखण्डितं मुनिदानं शिवसम्पदां पदम्॥ १७५॥ (मत्तावृत्तम्)

॥ इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तावशनदानविषये श्रीधनसेनश्रेष्ठिकथा समाप्ता ॥

अशनवैषयिकं धनसेनश्रेष्ठिदृष्टान्तमुक्त्वा द्वितीयं पानस्वरूपमनुरूपं प्ररूपयन्नाह-

**जिणवरआगमभणियं बहिरन्तरमलविसोहिसंजणयं ।**
**सत्तविहपाणएसणदूसणरहियं सिया पाणं ॥ ४०॥**

व्याख्या-जिनवरास्तीर्थंकरास्तेषां योऽसावागमः-सिद्धान्तस्तत्र भणितं-कथितं, यदुक्तं व्यवहारचूर्णौ-

पाणं सोवीरजवोदगाइ चित्तं सुराइयं चेव।
आउक्काओ सव्वो संगरकइराइणीरं च॥ १॥
खज्जूरदक्खदाडिमचिंचापाणाइ तक्कमिक्खुरसो ।
गुडखंडाईणीरं आयामुस्सेइमाइं च ॥ २॥
निशीथभाष्ये पुनस्त्वेवं-
अण्णजलं उण्हं वा कसायदव्वेहिं मीसियं वावि ॥
कप्पइ जईण णण्णं सुविहियकप्पट्ठियाणं तु ॥ ३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वण्णगंधरसेणं वा परिणयं फरिसेण वा ।
अजीवं परिणयं णच्चा पडिगाहिज्ज संजए ॥ ४॥

बहिरंतरित्ति-बाह्यं शारीरिकम्, आभ्यन्तरं-त्वात्मकृतं, यन्मलं-कश्मलं, तस्य विशोधिः-प्रक्षालनं, तस्य (सं)जनकमुत्पादकम्, ॥ सत्तविहत्ति-सप्तविधाः-सप्तप्रकारा याः पानैषणास्ताश्चेमाः-

[१]संसिट्ठ असंसिट्ठ उद्धड तह अप्पलेविया चेव ।
उग्गहिया पग्गहिया उज्झियधम्मा य सत्तमिया ॥ १॥
[श्रीप्रवचनसारोद्धारः ७३९]

तासां यद्दूषणं-दोषस्तेन रहितं पानं स्यादिति गाथार्थः॥

सदृष्टान्तं पानकाहारमाह-

**मग्गपरिस्संताणं तण्हातरलाण देइ समणाणं ।**
**जो पाणं सो पावइ पुलिंदमिहुणुव्व सुहमसमं ॥ ४१॥**

व्याख्या-यो विवेकश्छेकबुद्धिर्मार्गपरिश्रान्तेभ्यः-पथखिन्नेभ्योऽत एव तृष्णातरलेभ्यस्तृट्परीषहात् क्लान्तेभ्यः, श्रमणेभ्यः-साधुभ्यः, पानं-प्रासुकजलम्, दत्ते-वितरति, स पुलिन्दमिथुनवदसमं अनन्यमसामान्यम्, सुखं-स्वर्गादिसम्बन्धि, प्राप्नोति-लभत इति गाथार्थः॥

भावार्थस्तु कथानकगम्यस्तच्चेदम्-

अस्ति श्रिया विशालं **श्रीविशालनगरं** वरम् ।
यदन्तश्च बहिश्चैव सदारामोपशोभितम् ॥ १॥
तत्र नाम्ना च धाम्ना च **श्रीशूरः** पृथिवीश्वरः ।
पालयाञ्चकृवान् राज्यं हृतराजधनोदयः ॥ २॥
तस्याध्ययननामभ्यामभूद् **वेदमुखो** द्विजः ।
तस्य प्रजासृज इव **सावित्री**दयिताऽजनि ॥ ३॥

१. तुलना आव.हारिभद्री पृ.५७२..।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सा तन्वी जीवितेशेन समं वैषयिकं सुखम् ।
भुञ्जानाधानमुद्दध्रे रत्नं रोहणभूरिव ॥ ४ ॥
सुखं सुखेन सा गर्भं पालयन्ती प्रमोदतः ।
समये सुषुवे पुत्रीं नयनानन्दचन्द्रिकाम् ॥ ५ ॥
ततः पित्रा प्रमोदेन, पुत्र्या जन्ममहोत्सवः ।
अकार्यत तथा चक्रेऽभिधा **मदनमञ्जरी** ॥ ६ ॥
धात्रीभिः सादरं पाल्यमाना सा मृगलोचना ।
शुक्लपक्षेन्दुलेखेव वृद्धिं प्राप दिने दिने ॥ ७ ॥
अथैकदा तपःक्षामकुक्षिश्चिपिटनासिकः ।
दन्तुरः कुत्सिताकारः कुकर्णोऽतिमलीमसः ॥ ८ ॥
दवानलपरिप्लुष्टकीलवत्कृष्णविग्रहः ।
महर्षिः कोऽपि तद्गेहमागान्मासिकपारणे ॥ ९ ॥ युगलम् ॥
तं वीक्ष्य द्विजपुत्री सा निजसौभाग्यगर्विणी ।
अहो रूपमहो रूपमिति दुष्टाहसन्मुनिम् ॥ १० ॥
तदा कोऽपि हि तद्भक्तो यक्षः **खरमुखाह्वयः** ।
मुनिदेहेऽवतीर्याह सरुषा परुषाक्षरम् ॥ ११ ॥
आ दुष्टमानसे! मिथ्यारूपाहंकारधारिणि! ।
शान्तात्मनो मुनेरस्योपहासस्य प्रभावतः ॥ १२ ॥
दुःखौघपीडिता भोगहीना दीनानना सती ।
भवानां सप्तकं नीचवंशेऽवश्यं भ्रमिष्यसि ॥ १३ ॥ युग्मम् ॥
इत्थं तद्वचनं वज्रप्रपातमिव दारुणम् ।
श्रुत्वा हा तात! हा मातः!, पाहि पाहीति सारुदत् ॥ १४ ॥
दध्यौ चेहैव मे साधुहासभूः पापभूरुहः ।
फलितोऽस्य च पापाब्धेः पारं प्राप्स्यामि हा कथम् ॥ १५ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दुःखार्दितास्ततस्तस्याः पित्रादिस्वजना मुनिम् ।
क्षमयन्ति यतः साधुजनः प्रायः कृपापरः ॥ १६॥
ऊचिरे चापि हे वत्से! वात्सल्याब्धिममुं मुनिम् ।
क्षमयस्व ततः साऽपि तस्य पादाग्रतोऽलुठत् ॥ १७॥
तां साधुभक्तां विज्ञाय यक्षः प्रोवाच शान्तरुट् ।
याहि नाहलवंशे त्वं, तत्र सुस्था भविष्यसि ॥ १८॥
इतो भवे तृतीये ते, शापस्यान्तो भविष्यति ।
इत्युक्ते तेन सोड्डीयावतीर्णा नाहलान्वये ॥ १९॥
तस्या अदर्शनाज्जातशोकशङ्काकुलाशयौ ।
पितरौ हा सुते! क्व त्वं गतेत्याक्रन्दतां चिरम् ॥ २०॥
ततस्तौ बन्धुवर्गेण कथंचिदपि रोदनात् ।
निवारितौ यतोऽपत्यविरहः खलु दुःसहः ॥ २१॥
सा **मेघमुख**पल्लीन्द्रपल्यङ्कस्थं स्वमैक्षत ।
पल्लीशदासी तां दृष्ट्वा प्रभोश्चाग्रे न्यवेदयत् ॥ २२॥
देवाद्य युष्मत्पल्यङ्के निविष्टां कामपि स्त्रियम् ।
सर्वाङ्गसुन्दराकारामपश्यं देवतामिव ॥ २३॥
एवं निशम्य पल्लीन्द्रः साश्चर्यस्तां कृशोदरीम् ।
उपागत्यावदद् भद्रे! कासि त्वं कुत आगता ॥ २४॥
मरालिन्येव नालीकं किं कुलं भूषितं त्वया ।
इत्युक्ते तेन सारोदीन्न च प्रतिगिरं ददौ ॥ २५॥
इदं साध्यं स्त्रिया साध्यमिति संचिन्त्य पल्लिराट् ।
निर्ययौ **मेघमाला**याः स्वपत्न्याश्च पुरोऽब्रवीत् ॥ २६॥
प्रिये! विश्वास्य मधुरैर्वाक्यैरस्याः कुलादिकम् ।
पृच्छेति पत्यादिष्टा सा तदन्तिकमुपागता ॥ २७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तया पृष्टा सकष्टं सा, वृत्तान्तं स्वं न्यवेदयत् ।
सापि तां धर्मपुत्रीति कृत्वास्थापयदालये ॥ २८ ॥
सा पि स्वपितृवेश्मस्थमिवात्मानं सुलोचना ।
मन्वाना तद्गृहे कालं, नयति स्म समाधिना ॥ २९ ॥
अथो **कुबेरदत्तस्य**, **कुबेरनगर**प्रभोः ।
सन्धिविग्रहिकोऽनेकभटकोटिसमुत्कटः ॥ ३० ॥
दण्डार्थं ब्राह्मणज्ञातिर्नाम्ना **मदनविग्रहः** ।
पल्ल्यां समागतः पल्लीशेन स्वौकस्यनीयत ॥ ३१ ॥ युगलम् ॥
तस्मै प्राभृतकं दन्तिदन्तमुक्ताफलादिकम् ।
पल्लीपतिरदाद्राज्ञामाज्ञा कैः खलु खण्ड्यते ॥ ३२ ॥
तेन संमानपूर्वं स विसृष्टो द्विजनन्दनः ।
दैवात्तन्मन्दिरे रत्नं प्रविस्मार्य प्रचेलिवान् ॥ ३३ ॥
पल्लीश्वरोऽपि तद्रत्नं दत्त्वा धर्मसुताकरे ।
प्राहिणोत्सापि तं दृष्ट्वा काममूर्त्तिविडम्बकम् ॥ ३४ ॥
द्विजन्मानं नमस्यन्ती कम्पमानस्तनद्वया ।
जगाम कामबाणानां निकाममपि लक्षताम् ॥ ३५ ॥ युग्मम् ॥
विप्रोऽपि तां कुरङ्गाक्षीं, विनिरीक्ष्य स्मरातुरः ।
दीर्घं निःश्वस्य निःश्वस्यापृच्छदागमकारणम् ॥ ३६ ॥
सापि प्राह द्विजाहं ते तातेन प्रेषितान्तिकम् ।
इदं रत्नं गृहाणैवमुक्त्वा सा तत्करे ददौ ॥ ३७ ॥
तदान्योन्यकरस्पर्शात्तावुभावपि मन्मथः ।
अवाप्तावसरः स्वाज्ञां ग्राहयामास हेलया ॥ ३८ ॥
ततः सा तमनुज्ञाप्य मुक्त्वा तत्रैव मानसम् ।
केवलेनैव वपुषा जगाम निजमन्दिरम् ॥ ३९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

द्विजन्माऽपि हि तद्रागपिशाचच्छलिताशयः ।
विहाय कुलमर्यादां पल्लीशात्तामयाचत ॥ ४० ॥
पल्लीनाथोऽपि तारुण्यपुण्यलावण्यशालिने ।
कलाकलापयुक्ताय, तस्मै तां कन्यकां ददौ ॥ ४१ ॥
परिच्छदोऽवदद्विप्र! शुद्धपक्षस्य हंसवत् ।
तव भिल्लसुताकाक्या साकं संगो न सुन्दरः ॥ ४२ ॥
इत्थं निवारितोऽप्येष पापस्तद्रूपमोहितः ।
तामुपायंस्त ही कामः कामं कं न विडम्बयेत् ॥ ४३ ॥
उक्तं च-विकलयति कलाकुशलं हसति शुचिं पण्डितं विडम्बयति ।
अधरयति धीरपुरुषं, क्षणेन मकरध्वजो देवः ॥ ४४ ॥ (आर्या)
तदकृत्यं समालोक्य लज्जितः सविता निजान् ।
करान् संकोच्य वेगेनागच्छदस्ताचलस्थलीम् ॥ ४५ ॥
परिवारोऽपि तं विप्रवरमाचारदूषितम् ।
अलं मलमिव त्यक्त्वा कुबेरनगरं ययौ ॥ ४६ ॥
द्विजोऽपि पल्लीनाथस्य गृहस्थो भोगभङ्गिभृत् ।
योगीव परमब्रह्म तां सिषेवे दिवानिशम् ॥ ४७ ॥
अथायाते महाभीष्मे ग्रीष्मे तौ तापतापितौ ।
कारयाञ्चक्रतुः सौख्यावहं द्राक्कदलीगृहम् ॥ ४८ ॥
तत्र पुष्पोत्कराकीर्णे, शयनीयेऽतिशीतले ।
प्रसुप्तौ दम्पती पुण्यक्षयाद् दष्टौ महाहिना ॥ ४९ ॥
ततस्तौ दम्पती मृत्वा मध्यमाध्यवसायतः ।
**सह्य**शैलेऽटवी**कालाशन्यां** जातौ पुलिन्दकौ ॥ ५० ॥
तत्र कन्दफलाहारौ वृक्षत्वग्वेषधारिणौ ।
मिथः प्रीतिपरौ कालं, गमयामासतुस्तमाम् ॥ ५१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इतश्च सार्थतो भ्रष्टाः **सुप्रतिष्ठाख्य**सूरयः ।
बहुशिष्यपरीवाराः पर्यटन्त इतस्ततः ॥ ५२ ॥
तस्यामटव्यां संपेतुः पानाशनविवर्जिताः ।
पथि श्रान्ताश्च ते सप्तवासरीं व्यतिचक्रमुः ॥ ५३ ॥ युग्मम् ॥
तेषां मध्यान्मुनिं कञ्चिद् ग्रामादिकदिदृक्षया ।
उच्चैस्तरां स्थलीमारोहन्तं भिल्लो न्यभालयत् ॥ ५४ ॥
अदृष्टपूर्वमेणाक्षि! किमेतद्वीक्ष्यते त्विति ।
ब्रुवन्नसौ शरं चापे संदधे शमिनं प्रति ॥ ५५ ॥
सापि भिल्ली मुनिं दृष्ट्वा जातजातिस्मृतिर्जगौ ।
हहा नाथ! त्वयाच्चापाच्छरं संहर संहर ॥ ५६ ॥
एष साधुरिवावश्यं लक्ष्यते जीवितेश्वर! ।
अतो न वध्य इत्युक्ते तया भिल्लो ह्यभाषत ॥ ५७ ॥
आकर्णय प्रिये! मामकीनो बाणः कदाचन ।
संहितो न मुधाभूतः, सोऽधुना स्यात्कथं वृथा ॥ ५८ ॥
साप्याह नाथ! दान्तानां धर्मध्यानविधायिनाम् ।
साधूनां वधतोऽवश्यं, प्रयान्ति नरके नराः ॥ ५९ ॥
तदेतस्मान्मनो दुष्टाध्यवसायान्निवर्त्तय ।
सोऽपि तद्वाक्यसञ्जातबोधः संहृतवान् शरम् ॥ ६० ॥
ततो भिल्लः प्रियायुक्तः समेत्य मुनिपुङ्गवम् ।
ननाम साकं तेनैव, गुरोरभ्यर्णमागतः ॥ ६१ ॥
प्रणिपत्योपविष्टेऽस्मिन् सभार्ये सूरिशेखराः ।
समयज्ञा इमां धर्मदेशनां दिदिशुर्मुदा ॥ ६२ ॥
भो भो भव्याः! संसृतौ संसरद्भिः सन्मानुष्यं जन्म लब्ध्वा कथंचित्।
संजातायां साधुसामग्रिकायां भक्त्या देयं प्रासुकं पानदानम् ॥६३ ॥ (शालिनी)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति सूरिवचः श्रुत्वा भिल्लावूचतुरीश! नौ ।
गृहेऽस्ति पानं सत्सद्यः प्रसद्य प्रेष्यतां यती ॥ ६४॥
यथा तत्प्रासुकं पानं गृह्णीत इति जल्पिते ।
पुलिन्दकाभ्यामाचार्याः प्रैषयंस्तद्युतौ यती ॥ ६५॥
ततो गत्वा गृहे भिल्लौ, प्रचण्डानिलपातितैः ।
पत्रैः कषायितं भाण्डे दर्शयाञ्चक्रतुर्जलम् ॥ ६६॥
वर्णगन्धरसस्पर्शैः सम्यक् परिणतं तथा ।
अजीवं जीवनं ज्ञात्वा, जगृहाते महामुनी ॥ ६७॥
मुनिभ्यां शुद्धपानस्य दानादानन्दिताशयौ ।
पुलिन्ददम्पती इत्थं चिन्तयाञ्चक्रतुस्तराम् ॥ ६८॥
अद्यैव सफलं जन्म जीवितव्यं दिनं तथा ।
यदावाभ्यां मुनी एतौ सत्पानमुपकारितौ ॥ ६९॥
तस्य सत्पात्रदानस्य प्रभावात्तौ पुलिन्दकौ ।
बोधिबीजं सुरायुष्कं चार्जयामासतुस्तमाम् ॥ ७०॥
मुनी विहृत्य सत्पानं गुरूणां सविधं गतौ ।
वस्तुना तेन ते सर्वे सप्ताहात्पारणं व्यधुः ॥ ७१॥
ततस्तौ शबरौ सूरिवरान्मार्गे नियोज्य च ।
अभिवन्द्य च भावेन, निजं धाम समीयतुः ॥ ७२॥
अन्यदा सुखसुप्तौ तौ, मृगेन्द्रेण विनाशितौ ।
जातौ मध्यमभावेन सौधर्मे भासुरौ सुरौ ॥ ७३॥
तत्र तावप्सरोवर्गभोगसंयोगलालितौ ।
क्रमान्निजायुरापूर्य च्युतौ सन्तावुभावपि ॥ ७४॥
**जम्बूद्वीपे** महाद्वीपे, भरतक्षेत्रभूषणे ।
**श्रीवसन्तपुरे** श्रीम**च्चन्द्रशेखर**भूपतेः ॥ ७५॥
कान्तायां **चन्द्रलेखायां** सुतत्वेन बभूवतुः ।
नाम्ना **चन्द्रयशःसूर्ययशसौ** यशसोज्ज्वलौ ॥ ७६॥ कुलकम् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

द्वासप्ततिकलायुक्तौ, नवयौवनशालिनौ ।
तावुभौ तनयौ वीक्ष्य, राजा चेतस्यचिन्तयत् ॥ ७७ ॥
कन्याभिः सह धन्याभिर्भूमीन्द्रकुलजन्मभिः ।
ममाधुनानयोः कर्तुमुचितं पाणिपीडनम् ॥ ७८ ॥
ततो राजन्यकन्याभिः समं राजा तनूजयोः ।
विवाहं कारयाञ्चक्रे महोत्सवपुरःसरम् ॥ ७९ ॥
सदा ताभिः समं भोगान्, भुञ्जानौ भूपजन्मनौ ।
अत्यवाहयतां कालं दोगन्दुकसुराविव ॥ ८० ॥
अन्यदा मेदिनीजानिः संसारोद्विग्नमानसः ।
निवेश्य राज्यभारं स्वं सुते चन्द्रयशोऽभिधे ॥ ८१ ॥
युवराजपदं सूर्ययशस्यपि ततः स्वयम् ।
**सुस्थिताचार्य**पादाब्जमूले दीक्षामुपाददे ॥ ८२ ॥ युग्मम् ॥
तावुभावपि भूपालपुत्रौ सर्वामपि प्रजाम् ।
पालयामासतुर्न्यायवृत्त्यैकनगरीमिव ॥ ८३ ॥
क्रमात्तावपि वैराग्याद्राज्यं दत्त्वा स्वसूनवे ।
**युगन्धर**गुरोः पार्श्वे जगृहाते व्रतश्रियम् ॥ ८४ ॥
निरतीचारचारित्रं, पवित्रं प्रतिपाल्य तौ ।
घातिकर्मक्षयाज्ज्ञानं, श्रीकेवलमवापतुः ॥ ८५ ॥
प्रबोध्य सुचिरं लोकान् दग्धरज्जुनिभानि च ।
शेषकर्माणि निर्मूल्य, राजर्षी निर्वृतिं गतौ ॥ ८६ ॥
इत्थं पुलिन्दमिथुनस्य चरित्रमेतद्,
आकर्ण्य कर्णयुगलामृतपारणाभम् ।
भव्याः! प्रदत्त सुविशुद्धजलस्य दानं,
साधुभ्य एव यदि सिद्धिसुखाभिलाषः ॥ ८७ ॥ (वसन्ततिलका)

॥ इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ पानदानविषये पुलिन्दमिथुनकथा समाप्ता ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पानदानवैषयिकं पुलिन्दमिथुनदृष्टान्तमुक्त्वा तृतीयमासनदान-स्वरूपं प्रकटयन्नाह-

**सट्ठाणिम्मियममलं जीवुवघायाइदूसणविमुक्कं ।**
**अज्झुसिरमकंपमाणं वियरिज्जा आसणं जइणो॥ ४२॥**

व्याख्या-स्वार्थम्-आत्मार्थम्, गृहस्थेन निर्मितं-कृतम्, अन्यथा यतीनामकल्प्यत्वात्, अमलं-पङ्कानाविलम्, जीवोपघातादिदूषणविमुक्तं-स्वभावशुष्ककाष्ठमयमत एव हिंसादिदोषरहितम्, अशुषिरं-शुषिरे ह्याक्रम्यमाणे तदन्तर्गतजन्तुसंघातविघातः स्यादत एव निश्छिद्रम्, अकम्पमानं-अनिश्चलस्याधस्ताज्जन्तुप्रवेशे तत्प्राणितप्रणाशोऽत एव निश्चलम्, एवंविधमासनं-सिंहासनपट्टकादि, यतये-महर्षये, वितरेद्-दद्यादिति गाथार्थः॥

आसनप्रदानेन किं फलं भवतीति गाथायुगलेनाह-

**सिरिथूलभद्दमुणिवरसमागमे आसणस्स दाणाओ।**
**आबालकाललालियसुरुद्ददारिद्दमुद्दावि ॥ ४३॥**
**धणवंताणं मज्झे सण्णाइपिया सिरोमणी जाया ।**
**जं महियलंमि तं खलु अहो अहो दाणमाहप्पं ॥ ४४॥**

व्याख्या-श्रीस्थूलभद्रमुनिवरसमागमे आसनस्य दानादाबालकाल-लालितसुरौद्रदारिद्र्यमुद्राऽपि यत्सज्ञातिप्रिया-मित्रकलत्रं महीतले धनवतां मध्ये शिरोमणिर्जाता-बभूव। तत् खलु-निश्चितमहो अहो दानमाहात्म्य-मिति गाथायुगार्थः॥ भावार्थः कथया प्रतन्यते तथाहि-

अस्ति श्री**भरत**क्षेत्रे, श्री**श्रावस्ती**महापुरी ।
अस्यामाकर्ण्यते बन्धशब्दो वेण्यां न देहिषु ॥१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तस्यामासीदसीमश्रीर्धनदेवाभिधो वणिक् ।
तस्य च प्रेयसी प्राणेभ्योऽप्यभीष्टा **धनेश्वरी** ॥ २॥
तस्या नगर्या उद्यानेऽपरेद्युः साधुभिर्वृताः
**श्रीस्थूलभद्र**सूरीन्द्रा विहरन्तः समैयरुः ॥ ३॥
तेषामागमनं श्रुत्वा श्रीसंघः सकलोऽपि हि ।
रोमाञ्चकञ्चुकीभूतः श्रीसूरीन् वन्दितुं ययौ ॥ ४॥
नत्वोपविष्टे श्रीसंघे स्थूलभद्रमुनीश्वरः ।
दिदेश देशनां क्लेशनाशिनीं धर्मदेशिनीम् ॥ ५॥
धर्मोऽयं धनवल्लभेषु धनदः कामार्थिनां कामदो,
राज्यार्थिष्वपि राज्यदः किमपरं पुत्रार्थिनां पुत्रदः।
सौभाग्यादिषु तत्प्रदः किमथवा नानाविकल्पैर्नृणाम्,
तत्किं यन्न तनोति यन्न कुरुते स्वर्गापवर्गप्रदः ॥ ६॥ (शार्दूलविक्रीडितम्)
सूरिवक्त्राम्बुजोद्भूतदेशनामधुपानतः।
परमं प्राप सौहित्यं संघमानसषट्पदः ॥ ७॥
तदा प्रभुः निजं मित्रं, धनदेवं वणिग्वरम् ।
नमस्कर्तुमनायातं, विलोक्येति व्यचिन्तयत् ॥ ८॥
स शैशववयस्यो मे सदने विद्यते न वा ।
समीयुष्यपि पूर्लोके नायातः स्नेहलोऽपि यत् ॥ ९॥
तद् व्रजामि निरीहोऽपि, धर्मोपकृतिहेतवे ।
तदीयमन्दिरे यस्मादनुग्राह्यः सुहृद् भवेत् ॥ १०॥
ततः स भगवान् स्थूलभद्रः संघसमन्वितः।
कैश्चिद्विवेकिभिर्भक्त्या, दत्तहस्तावलम्बनः ॥ ११॥
कैश्चिदातपभीत्येव धार्यमाणशिरोंऽशुकः ।
कैश्चित्कौतूहलाद्दृश्यमानाग्रलकुटारसः ॥ १२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कैश्चिच्च वाद्यमानोद्यदातोद्यश्रुतिहर्षुलः ।
भट्टथट्टमुखोल्लासिवरेण्यबिरुदावलिः ॥ १३ ॥
सादरं श्राविकावर्गगीयमानगुणोदयः ।
अर्हतां चैत्यबिम्बानि, वन्दमानः पदे पदे ॥ १४ ॥
एकातपत्रं श्रीजैनशासनं च प्रकाशयन् ।
धनदेववयस्यस्य वेश्मनि प्राविशत्प्रभुः ॥ १५ ॥ पञ्चभिः कुलकम् ॥
सूरिं निजपतेर्मित्रं, कल्पद्रुमिव जङ्गमम् ।
गृहे प्रवेशं कुर्वाणमीक्षाञ्चक्रे धनेश्वरी ॥ १६ ॥
उत्थाय संमुखीभूय हर्षोत्फुल्लविलोचना ।
बाला श्रीस्थूलभद्राय, भद्रासनमदात्स्वयम् ॥ १७ ॥
भगवांश्च रजोहृत्या, प्रतिलिख्य प्रयत्नतः ।
तदासनमलञ्चक्रे, पूर्वाचलमिवार्यमा ॥ १८ ॥
शकटालमहामात्यनन्दनं जननन्दनम् ।
अभिवन्द्य यथास्थानमुपाविक्षद् धनेश्वरी ॥ १९ ॥
स्थूलभद्रमुनीन्द्रोऽपि, विच्छायवदनाम्बुजाम् ।
वयस्यप्रेयसीं वीक्ष्य, प्रोचे मधुकिरा गिरा ॥ २० ॥
भद्रे! सोऽस्माकमाबालकालमित्रं भवत्पतिः ।
गृहेऽपि नेक्ष्यते केन हेतुना तन्निवेदय ॥ २१ ॥
सा प्राह भगवन्! यच्च गृहे यच्च बहिर्धनं ।
अभूत्तदखिलं युष्मन्मित्राभाग्योदयाद् गतम् ॥ २२ ॥
ततः स धनहीनः संस्तत्यजे स्वजनैरपि ।
स्वच्छवारिविनिर्मुक्तस्तटाक इव पक्षिभिः ॥ २३ ॥
स तु मानधनो बन्धूनपि नायाचतात्मनः ।
वरं मृत्युर्न तु कृता प्रार्थनान्यस्य पार्श्वतः ॥ २४ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विचिन्त्येति निजे चित्ते स मे जीवितवल्लभः ।
विभवोपार्जनायेतः प्रतस्थे विषयान्तरम् ॥ २५ ॥
तन्निशम्य श्रुतज्ञानोपयोगेन मुनीश्वरः ।
तद्गृहे स्तम्भकाधस्ताद्विदाञ्चक्रे महानिधिम् ॥ २६ ॥
ततो व्याख्यामिषात् स्वामी, करपल्लवसंज्ञया ।
भूयो भूयो निधिस्तम्भं दर्शयंस्तामदोऽवदत् ॥ २७ ॥
अत्रेदृक् तत्र तादृक्षं पश्य कीदृगजायत ।
स्थूलभद्रो जगादैवं सम्प्राप्तो मित्रवेश्मनि ॥ २८ ॥
वारंवारमिदं पद्यं सनिर्वेदं सुहृत्स्त्रियः ।
पुरो निगद्य सूरीन्द्रोऽपरत्र विहृतिं व्यधात् ॥ २९ ॥
अथानुपार्जितद्रव्यो धनदेवः स्वमन्दिरे ।
समियाय यतो भाग्ये क्षीणे स्यादर्जना कुतः ॥ ३० ॥
एकदा स्थूलभद्रस्य सदनागमनं स्त्रिया ।
कान्ताग्रेऽकथि सोप्यूचे किमुक्तं तेन सूरिणा ॥ ३१ ॥
साप्यभाषत हे नाथ! स मुनिः करसंज्ञया ।
स्तम्भं प्रदर्शयन् वारंवारं पद्यमदोऽवदत् ॥ ३२ ॥
अत्रेदृक् तत्र तादृक्षं, पश्य कीदृगजायत ।
स्थूलभद्रो जगादैवं संप्राप्तो मित्रवेश्मनि ॥ ३३ ॥
तच्छ्रुत्वा धनदेवोऽपि चेतसीति व्यचिन्तयत् ।
यत्तस्य तादृशज्ञानवतश्चेष्टा वृथा न हि ॥ ३४ ॥
स्तम्भमुद्दिश्य यद् हस्ताभिनयं विदधे विभुः ।
तदवश्यममुष्याधः किमपि स्वं भविष्यति ॥ ३५ ॥
निश्चित्येत्यखनद्यावत्स्तम्भदेशं स नैगमः ।
तावदाविरभूत्तत्र स्वभाग्यमिव सेवधिः ॥ ३६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदा तेन धनेनोच्चैर्धनदेवो धनेश्वरी ।
स्वनामसत्यतामेतौ निन्यतुः पृथिवीतले ॥ ३७॥
धनदेवः सदा सूरेरुपकारं निजे हृदि।
योगीव परमब्रह्म स्मरन् समयमत्यगात् ॥ ३८॥
सोऽन्यदा **पाटलीपुत्रे** विहरन्तं मुनीश्वरम् ।
शकटालसुतं श्रुत्वा, तन्नमस्कृतये ययौ ॥ ३९॥
तत्र सूरीश्वरं नत्वा, मत्वा स्वं जन्म सार्थकम् ।
आनन्दामृतपाथोधौ स निमग्न इवाजनि ॥ ४०॥
व्यजिज्ञपच्च हे स्वामिन्! दारिद्र्यक्षारसागरम् ।
तव प्रसादपोतेन, द्रुतं लङ्घितवानहम् ॥ ४१॥
तस्माद्यतिपते! प्रत्युपकारशतकोटिभिः ।
त्वत्तोऽहं नानृणीभावं, यामि पित्रोरिवाङ्गजः ॥ ४२॥
अतस्त्वमेव मे स्वामी, त्वमेव हि पिता मम ।
त्वमेव मे परो बन्धुस्त्वमेव च गुरुर्मम ॥ ४३॥
तत्स्थूलभद्रसूरीन्द्र! दयामय! दयां मयि ।
विधाय करणीयं मे समादिश करोमि किम् ॥ ४४॥
तेनेत्युक्ते प्रभुः प्राह भद्र! भद्रैकसाधकम् ।
जिनेन्द्रभाषितं धर्ममङ्गीकुरु कृपामयम् ॥ ४५॥
यस्मिन्नाराधिते पुंसामैहिकामुष्मिकश्रियः ।
सम्पद्यन्ते विपद्यन्ते विपदो निखिला अपि ॥ ४६॥
ओमित्युक्त्वा प्रभुं नत्वा, गत्वा च निजमन्दिरम् ।
धनदेवोऽर्हतां धर्मं दयितामप्यशिक्षयत् ॥ ४७॥
तौ दम्पती निजं वित्तं, सप्तक्षेत्र्यां निरन्तरम् ।
उप्त्वा चित्वा फलं चायुःक्षये स्वःपदमापतुः ॥ ४८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति जना धनदेववणिक्प्रियाचरितमेतदवेत्य महाद्भुतम् ।
यतिपतेः प्रवरासनदानकं वितरतेह यथा तरतापदम् ॥४९॥

(द्रुतविलम्बितम्)

॥ इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ आसनदानविषये सज्ञातिप्रियाकथा समाप्ता ॥

आसनदानवैषयिकं सज्ञातिप्रियानिदर्शनमुक्त्वा चतुर्थं वस्त्रदान-स्वरूपं गाथायुगलेनाह-

**साहुणिमित्तं कीयं पामिच्चं अभिहडं तहा वुणियं ।**
**अण्णेसिं परिगहियं एरिसदोसेहिं परिचत्तं ॥ ४५॥**

**सिसिरकरकिरणधवलं णियपरिभोगेण अमलियमखंडं ।**
**माणसजलसुद्धमणो वत्थं पत्तेसु वियरिज्ज ॥ ४६॥**

व्याख्या-साधुनिमित्तं मुनिकृते इति सर्वत्र सम्बन्धः। तत्र क्रीतं-द्रव्येण गृहीतम्, प्रामित्यमन्यवस्तुपरावृत्योपात्तम्, अभ्याहृतं-परग्रामा-दानीतम्, तथा तेनैव प्रकारेण व्यूतं स्वयं निर्मितम्। अन्येभ्यः परिगृहीतं-परेभ्यः सकाशादुद्धारेण गृहीतम्, अत ईदृक्षदोषैः परित्यक्तं-विमुक्तं वस्त्रैषणायाम्-

जणतयट्ठाकीयं णेय चुयं णेय गहियमण्णेसिं ।
आहड-पामिच्चं वज्जिऊण तं कप्पए वत्थं ॥१॥

सिसिरित्ति-शिशिरकरश्चन्द्रस्तस्य ये किरणाः करास्तद्वद्धवलं-निर्मलम्, निजपरिभोगेनामलितं-स्वपरिभुक्तवस्त्रपरिभोगान्मुनीनामा शातनासंभवत्वादतो गृहस्थेनाव्यावृतम्, अखण्डं-सम्पूर्णम्, वस्त्रं-वसनम्, पात्रेषु-सुसाधुषु० मानसजलशुद्धमना-मानससरःसलिल-निर्मलस्वान्तोऽर्थापत्त्या विवेकवान् प्राणी वितरेद्-दद्यादिति गाथाद्वयार्थः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वस्त्रदानप्ररूपिकां सद्दृष्टान्तां गाथामाह-

**स जयउ जए मयंको चउविहसंघस्स वच्छदाणाओ ।**
**जसजयढक्का अज्जवि अणवज्जा वज्जए जस्स ॥४७॥**

व्याख्या-स मृगाङ्कः-श्रेष्ठिपुत्रो, जगति-पृथिव्यां, जयतु-सर्वोत्कर्षेण वर्तताम्, यस्य-मृगाङ्कस्य, चतुर्विधसंघस्य-साधु-साध्वी-श्रावक-श्राविकारूपस्य, वस्त्रदानादद्यापि-इदानीमपि, यशोजयढक्का-कीर्त्तिविजयपटहोऽनवद्या-निर्दूषणा, वाद्यति-शब्दायत इति गाथार्थः॥
भावार्थः कथानकादवसेयस्तच्चेदम्-

विकसत्कमलाकीर्णा सच्चक्रैरुपशोभिता ।
**वाराणसी** पुरी ख्याता, जाह्नवीवास्ति भारते ॥ १ ॥
यस्यामुत्तुङ्गचैत्यालीसौवर्णकलशच्छलात् ।
मन्ये प्रद्योतनोऽद्यापि, तनुते जिनसेवनम् ॥ २ ॥
तत्राभूद्रूपमकरध्वजो रा**ण्मकरध्वजः** ।
यद्यशोलवरूपोऽपि शशी शुभ्रयति जगत् ॥ ३ ॥
नैकप्रकारमाणिक्यकोटिस्वामी कुबेरवत्।
श्रेष्ठी **कुसुमसारा**ख्यः प्रख्यातो नागरेष्वभूत् ॥ ४ ॥
तस्य **स्वयंप्रभा**नाम्न्या, सधर्मिण्या कलानिधिः ।
**मृगाङ्कः** सुषुवे सूनुर्मृगाङ्क इव पूर्वया ॥ ५ ॥
पित्रा पुत्रोऽष्टमे वर्षे नाम्नो **ज्ञानमहोदधेः** ।
उपाध्यायस्य पार्श्वेऽसावध्येतुं प्रैषि सोत्सवम् ॥ ६ ॥
इतश्च तस्मिन्नगरे विद्यते धनशालिनः ।
**धनञ्जय**स्य लावण्यपद्मा **पद्मावती** कनी ॥ ७ ॥
तस्मा एव कलाचार्यवर्यायाध्येतुमर्पिता ।
पितृभ्यां सोत्सवं सापि, मृगाङ्काधीतिवासरे ॥ ८ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

*पद्मावतीमृगाङ्काभ्यां समाभ्यां गुणसम्पदा ।
अभूत्परस्परं प्रीतिः कौमुदीकुमुदेशवत् ॥ ९ ॥
अन्योऽन्यं पददानानि सविश्रम्भवचांसि च।
खाद्यं स्वाद्यं तथा पेयं कुर्वाणौ पठतः सुखम् ॥ १० ॥
गृहागतायाः खाद्यर्थं, पद्मावत्याः कृते पिता ।
वराटकाशीतिमानं पणं प्रेषितवानथ ॥ ११ ॥
खाद्यर्थम्-भोज्यार्थम् ।
मृगाङ्कोऽपि तमादाय तस्या विश्रम्भतः स्वयम् ।
गत्वापणे पणेनेदं खाद्यं क्रीत्वा च भुक्तवान् ॥ १२ ॥
आगतायां पुनस्तस्यां तेनाभाणि स्वचेष्टितम् ।
साप्याह न त्वया चैतत्कार्यं हारि व्यरच्यत ॥ १३ ॥
येऽनालोच्य स्वकार्यान्तं प्रवर्तन्ते यथा तथा ।
सतां संसदि ते हास्यं, लभन्ते नात्र संशयः ॥ १४ ॥
तदा कपर्दैस्तैः स्वस्मै वस्त्राभरणसम्पदः ।
अकरिष्यमहं चेन्मेऽभविष्यन् शयगा इमे ॥ १५ ॥
स्नेहस्यानुचितं तस्या असंभाव्यमिदं वचः ।
श्रुत्वा स्वयंप्रभासूनुः, खेदमेदस्वितामयात् ॥ १६ ॥
तद्वचोऽनुस्मरन्नेष कियन्तं कालमत्यगात् ।
साधवः साधयन्त्यर्थं यस्मान्मौनं समाश्रिताः ॥ १७ ॥
कियत्यपि गते काले, पद्मावत्या निजं वचः ।
व्यस्मारि यद्वा बालानां चिरं संस्मरणं कुतः ॥ १८ ॥
उक्तं च-उच्चावयाणि अइणिट्ठुराणि, मसिणाणि णिययभणियाणि।
महिलायणे हलाविय, कित्तिय मित्ताणि सुमरंति ॥ १९ ॥

* एष प्रयोगश्चिन्त्यः, षष्ठ्यन्तः समुचितो भाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कलाकलापसम्पूर्णौ तौ विज्ञाय कलागुरुः ।
तत्पित्रोरर्पयामास ताभ्यां चापूजि सोऽधिकम् ॥ २० ॥
मृगाङ्कस्तद्वचः श्रुत्वा जनकाभ्यां विमार्ग्य च ।
*धनञ्जयसुतां पद्मावतीमेष उदूढवान् ॥ २१ ॥*
सोऽज्ञापयन्निजस्वान्ताभिप्रायं रतकेलिभिः ।
विललास तया सार्धं, श्रियेव मधुसूदनः ॥ २२ ॥
एकदा यामिनीयामे, पश्चिमेऽसावचिन्तयत् ।
पापयाहं तदा हन्त खेदमापादितोऽनया ॥ २३ ॥
इमां मुक्त्वा प्रतिज्ञां चेत्पूरयामि तदानया ।
सह स्याद्विरहो घोरः कल्पान्तानलसंनिभः ॥ २४ ॥
यद्वा तरोस्तरोर्मूले सुलभो वल्लभाजनः ।
को वियोगोऽस्य तच्छल्यमुद्धरामि स्वमानसात् ॥ २५ ॥
अथ सागरदत्तोऽस्य, मित्रं दैवात्तदा च हि ।
कारयामास पोतानां सामग्रीमखिलामपि ॥ २६ ॥
तस्य व्यतिकरं ज्ञात्वा, मृगाङ्कोऽपि समुत्सुकः ।
पित्रोरनुज्ञामासाद्य पोतानापूरयद्रयात् ॥ २७ ॥
गत्वा वासालयं बाष्पजलाविलविलोचनः ।
स श्रेष्ठिसूः प्रकटितच्छद्मा पद्मावतीमवक् ॥ २८ ॥
पितुरादेशतः प्राणप्रियेऽहं सरितांपतिम् ।
तरिष्यामि त्वया चात्र, स्थातव्यं स्वच्छचेतसा ॥ २९ ॥
स्वप्नेऽपि न त्वया चिन्त्यं यदसौ मम वल्लभः ।
रमणीमपरां रन्ता त्वदायत्तो यतोऽस्म्यहम् ॥ ३० ॥
सत्यमेव वचस्तस्य, मन्वाना सा समालपत् ।
नाथैष्यामि त्वया सार्कं छायेव विरहासहा ॥ ३१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मृत्युर्वा जीवितव्यं वा दुःखं वा यदिवा सुखम् ।
यद् भावि तद् भवेदीश! प्रयास्यामि समं त्वया॥ ३२॥
आगच्छेति प्रतिश्रुत्य, सामग्रीं प्रविधाय च ।
कलत्रमित्रसंयुक्तो, मृगाङ्कः प्रस्थितो मुदा ॥ ३३॥
यात्रामूहुर्तवेलायां मङ्गलार्थं स्वयंप्रभा ।
मृगाङ्कस्याकरोत्तोषाद् भाले श्रीखण्डपुण्ड्रकम् ॥ ३४॥
अथ तीरगतोऽद्राक्षील्लोलकल्लोलमालितम् ।
श्रेष्ठिसूः सरितामीशं संपदामिव मन्दिरम् ॥ ३५॥
डिण्डीरलहरीदम्भाद् दधिदूर्वोरुमङ्गलम् ।
यात्रायियासोस्तस्यासौ व्यनक्तीव महोदधिः ॥ ३६॥
आरुह्य सहसा पोतान्, प्रेरयाञ्चकृवानयम् ।
वेगेन विहगस्वामिसमीरजयकारिणा ॥ ३७॥
द्वीपाननेकशः शैलान् वेलाकूलानि च क्षणात् ।
उल्लङ्घ्य वहनव्रातो **राक्षसद्वीप**मासदत् ॥ ३८॥
तत्रावष्टभ्य बोहित्थान् पानीयेन्धनहेतवे ।
उत्ततार तरीलोकः कोलाहलपरो रयात् ॥ ३९॥
पद्मावती प्रियं प्राह, वनराजिविराजितम् ।
नानाश्चर्यमयं द्वीपममुं दर्शय नाथ! मे ॥ ४०॥
तच्छ्रुत्वानन्दरोमाञ्चचञ्चुराङ्गस्तया सह ।
मृगाङ्कोऽवातरत्तर्या योगीव भवसागरात् ॥ ४१॥
सरसीसरिदारामशैलादिविपुलां श्रियम् ।
दर्शयन् दर्शयन् पत्न्यै स द्वीपं व्यचरच्चिरम् ॥ ४२॥
एकत्र कदलीतालकृतमालतमालकैः।
मालतीवञ्जुलाम्रालीलवलीभिश्च संकुलम् ॥ ४३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रङ्गन्नारङ्गपुन्नागनागपूगलताञ्चितम् ।
कदम्बजम्बुजम्बीरनिकुरुम्बमनोहरम् ॥ ४४ ॥
ईदृगुद्यानमालोक्य परिश्रान्तप्रियायुतः ।
स्वयंप्रभासुतः शीते विश्रान्तः कदलीगृहे ॥४५॥ कुलकम् ॥
आनाय्य प्राज्यभोज्यानि, निजप्रवहणादयम् ।
प्रियापरिकरोपेतस्तत्रैव बुभुजेतराम् ॥ ४६ ॥
विरचय्याद्भुतां शय्यां कमलानामलं दलैः ।
उवास तां निशां तत्र मृगाङ्कः प्रियया सह ॥ ४७ ॥
स स्मृत्वा तद्वचो बद्ध्वा पणं चैकं* तदञ्चले ।
सुप्तां तत्याज तां कान्तां, ही क्रोधस्य दुरन्तता ॥ ४८ ॥
दूरासन्नस्थितं भृत्यवर्गमुत्थाप्य वेगतः ।
सोऽवोचदुच्चकैर्दम्भाद् भो मां रक्षत रक्षत ॥ ४९ ॥
राक्षसो राक्षसद्वीपवासी जग्ध्वा मम प्रियाम् ।
पश्चाद् गिलितुकामो मां रयादायाति पृष्ठतः ॥ ५० ॥
परिच्छदोऽपि बुद्धः सन्, किमिदं किमिदं ब्रुवन् ।
तस्यैव मार्गसंलग्नो, वेगेन वहनेष्वगात् ॥ ५१ ॥
स कान्ताघातवृत्तान्तमुक्त्वा वाहनवासिनाम् ।
पोतानचालयत् पापः स्थैर्यं हि द्रोहिणां कुतः ॥ ५२ ॥
स दुष्टः कृतकृत्यं स्वं मन्वानश्छद्मनाधिकम् ।
विललाप गलद्बाष्पजलाविलविलोचनः ॥ ५३ ॥
हा चन्द्रवदने! देवि! गजगामिनि! भामिनि! ।
क्व मुक्त्वा मन्दभाग्यं मां गतासि मृगलोचने! ॥ ५४ ॥
श्रेष्ठिभूर्विलपन्नेवं मित्रैः सम्बोध्य भोजितः ।
ततो निश्चिन्तचित्तोऽसौ, **सिंहला**भिमुखं ययौ ॥ ५५ ॥

*पणं पत्रं तदञ्चले इति संगतं भाति, दृश्यताम् श्लोकः-६५।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ पद्मावती तत्र हंससारसकूजितैः ।
बन्दिवृन्दाननोद्भूतैरिवारावैरजागरीत् ॥ ५६ ॥
न प्रियं न परीवारं, पश्यन्ती तत्र केवलम् ।
स्वं विलोक्यालसाक्षी सा, मुमूर्च्छ च मुहुर्मुहुः ॥ ५७ ॥
सा पुनः प्राप्य चैतन्यं, पवनैरतिशीतलैः ।
स्मारं स्मारं स्मराकारं, जीवेशं व्यलपत्तमाम् ॥ ५८ ॥
एकाकिनीमनाथां मां परित्यज्याजने वने ।
क्व गतोऽसि हहा नाथ! नेदृशं युज्यते सताम् ॥ ५९ ॥
नूनं जलस्थलव्योमदेवीभिर्वल्लभो मम ।
सौभाग्यसरसीहंसो, लुब्धाभिरधुना हृतः ॥ ६० ॥
शून्ये वासो वियोगश्च बन्धुभिर्दयितेन मे ।
हा हताश! त्वया दैव! समकालमदायि किम् ॥ ६१ ॥
ततः पद्मावती बाढं खेदमेदुरमानसा ।
गता जलनिधेस्तीरं वहनानां दिदृक्षया ॥ ६२ ॥
पोताननीरीक्ष्य सा तत्रोपालेभे सरिदीश्वरम् ।
हत्वा मम प्रियं गर्जन् रे निर्लज्ज! न लज्जसे ॥ ६३ ॥
एवं विलापव्यापारविधुरा मदिरेक्षणा ।
निजचेलाञ्चले ग्रन्थिं तदा सोत्कण्ठमैक्षत ॥ ६४ ॥
स्मेराम्भोरुहपत्राक्ष्या, ग्रन्थावुन्मुद्रिते तया ।
सपणं लिखितं पत्रं समालोक्येति वाचितम् ॥ ६५ ॥
एतैर्वराटकैः स्वस्मा आहाराभरणादिकम् ।
विचक्षणे! त्वया कार्यं स्मृत्वा पूर्वोदितं वचः ॥ ६६ ॥
ततस्तोषविषादाभ्यामाकुला विममर्श सा ।
एतावन्ति दिनानीदं, वचोऽधार्यमुना कथम् ॥ ६७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वचो देहं मनः पुंसां त्रयमप्यतिकर्कशम् ।
हत दैवेन केनापि, न विद्धोऽशैरकारि कैः ॥ ६८ ॥
तत्तादृग् प्रेम ता लीलाश्छेकोक्तीश्चाविभाव्य ताः ।
पापोऽयमनघां शून्यारण्ये मां मुक्तवान् कथम् ॥ ६९ ॥
पूर्वं रागं ततस्तापं तन्वन्तो रविवन्नराः ।
नूनं दूरस्थिता वन्द्या नावतार्याश्च दृक्पथम् ॥ ७० ॥
प्रतिज्ञां मे तु दिदृक्षुश्चेद् रे मन्दमते! तदा ।
उपायरहिते शून्येऽरण्ये किं मुक्तवानसि ॥ ७१ ॥
शोचितेनाथ किं वा श्राक् प्रोक्तं स्वस्य प्रियस्य च ।
साधयाम्यनुकूलश्चेदधुना स्याद्विधिर्मम ॥ ७२ ॥
ततश्चीवरखण्डं सा निजज्ञापनहेतवे ।
गृहीत्वा शाखिशाखाग्रे बबन्ध ध्वजमुच्चकैः ॥ ७३ ॥
साथ लेपमयीं कृत्वा, प्रतिमामृषभप्रभोः ।
त्रिसन्ध्यं पूजयामास, कमलैरमलैरलम् ॥ ७४ ॥
**पद्म**नामाथ सार्थेशो द्वीपान् दृष्ट्वा सहस्रशः ।
राक्षसद्वीपमायातस्तामपश्यत्पताकिकाम् ॥ ७५ ॥
बोहित्थादवतीर्यासौ साश्चर्यो वारिधेस्तटे ।
अनेकलक्षणोपेतामद्राक्षीत्पदपद्धतिम् ॥ ७६ ॥
तामेव वर्णयंस्तस्याश्चानुसारात्पुरो व्रजन् ।
**रत्नशैल**गुहायां सोऽद्राक्षीदेकां मृगेक्षणाम् ॥ ७७ ॥
जिनार्चामर्चयन्तीं तां प्रतीक्ष्य स सुधीः क्षणम् ।
ऊचे कुतस्त्वमायाता किं वा ते कुलमुज्ज्वलम् ॥ ७८ ॥
नाहं विरुद्धकारी ते विश्वासं कुरु मे स्वसः! ।
भ्रातरीव मयि प्रीतिस्फीतिमातनु चानघे ॥ ७९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तच्छ्रुत्वा साप्यवक् जातविश्रम्भा भ्रातरापतम् ।
सार्थेशेन मृगाङ्केण पत्येह चलिता सह ॥ ८० ॥
फलकेनाहमत्रागां भग्ने प्रवहणव्रजे ।
सत्यं च यदि मे बन्धुस्तदा मां वसतिं नय ॥ ८१ ॥
अङ्गीकृतेऽथ तद्वाक्ये प्रस्थाय सह तेन सा ।
निश्चितं स्वं पणं जीवमिव संगोप्य जग्मुषी ॥ ८२ ॥
ततः पद्मोऽपि तां पद्माननां पद्मावतीमभि ।
क्षुब्धोऽम्भोधिरिवानङ्गवायुनेति व्यचिन्तयत् ॥ ८३ ॥
एषा रम्भाथवा गौरी रमा वा यदिवा रतिः ।
नेदृशीरूपसंपत्तिर्मानवीषु विभाव्यते ॥ ८४ ॥
मन्ये स्मरोऽपि रूपेण जिग्ये तेनेन्द्रसूरपि ।
बालेयं यस्य सोत्कण्ठं कण्ठपीठे लुठत्यलम् ॥ ८५ ॥
ततस्तामवदत्पद्मस्त्वद्वियोगविषार्दितम् ।
स्वाङ्गाश्लेषसुधासेकान्मामुज्जीवय सुन्दरि ! ॥ ८६ ॥
इत्याकर्ण्य विहस्ता सा यावत्किमपि नाब्रवीत् ।
तावत्स्वं प्रकटीकृत्य बभाषे पोतदेवता ॥ ८७ ॥
सतीं कामयमानस्य स्वसारं प्रतिपद्य रे ! ।
यत्र हत्ते द्विधा जज्ञे, स्फोटयिष्ये तदेतकत् ॥ ८८ ॥
वचसोऽनन्तरं तस्या एरण्डफलवत्ततः ।
बिभेद वहनं वेगात्समं पद्ममनोरथैः ॥ ८९ ॥
पुण्यात् पद्मावती दारुखण्डमाप्योर्मिलोलिता ।
बभ्रामाम्भोनिधौ जीव इव सांसारिको भवे ॥ ९० ॥
देव्यानुकूलयाप्येषा नोद्दध्रे जलधेर्जलात् ।
शक्या हि नान्यथा कर्तुं, गतिः केनापि कर्मणाम् ॥ ९१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदाप्तफलका स्फूर्जद्रोषारुणितचक्षुषा ।
उत्क्षिप्य साप्यत व्योमतलं सलिलहस्तिना ॥ ९२॥
रराज फलके लग्ना गगनाङ्गणसर्पिणी ।
प्लवङ्गप्रेयसीवासौ शाखिशाखाग्रशायिनी ॥ ९३॥
फलकेन समं व्योम्नः पतन्ती सा विधेर्वशात् ।
विद्याधरेण संगृह्य विमाने स्थापिता निजे ॥ ९४॥
ऊचे च सुभ्रु! वैताढ्यभूधरे **तारका**भिधः ।
अहमस्मि श्रियां पात्रं **रथनूपुर**नायकः ॥ ९५॥
अङ्गीकुरु भजन्तं मां मावमंस्थाः सुलोचने! ।
प्रसीद प्राप्य राज्यं च, खेचरीशेखरीभव ॥ ९६॥
तद्वचो वज्रपाताभं मत्वा सत्त्वानुगा सती ।
साह विद्याभृतां मुग्ध! कलङ्कयसि किं कुलम् ॥ ९७॥
नरकातिथिपाथेयां कीर्त्तिवल्लीकरेणुकाम् ।
स्वर्गापवर्गसंहर्त्रीं, परस्त्रीलोलतां त्यज॥ ९८॥
खेचरो व्याकरोद्वार्धिव्यसनोद्धरणादहम् ।
तवोपकार्यतः स्वाङ्गसङ्गेनोज्जीवयाशु माम् ॥ ९९॥
साप्याह तत उद्धृत्य मामगाधे भवाम्बुधौ ।
पातयन् शीलविध्वंसात्कथं त्वमुपकार्यसि ॥ १००॥
तदा विद्याधराधीश! मन्ये त्वामुपकारिणम् ।
यथाब्धे रक्षिताः प्राणाः, शीलं चेन्मे तथावसि ॥ १०१॥
मन्यसे यदि रागान्धः, कृतघ्नैकशिरोमणिम् ।
तदा प्रक्षिप्य मामब्धौ कृतकृत्योऽधिकं भव ॥ १०२॥
वरं वारिनिधौ पातः प्रवेशो वा हुताशने ।
शीलरत्नं तु नो भग्नमाजन्म परिपालितम् ॥ १०३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति तस्या महासत्या वचःपीयूषपानतः ।
प्रणष्टं विषयावेशगरलैस्तस्य चेतसः ॥ १०४॥
तस्याः पादौ स नत्वाख्याद्रक्षितो नरकादहम् ।
स्वसः! किमपि कार्यं मे पुरो वद करोमि तत् ॥ १०५॥
सर्वं निवेद्य वृत्तं स्वं तदग्रे सेत्यवोचत ।
भ्रातः! कुरु तथा यत्नं, यथा स्याच्छीलपालनम् ॥ १०६॥
परविद्यापहां विद्यामदृश्यीकरणाञ्जनम् ।
रूपान्यताकरीं चास्यै गुटिकां खेचरो ददौ॥ १०७॥
**संसुमार**पुरारामे तां विमुच्य महासतीम् ।
वन्दित्वा च ततो हृष्टस्तारकोऽगान्निजां पुरम् ॥ १०८॥
तया गुटिकया सापि रूपं निर्माय पौरुषम् ।
पुरे प्रविश्य कस्याश्चिद् वृद्धायाः सदनं ययौ ॥ १०९॥
सुतत्वेन दृतः सोऽपि तया प्रोषितपुत्रया ।
यतश्चिन्तामणीरत्नं क्व प्राप्नोति न गौरवम् ॥ ११०॥
**साहसाङ्का**भिधां स्वस्य प्रथयंस्तरुणाग्रणीः ।
रूपेण च कलाभिश्च, पुरीजनमरञ्जयत् ॥ १११॥
वृद्धया स पणार्धेनाऽनीनयत्केकिपिच्छकान् ।
अन्यार्धेन च पञ्चापि, कुरुविन्दादिवर्णकान् ॥ ११२॥
ततः कलापिनां पिच्छैर्नानाविच्छित्तिसंयुतम् ।
कियद्भिर्वासरैरेष व्यजनं विजने व्यधात् ॥ ११३॥
तत्र चैकत्र नामाङ्कं रूपं **श्रीनरवर्मणः** ।
चतुरङ्गचमूयुक्तां राजपाटीं च सोऽकरोत् ॥ ११४॥
प्राकारागारजैनेन्द्रविहारापणराजितम् ।
सोऽन्यत्राचित्रयत्तत्र, संसुमारपुरं पुरम् ॥ ११५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वृद्धाग्रे भणितं तेन, यदेतद् व्यजनं त्वया ।
षोडशाधिकया पञ्चशत्या विक्रेयमापणे ॥ ११६ ॥
प्रत्यहं सा तदादाय, नृभ्योऽदर्शयदापणे ।
महार्घ्यमिति तेऽप्युक्त्वा तालवृन्तं समत्यजन् ॥ ११७ ॥
अन्यदा पौरलोकेभ्यस्तद्वार्त्ताश्रावि भूभुजा ।
सकौतुकेन तेनापि तदानाय्य व्यलोक्यत ॥ ११८ ॥
तद्विलोक्य स्वनामाङ्कं सविज्ञानं महीभुजा ।
ततोऽस्यै द्विगुणं मूल्यं वृद्धायै प्रवितारितम् ॥ ११९ ॥
कस्य विज्ञस्य विज्ञानमिदं पृष्टा महीभुजा ।
वृद्धाह देव! देवेन्द्राकारस्याङ्गरुहस्य मे ॥ १२० ॥
सस्मयेन राज्ञासावाकार्याप्रच्छि सादरम् ।
अन्या अपि कला वेत्सि, ततः सोऽप्युक्तवानिति ॥ १२१ ॥
नारीणां च नराणां च, जानामि सकलाः कलाः ।
सा विद्या भुवने नास्ति यां न वेद्मि नरेश्वर! ॥ १२२ ॥
इत्याकर्ण्य नृपः पुत्रानचलादीन् कलासु मे ।
कुरुष्व कोविदानेवं साहसाङ्कं समादिशत् ॥ १२३ ॥
सोऽथ लक्षणसाहित्यच्छन्दोऽलङ्कारसंयुतान् ।
धनुर्वेदायुधन्यायग्रन्थांस्तानध्यजीगपत् ॥ १२४ ॥
तथाशिक्ष्यन्त दक्षत्वं कुमारास्तेन वाग्मिना ।
यथा वादेऽपि ते देवसूरिं दूरयितुं क्षमाः ॥ १२५ ॥
विचार्य विद्याचातुर्यं, पुत्राणां प्राह भूपतिः ।
साहसाङ्क भणाभीष्टं तुभ्यं किं दीयते मया ॥ १२६ ॥
सोऽप्यवोचदिलापाल! शुल्कशालां प्रयच्छ मे ।
ओमिति स्वीकृते राज्ञा स्वाधिकारं स चाश्रयत् ॥ १२७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सोऽन्यदा नैगमानाह, देयं दानार्धमेव मे ।
क्रयाणकेष्वसत्यं तु, न वक्तव्यं कदाचन ॥ १२८ ॥
असत्यवादी यस्तेषु तस्याहं स्वेच्छया पुनः ।
करिष्ये दारुणं दण्डमित्येष मम संगरः ॥ १२९ ॥
अत्रान्तरे सभासीनं, नरवर्मनरेश्वरम् ।
विज्ञप्य पौरा वासाय स्थानमन्यद्ययाचिरे ॥ १३० ॥
किमेवं वदतेत्युक्ता राज्ञा पौरा जगुर्विभो! ।
तथा चौरेण मुषिता जाता निःशम्बला यथा ॥ १३१ ॥
अस्माभिः सपरीवारैरपि निद्राविवर्जितैः ।
निशायां नेक्ष्यते कोऽपि राजन्नगरवीथिषु ॥ १३२ ॥
परं प्रगे कृतं तेन वृत्तं त्र्यस्रं चतुर्दलम् ।
पद्माकारं घटाभं च क्षत्रमेव निरीक्ष्यते ॥ १३३ ॥
एवमाकर्ण्य भूपालो, भ्रकुटीभीषणालिकः ।
आहूय प्राह दुर्गेशं साधु रे! रक्ष्यते पुरम् ॥ १३४ ॥
सोऽप्याह तस्करं पश्यन्नपि पश्यामि नान्धवत् ।
चेद्रुष्टोऽसि महाराज! तदान्यं कुरु मत्पदे ॥ १३५ ॥
महाजनं विसृज्यान्तःपुरं गत्वा च भूपतिः ।
चौरनिग्रहणोपायचिन्तने प्रगुणोऽजनि ॥ १३६ ॥
कार्यं धैर्येण संसाध्यमिति ध्यात्वा नृपो निशि ।
कृपाणपाणिर्निर्भीको, बभ्राम निखिले पुरे ॥ १३७ ॥
शून्यागारसुरागारमठारामेषु स भ्रमन् ।
न प्राप क्वापि तं पापं, प्रत्यावृत्यागमद् गृहम् ॥ १३८ ॥
तदारक्षकपूत्कारमश्रौषीदिति भूप्रभुः ।
अशेषा अपि हा कोशा मुषिताः परिमोषिणा ॥ १३९ ॥

परिमोषिणा-चौरेण ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नरेन्द्रो मन्दमन्दाक्षश्चेतस्येवमचिन्तयत् ।
यं हन्तुमुद्यतोऽहं तु हन्त तेन कृतं किमु ॥ १४० ॥
ततो विषादिनं भूपं जानुविन्यस्तमस्तकम् ।
प्रणन्तुमागतो मन्त्री निरीक्ष्येति व्यजिज्ञपत् ॥ १४१ ॥
खेदं मुञ्च विभो! पश्य मद्बुद्धेश्च विजृम्भितम् ।
पञ्चाहेन मया ग्राह्यो ध्रुवं पाटच्चराग्रणीः ॥ १४२ ॥
पाटच्चराग्रणीः-स्तेनशेखरः ।
प्रससार प्रतिज्ञेति मन्त्रिणः पत्तनेऽखिले ।
यदेष धीप्रपञ्चेनाचिराच्चौरं ग्रहीष्यति ॥ १४३ ॥
तालोद्घाटिन्यपस्वापिनीभ्यां स सचिवौकसः ।
विशिष्य निशि सर्वस्वमपाहार्षीन्मलिम्लुचः ॥ १४४ ॥
चौरग्रहणचिन्ताब्धौ मज्जतो मन्त्रिणः पुरः ।
कथितं सेवकैर्देव! कोशस्ते तेन लुण्टितः ॥ १४५ ॥
एवं दर्पात्प्रतिज्ञातं यैर्यैर्नैमित्तिकादिभिः ।
ते ते विडम्बिताः सर्वे तेन हत्वाखिलं धनम् ॥ १४६ ॥
अथो **मकरदंष्ट्रा**ख्या शुम्भली भूभुजः पुरः ।
चौरग्राहं प्रतिज्ञाय समियाय निजालयम् ॥ १४७ ॥
तस्याः प्रतिज्ञां विज्ञाय, कृत्वा शृङ्गारमेत्य च ।
सायं वेश्यागृहद्वारे कुब्जां चेटीं न्यभालयत् ॥ १४८ ॥
तन्मुष्टिघातात्सज्जत्वं प्राप्य कुब्जाह कुट्टिनीम् ।
मातः! केनापि पुंसाहमचिरात् सरसीकृता ॥ १४९ ॥
तच्छ्रुत्वा विस्मिता प्राह क्व स क्व स नरोत्तमः ।
अक्का तया समं चेट्या तत्समीपमियाय च ॥ १५० ॥
सा प्रह्वा प्राह तं धूर्तं, वत्स! मां तरुणीं कुरु ।
यद्याचसे धनं तत्ते, प्रदास्ये कामगौरिव ॥ १५१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स मायी प्राह मातस्ते धनं स्वाधीनमेव मे ।
तदेव किन्तु कर्त्तव्यं, भवत्या यद्वदाम्यहम् ॥ १५२॥
कपाटसंपुटं दत्त्वा, गृहस्यान्तः प्रविश्य च ।
दिव्यौषधिरसावास्ये निक्षेप्या सादरं त्वया ॥ १५३॥
अक्के! भविष्यसि व्यक्तं प्रातस्तारुण्यशालिनी ।
रूपेण च सुरस्त्रीषु जयपत्रं प्रदास्यसि ॥ १५४॥
तद्वाक्ये जातविश्रम्भा तथैवाकृत कुट्टिनी ।
धूर्तोऽप्यादाय तद्वेश्मसर्वस्वमगमत्कृती ॥ १५५॥
विरते यामे यामिन्या गृहान्तः शुम्भलीसुता ।
शब्दायमानामश्रौषीत् खरीमतिखरस्वरीम् ॥ १५६॥
उद्घाट्य द्वारमालोक्य तामक्कां खररूपिणीम् ।
तद्वर्गो विललापोच्चैः शठेन किमकारि हा ॥ १५७॥
मतिप्रभायां सन्देहैर्विलीनं तामसैरिव ।
यस्यास्तवाम्ब! किं जातमवसानमिदं हहा ॥ १५८॥
चौरोऽपरेद्युर्भूजानेर्नवयौवनशालिनीम् ।
कन्यां **हिरण्यरेखा**ख्यां छागीं वृक इवाहरत् ॥ १५९॥
सुतापहारसंभूतदुःखप्राग्भारदुर्मनाः ।
पटहं दापयामास पुरे श्रीनरवर्मराट् ॥ १६०॥
स्तेनं विज्ञाय यः कोऽपि समानयति मे सुताम् ।
तस्मै समीहितामृद्धिं दास्येऽहं सहितां तया ॥ १६१॥
साहसाङ्ककुमारोऽथ भ्रमन्तं पटहं पुरे ।
स्पृष्ट्वा परिवृढं प्राह देवादास्ये मलिम्लुचम् ॥ १६२॥
आनीय भवतां पुत्रीं चौरचारं निवार्य च ।
नगरीं सुखिनीं कर्त्ता स प्रतिज्ञातवानिति ॥ १६३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

राज्ञा स्वहस्तदत्तं सोऽवाप्य प्रसादबीटकम् ।
गृहं गत्वा परीवारं वारयाञ्चकृवानिति ॥ १६४॥
स्वैरं निद्राद्य कर्त्तव्या दातव्या नैव तालका: ।
उपेक्षणीयश्चौरश्च प्रविशन् कोशवेश्मनि ॥ १६५॥
अदृश्यरूपतां कृत्वा सोऽञ्जनस्यानुभावत: ।
परविद्यापहां विद्यां संस्मरंस्तत्र तिष्ठवान्* ॥ १६६॥
निशम्य सोऽपि लोकास्यात् तत्प्रतिज्ञातमीदृशम् ।
उपहासपरश्चौरस्तुत्रौके निशि तद्गृहे ॥ १६७॥
कृत्वापस्वापिनीदानं सदनाभ्यन्तरं गत: ।
कोशमप्रावृतद्वारं दृष्ट्वा हृष्ट: प्रविष्टवान् ॥ १६८॥
गृहीत्वा सारसर्वस्वं, नि:ससार स तस्कर: ।
साहसाङ्कोऽपि तत्पृष्ठे खड्गव्यग्रकरोऽचलत् ॥ १६९॥
पुरात् क्रमेण निर्गत्य धीरौ वीरावुभावपि ।
कीनाशवदनाकारं प्रविष्टौ विवरं गिरे: ॥ १७०॥
धनमाशु विमुच्यासौ निकामं कामविह्वल: ।
गत्वा राजसुताभ्यर्णे पापीयानित्यभाषत ॥ १७१॥
अद्यापि न वच: किं मे कुरुषे किमु रोदिषि ।
सुलोचने! त्वया मुक्तं मुक्तजीवमवेहि माम् ॥ १७२॥
इदं मणिमयं धाम वस्तून्येतानि भूरिश: ।
दासोऽहमप्यत: सर्वं स्वाधीनं विद्धि भामिनि! ॥ १७३॥
अबलाया बलात्कार: क्रियते नैव केनचित् ।
तेन स्तेनोऽप्यहं चाटुवाचो वच्मि पुरस्तव ॥ १७४॥
साप्येवमाह रे पाप! मुक्तमर्याद! निस्त्रप! ।
पारदारक! मां हत्वा सुखितो भव सम्प्रति ॥ १७५॥

*स्थितवान्...तस्थिवान् वेति संगतं भाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्राणान्ते त्वामहं पाप! कुर्वे कान्तं कदापि न ।
त्वं चाद्यानेन पापेन ध्रुवमेव पतिष्यसि ॥ १७६ ॥
इति तद्वचसा जातकोपाटोपः स तस्करः ।
यावत्कृपाणमाकृष्याधावत्तस्याः शिरश्छिदे ॥ १७७ ॥
तावत्स साहसाङ्कोऽपि दूरीकृतदृगञ्जनः ।
ततर्ज तमरे! कन्याघातिन्नाप्स्यसि तत्फलम् ॥ १७८ ॥
किमेतदिति तां मुक्त्वाऽधावत्तं प्रति कोपतः ।
वीरयोरनयोर्जज्ञे चान्योऽन्यं दारुणो रणः ॥ १७९ ॥
सहसा साहसाङ्कस्य खड्गपातेन वज्रवत् ।
अभिद्यत तदीयासिः समं तस्य मनोरथैः ॥ १८० ॥
भग्नासिदण्डमुच्चण्डं, गृह्णन्तमथ मुद्गरम् ।
कुमारः पादघातेन निहत्याशु बबन्ध तम् ॥ १८१ ॥
पिधाय विवरद्वारं संस्थाप्य च नृपाङ्गजाम् ।
दिनोदयेऽवनीजानेरागमत्सविधे सुधीः ॥ १८२ ॥
व्यजिज्ञपच्च राजेन्द्राभ्येत्य कन्या विलोक्यताम् ।
स्वस्वादानाय लोकोऽपि, क्षिप्रमाहूयतामिह ॥ १८३ ॥
तस्येति वाचमापीय सुधामिव नृपोऽतुषत् ।
समं च तेन संप्राप्तश्चौरपातालमन्दिरम् ॥ १८४ ॥
ततो निजं निजं द्रव्यं, पौरेभ्योऽदापयन्नृपः ।
न मन्यन्ते तृणायापि परार्थं हि महाशयाः ॥ १८५ ॥
अनिच्छतेऽपि तां पुत्रीं कुमाराय नृपो ददौ ।
युगान्तेऽपि निजां वाचं लुम्पन्ति न हि सज्जनाः ॥ १८६ ॥
यदुक्तं-अलसायंतेण वि सज्जणेहिं जे अक्खरा समुल्लविया।
ते पत्थरेसु टंकुल्लिहियव्व ण हु अण्णहा हुंति* ॥ १८७ ॥
यत्कन्या गुटिकाच्छन्नाबलारूपवतेऽपि मे ।
दीयते तदिहाश्चर्यमित्ययं हृद्यचिन्तयत् ॥ १८८ ॥

---

* प्राकृतसुभाषितसंग्रहे-गा-१०

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दृष्टः श्रुतो वा केनापि द्वयोः पुंसोर्द्वयोः स्त्रियोः ।
पाणिग्रहविधिर्यद्वा जीवद्भिः किं न दृश्यते ॥ १८९ ॥
उन्मुक्तबन्धनाच्चौरादक्कां मकरदंष्ट्रिकाम् ।
स्वभावरमणीरूपां कृपयाकारयन्नृपः ॥ १९० ॥
चौरादादाय विद्यास्तास्तास्तालोद्घाटिनीमुखाः ।
विचारचतुरो राजा, जीवन्तं मुक्तवानमुम् ॥ १९१ ॥
इतश्च सिंहलद्वीपात्समुपार्ज्य घनं धनम् ।
सुंसुमारपुरं प्राप स मृगाङ्को विधेर्वशात् ॥ १९२ ॥
पोतान् संस्थाप्य भृत्वा च स्थालं रत्नादिवस्तुभिः ।
साहसाङ्ककुमारस्य दर्शनाय स आययौ ॥ १९३ ॥
साहसाङ्कोऽपि तं नाथं ज्ञात्वा दम्भाददोऽवदत् ।
सार्थेश! वद किं किं ते वस्तु पोतेषु विद्यते ॥ १९४ ॥
क्रयाणकानां संख्याथ सार्थवाहेन लेखिता ।
तस्या मुमोच दानार्धं साहसाङ्कः प्रसन्नवत् ॥ १९५ ॥
अपृच्छच्चाधिकं चेत्ते वस्तु पोतेषु तद्वद ।
निर्दोषताधुना प्रोक्ते, पश्चाद्दोषे पतिष्यसि ॥ १९६ ॥
मृगाङ्कोऽप्याह पोतेषु विद्यते नाधिकं प्रभो! ।
वाच्यं च देवपादानां सत्यमेव पुरो मया ॥ १९७ ॥
करिष्ये सार्थवाहस्य वस्तुनोऽद्य परीक्षणम् ।
इत्युक्त्वा साहसाङ्कः श्राक् सुखासनगतोऽचलत् ॥ १९८ ॥
सोऽश्ववारैरतिस्फारैरवारितपराक्रमैः ।
परीतः परितः प्राप्त यत्रास्ति वहनावलिः ॥ १९९ ॥
तस्योरांसीव मञ्जिष्ठास्थानकानि व्यदारयत् ।
तज्जीवितेन साकं च स वस्त्वारोपयत्तुलाम् ॥ २०० ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदुक्ताद् द्विगुणं वस्तु वीक्ष्याह मम रे पुरः ।
असत्यं जल्पतस्तेऽस्तु समर्च्चनमुपानहा ॥ २०१ ॥
ततः सर्वस्वमादाय बन्धयित्वा च चौरवत् ।
निनाय तं निजं धाम नीतिमार्गं स दर्शयन् ॥ २०२ ॥
*निबिडैर्निगडैर्बध्यो लम्बकम्बाप्रहारजाम् ।
वेदनां साहसाङ्केन मृगाङ्कस्ताड्यतेऽन्वहम् ॥ २०३ ॥
तद्विधाय दयां तस्मान्मोचयास्माकमीश्वरम् ।
ततो राजा तमाकार्य जगौ मधुकिरा गिरा ॥ २०४ ॥
देशान्तरिकलोकानां कुर्वतस्ताडनादिकम् ।
तवाकीर्तिर्दिगन्तानि श्यामयन्ती भ्रमिष्यति ॥ २०५ ॥
सोऽप्याह सापराधं नो मुञ्चामि कथमप्यहम् ।
तथापि युष्मदादेशान्मुक्तोऽसौ मां निषेवताम् ॥ २०६ ॥
ततो मृगाङ्कस्तन्मुक्तो भुङ्क्ते स्म सह सेवकैः ।
तदादिष्टं च कुर्वाणः सोऽस्थात्तद्द्वारि भृत्यवत् ॥ २०७ ॥
साहसाङ्काननं पश्यन् सार्थेशोऽथः पुनः पुनः ।
किमु पद्मावतीभ्राता, किं वा सैवेत्यचिन्तयत् ॥ २०८ ॥
प्रसन्नास्यं विमृश्यामुं चिरकालातिसेवया।
विज्ञप्तवानयं स्वामिन्! मुञ्च मां याम्यहं गृहम् ॥ २०९ ॥
साहसाङ्को हसित्वाह जीवन्तं त्वां त्यजामि न ।
मम पार्श्वस्थितश्चैव कुरु सेवामनारतम् ॥ २१० ॥
अतिकोपं त्यज स्वामिन्नूचे कुसुमसारसूः ।
कथंचनापि मां मुञ्च सन्तो हि नतवत्सलाः ॥ २११ ॥

---

* कथानुसन्धानं त्रुटितं भाति, अतोऽनुसन्धानमिदम् ।

निबिडैर्निगडैर्बद्ध्वा, लम्बकम्बाप्रहारजाम् । वेदनामनिशं दत्ते, साहसाङ्कोऽतिनिर्दयः ॥२०३॥
दृष्ट्वा तत्परिवारेण, कर्तांचिर्दादनतो नृपः । विज्ञप्तो साहसाङ्केन, मृगाङ्कस्ताड्यतेऽन्वहम् ॥२०४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यदि मेऽङ्घ्रितलद्वन्द्वे शोषयेः सर्पिषः पलम् ।
मुञ्चामि तदा नैवान्यथेत्यूचे स शुल्ककृत्तम् ॥ २१२॥
ओमिति स्वीकृते तस्मिन् साहसाङ्को गृहोपरि ।
निजाभिमानपूर्त्यर्थमस्वाप्सीच्छयनीयके ॥२१३॥
तस्य सुप्तस्य सार्थेशः पादौ प्रक्षाल्य वारिणा ।
परामृमर्श कच्चोलस्थितसर्पिःपलेन सः ॥ २१४॥
याममात्रे व्यतीतेऽपि पारं नेयुषि सर्पिषि ।
नात्यजद् व्यवसायं स भीतस्तस्य भियाधिकम् ॥ २१५॥
सोऽतीवखिन्नो मन्वानस्तं निद्रामुद्रितेन्द्रियम् ।
पपावुत्पाट्य कच्चोलघृतं रङ्क इव द्रुतम् ॥ २१६॥
रे रे धृष्ट! ममाप्यग्रे पिबस्येवं घृतं छलात् ।
इति जल्पन् जघानामुं सोऽङ्घ्रिघातेन निष्ठुरम् ॥ २१७॥
वदाशु क्रियते किं त इत्युक्तोऽब्रूत सार्थपः।
तव हस्तौ च मत्पृष्ठिर्यज्जानीषे कुरुष्व तत् ॥ २१८॥
बाहू विधृत्य सार्थेशं शयनीये निवेश्य च ।
सोऽथ पद्मावतीभूय प्रोचेऽहं नाथ! ते प्रिया ॥ २१९॥
अभिमानमहाम्भोधे! क्षिप्ताहं सागरे त्वया ।
मयापि तेन नाथ! त्वं, पातितो दुःखवारिधौ ॥ २२०॥
तदयं क्षम्यतां स्वामिन्नपराधः प्रसद्य मे ।
कषन्ति कूलं कूलिन्यो घनौत्सुक्यान्न चाब्धयः ॥ २२१॥
विद्याधरार्पिता विद्याः समस्तो धनसंचयः ।
कन्या हिरण्यरेखा च त्वदायत्ता इमे प्रभो! ॥ २२२॥
इदं स्वरूपमाकर्ण्य, प्रमोदभरनिर्भरः ।
मृगाङ्को विकसन्नेत्रशतपत्रस्तामभाषत* ॥२२३॥

* इदं चरणं नवाक्षरीयमस्ति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अतीवदुष्टचित्तस्य निष्ठुरस्य शठस्य मे ।
त्वया कियदिदं चक्रे गजगामिनि! भामिनि! ॥ २२४॥
सौभाग्यवत्सु मे रेखा धन्यो मन्येऽस्म्यहं पुनः ।
भवादृशी प्रिया यस्य शीलालङ्कारधारिणी ॥ २२५॥
इदं स्वरूपमाकर्ण्य नरवर्मनरेश्वरः ।
विस्मितस्तद्गृहायातश्चेतस्येवमचिन्तयत् ॥ २२६॥
व्यवसायं पृथुन्यायं, साहसित्वं च शूरताम् ।
विज्ञानं कियदेतस्याः सुकेश्याः संस्तुमो वयम् ॥ २२७॥
अभाषत च हे पद्मावतीयं मम नन्दिनी ।
प्रियं विना कथं जन्मापनेष्यति वियोगिनी ॥ २२८॥
सा प्रगल्भा नृपं प्राह, योपयेमे मया विभो! ।
मद्धृदिस्थेन नाथेन परिणीतामवेहि ताम् ॥ २२९॥
सुता हिरण्यरेखा ते मेदिनीकामिनीपते!।
प्रिया भवतु मे भर्तुर्नात्र कार्या विचारणा ॥ २३०॥
तद्वाक्याज्जातसंतोषो मृगाङ्काय नृपो ददौ ।
हिरण्यरेखां पुरुषोत्तमायेवार्णवः श्रियम् ॥ २३१॥
कियत्यपि गते काले, स्वपित्रोर्मिलनेच्छया ।
विज्ञप्तवान्महीराजं, सत्वरं श्रेष्ठिनन्दनः ॥ २३२॥
मद्वियोगान्महाराज! पितरावतिदुःखितौ ।
यद्याज्ञा वस्तदा गत्वा तदिच्छां पूरयाम्यहम् ॥ २३३॥
जानानोऽपि नृपस्तस्य प्रस्थानं दुःखकारणम् ।
आदिदेशाथवा पान्थैर्वसन्ति नगराणि न ॥ २३४॥
सार्थपोऽथ महार्द्ध्या* मित्रसामन्तमन्त्रिभिः ।
प्रियायुगेन च युतः प्रतस्थे स्वपुरं प्रति ॥ २३५॥

* केचित् प्रकृतिभावमपीच्छन्ति तन्मते एष प्रयोगः सिद्धः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नृपदत्तसितच्छत्रं धारयन्नश्वकोटिभिः ।
परीतो गजलक्षैश्च मृगाङ्कः प्राविशत्पुरम् ॥२३६॥
प्राप्तश्च वेश्मन्यानंसीत्पितृमातृपदाम्बुजम् ।
ताभ्यां चाङ्के निवेश्यासावानन्दास्त्रैरसिच्यत ॥ २३७॥
पूजां संघस्य वस्त्राद्यैर्बिम्बलक्षाणि चार्हताम् ।
सत्कृती कारयामास यतः श्रीणामिदं फलम् ॥ २३८॥
अन्येद्युः कुसुमोद्याने, केवलज्ञानभानुना ।
तमो विघटयन्नागात्सूरिः **श्रीमतिसागरः** ॥ २३९॥
सूरेरागमनोदन्तं नृपः श्रीमकरध्वजः ।
उद्यानपालकात् ज्ञात्वा तं वन्दितुमिवागमत् ॥ २४०॥
मृगाङ्कोऽपि प्रियायुग्मसहितो हितहेतवे ।
केवलज्ञानिनं नन्तुं पौरैः सह समेतवान् ॥ २४१॥
महीपालमृगाङ्कादिषूपविष्टेषु सूरिराट् ।
संसारासारतासारामादिदेशेति देशनाम् ॥ २४२॥
भवाम्भोधौ निमज्जद्भिरङ्गिभी रागरङ्गिभिः ।
जन्ममृत्युजरादुःखान्यनाथैरिव सेहिरे ॥ २४३॥
धनपुत्रकलत्रादिकार्येऽनार्यैः प्रसज्यते ।
हहा क्षणमपि स्वीयं विधेयं न विधीयते ॥ २४४॥
यद्यस्ति मोक्षसौख्येषु वाञ्छातुच्छा तदा मुदा ।
कुर्वीत वीतरागोक्ते, धर्मकर्मणि मानसम् ॥ २४५॥
देशनान्ते मृगाङ्कस्तं विज्ञो विज्ञप्तवान् गुरुम् ।
किमकारि मया कर्म सापाया येन मे श्रियः ॥ २४६॥
दानं दत्त्वाखण्डि भावः प्रभुः प्राह पुराभवे ।
स एव कथ्यमानस्तेऽग्रे मृगाङ्क! निशम्यताम् ॥ २४७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

धनधान्यरमारामे ग्रामे **धान्यपुरा**भिधे ।
क्षत्रियो **हंसपालो**ऽभूद् दरिद्री गुणवानपि ॥ २४८ ॥
उक्तं च-जे जे गुणिणो जे जे य माणिणो जे वियड्ढविण्णाणा ।
दालिद्द रे! वियक्खण! ताण तुमं साणुराओ सि* ॥ २४९ ॥
तव प्राणप्रिया **लीलावती** शीलकलावती ।
तां चार्थार्थी गृहे मुक्त्वा त्वमगा विषयान्तरम् ॥ २५० ॥
ग्रामान् पुराणि देशांश्च परिभ्राम्यन्ननेकशः ।
लक्ष्मीं तुच्छामपि प्राप्तो न निर्भाग्यशिरोमणे! ॥ २५१ ॥
तथैव निर्धनो दीनो व्यावृत्तः क्वापि कानने ।
बिल्वद्रुमस्य भूलग्नं, वटपादं व्यलोकयः ॥ २५२ ॥
पलाशबिल्वयोर्नूनं वटपादे निधिर्भवेत् ।
इति ध्यात्वा मुदा त्वं तं समूलमुदमूलयः ॥ २५३ ॥
तत्र सौवर्णदीनारमेकं वीक्ष्येत्यचिन्तयः ।
नाप्नोत्युदङ्कोऽब्धिस्थोऽपि, स्वपूरादधिकं यतः ॥ २५४ ॥
उदङ्कः-लघुघटः, 'कुलडी' इति गुर्जरभाषायाम् ।
तदादाय गृहं प्राप्तः सर्वं जायापुरोऽवदः ।
साप्याह नाथ! किं क्वापि, स्वलभ्याल्लभ्यतेऽधिकम् ॥ २५५ ॥
प्राणेश्वरीगिरा हट्टाद्दीनारेण समानयः ।
शर्करां क्षीरमाज्यं च वासः कलमतन्दुलान् ॥ २५६ ॥
दूरदेशादुपेतस्य स्वभर्तुः क्षुधितस्य ते ।
तया व्यधायि क्षीरेयी, मधुरा परिवेषिता ॥ २५७ ॥
अथ पुण्योदयात्प्राप्तो **जयदत्त**स्तवौकसि ।
मासपारणके जीर्णशीर्णवासा मुनीश्वरः ॥ २५८ ॥
तस्मै जङ्गमकल्पद्रुकल्पाय परमान्नकम् ।
सशर्कराज्यं वासश्च ददिथातिथये मुदा ॥ २५९ ॥

---

* विज्जालग्गम्-गा-१४०.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनुगत्य यतिं पश्चाद्वलितस्त्वमचिन्तयः ।
मन्ये धन्योऽहमेवैको यद्गृहे यतिराययौ ॥ २६० ॥
दुर्गदौर्गत्यपाथोधिमग्नस्यापि सदा मम ।
जानेऽनेनैव पुण्येन, मर्त्यजन्म फलेग्रहि ॥ २६१ ॥
लीलावत्यपि ते कान्ता, दृष्ट्वा तद्दानमद्भुतम् ।
विशुद्धभावनाम्भोधिमग्ना चित्ते व्यचिन्तयत् ॥ २६२ ॥
चित्तवित्तोल्लसत्पात्रसामग्री यस्य जायते ।
राज्यस्वर्गापवर्गश्रीरालिङ्गति तमङ्गिनम् ॥ २६३ ॥
एवं द्वयोरपि तदा भावः प्रववृधे शुभः ।
पश्चाच्च पश्चात्तापोऽभूदित्यहो कर्मणां गतिः ॥ २६४ ॥
अस्माभिर्वेश्म गुर्वस्वैर्वस्त्रान्नादि कृतं हि यत् ।
तद् दत्त्वा हीन्द्रियग्रामो भोगेभ्यो वञ्चितो मुधा ॥ २६५ ॥
गुर्वस्वैः-अत्यन्तनिर्धनैः ।
अथवा चारु नाचिन्ति गुरुदत्तोद्धृतैरिमैः ।
परमान्नादिभिः साध्यं साधयिष्यामहे वयम् ॥ २६६ ॥
तद्दिनात् त्वद्गृहे द्रव्यममन्दमुदपद्यत ।
यद्वा सत्पात्रदानेन किं किं स्यान्न मनीषितम् ॥ २६७ ॥
ततो युवाभ्यां जगृहे गृहिधर्मः प्रपाल्य तम् ।
मृत्वा च प्रथमे कल्पे सुरसंपदवाप्यत ॥ २६८ ॥
स हंसपालजीवस्त्वं मृगाङ्कोऽभूस्ततश्च्युतः ।
लीलावती पुनर्जज्ञे प्रिया पद्मावती तव ॥ २६९ ॥
भावाभावविशुद्ध्या यद्ददे दानं तदा त्वया ।
सापाया निरपायाश्च तेनाभूवंस्तव श्रियः ॥ २७० ॥
सत्पात्रदानमासूत्र्य जिनानां प्रतिमा अपि ।
पश्चात्तापो न कर्तव्यः कदापि किल कोविदैः ॥ २७१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्याकर्ण्य गुरोर्वाक्यं जातजातिस्मृती ततः ।
दम्पती प्रतिपेदाते, गृहिणां धर्ममद्भुतम् ॥२७२॥
यतिपतिमथ नत्वा धाम गत्वा मृगाङ्को,
व्रतनिवहमुपास्य स्वप्रियायुग्मयुक्तः ।
अधिगतसुरसंपद् द्वादशे देवलोके,
तदनु च शिवलक्ष्मीसंगमाप्स्यत्यवश्यम् ॥ २७३॥ (मालिनी)
यथा मृगाङ्केण मुनीश्वरस्य वस्त्रादिदानं विहितं तथैव॥
विधेयमन्यैरपि भावशुद्ध्या यथा भवन्तीह समीहितार्थाः ॥२७४॥ (उपजातिः)

॥ इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ वस्त्रादिदानविषये मृगाङ्ककथा समाप्ता ॥

वस्त्रादिदानवैषयिकं मृगाङ्कचरित्रमुक्त्वा पञ्चमं वसतिदानस्वरूपमाह-

**इत्थिजणसंगरहियं पसुपंडयविप्पमुक्कमइविउलं ।**
**दिज्जाणवज्जसिज्जं समणाणं विहियमप्पकए ॥ ४८॥**

व्याख्या- स्त्रीजनसङ्गरहितां यतो वसतावनवसरे योषितां सङ्गोऽनर्थाय जायते। यदुक्तं-श्री दशवैकालिके-

जहा कुक्कुडपोयस्स णिच्चं कुललओ भयं ।
एवं खु बंभयारिस्स, इत्थीविग्गहओ भयं ॥१॥ [८/५४]

अत एव युवतीजनसंयोगवियुक्तां पसुपंडयत्ति-पशवश्चतुष्पदाः-पक्षिणश्च, पण्डकाः- क्लीबास्ताभ्यां विप्रमुक्ताम्-सर्वथा रहिताम्, यतो मा कदाचन पशुधर्मावलोकात् समाधिभङ्गो भवत्विति भावः। अति-विपुलां बहुविधतपोधनक्रियाकलाप-स्वाध्यायाध्ययन-ध्यान-करणयोग्यत्वादतिशयेन विस्तीर्णाम्, अन्यथा तन्निवृत्तेः । आत्मकृते विहिताम्, साध्वर्थं कृता सती तदनर्हत्वादत एव स्वनिमित्तं विनिर्मिताम्, अनवद्यशय्यां-निर्दूषणवसतिं श्रमणेभ्यः-साधुभ्यो दद्याद्-वितरेदिति गाथार्थः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यतिभ्यो वसत्यां प्रदत्तायां दात्रा किं किं न दत्तमित्याह-

**पंचसमियाण गुत्तीजुयाण जो देइ वसहिवरदाणं ।**
**तेणण्णाई सयलं दिण्णं वुत्तं जओ सुत्ते ॥ ४९ ॥**

व्याख्या-यो वासनापरः पञ्चसमितेभ्य ईर्याभाषैषणादान-निक्षेपोत्सर्गरूपपञ्चसमितिसमितेभ्यः, गुप्तियुतेभ्यो-मनोवाक्काय-गुप्तिसहितेभ्यो यतिभ्यो वसतिवरदानं ददाति। तेनान्नाद्यशन-पान-खादिम-स्वादिमप्रभृतिवस्तुजातं, सकलं-समस्तं, दत्तं यतो-यस्माद् हेतोः सूत्रे-सिद्धान्ते, प्रोक्तमिति गाथार्थः॥ एतदेवाह-

**जो देइ उवस्सयं मुणिवराण तवणियमबंभजुत्ताणं ।**
**तेण दिण्णा वत्थण्णपाणसयणासणवियप्पा ॥ ५० ॥**

व्याख्या-यो दाता तपोनियमब्रह्मचर्ययुक्तेभ्यो मुनिवरेभ्य उपाश्रयं-वसतिं ददाति, तेन विवेकिना वस्त्रान्नपानशयनासन-विकल्पा दत्ता इति गाथार्थः ॥

वसतौ दत्तायां शय्यातरस्य को गुणः स्यादित्याह-

**तवसंजमसज्झाओ णाणब्भासो जणोवयारो य ।**
**सो साहूणमवग्गहकारी सज्झायरो तस्स ॥ ५१ ॥**

व्याख्या-यः पुण्यवान् साधूनां सुविहितानां, तपो-द्वादश-विधं, संयमः-सप्तदशभेदः, स्वाध्यायो-वाचनाप्रच्छनापरावर्तनानु-प्रेक्षाम्नायधर्मोपदेशरूपः पञ्चप्रकारस्तपश्च संयमश्च स्वाध्यायश्चेति द्वन्द्वः। यश्च ज्ञानाभ्यासः-सिद्धान्ताध्ययनाध्यापनादिः, यश्च जनोपकारः-कुमार्गात् सन्मार्गप्रवर्त्तनम्, तस्य सर्वस्यापि धर्मकृत्यस्य शय्यातरो-वसतिदाता, अवग्रहकारी-उपष्टम्भविधायकः स्यादिति गाथार्थः॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शय्यादानात्किं फलं भवतीति प्रकटयन्नाह –

**पावइ णरसुररिद्धी सुकुलुप्पत्ती वि भोगसामग्गी।**
**णित्थरइ भवं सगारी सिज्जादाणेण साहूणं ॥ ५२॥**

व्याख्या-सोऽगारी-गृहस्थः, साधुभ्यो-महर्षिभ्यः, शय्यादानेन-वसतिवितरणेन, नरसुरऋद्धीर्मनुष्यदेवसंपत्तीः, प्राप्नोति-लभते । न केवलमेताः सुकुलोत्पत्तिमपि-प्रांशुवंशजन्म, तदपि भोगसंयोगैर्विना अवकेशितरुपुष्पवत् निष्फलम्, अत एव भोगसामग्रीः पञ्चोपचार-रुचिरभोगसंयोगान्, इत्यादि सामग्र्यामवाप्तायां पश्चात् किं भवती-त्याशङ्क्याह भवत्ति-भवश्चातुर्गतिकसंसारस्तं निस्तरति, परमपद-नितम्बिनीपीनस्तनतटलुठनसावधानमानसः स्यादिति गाथार्थः ॥

सदृष्टान्तां शय्यादानप्रतिख्यापिकीगाथामाह-

**सिरिअज्जसुहत्थीणं विइण्णसिज्झापयाणउ लद्धे ।**
**णलिणीगुम्मविमाणं अवंतिसुकुमालवरवणिणा ॥ ५३॥**

व्याख्या-श्रीआर्यसुहस्तिभ्यः-श्रीस्थूलभद्रशिष्येभ्यो वितीर्ण-शय्याप्रदानात्-प्रदत्तवसतिदानादवन्तिसुकुमालवरवणिजा नलिनी-गुल्मविमानं लब्धं-प्राप्तमिति गाथार्थः ॥

भावार्थः कथानकगम्यस्तच्चेदं-

अस्ति **मालवकेऽवन्तिनगरी** श्रीगरीयसि ।
यालकापूरिवात्यर्थं श्रूयते धनदाश्रिता ॥ १ ॥
तस्यां भद्राकृतिर्**भद्रा**कुक्षिक्षीराब्धिचन्द्रमाः ।
**अवन्तीसुकुमाला**ख्यः श्रेष्ठी श्रेष्ठिवरोऽभवत् ॥ २ ॥
स प्राग्भवार्जितागण्यपुण्यप्राप्तधनोदयः ।
सचित्रचित्रशालायां शालिभद्र इवापरः ॥ ३ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

देवाङ्गनोपमानद्वात्रिंशद्युवतिभिः समम् ।
भुञ्जानो भङ्गुरान् भोगान् वासरानत्यवाहयत् ॥ ४॥ युग्मम् ॥
एकदा भगवा**नार्यसुहस्ती** साधुभिर्वृतः ।
विहारचर्ययानार्यदेशलोकान् प्रबोधयन् ॥ ५॥
तस्या नगर्या उद्यानमण्डने जिनमन्दिरे ।
श्रीजीवत्स्वामिनो बिम्बं नमस्कर्तुमुपाययौ ॥ ६॥ युग्मम् ॥
तेनोपाश्रयवीक्षायै सूरिणा गुणभूरिणा।
प्रहितौ गृहीतौ पुर्यां, गीतार्थौ द्वौ महामुनी ॥ ७॥
विज्ञावाज्ञां गुरोर्धृत्वा शीर्षे शेषामिवात्मनः ।
शय्यां गवेषयन्तौ तौ भद्रायाः सदनं गतौ ॥ ८॥
सापि हर्षोल्लसद्गात्री मुनी नत्वा व्यजिज्ञपत् ।
प्रभू! मामनुगृह्णीतमाज्ञादानप्रसादतः ॥ ९॥
तावप्येव ब्रुवाते स्म, शिष्यावावां सुहस्तिनः ।
भद्रे! तदीयादेशेन प्रार्थयाव उपाश्रयम् ॥ १०॥
तत्रस्था यन्महात्मानः कुर्वन्ति सुकृतादिकम् ।
तदीयसंविभागः स्याद् भवतामपि निश्चितम् ॥ ११॥
इति श्रुत्वा सुतं पृष्ट्वा, भद्रा वाहनशालिकाम् ।
ददावथ प्रभुस्तस्यां स्थितः साधुसमन्वितः ॥ १२॥
धर्मजागरिकां कुर्वाणेषु साधुषु कर्हिचित् ।
**नलिनीगुल्मा**ध्ययनं गुणयाञ्चकृवान् गुरुः ॥ १३॥
तदा भद्रासुतस्ताभिः, प्रेयसीभिः समं मुदा ।
विलसन्नलिनीगुल्माध्ययने निदधे श्रुती ॥ १४॥
तत्तादृग्भोगसौख्यानि विषाणीव विमुच्य सः ।
तदाकर्णयितुं सूरिशय्याद्वारमुपाययौ॥ १५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पुरा क्वापि मयार्थोऽयमनुभूत इति स्वके ।
हृदि ध्यायन् सुधीर्जातस्मृतिर्गुर्वन्तिकं ययौ ॥ १६ ॥
प्रभुं प्रणम्य सोऽप्राक्षीत् श्रीसुहस्तिनमेव हि ।
विमानं नलिनीगुल्माभिधमध्युषितं किमु ॥ १७ ॥
ततः प्रभुरभाषिष्ट, भद्र! भाद्रेय! नो मया ।
तत्रोषितं परं जैनागमोक्तं तदगुण्यत ॥ १८ ॥
प्राप्यते तत्कथं नाथ! सनाथं सौख्यसंपदा ।
मरुस्थले सर इव, वारिवारिजराजितम् ॥ १९ ॥
तत्रैनं सस्पृहं ज्ञात्वोवाच वाचंयमाग्रणीः ।
विना जैनेश्वरीं दीक्षां, नाप्यते वत्स! तत्सुखम् ॥ २० ॥
सोऽप्याह करुणाधार! प्रसद्याद्यैव मे व्रतम् ।
प्रयच्छ येन तद्वासमवाप्नोम्यचिरादहम् ॥ २१ ॥
भगवानप्युवाचैवं सुकुमालक! बालक! ।
वार्धिरुल्लोलकल्लोलैर्दुर्लङ्घ्योऽपि हि लङ्घ्यते ॥ २२ ॥
चंक्रम्यतेऽसिधारापि, मेरुरुल्लोल्यते पुनः ।
न तु पालयितुं शक्या, जैनी दीक्षातिदुस्तरा ॥ २३ ॥ युग्मम् ॥
भाद्रेयोऽप्यवदन्नाथ! संयमे सस्पृहोऽस्म्यहम् ।
परं चिरतरं सामाचारीं नाचरितुं क्षमः ॥ २४ ॥
तदहं तत्सुखाकाङ्क्षी नाथ! प्रथममेव हि ।
व्रतं सानशनं लात्वा, भावी पूर्णमनोरथः ॥ २५ ॥
गुरुणा जगदे भद्र! यद्येवं तर्हि सत्वरम् ।
गृहे गत्वा निजान् बन्धूनापृच्छ्यागच्छ वत्सल! ॥ २६ ॥
गुरुं नत्वा ततोऽवन्तिसुकुमालः स्वमालयम् ।
गत्वात्मसहृदोऽपच्छन्नानज्ञातश्च तैर्व्रते ॥ २७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

केशान् क्लेशानिव स्वीयानुत्खायाङ्गीकृतव्रतः ।
स साधुलिङ्गभृत्सूरिपदमूलमुपाययौ ॥ २८॥
स्वयमात्ते व्रते मा भूदनवस्थेति सूरिराट् ।
तमनुग्राहयामास दीक्षयाक्षीणशिक्षया ॥ २९॥
व्रतासेवनजं कष्टं चिरं सोढुं न हि क्षमः ।
इति ध्यात्वा गुरुं नत्वा, ततोऽसौ निरगान्मुनिः ॥ ३०॥
कटुकण्टकविद्धांह्रिनिर्यद्रुधिरबिन्दुभिः ।
अलक्तैरिव भाद्रेयः पृथ्वीपीठं प्रसाधयन् ॥ ३१॥
करालकालवेतालं शिवाफेत्कारभीषणम् ।
निर्भीकः पितृवेश्मेव पितृवेश्म ययौ यतिः ॥ ३२॥ युग्मम् ॥
तत्र **कन्थारिका**नाम्नि कानने शमनानने ।
गृहीत्वानशनं कायोत्सर्गेणास्थान्महामुनिः ॥ ३३॥
अथासृक्पङ्कसंमिश्रां तदीयां पदपद्धतिम् ।
लेलिहाना शिवा काचित्ससुता वनमागमत् ॥ ३४॥
क्रमेण शोधयन्ती सा, सशोणं प्राप्य तत्पदम् ।
निष्कृपा खादितुं मङ्क्षु राक्षसीव प्रचक्रमे ॥ ३५॥
विदारयन्ती चर्माणि रदनैः क्रकचोपमैः ।
पिबन्ती शोणितं नीरभोगिणीव सुतैः सह ॥ ३६॥
खादन्ती मांसखण्डानि, लोलं लोलं वृकीव सा ।
यामिन्याः प्रथमे यामे, तत्क्रमौ निरशेषयत् ॥ ३७॥
मनागपि मनो नास्य स्खलितं सत्त्वशालिनः ।
यद्वा द्युसानुमत्सानु कम्प्यते क्वापि वात्यया ॥ ३८॥
द्वितीये यामिनीयामे खादन्तीमूरुयामलम् ।
तां वीक्ष्य न चुकोपर्षिरहो क्षान्तिविजृम्भितम् ॥ ३९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

द्विधोदरं प्रकुर्वाणा तृतीये प्रहरे निशः ।
तेन स्वदुर्गतेर्दुर्गं दलयन्तीव साकलि ॥ ४० ॥
तुर्ये च यामिनीयामे, मृत्वा तद्ध्यानवानृषिः ।
विमानं नलिनीगुल्मं चिन्तामणिमिवाप सः ॥ ४१ ॥
अहोसत्त्वमहोसत्त्वमिति स्तुतिपराः सुराः ।
मुदा तस्य मुनेर्मूर्ध्नि पुष्पवृष्टिं वितेनिरे ॥ ४२ ॥
अथ प्रातः प्रियास्तस्यापश्यन्त्यो जीवितेश्वरम् ।
गत्वा नत्वा गुरुं प्राख्युः, प्रभो! क्वास्ति स नः प्रियः ॥ ४३ ॥
सूरिर्ज्ञात्वोपयोगेन तच्चरित्रं यथास्थितम् ।
तासां पुरस्तादाचख्यौ सुधामधुरया गिरा ॥ ४४ ॥
इत्याकर्ण्य हहारावपरास्ताः स्वगृहं गताः ।
गुरूदितं प्रियोदन्तं भद्रायाः पुरतो जगुः ॥ ४५ ॥
भद्रापि तत्क्षणादेवास्तोकशोकसमाकुला ।
वधूपरिच्छदोपेता कन्थारीवनमाययौ ॥ ४६ ॥
रक्षोदिशि समाकृष्टं निजसूनोः कलेवरम् ।
दर्शं दर्शं रुरोदासौ, रोदसीपूरमातुरा ॥ ४७ ॥
विलपन्ती लुठन्ती च भुवि भद्रा वधूयुता ।
रोदयामास विहगानप्येषा स्वजनानिव ॥ ४८ ॥
अस्मान्मुक्त्वा पराधीना दीनदीनाननाः सुत! ।
आत्तदीक्षोऽपि किं नेक्षामात्रेणान्वग्रहीर्गृहम् ॥ ४९ ॥
यानि वत्स! स्वमुत्संगमारोप्य त्वामकार्ष्महि ।
पटुचाटूनि किं तानि हहा विस्मृतवानसि ॥ ५० ॥
अस्मासु भवकारासु, निर्ममश्चेद् भवानभूत् ।
तत्किं हे वत्स! संसारतारकेषु गुरुष्वपि ॥ ५१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निर्मोहोऽपि महासत्त्व! स्नेहमन्थरया दृशा ।
मामम्बां प्रेयसीश्चैता दयामय! विलोकय ॥ ५२॥
एवं विलापमासूत्र्य भद्रा **सिप्रा**नदीतटे ।
अवन्तिसुकुमालस्याङ्गसंस्कारमकारयत् ॥ ५३॥
भद्रा स्वसुतशोकाग्निज्वालाजालकरालितम् ।
आत्मानं मज्जयामास, वैराग्यामृतसागरे ॥ ५४॥
अहो असारे संसारे भाण्डागारे महापदाम् ।
युक्तं योगभृतो नैव, रक्तियुक्तं वितन्वते ॥ ५५॥
तन्मे निष्पतिपुत्रायाः सत्राया दुःखसंततेः ।
गृहावेशे महाक्लेशेऽवस्थानं नैव युज्यते ॥ ५६॥
ततो मुक्त्वा वधूमेकां, ससत्त्वां निजवेश्मनि ।
अपराभिः समं भद्रा व्रतश्रियमशिश्रियत् ॥ ५७॥
वंशावतंसं भाद्रेयप्रिया सुतमसूत सा ।
सोऽपि देवगृहं चक्रे पितृनिर्वाणभूतले ॥ ५८॥
योऽवन्तिसुकुमालस्य कालस्थाने सुरालयः ।
बभूव स तु लोकेन **महाकाले**ति गीयते ॥ ५९॥
इत्थमवन्तीसुकुमालस्य श्रुत्वा चरितं चारु वयस्य!।
सद्गुरुशय्यादानविधानं कुरु तव येन भवेच्छममानम् ॥ ६०॥ (मत्तावृत्तम्)

॥ इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ शय्यादानविषयेऽवन्तीसुकुमालश्रेष्ठिदृष्टान्तः समाप्तः॥

वसतिदानवैषयिकमवन्तिसुकुमालनिदर्शनमुक्त्वा षष्ठं संस्तारकदानस्वरूपमाह–

**संथारपायपुंछणसयणासणपीढफलगपमुहाइं ।**
**सकए कयाइं जइणो विहिणा वियरिज्ज पुण्णट्ठा ॥ ५४॥**

व्याख्या-संस्तारकः-शयनकम्बलः, पादप्रोञ्छनम्-उपवेशन-योग्यकम्बलः, शयनासनपीठफलकप्रमुखं-शयनकृते पट्टः, उपवेशनकृते पट्टकः, प्रमुखशब्देन चतुष्किकादिः। संस्तारकपादप्रोञ्छनं च, *शयनासनपीठफलकप्रमुखं च संस्तारकपादप्रोञ्छनशयनासनपीठफलकादीनि स्वकृते कृतानि, अन्यथा व्रतिनामनर्हत्वादत एवात्मार्थं निर्मितानि, यतेः-साधोर्विधिना-सिद्धान्तोक्तयुक्त्या, पुण्यार्थं-सुकृताय वितरेद् (दद्याद्) इति गाथार्थः ॥

सनिदर्शनमेतद्वस्तुदानमाहात्म्यमुद्भावयन्नाह-

**चंदणवणिणा मुणिणो एरिसवत्थूण दाणमाहप्पा ।**
**अणुहविय णरसुरसिरिं विभूसियं सासयं ठाणं ॥ ५५॥**

व्याख्या-चन्दनवणिजा-चन्दनश्रेष्ठिना, मुनेर्महात्मन ईदृग्वस्तूनां पश्चादुक्तानाम्, दानमाहात्म्यान्नरसुरश्रियं-मनुष्यामरलक्ष्मीमनुभूय-भुक्त्वा, शाश्वतं स्थानं-परमपदम्, विभूषितं-मण्डितमिति गाथार्थः ॥ भावार्थः पुनरयम्, तथाहि -

**जम्बूद्वीपा**भिधे द्वीपे श्रीम**द्रत्नपुरं** पुरम् ।
विबुधाधिष्ठितं मेरुमिव व्योमेव राजते* ॥ १॥
नानारत्नाकराकीर्णं यस्यैक्ष्यापणपद्धतिम् ।
कियद्रत्नाकरं रत्नाकरं जानीत धीधनाः! ॥ २॥
तत्र **रत्नप्रभो** धात्रीपालो राज्यमपालयत् ।
विशदीकुरुतेऽद्यापि जगद् यस्य यशःशशी ॥ ३॥
तस्य **रत्नावली** जाया, यस्याः सौन्दर्यदर्शनात् ।
कन्दर्पोऽपि रतिप्रीत्योः प्रीतिं शिथिलयत्यलम् ॥ ४॥

* वृत्तिस्त्रुटिता प्रतिभाति ।
* व्योम्नि विराजते । इति पाठः समीचीनो भाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दम्पत्योरेतयोर्भुञ्जानयोर्वैषयिकं सुखम् ।
निमेष इव निःशेषः समयः समयात् कियान् ॥ ५ ॥
इतश्च स्वर्गतश्च्युत्वा रत्नौघस्वप्नसूचितः ।
तस्याः कुक्षाववातारीज्जीवः कश्चन पुण्यवान् ॥६ ॥
राज्ञी रत्नवती पूर्णैर्दौहृदैर्दिवसैरपि ।
असूत सूनुं प्राचीव सवितारं सुतेजसम् ॥७ ॥
जाते तस्मिन्सुतेऽकार्षीद् राजातुच्छं महोत्सवम् ।
**रत्नचूडा**भिधं चास्य रत्नस्वप्नानुसारतः ॥ ८ ॥
कलाकलापशिक्षार्थं कलाचार्याय भूभुजा ।
रत्नचूडः कुमारोऽयं ददे सत्कारपूर्वकम् ॥ ९ ॥
सोऽधीत्य दिवसैः कैश्चिद् द्वासप्ततिकलाः कलाः ।
प्राप रेखां कलावत्सु देवेन्द्र इव नाकिषु ॥ १० ॥
औदार्यधैर्यगाम्भीर्यसौन्दर्यैकनिकेतनम् ।
कुमारो मारसत्क्रीडावनं यौवनमासदत् ॥ ११ ॥
अथाम्रमञ्जरीमञ्जुमरन्दास्वादसुस्वरैः ।
भृङ्गैर्गीतयशाः प्राप वसन्तो नन्दने वने ॥ १२ ॥
प्रसर्पति वसन्तेऽपि यौवनोन्मादवानपि ।
रत्नचूडो न चिक्रीड क्रीडत्यपि जनेऽखिले ॥ १३ ॥
विलासविमुखं वीक्ष्य पितरौ निजनन्दनम् ।
तं चानाय्य ब्रुवाते स्म, वत्स! त्वं रमसे न किम् ॥ १४ ॥
स प्राह तात! नेच्छा मे पूर्यते स्वल्पया श्रिया ।
शुचौ तापाभिभूतो हि तृप्यत्यम्भःकणेन किम् ॥ १५ ॥
शुचौ-आषाढमासे ।
नृपो ज्ञात्वा मनः सूनोः कोशाध्यक्षान् समादिशत् ।
यदेष याचते वत्सस्तत्प्रदेयमसंशयम् ॥ १६ ॥
लब्धवित्तस्ततो रत्नचूडः क्रीडनहेतवे ।
मित्रेभ्यो लक्षसंख्येभ्यो दददाभरणादिकम् ॥ १७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रीणयंश्च धनाम्भोदैर्मुदा याचकचातकान् ।
सिन्धुरस्कन्धमध्यास्य ययौ नन्दनकाननम् ॥१८॥ युग्मम्॥
मरुद्धूततरुव्रातपल्लवैराह्वयन्निव ।
मधुरैः परभृद्ध्वानैः स्वागतं कथयन्निव ॥ १९॥
पलाशकुसुमाङ्कूरैः स्वं रागं दर्शयन्निव ।
अनेकानोकुहभ्रस्यत्प्रसूनैरर्चयन्निव ॥ २०॥
भ्रमद्भ्रमरझंकारविरावैश्च स्तुवन्निव ।
समवापि कुमारेणारामः कामानुकारिणा ॥ २१॥ कुलकम् ॥
आश्चर्याश्चर्यकृत्क्रीडाविनोदैः[१] क्रीडतामुना ।
वर्षणैः स्वर्णरत्नानामकालजलदायितम् ॥ २२॥
सुवर्णकोटयस्तिस्र एकस्मिन्नपि वासरे ।
रत्नचूडकुमारेण हेलयैव व्ययीकृताः ॥ २३॥
अस्मिंस्तनयवृत्तान्ते कोशाध्यक्षादथ श्रुते ।
रुषा जज्वाल भूपालः सर्पिःक्षेपात्कृशानुवत् ॥ २४॥
ततः कुमारमाकार्य नृपवर्योऽब्रवीदिति ।
रे रे बाल! मदोत्ताल! किमारब्धमिदं त्वया ॥ २५॥
यद्देशेभ्यः समग्रेभ्यः प्रतिवर्षं कथंचन ।
उत्पाद्यन्ते त्रयस्त्रिंशन्मया हाटककोटयः ॥ २६॥
अन्तःपुरे परीवारे स्कन्धावारे च तद्व्ययात् ।
एकावशिष्यते कोटिः सा पुनः स्थाप्यते निधौ ॥ २७॥
तां च वैरिभये जाते दुर्भिक्षे वाथ संकटे ।
व्ययीकृत्य मया राज्यं सुस्थिरीक्रियतेतराम् ॥ २८॥
तद् रे दिनमात्रेऽपि कोशमेवं क्षयं नयन् ।
पुत्रव्याजेन मे शत्रुरुपतस्थे कुतोऽपि हि ॥ २९॥

१. आश्चर्यचर्य- L-D।

कुमारोऽप्येवमाकर्ण्य पितुर्वाक्यमरुन्तुदम् ।
नगरान्निरगाद्वेगात्पुण्यमेव प्रमाणयन् ॥ ३० ॥
प्रतिदेशं प्रतिग्रामं जनतां रञ्जयन्नयम् ।
चित्रव्याघ्रद्विपैर्भीमां जगामैकां महाटवीम् ॥ ३१ ॥
तत्र भ्रमन् ददर्शासौ **नभस्तिलक**पर्वतम् ।
निजौन्नत्यश्रियान्याद्रिस्वामितां वदतीव यः ॥ ३२ ॥
स कौतुकात्तमारुह्य तालहिन्तालसंकुलम् ।
नारङ्गपूगपुन्नागसुभगं वनमैक्षत ॥ ३३ ॥
तदन्तः प्रविशन्नाशु द्युतिद्योतितदिग्मुखम् ।
प्रासादमेकमद्राक्षीद्रत्नचूडो मणीमयम् ॥ ३४ ॥
तद्द्वारि वारिजामन्दमरन्दामोदिताम्भसि ।
वाप्यां श्रान्तः कृतस्नानः प्रासादं प्राविशत्सुधीः ॥ ३५ ॥
दृष्ट्वा **चक्रेश्वरी**सेव्यां प्रतिमां **वृषभ**प्रभोः ।
पूजयामास सोऽम्भोजै स्तवमेवं चकार च ॥ ३६ ॥
स्वामिन्नाभिनरेन्द्रनन्दन! जिन! त्वद्दर्शनादद्य मे,
पापैर्नष्टमनन्तकालजनितैः पुण्यैर्जजृम्भेतराम् ।
माद्यत्कुञ्जरकर्णतालतरलाभिः श्रीभिराभिः स्थिरी-
भूतं धूतमसंख्यदुःखततिभिर्भिन्नं भयैराभवम् ॥ ३७ ॥
(शार्दूलविक्रीडितम्)

स्नातं नेत्रयुगाम्बुजेन रुचिरे पीयूषकुण्डान्तरे,
हर्षाद्वैतसुखप्रसंगमसमं स्वान्तेन लेभेऽधुना ।
रोमाञ्चैर्वपुरञ्चितं च वचसोत्कर्षोदयः सद्गुण-
श्लाघातो जगृहे मनुष्यजनुषा साफल्यमासादितम् ॥ ३८ ॥
(शार्दूलविक्रीडितम्)

इति स्तुतिपरे भूपपुत्रे चक्रेश्वरीसुरी ।
प्रकटीभूय सानन्दमनसा तमवोचत ॥ ३९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वत्साहं त्वयि तुष्टातो मनोऽभिमतमात्मनः ।
वरं वृणु यतो देवदर्शनं स्यान्न निष्फलम् ॥ ४० ॥
तां प्रणत्य कुमारोऽपि, प्राह शासनदेवते ! ।
किं किं नाप्तं मया नाभिभुवस्तव च दर्शनात् ॥ ४१ ॥
किमप्यनिच्छते तस्मै देवी चिन्तामणिं बलात् ।
जगद्विजित्वरं चासिं वितीर्य पुनरादिशत् ॥ ४२ ॥
वत्स! नाभेयदेवस्य प्रसादात्सप्तमे दिने ।
राज्यं भावि तवाश्वेभभटकोटिरथोत्कटम् ॥ ४३ ॥
इत्युदित्वा तिरोभावभाजि देव्यां नृपाङ्गभूः ।
सानन्दः पुरतो गच्छन् ददर्शैकं पुरं परम् ॥ ४४ ॥
कुमारः प्रविशंस्तत्र नेक्षाञ्चक्रे क्वचिन्नरान् ।
विभातायां विभावर्यां ग्रहानिव नभोङ्गणे ॥ ४५ ॥
क्वाप्यपश्यदगौ गन्धसारकर्पूरभासुरम् ।
लीलां मलयशैलस्य दधद् गन्धाट्टपेटकम् ॥ ४६ ॥
मुक्ताप्रवालमाणिक्यव्याप्तां क्वापि स ऐक्षत ।
सौवर्णिकापणश्रेणीं वेलामिव महोदधेः ॥ ४७ ॥
क्वचिन्निभालयामास सोऽंशुकापणपद्धतिम् ।
सनर्माणं स्फुरन्नेत्रोल्लासां सीमन्तिनीमिव ॥ ४८ ॥
एवं विविधवस्तूनां विस्तारैः परिपूरितम् ।
राजमार्गमसौ पश्यन्नासदन्नृपमन्दिरम् ॥ ४९ ॥
यद् भाति रत्नसौवर्णकलशध्वजतोरणैः ।
पुरलक्ष्मीदिदृक्षायै स्वर्विमानमिवागतम् ॥ ५० ॥
कुमारोऽन्तःपुरं पश्यन् शून्यं सौगततत्त्ववत् ।
कृपाणपाणिरारुक्षत्तत्सप्तममहीतलम् ॥ ५१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्र प्रेक्षाञ्चकारैकां* नवयौवनशालिनीम् ।
कनीं तल्पगतां देवीं शापादिव दिवश्च्युताम् ॥ ५२॥
कुमारं मदनाकारं पश्यन्ती सापि सस्पृहम् ।
सहसोत्थाय चावादीद्देवपादोऽवधार्यताम् ॥ ५३॥
सिंहासने तया दत्ते राजसूरुपविश्य ताम् ।
सविषादां विषादस्य कारणं लघु पृष्टवान् ॥ ५४॥
सा प्राह शृणु मे दुःखकारणं करुणानिधे! ।
यदत्रास्त्यचलामौलिमौलिरे**लापुरी** पुरी ॥ ५५॥
तत्रारिनारीदृग्वारिसिक्तकीर्त्तिलतावनः ।
अभून्नाम्ना च लक्ष्म्या च **पुरन्दर**नरेश्वरः ॥ ५६॥
सर्वाङ्गसुन्दराकारा राज्यश्रीरिव जङ्गमा ।
**अनङ्गसुन्दरी** प्राणेश्वरी तस्य महीशितुः ॥ ५७॥
तयोर्निरन्तरं प्रेमपरयोः शिवयोरिव ।
जज्ञे **काञ्चनमाला**ख्या, सुता सप्तसुतोपरि ॥ ५८॥
साभ्यस्तेष्टचतुःषष्टिकलासादितयौवना ।
जनन्या जनकं नन्तुं प्रैषि पर्षदि संस्थितम् ॥ ५९॥
स्नेहात्सुतां निजोत्सङ्गीकृत्य सर्वसहेश्वरः ।
नैमित्तिकं सभासीनं तदापृच्छदिति द्रुतम् ॥ ६०॥
दैवज्ञकशिरोरत्न! वद विज्ञाय संविदा ।
अस्याः काञ्चनमालाया भविता कतरो वरः ॥ ६१॥
सोऽपि ज्ञानेन विज्ञाय प्राह रत्नपुरेशितुः ।
श्रीरत्नप्रभभूपस्य, तनयो विनयोल्बणः ॥ ६२॥
रत्नचूडाभिधो भाग्यसौभाग्यैकनिवासभूः ।
देव! काञ्चनमालायास्त्वत्पुत्र्या भविता पतिः ॥ ६३॥ युग्मम्॥

* प्रेक्षाञ्चक्रे ...कामिति संगतो भाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्युक्त्वा विरतेऽमुष्मिन् यावत्तावन्महाजनः ।
तारपूत्कारकृद्वेगादेत्य भूपं व्यजिज्ञपत् ॥ ६४॥
त्वयि नाथेऽपि निर्नाथा इव मुष्यामहे वयम् ।
केनापि क्रूरचौरेण यामिनीसमयेऽन्वहम् ॥ ६५॥
कर्णज्वरकरं वाक्यमिदमाकर्ण्य भूपतिः ।
रयादेव समाकार्य, नगरारक्षमाक्षिपत् ॥ ६६॥
रे रे! दुरात्मन्! मे ग्रासं भोजं भोजं स्वपिष्यलम् ।
मत्प्रजायाः परित्राणं न करोषि च चौरतः ॥ ६७॥
सोऽप्याह नाहमीशोऽस्मि चौरनिग्रहहेतवे ।
अतः स्वामी मयि क्रोधं तोषं वा कुरुतात्तराम् ॥ ६८॥
ततः स्वयमिलापालः करवालकरो निशि ।
पुरेऽभ्रमन्महावर्त्तमध्ये पतितपोतवत् ॥ ६९॥
निरन्तरं पुरे भ्राम्यन्नखिन्नो भूभृदन्यदा ।
चौरं क्षत्रमुखान्मङ्क्षु निर्गच्छन्तमवैक्षत ॥ ७०॥
कोऽसीति भूभुजा पृष्टः सोऽब्रवीत्कमलोऽस्म्यहम् ।
अन्यान्यकृतपाखण्डिवेषो मुष्णोमि पत्तनम् ॥ ७१॥
ततो विशांविभुर्वेगाद् गृहीत्वा तं मलिम्लुचम् ।
शूलायां रोपयामासायमेव क्ष्माभुजां नयः ॥७२॥
मृत्वा कृतनिदानः संश्चौरो रात्रिञ्चरोऽजनि ।
ततः स प्राग्भवं ज्ञात्वा वैरं सस्मार भूपतौ ॥ ७३॥
सान्तःपुरपरीवारं पुरन्दरनरेश्वरम् ।
कोपाद् व्यापाद्य पापात्मा स शून्यमकरोत्पुरम् ॥ ७४॥
एका काञ्चनमाला तु पुरन्दरनृपाङ्गजा ।
पापेन रक्षसारक्षि, स्वपाणिग्रहणेच्छया ॥ ७५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कुर्वन् पटूनि चाटूनि माससमात्रं कथंचन ।
सोऽत्यवाहि तया चित्ते स्मरन्त्या ज्ञानिनो वचः ॥ ७६ ॥
साहं सुभग! भूजानिजनिः काञ्चनमालिका ।
रत्नचूडं पतीयन्तीयन्तं कालमवास्थिषि ॥ ७७ ॥
क्वाहं क्व च स मे भर्त्ता रत्नप्रभनृपाङ्गभूः ।
अतो दुःखातुराया मे मरणं शरणं किल ॥ ७८ ॥
तत्कुमार! मयावादि निजखेदस्य कारणम् ।
त्वत्पुरस्ताद्यतः सन्तः परदुःखेषु दुःखिताः ॥ ७९ ॥
मद्विवाहस्य सामग्रीं कर्तुं यावद् गतोऽस्ति सः ।
तावत्प्रयाहि पुंरत्न! नो चेत्त्वां प्रहणिष्यति ॥ ८० ॥
तस्यामिति ब्रुवाणायां तरसा राक्षसेश्वरः ।
समागत्य कुमारं तं दृष्ट्वा चैवमतर्जयत् ॥ ८१ ॥
रे रे! पाप! दुराचार! कृतान्तस्यातिथीभवन्! ।
कुतः सुरासुरागम्यं ममान्तःपुरमागमः ॥ ८२ ॥
इत्याकर्ण्य कुमारोऽपि कोपाटोपारुणेक्षणः ।
खड्गं चक्रेश्वरीदत्तं करे कृत्वैवमब्रवीत् ॥ ८३ ॥
अरे! क्रव्याद! खेट! त्वमरिदावदवानलम् ।
रत्नप्रभसुतं रत्नचूडं मां नावगच्छसि ॥ ८४ ॥
खड्गाखड्गि तयोर्युद्धं वृत्तं विश्वभयङ्करम् ।
यद्दर्शनादजायन्त विस्मिता अमरा अपि ॥ ८५ ॥
अहो! पुंसोऽस्य शौण्डीर्यमहार्यममरैरपि ।
इति ध्यायन्नयं चित्ते राक्षसो विस्मयं ययौ ॥ ८६ ॥
स कुमारमवादीच्च कुमार! तव विक्रमात् ।
सुप्रसन्नं मनो मेऽभूत् कवित्वमिव सत्कवेः ॥ ८७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदेलापुरसंज्ञस्य पुरस्यास्य नरोत्तम! ।
राज्यश्रियमुपादाय कुरु मे सफलं वचः ॥ ८८ ॥
इमां काञ्चनमालां च, पाणिपीडनकर्मणा ।
सधर्मचारिणीभावं नीत्वा नन्दय मे मनः ॥ ८९ ॥
इति श्रुत्वा कुमारोऽपि मनस्येवं व्यभावयत् ।
चक्रेश्वर्या यदुक्तं मे सप्तमं दिनमद्य तत् ॥ ९० ॥
इति ध्यात्वा वचस्तस्य स्वीचक्रे नृपनन्दनः ।
रक्षोऽपि किंकरीभावं भेजे तद्भाग्ययोगतः ॥ ९१ ॥
कृत्वा तस्य कुमारस्य, रक्षो राज्याभिषेचनम् ।
उद्वसं तत्पुरं सर्वं चकार जनसंकुलम् ॥ ९२ ॥
चतुरङ्गचमूचक्रं परचक्रविजित्वरम् ।
तदग्रे प्रकटीकृत्य स्वयं रक्षस्तिरोदधे ॥ ९३ ॥
सर्वेऽप्यमात्यसामन्ता रत्नचूडमहीपतेः ।
बिभरामासुराज्ञां ते, शीर्षे शेषामिवानिशम् ॥ ९४ ॥
पट्टराज्ञीपदे तेनास्थापि काञ्चनमालिका ।
चिन्तामणिप्रभावाच्च तस्य कोशा भृता धनैः ॥ ९५ ॥
ततो विजित्य दुर्दान्तसीमान्तजगतीपतीन् ।
आसमुद्रं महीपीठमेकच्छत्रं चकार स ॥ ९६ ॥
पितुः स्मृत्वान्यदा वाक्यं सामन्तैरमितैर्युतः ।
रत्नचूडो नृपोऽचालीद्रत्नप्रभनृपं प्रति ॥ ९७ ॥
तस्य प्रस्थितसैन्यौघोद्धूतधूलिकदम्बकैः ।
व्योमापगापि संजज्ञे प्रोद्यज्जम्बालसंकुला ॥ ९८ ॥
चतुरङ्गचमूचक्रभारभुग्नफणागणे ।
फणीन्द्रे यत्प्रयाणेऽलमचलापि चलाजनि ॥ ९९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यद्यात्रासमये भेरीभाङ्काराकीर्णकर्णकैः ।
*चकम्पिरे धराधीशैर्वाति वाते द्रुमैरिव ॥ १०० ॥
देवैलापुरभूपालस्तवोपरि महाबलः ।
समायाति चरैरेवं, प्रोक्तो रत्नप्रभप्रभुः ॥ १०१ ॥
सोऽपि स्वसैन्यं संमील्याचलत्तत्संमुखं मुदा ।
वीरा हि समरारम्भं मन्यन्तेऽधिकमुत्सवात् ॥ १०२ ॥
परस्परं चमूचक्रं जनकाङ्गजयोस्तयोः ।
संग्रामायामिलत्कांस्यतालयामलवत् क्रमात् ॥ १०३ ॥
निवार्य वीरसंहारं ससंरम्भौ महारथौ ।
परस्परं प्रपेदाते रथारूढौ रणोत्सवम् ॥ १०४ ॥
गर्जन्तौ चण्डकोदण्डदण्डटङ्कारनिस्वनैः ।
वर्षतः स्म शरासारैर्नभोभाद्राम्बुदाविव ॥ १०५ ॥
शराः शरासनान्मुक्तास्ताभ्यामर्द्धपथे गताः ।
परस्परमखण्ड्यन्त रोरस्येव मनोरथाः ॥ १०६ ॥
रत्नप्रभोऽथ निःशङ्कं स्वपुत्रमविदन्नहन् ।
रत्नचूडोऽपि सापेक्षं जानानो जनकं निजम् ॥ १०७ ॥
यद्यद् गृह्णाति कोदण्डं, पिता तत्तत् तनूद्भवः ।
शरैः क्षुरप्रैश्चिच्छेद कुठारैरिव काननम् ॥ १०८ ॥
अच्छिद्यन्त कुमारेण क्रमेण धरणीपतेः ।
आतपत्रं पताका च रथो रणमनोरथः ॥ १०९ ॥
कान्दिशीको विशामीशश्चेतस्येवमचिन्तयत् ।
कृतः कथमनेनाहं छिन्नपल्लवशाखिवत् ॥ ११० ॥
कुमारप्रहितं बाणमक्षरावलिमालितम् ।
पुरः पतितमादाय, वाचयामास भूविभुः ॥ १११ ॥

---

* एष प्रयोगश्चिन्त्यः, धातोरकर्मकत्वात् चकम्पे नु इति संगतो भाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ज्ञात्वेति सहसा हर्षोत्कर्षोत्फुल्लविलोचनः ।
वत्सागच्छ मदुत्सङ्गं श्रयेत्याह महीपतिः ॥ ११२ ॥
कुमारोऽपि धनुर्मुक्त्वा महीलुलितमस्तकः ।
ननाम विनयानम्रो मुदा पितृपदाम्बुजम् ॥ ११३ ॥
उत्सङ्गसङ्गिनं सूनुं, विधाय वसुधापतिः ।
शिरश्चुम्बानन्दाश्रुजलैरभिषिषेच च ॥ ११४ ॥
पित्रा पृष्टः स्ववृत्तान्तं रत्नचूडो न्यवेदयत् ।
तं चाश्चर्यकरं श्रुत्वा विशामीशो विसिष्मिये ॥ ११५ ॥
वधूः काञ्चनमालापि ननाम श्वशुरं मुदा ।
वत्से! श्वश्रूः समाभूया इत्याशिषमदान्नृपः ॥ ११६ ॥
सिन्धुरस्कन्धमारूढौ पितृपुत्रौ* भुवो विभू ।
सोत्सवं विधृतच्छत्रौ, प्रविष्टौ रत्नपत्तनम् ॥ ११७ ॥
रत्नप्रभनृपोऽन्येद्युर्दत्त्वा राज्यं स्वसूनवे ।
**श्रीसुन्दर**गुरोः पार्श्वे, परिव्रज्यामुपाददे ॥ ११८ ॥
रत्नचूडनृपो राज्यद्वयमद्वैतसौख्यभाक् ।
पालयामास भूपालपालीनतपदाम्बुजः ॥ ११९ ॥
अन्येद्यु**र्नन्दनो**द्याने श्रीरत्नपुरमण्डने ।
समागात्केवलज्ञानी सूरिः **क्षेमंकरा**भिधः ॥ १२० ॥
समेत्य वनपालेन, रत्नचूडनरेश्वरः ।
सभायां वर्धयाञ्चक्रे गुरोरागमवार्त्तया ॥ १२१ ॥
तच्छ्रुत्वा वनपालाय तुष्टिदानं प्रदाय सः ।
नृपोऽगमद् गुरुं नन्तुं युतः काञ्चनमालया ॥ १२२ ॥
सूरिं प्रणिपनीपत्योपविष्टे विष्टपेश्वरे ।
भगवान् विदधे धर्मदेशनां पापनाशिनीम् ॥ १२३ ॥

---

* पितापुत्रौ इति पाठः समुचितः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भ्रामं भ्राममनन्तकायिनिचयेऽनन्ताननन्तान् भवान्,
पृथ्वीवारिकृपीटयोनिमरुतां कायेषु संख्यातिगान् ।
तांश्च द्वित्रिचतुःशरेन्द्रियगतौ संख्यागतान् मा मुधा,
कुर्वीध्वं नरजन्म पुण्यवशतः प्राप्तं कथंचिज्जनाः! ॥ १२४॥

(शार्दूलविक्रीडितम्)

श्रीरत्नचूडभूमीन्द्रः श्रुत्वैवं धर्मदेशनाम् ।
सूरिं प्रणम्य पप्रच्छ स्वरूपं पूर्वजन्मनः ॥ १२६॥
सूरिराह **शतद्वारपुरे** राजन्! पुरोऽभवः ।
वणिक्**चन्दन**नामा त्वं **कमला**महिलाप्रियः ॥ १२७॥
जायापती युवां श्रुत्वा **सुस्थिताचार्य**सन्निधौ ।
संस्तारदानमाहात्म्यं गृह्णीथः स्मेत्यभिग्रहम् ॥ १२८॥
आजीवितव्यमावाभ्यां साधुभ्यः साधुभक्तितः ।
संस्तारासनपीठान्नदानं देयमसंशयम् ॥ १२९॥
युवाभ्यां प्रतिपाल्यामुं चिरकालमभिग्रहम् ।
विधाय पुण्यं मृत्वा च प्रपेदे स्वर्ग आदिमः ॥ १३०॥
तत्र शाश्वतजैनार्चार्चनैर्भोगैश्च भासुरैः ।
मुदातिवाहयाञ्चक्रे क्षणवत्सागरद्वयी ॥ १३१॥
ततश्चन्दनजीवस्त्वं च्युत्वा रत्नपुरप्रभो! ।
रत्नप्रभस्य पुत्रोऽभू रत्नचूडाभिधानतः ॥ १३२॥
च्युत्वापि कमलाजीव एलापुरपुरेशितुः ।
पुरन्दरस्य पुत्र्यासीन्नाम्ना काञ्चनमालिका ॥ १३३॥
सेयं पूर्वभवस्नेहादिहापि त्वत्प्रियाजनि ।
संस्तारदानमाहात्म्याद्राज्यं च प्रापथुर्युवाम् ॥ १३४॥
इति श्रुत्वा गुरोर्वाणीं जातजातिस्मृती उभौ ।
श्राद्धधर्ममुपादाय जग्मतुर्निजमन्दिरम् ॥ १३५॥

Jain Education International          For Personal & Private Use Only          www.jainelibrary.org

दानशाला: प्रतिग्रामं जिनानां भवनानि च ।
विधाप्य शासनं जैनमेकच्छत्रं नृपोऽतनोत् ॥ १३६ ॥
वत्सराणां सहस्राणि प्रपाल्यैश्वर्यमेकदा ।
प्रासादशिखरारूढो, रत्नचूड: प्रियान्वित: ॥ १३७ ॥
ददर्श तालहिन्तालश्यामले जलदान्तरे ।
ऐन्द्रं धनुर्यमागारतोरणाभं वियोगिनाम् ॥ १३८ ॥ युगलम् ॥
विलोकयन्निदं राजा मनसीति व्यतर्कयत् ।
अहो व्योम्नि कथं भावा: स्वभावेन भवन्त्यमी ॥ १३९ ॥
एतच्चापमुपादाय धारासारै: पयोधर: ।
वर्षन् गर्जंश्च सोत्कर्षं ग्रीष्मं प्रहरति द्रुतम् ॥ १४० ॥
इत्थं पश्यत एवास्य सहसा वायुरंहसा ।
सञ्जह्रे जलदो राज्ञ: समं मोहेन तत्क्षणात् ॥ १४१ ॥
इति वीक्ष्य नृपो दध्यौ भावान् पश्यत पश्यत ।
मन्यते तान् कथं मूढो, भङ्गुरानपि शाश्वतान् ॥ १४२ ॥
धारासारैर्घनो वर्षन् संहृतो मरुता यथा ।
तथैव ह्रियतेऽत्यर्थं प्राणी धीरोऽपि मृत्युना ॥ १४३ ॥
यत्सौख्यं दिव्यमप्यग्निस्थितसूतवदस्थिरम् ।
तत्का मनुष्यभोगेषु नित्यता चिन्त्यते जनै: ॥ १४४ ॥
राज्यमन्त:पुरं सेना श्रिय: परिकरोऽपि च ।
तडिल्लोलमिदं सर्वं विदन्नपि न बुध्यते ॥ १४५ ॥
क्रियते पोषणा यस्य भोगाभोगैर्निरन्तरै: ।
तदप्यङ्गं न हि स्वीयं कृतघ्न इव जायते ॥ १४६ ॥
संसारासारतामेवं विमृश्य नृपपुंगव: ।
**चित्राङ्गदाभिधे** पुत्रे राज्यभारं न्यवेशयत् ॥ १४७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उप्त्वा निजधनं सप्तक्षेत्र्यां स प्रिययान्वितः ।
**श्रीसुव्रत**गुरोः पार्श्वे संवेगाद् व्रतमाददे ॥१४८॥
श्रीरत्नचूडो दयितासमेतस्तप्त्वा तपो दुस्तपमन्तरारीन् ।
विजित्य कैवल्यमुपार्ज्य चाशु शिवाङ्गनाकामुकतामुवाह ॥१४९॥
(उपजातिः)

एवं श्रुत्वा चन्दनचरितं जगदाश्चर्यविधायि त्वरितम् ।
पात्रे संस्तारादिकदानं भव्या! दत्त शिवैकनिदानम् ॥ १५० ॥ (मत्तावृत्तम्)

॥ इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ संस्तारकादिदानविषये श्रीचन्दनवणिक्कथा समाप्ता ॥

संस्तारकादिदानवैषयिकं चन्दनवणिग्दृष्टान्तमुक्त्वा सप्तमं महात्मनां शुश्रूषाकरणाख्यं दानस्वरूपं बृंहयन्नाह –

**वरचरणकरणधारणणिरयाणं रागरोसरहियाणं ।**
**सुस्सूसणाइकरणं निवारणं सयलदुरियाणं ॥ ५६ ॥**

व्याख्या – वरे परमार्थेन सुन्दरे ये चरणकरणे जिनवरप्रणीते के ते इत्याह –

वय[५] समणधम्म[१०] संजम[१७] वेयावच्चं[१०] च बंभगुत्तीओ[९] ।
णाणाइतियं[३] तव[१२] कोहणिग्गहा[४] इइ चरणमेयं ॥१॥
[ओघनिर्युक्ति–भा.–२]

पिंडविसोही[४], समिई[५], भावण[१२] पडिमा[१२] य इंदिय[५]निरोहो ।
पडिलेहण[२५] गुत्तीओ[३], अभिग्गहा[४] चेव करणं तु ॥२॥*
[ओघनिर्युक्ति–भा.–३]

इति प्रत्येकं द्वे सप्ततिभेदरूपे तयोर्यद्धारणं सम्यक्तया प्रति–

---

* तुलना–प्रवचनसारोद्धारे–गा०५५१/५६२... तथा दशवैका० हारि०वृत्तौ–२४२ पृष्ठम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पालनं तत्र निरतानां-सदा तल्लीनमानसानाम्, पुनः किंभूतानां ? राग-रोषरहितानां रागः स्त्र्यादिष्वभिष्वङ्गलक्षणो, द्वेषो-वैरिषु प्रद्वेष-करणं ताभ्यां रहितानां-मनोवाक्कायैर्दूरीभूतानां अर्थान्मुनीनां शुश्रूषादिकरणं-सेवनं प्राशुकान्नपानचिन्तारूपम्, सकलदुरितानां-निखिलसांसारिक-दुःखानां निवारणं-निषेधकं स्यादिति गाथार्थः॥

तत्फलं दृष्टान्तेन द्रढयन्नाह-

**सिरिबलिभद्दमुणीसरसंसेवणदाणओ मिगेणावि ।**
**जं बंभलोयपयवी पत्ता तं किं ण चुज्जकरं ॥ ५७॥**

व्याख्या- श्रीबलभद्रमुनीश्वरसंसेवनदानत आस्तां तावज्जनै-र्यन्मृगेणापि-पशुजातीयेनापि यद् ब्रह्मलोकपदवी-पञ्चमदेवलोक-सुखसंपत्, प्राप्ता-करतलकलितीकृता, तत्किं नाश्चर्यकरम् अपि तु विस्मयकरमिति गाथार्थः॥

भावार्थः कथानकगम्यस्तच्चेदम्-

**जम्बूद्वीपा**भिधे द्वीपे **तुङ्गी**नामा महीधरः ।
विद्यते **भरते** क्षोण्याः कीर्त्तिस्तम्भ इवोच्चकैः ॥ १॥
तस्मिन्नेको वसत्येणः स्वभावसरलाशयः ।
सर्वदा यस्य धीरस्ति केवलं तृणभक्षणे ॥ २॥
तमन्यदा **द्वारवती**दाहाज्जाते यदुक्षये ।
**जराकुमार**निर्मुक्तपृषक्तनिहते हरौ ॥ ३॥
**सिद्धार्था**भिधगीर्वाणगीर्वाणहतशुग्बलः ।
**अरिष्टनेमि**नादिष्टचारणश्रमणान्तिके ॥ ४॥
गृहीतसंयमः श्रीमान् **रामो** नाम महामुनिः ।
तपश्श्रीकीरलञ्चक्रे मराल इव मानसम् ॥ ५॥ कुलकम् ॥
तत्र चित्रतपःसक्तं विरक्तं पापकर्मतः ।
बलं दृष्ट्वा स सारङ्गो जातिस्मरणभागभत ॥ ६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततः संवेगमापन्नः कृतासन्नासनो मृगः ।
प्रावर्त्तत तमाराद्धुं विनेय इव सद्गुरुम् ॥ ७॥
यत्र यत्र प्रयात्येष राजर्षिस्तत्र तत्र सः ।
तद्गुणप्रीणितस्वान्तः, सारङ्गोऽप्यनुगच्छति ॥ ८॥
एकदा लाङ्गली साधुर्मासक्षपणपारणे ।
युगमात्रां भुवं पश्यन् भिक्षार्थं प्राविशत्पुरि ॥ ९॥
लाङ्गली-बलभद्रः ।
तदैका कामिनी साक्षाद्देवरूपविडम्बकम् ।
विनिरीक्ष्य ऋषिं मारशरगोचरतां गता ॥ १०॥
तद्रूपमोहितस्वान्ता कान्ता कूपतटस्थिता ।
कुम्भकण्ठभ्रमात्पुत्रकण्ठे पाशं न्यवेशयत् ॥ ११॥
यावत्कूपान्तरे मुग्धा क्षेप्तुं प्रववृते सुतम् ।
तावद् बलमुनीन्द्रेणागत्य सा प्रतिबोधिता ॥ १२॥
ततः स आत्मनो रूपं निन्दन् श्रीरोहिणीसुतः ।
व्यावृत्य गिरिमायातो वक्रान्मार्गमिव ग्रहः ॥ १३॥
नातः परमितः शैलाद् गत्वा ग्रामेऽथवा पुरे ।
उपादास्येऽशनं राम इत्यभिग्रहमग्रहीत् ॥ १४॥
तस्यैव काननं श्रित्वा स्मृत्वा तद्वैशसं हृदि ।
श्रीरामनामराजर्षिः स तेपे दुस्तपं तपः ॥ १५॥
राज्ञादिष्टोऽन्यदा कोऽपि रथकृत्काष्ठहेतवे ।
तत्राययौ परीवारपाथेयादिसमन्वितः ॥ १६॥
तस्यादेश्या मनुष्यौघास्तीव्रधारैः परश्वधैः ।
शाखिनोऽनेकशश्छिन्नानर्धच्छिन्नांश्च चक्रिरे ॥ १७॥
भोज्योद्यतेषु तेषु श्रीरामर्षिः पारणाय सः ।
तत्राजगाम तत्पृष्ठे सारङ्गोऽपि समाययौ ॥ १८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रथकारो मुनिं मूर्त्तिमन्तं धर्ममिवागतम् ।
विनिरीक्ष्य निजस्वान्ते चिन्तयामासिवानिदम् ॥ १९ ॥
अद्य मे सदने कल्पद्रुमः प्रादुरभूत्तराम् ।
यदेष प्राप्तवान् भोज्यसमये मुनिसत्तमः ॥ २० ॥
तदस्मै मुनये स्वान्तमोदकान्मोदकानहम् ।
वितीर्य वेगादात्मानं तारयामि भवार्णवात् ॥ २१ ॥
ततः स रथकृद् भक्तिभरनिर्भरमानसः ।
पञ्चाङ्गप्रणिपातेन प्रणनाम मुनीश्वरम् ॥ २२ ॥
ऊचे च भगवन्नेतान् सिंहकेसरमोदकान् ।
उपाददीयाः सन्तो हि प्रार्थनाभङ्गभीरवः ॥ २३ ॥
द्रव्यादिभेदतो ज्ञात्वा, प्रासुकान्मोदकान् मुनिः ।
उपाददे यथा स्वादुफलानि वनपालकः ॥ २४ ॥
तेन सत्पात्रदानस्य पुण्येन रथकृत्कृती ।
बबन्ध देवलोकायुरहो दानफलं कलम् ॥ २५ ॥
बलानुगः कुरङ्गोऽपि सुरङ्गोऽदो व्यचिन्तयत् ।
मन्येऽमुं धन्यमध्वन्यं येनायं पारितो यतिः ॥ २६ ॥
धन्योऽयमपि राजर्षिर्भिक्षार्थं न पुरान्तरे ।
गन्तव्यमिति यः स्वीयाभिग्रहं पर्यपूरयत् ॥ २७ ॥
किन्त्वेक एव दुष्कर्मवशात्पशुगतिं गतः ।
पात्रदानाक्षमस्तत्किं करोमि कृपणाशयः ॥ २८ ॥
परमेतदभूत्सुष्ठु यदेतौ पुरुषोत्तमौ ।
प्रदानादानसंपूर्णकामौ दिष्ट्याद्य वीक्षितौ ॥ २९ ॥
यावदेवं शुभध्यानविधानासक्तचेतसः ।
तिष्ठन्ति बलभद्रर्षिरथकारमृगा भृशम् ॥ ३० ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तावद्विधिवशादर्द्धच्छिन्नद्रुमर्मरुतेरितः ।
तेषां त्रयाणामुपरि पविपात इवापतत् ॥ ३१ ॥
ततस्त्रयोऽपि ते मृत्वा पञ्चमे त्रिदशालये ।
**पुष्पोत्तर**विमानश्रीभोगाभोगभुजोऽभवन् ॥ ३२ ॥
इति यथा बलिभद्रमुनिप्रभोर्मृगवरेण कृतं पदसेवनम् ।
इह तथा ह्यपरैरपि पूरुषैरनुदिनं क्रियतां सुखकाङ्क्षिभिः ॥ ३३ ॥
(द्रुतविलम्बितम्)

॥ इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ शुश्रूषादानविषये मृगकथा समाप्ता॥

शुश्रूषादानवैषयिकं मृगदृष्टान्तमुक्त्वा अष्टमं वन्दनदानस्वरूपं गाथायुगलेन प्ररूपयन्नाह-

**दोसापहारयं दिणयरव्व रयणायरं सुमेरुव्व ।**
**वंछियपयत्थसत्थाण साहणं कप्परुक्खुव्व ॥ ५८ ॥**
**सुगुरुचरणकमले वंदणदाणं विणिम्मियं संतं ।**
**वियरेइ णरसुरसिरिं जह दुग्गयणामणिगमस्स ॥ ५९ ॥**

व्याख्या-दिनकरवद्दोषापहारकम्, यथा दिनकरः-श्रीसूर्यो दोषापहारको रात्र्युच्छेदकः, तथा वन्दनकदानमपि दोषापहारकं कुकर्मादिदोषखण्डकं यदुक्तमागमे-

वन्दणएणं भंते ! जीवे किं जणयइ ? गोयमा ! वन्दणएणं णीयागोयं कम्मं खवेइ, उच्चागोयं णिबन्धइ, सोहग्गं च णं अप्पडिहयं आणाफलं णिवत्तेइ, दाहिणभावं च णं जणयइ ॥ [श्रीउत्तराध्ययने-२९/१०] सुमेरुवद्रत्नाकरम्, यथा सुमेरुः-कनकाचलो रत्नानां पद्मराग-पुष्परागादीनामाकर उत्पत्तिस्थानम्, अन्यत्रोत्पादाभावात्। तथेदमपि रत्नानामाकरः, कोऽर्थः रत्नानां ज्ञानदर्शनचारित्रलक्षणानामाकरो जन्म-भूमिः, कल्पवृक्षवद् वाञ्छितपदार्थसार्थानां साधकम्, यथा कल्पवृक्षः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सुरतरुर्वाञ्छितपदार्थसार्थानामभिलषितवस्तुविस्ताराणां संपादकस्तथेद-मपि सुगुरूणां-सुसाधूनां, चरणकमले-पदपङ्कजे, वन्दनकदानं-नमस्कारकरणं, विनिर्मितं-सत्कृतं सन्नरसुरश्रियं-मर्त्यामर्त्यलक्ष्मीं वितरति-ददाति। यथा दुर्गतनामनैगमस्य-दुर्गताभिधस्य वणिज इति गाथायुगार्थः ॥

भावार्थस्तु कथानकादभ्यूह्यस्तच्चेदम्-

अस्ति नाम्ना पुरं **पृथ्वीतिलकं** तिलकं भुवः ।
यत्राभिवीक्ष्यते दण्डशब्दश्छत्रेषु नो नृषु ॥ १॥
तत्राकृत्या च नाम्ना च, **सुन्दरो** वणिजां वरः ।
तस्यापि च तथैवासी**च्छ्रीमती** जीवितेश्वरी ॥ २॥
वल्लभेन समं भोगान्, भुञ्जानाया यथासुखम् ।
तस्या मृगीदृशः कोऽपि जीवः कुक्षाववातरत् ॥ ३॥
तस्मिन् गर्भस्थिते तातो ययौ कीनाशमन्दिरम् ।
जातमात्रे तु मातापि हहा विधिविजृम्भितम् ॥ ४॥
ततो विपन्नपितृकं दुःखावस्थागतं शिशुम् ।
विनिरीक्ष्य नरास्तस्य, **दुर्गते**त्यभिधां व्यधुः ॥ ५॥
कृपया ज्ञातिवर्गेण पाल्यमानः क्रमेण सः ।
बालभावं व्यतिक्रम्य समजन्यष्टवार्षिकः ॥ ६॥
स दुर्गतः परागारभिक्षया प्राणवृत्तिकृत् ।
अन्येद्युरिति दध्यौ यद् भिक्षेयं लाघवास्पदा ॥ ७॥
तदिमां गौरवप्राणहरीं विषधरीमिव ।
हित्वा कमप्यहं कुर्वे, व्यवसायं यशस्करम् ॥ ८॥
सोऽपि नीवीं विना न स्यादिति चित्ते विचिन्त्य सः ।
तृणकाष्ठाद्युपाहारैश्चकार प्राणजीविकाम् ॥ ९॥

नीवीम्-धनसमुच्चयम्, 'मूडी' इति गुर्जरभाषायाम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कियद्भिर्वासरैरेवं कुर्वता तेन किंचन ।
समुपार्ज्य धनं स्वीयचेतसीति व्यमृश्यत ॥ १० ॥
यदेष व्यवसायोऽपि, गर्हाकृद् व्यवहारिणाम् ।
तदेनमपि संत्यज्यान्नवाणिज्यं करोम्यहम् ॥ ११ ॥
ततोऽसौ दुर्गतो मुद्गग्रन्थिं कृत्वा स्वमूर्धनि ।
**श्रीअचलपुरं** याति विक्रीयायाति चालयम् ॥ १२ ॥
एवं प्रतिदिनं तेन कुर्वाणेनान्यदा पथि।
कायोत्सर्गस्थितः साधुर्मूर्त्तो धर्म इवैक्ष्यत ॥ १३ ॥
दर्शनादेव रोमाञ्चकञ्चुकीभूतविग्रहः ।
दुर्गतः सद्गुरोरङ्घ्रियुगले वन्दनं व्यधात् ॥ १४ ॥
भगवानपि तं भावि भद्रं विज्ञाय तत्क्षणात् ।
प्रतिमां पारयित्वा श्रीधर्माशिषमदान्मुदा ॥ १५ ॥
व्याजहार च हे भद्र! त्वया साधुसमागमे ।
अवश्यमेव कर्तव्यं वन्दनं दुःखखण्डनम् ॥ १६ ॥
अस्मिंश्च विहितेऽत्रैव प्राणी राज्यादिसौख्यभाक् ।
भवेत् परभवे स्वर्गापवर्गसुखभागपि ॥ १७ ॥
इति श्रुत्वा मुनिं नत्वा कृतकृत्यः स दुर्गतः ।
मुद्गग्रन्थिं पुनर्मूर्ध्नि धृत्वाऽचालीत्पुरं प्रति ॥ १८ ॥
तस्याग्रे व्रजतः साधुपदवन्दनदानतः ।
पदे पदे बभूवोच्चैः शुभा शकुनसंहतिः ॥ १९ ॥
इदानीमेव चेत्कोऽपि सिद्धपुत्रो मिलत्यलम् ।
तदा पृच्छामि शान्तानां शकुनानामहं फलम् ॥ २० ॥
इति ध्यानपरे तस्मिन्नकस्मात्सिद्धपुत्रकः ।
समियाय यतः पुण्योदये किं किं न जायते ॥ २१ ॥
स सिद्धपुत्रतोऽप्राक्षीच्छकुनानामलं फलम् ।
सोऽप्याहाद्य तवापूर्वः कोऽपि लाभो भविष्यति ॥ २२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदाकर्णनतो जातप्रमोदभरमन्थरः ।
उर्ध्वीकृत्य भुजद्वन्द्वं दुर्गतो नृत्यमातनोत् ॥ २३॥
अस्मिन्नवसरे श्रीमान् श्रीअचलपुरेश्वरः ।
राजा **विक्रमराजा**ख्यश्चतुरङ्गचमूवृतः ॥ २४॥
राजपाट्यामटन् दूरात्तं तथास्थितमैक्ष्य सः ।
सविस्मयस्तदाह्वानहेतवे प्राहिणोन्नरम् ॥ २५॥ युग्मम्॥
सोऽपि गत्वा तमाह स्म रे! त्वां केनापि हेतुना ।
राजाकारयति क्षिप्रमत एहि मया समम् ॥ २६॥
दुर्गतोऽप्यभयस्तेन समं तत्र गतो द्रुतम् ।
वसुन्धराधिराजेन पृष्टो नृत्यस्य कारणम् ॥ २७॥
सोऽप्याह शृणु भूपाद्य वर्त्मन्यागच्छता मया ।
श्रीसद्गुरुपदाम्भोजे वन्दनं विदधे मुदा ॥ २८॥
जज्ञिरे शकुनाः शान्ताश्चाभूद्दैवज्ञसंगमः ।
स मया तत्फलं पृष्टोऽप्राक्षील्लाभोऽद्य ते महान् ॥ २९॥
ततस्तच्छ्रवणोत्पन्नमुदो मे नृत्यकारणम् ।
इत्याकर्ण्य नृपोऽप्याह ग्रन्थौ वस्तु किमस्तु रे! ॥ ३०॥
मुद्गाः सन्तीति तेनोक्ते नृपश्चेतस्यचिन्तयत् ।
यदेतेभ्यः कियानायो भाव्यतोऽस्य मुधा मुदः ॥ ३१॥
मूलात्तमप्यहं छेत्ता कुठार इव भूरुहम् ।
ततस्तं नरमाकार्य नृप एवमशिक्षयत् ॥ ३२॥
रेऽधुनैव पुरं गत्वा, त्वया घोष्यं यदस्य हि ।
यः कोऽपि मुद्गानादाता तं राजा दण्डयिष्यति ॥ ३३॥
सोऽपि वेगात्पुरे गत्वा, पौराणां पुरतो जगौ ।
यः कोऽपि स्वशिरःक्लृप्तमुद्गग्रन्थिः समेति भोः! ॥ ३४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तस्य मुद्गा न लातव्या इति विक्रमभूपतेः ।
वचोऽथवा य एतांश्च ग्रहीता स करास्पदम् ॥ ३५ ॥
इत्युदित्वा गते राजपुरुषे सति दुर्गतः ।
*मुद्गविक्रीणनायाशु हट्टवीथ्यामुपाययौ ॥ ३६ ॥
तेन विक्रीयमाणोऽपि मुद्गग्रन्थिर्न कैरपि ।
अगृह्यत यतो राज्ञ आज्ञा कैरिह खण्ड्यते ॥ ३७ ॥
व्यचिन्ति च निजे चित्ते शकुनानामहो फलम् ।
आस्तां लाभोऽधुना तावन्नीव्या अपि हि संशयः ॥ ३८ ॥
भवतु प्रातरेतांश्च विक्रेष्यामीति चेतसि ।
निश्चित्य दुर्गतः सायंकाले शून्यापणेऽस्वपत् ॥ ३९ ॥
अथो निशीथे संवृत्ते देवतायतने क्वचित् ।
नान्दीनिनादस्तस्यागात्कर्णगोचरचारिताम् ॥ ४० ॥
अयं तु नृत्यसूचाकृदतस्तत्र प्रयाम्यहम् ।
लास्यं पश्यामि यद् दृष्टेः फलं द्रष्टव्यदर्शनम् ॥ ४१ ॥
ततो दुर्गतको नाट्यदिदृक्षुर्मुद्गपोट्टलम् ।
तत्रैव मुक्त्वा वेगेनाऽचालीद्देवकुलं प्रति ॥ ४२ ॥
मार्गे गच्छन्नसौ यावन्नृपवेश्मान्तिकं गतः ।
तावत्तद्भित्तिसंलम्बमानां मञ्चीं न्यभालयत् ॥ ४३ ॥
आरोहाम्यहमस्यां हि पश्यामि किल कौतुकम् ।
इति ध्यात्वाभयो यावन्मञ्चिकामारुरोह सः ॥ ४४ ॥
तावद्विक्रमराजस्य भूपस्य तनुजन्मनः ।
**अनङ्गसुन्दरी***नाम्न्या, धात्र्या* **मालतिका***ख्यया* ॥ ४५ ॥
आकृष्यत बभाषे च वत्से! सोऽयं तवेप्सितः ।
वरः स्वयंवरायातस्तद्विधेहि स्वमीहितम् ॥४६॥ (त्रिभिर्विशेषकम्)

*एष प्रयोगश्चिन्तनीयः, मुद्गविक्रयणायाशु इति शुद्धो भाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

बालापि चीनवासांसि परिधाप्य निबध्य च ।
कौसुम्भकण्डमंह्रौ तमुपयेमेऽग्निसाक्षिकम् ॥ ४७ ॥
पाणिग्रहमहे वृत्ते, मालती धनलोलुपा ।
तस्मात्प्रसाददानं सा, सानन्दा समयाचत ॥ ४८ ॥
मदङ्गच्युतवासांसि गृहाणेति ब्रुवन्नसौ ।
धात्र्याज्ञायि स्वरेणान्यः कोऽप्ययं स तु नो पुमान् ॥ ४९ ॥
इति धात्रीशपुत्र्यग्रे धात्र्योक्ते सा कृशोदरी ।
भयभीता तथैवाशु सौधात्तं भुव्यमोचयत् ॥ ५० ॥
ततः सा चिन्तयाचान्तचित्ता धात्रीमवोचत ।
हहा दैवादिदं जातमतः किं क्रियतेऽधुना ॥ ५१ ॥
सा प्राह पुत्रि! स्वाम्बायाः, पुरो गत्वेदमुच्यते ।
यतो व्यसनपाथोधौ निम्नगैः स्मर्यते हि सा ॥ ५२ ॥
ततो धात्रीयुतानङ्गसुन्दरी मातुरन्तिकम् ।
वेगादगात्तयादिष्टा सापि तत्पुरतो जगौ ॥ ५३ ॥
स्वामिन्यनङ्गसुन्दर्या गवाक्षविनिविष्टया ।
एकदा रूपलावण्यकिंकरीकृतमन्मथः ॥ ५४ ॥
राजमार्गे परिभ्राम्यन्, कश्चित्सामन्तनन्दनः ।
सुधी**रमरकेत्वा**ह्वः, स्वदृशोरतिथीकृतः ॥ ५५ ॥ युग्मम् ॥
तत्रासावनुरक्ता मां प्रजिघाय तदन्तिकम् ।
गत्वाहमपि सामन्ततनयं विनयोक्तिभिः ॥ ५६ ॥
अस्यां दृढानुरागं तं विधायाद्य निशार्द्धके ।
संकेतं मञ्चिकायोगाद् व्यधामेतत्करग्रहे ॥ ५७ ॥ युग्मम् ॥
स पुमानद्य केनापि हेतुना स्वप्रतिश्रुतम् ।
अप्यस्यास्तव नन्दिन्या, न व्यधात्पाणिपीडनम् ॥ ५८ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दैवादकस्मात् कोऽप्यन्योऽभ्येत्य मञ्चीप्रयोगतः ।
अस्याः करग्रहं कृत्वा जगाम स्थानमात्मनः ॥ ५९॥
स तावत्पूर्वमावाभ्यामौत्सुक्यान्नोपलक्षितः ।
पश्चाद्विवाहे सञ्जाते विदाञ्चक्रेऽर्त्तिनाशिनि ॥ ६०॥
एतद् दुश्चेष्टितं श्रुत्वा नृपकान्ता जगाद ताम् ।
आः पापे! किमिदं चक्रे, लोकद्वयविगर्हितम् ॥ ६१॥
कथंकारमियं वार्ता चण्डकोपस्य भूपतेः।
पुरो निवेद्यतेऽवद्या कथनीया तथापि हि ॥ ६२॥
ततो राज्ञी समुत्थायावसरं प्राप्य भूभुजे ।
भीतभीता सती पुत्र्याः कथां सर्वां न्यवेदयत् ॥ ६३॥
राजापि तामुभाकर्णि समाकर्ण्येत्यभाषत ।
प्राणप्रिये! व्रजेदानीं प्रातः कर्त्तास्मि निर्णयम् ॥ ६४॥
ततो दुर्गतको गत्वा साधुवन्दनजं फलम् ।
साश्चर्यं संस्मरंश्चित्ते, तस्मिन्नेवापणेऽस्वपत् ॥ ६५॥
अत्रान्तरे महामन्त्रि**सुमते**र्मतिशालिनः ।
वल्लभाया **जयावल्या**स्तनुजन्माष्टकोपरि ॥ ६६॥
सुता बभूव **मदनमञ्जरी** रतिजित्वरी ।
पितुर्मातुश्च यात्यर्थं, तनयेभ्योऽपि वल्लभा ॥ ६७॥ युग्मम्॥
अन्यदा सा गवाक्षस्था, संचरन्तं नृपाध्वनि ।
अपश्यन्नामरूपाभ्यां, श्रेष्ठिसूनुं **सुदर्शनम्** ॥ ६८॥
तदा निजप्रियापक्षपातं विदधतेव सा ।
पञ्चबाणेन बाणानां लक्षभावमनीयत ॥ ६९॥
तद्भाववेदिनी तस्या, वयस्या **पद्मिनी** जगौ ।
सखि! स्वं ब्रूह्यभिप्रायं, यथाहं साधयामि तम् ॥ ७०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

बाला प्राह वयस्ये! चेत्प्राणिते मे प्रयोजनम् ।
तदा सुदर्शनश्रेष्ठिसुतः संयोज्यतां मयि ॥ ७१ ॥
ओमित्युक्त्वा वयस्यापि ततो गत्वा सुदर्शनम् ।
तस्यां वचनभङ्गीभिरनुरागिणमातनोत् ॥ ७२ ॥
पाणिग्रहणसंकेतस्थानं शून्यापणे निशः ।
निशीथेऽद्य निवेद्यैषाभ्येत्यास्यै तन्न्यवेदयत् ॥ ७३ ॥
सुदर्शनोऽपि तां वार्ता, पितुरग्रे न्यवेदयत् ।
सोऽप्याह वणिजामेतत्कर्तुं वत्स! न युज्यते ॥ ७४ ॥
तदेतत्करणीयात् त्वं स्वधियं शिथिलीकुरु ।
इति तातगिरालानबद्धः सोऽस्थाद् गजेन्द्रवत् ॥ ७५ ॥
मन्त्रिपुत्र्यपि सामग्रीं कृत्वा वैवाहिकीं जवात् ।
तया वयस्यया युक्ता तत्र शून्यापणे ययौ ॥ ७६ ॥
सुप्तश्रेष्ठिसुतभ्रान्त्या दुर्गतं पद्मिनी जगौ ।
स्वामिन्नुत्तिष्ठ सा बाला त्वां वरीतुमुपस्थिता ॥ ७७ ॥
सोऽपि धूर्त्त इवोत्थाय, मौनवांस्तन्निवेदिताः ।
क्रियाः कङ्कणबन्धाद्या विवाहान्ताश्च संव्यधात् ॥ ७८ ॥
पाणिग्रहमहे जाते, पद्मिनी पारितोषिकम् ।
वराद्ययाचे सोऽप्यूचे लाह्यैनं मुद्गपोट्टलम् ॥ ७९ ॥
सखि! केनापि धूर्तेन तच्छलाद्वञ्चिते हहा ।
इत्युदित्वा भयभ्रान्तस्वान्ते ते जग्मतुर्गृहम् ॥ ८० ॥
ततो मातृपुरो बाला, स्वं वृत्तान्तं वयस्यया ।
कथयामास साप्येतत्पत्युरग्रे न्यवेदयत् ॥ ८१ ॥
सोऽप्युवाच प्रिये! कार्ये व्यतीते किं विधीयते ।
परं प्रभाते सञ्जाते सर्वं भव्यं विधास्यते ॥ ८२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कथं स ज्ञास्यतेऽमुष्याः सुताया दयितो मया ।
इति चिन्तातुरो मन्त्री प्रातर्भूपान्तिकं ययौ ॥ ८३ ॥
तस्मिन्नत्वोपविष्टे क्ष्मापालः कोपादभाषत ।
हे मन्त्रिंस्त्वयि मन्त्रीन्द्रमुद्रां शासति यत्पुरे ॥ ८४ ॥
अन्यायो वर्तते तत्किं सुप्त एव हि तिष्ठसि ।
मन्त्री प्राह महाराज! किमकृत्यमजायत ॥ ८५ ॥ युग्मम् ॥
नृपेण निजनन्दिन्याः प्रोक्ते व्यतिकरेऽखिले ।
उवाच सचिवः स्वामिन्! यथा तव तथा मम ॥ ८६ ॥
कथमित्युदिते राज्ञा सुमतिर्मन्त्रिवृत्रहा ।
जगाद निजनन्दिन्या अपि वृत्तं यथास्थितम् ॥ ८७ ॥
ततः कोपोत्कटः क्ष्मापः प्रोवाच सचिवेश! सः ।
आनाय्य हन्यतेऽन्यायकारी चौर इवाधमः ॥ ८८ ॥
सचिवोऽप्यूचिवान्नाथ! कर्तुमेवं न युज्यते ।
यद्वा हतेऽस्मिन्नाजन्म कन्या शल्यायते पितुः ॥ ८९ ॥
अन्यच्च लोके प्रसरत्ययशोऽतः सुतापतिम् ।
आनाय्य कन्यादानेन द्राक्कृतार्थय पार्थिव! ॥ ९० ॥
ततो मन्त्रिगिरा शान्तकोपाटोपः क्षितीश्वरः ।
पुरुषान् प्रेषयामास तदानयनहेतवे ॥ ९१ ॥
तेऽपि भ्रान्त्वा पुरे शून्यविपणौ कङ्कणाङ्कितम् ।
सुप्तं किञ्चिन्नरं दृष्ट्वोत्थाप्य च क्ष्मापमानयत् ॥ ९२ ॥
क्षितीश्वरोऽपि तं वीक्ष्योपलक्ष्य च सविस्मयः ।
प्राह मन्त्रिन्! स एवायं मुद्गपोट्टलविक्रयी ॥ ९३ ॥
यन्मया नगरे मुद्गविक्रये वारितेऽप्ययम् ।
लाभमीदृशमाप तदहो भाग्यविजृम्भितम् ॥ ९४ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततो नरवरोऽनङ्गसुन्दरीं निजनन्दिनीम् ।
तस्य दत्त्वा मुदा **पुण्यपाल** इत्यभिधां व्यधात् ॥ ९५ ॥
अमात्योऽपि तदीयांह्रौ कङ्कणद्वयमेक्ष्य सः ।
दध्यौ स्वमानसे यन्मे, सुताया अप्ययं पतिः ॥ ९६ ॥
तदस्मा अहमप्यात्मपुत्रीं मदनमञ्जरीम् ।
वितरामीति निश्चित्य, मन्त्री तस्मै सुतां ददौ ॥ ९७ ॥
तदा पुण्याधिकः पुण्यपालः कान्ताद्वयीवृतः ।
रतिप्रीतियुतोऽनङ्ग इव कामं व्यराजत ॥ ९८ ॥
हे जामातस्तवापूर्वाः शकुनाः फलिताः किल ।
इति भूमीभुजा प्रोक्ते, पुण्यपालः समालपत् ॥ ९९ ॥
नरेन्द्र! शकुनानां नो फलमीदृग्विधं भवेत् ।
किन्तु साधुपदाम्भोजद्वयवन्दनजं फलम् ॥ १०० ॥
एतच्च केनचित्पुण्याधिकेन किल देहिना ।
अवाप्यते भवाम्भोधौ, दक्षिणावर्त्तशङ्खवत् ॥१०१॥
इत्युक्त्वा विरते तस्मिन्नकस्माद्वनपालकः ।
समेत्य प्रणतिप्रह्वो भूपमेवमवर्धयत् ॥१०२॥
देवाद्य भवदुद्यानवने **सुस्थितसूरयः** ।
समैयरुः समासारप्रीणितक्षोणिमण्डलाः ॥१०३॥
एतदाकर्ण्य कर्णाभ्यां, जातरोमाञ्चकञ्चुकः ।
प्रदाय वनपालाय स्वर्णाद्यं पारितोषकम् ॥१०४॥
पुण्यपालमहामात्यसुमतिभ्यां समन्वितः ।
श्रीमद्विक्रमराजेन्द्रः सूरीन्द्रान् वन्दितुं ययौ ॥१०५॥ युग्मम् ॥
भक्त्या प्रणिपनीपत्योपविष्टे विष्टपप्रभौ ।
सूरयो दिदिशुर्धर्मदेशनां क्लेशनाशिनीम् ॥१०६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भो भव्या भववारिधौ निरवधौ जन्माम्बुपूर्णे स्फुरत्-
पापव्यापतरङ्गभङ्गिकलिते दुष्कर्मनक्रोद्धुरे ।
आधिव्याधिविधानवाडवहविर्घोरे नृणां मज्जताम् ,
श्राग् निस्तारकरी जिनस्य हि भवेदेकैव दीक्षातरी ॥१०७॥
(शार्दूलविक्रीडितम्)

एवं गुरुमुखाद्धर्मोपदेशं विनिशम्य सः ।
वैराग्यरङ्गितस्वान्तः क्ष्माशक्रस्तान् व्यजिज्ञपत् ॥१०८॥
भगवंस्तावदत्रैव, स्थातव्यं यावदात्मनः ।
राज्यभारं निवेश्यास्मिन् जामातरि समागमम् ॥१०९॥
गुरवोऽप्यवदन् राजन्मा प्रमादो विधीयत ।
ओमित्युक्त्वा परीवारवृतो नृपोऽगमद् गृहम् ॥११०॥
वितीर्य पुण्यपालाय, राज्यं विक्रमराजराट् ।
अमात्यसहितो दीक्षामग्रहीद् गुरुसन्निधौ ॥ १११॥
प्रपाल्य खड्गधाराग्रचङ्क्रमोपमितं व्रतम् ।
श्रीमद्विक्रमराजर्षिः सामात्यस्त्रिदिवं ययौ ॥ ११२॥
अथ श्रीपुण्यपालोऽपि, पालितावनिमण्डलः ।
साधुवन्दनकृत्यादिकरणे प्रगुणोऽभवत् ॥ ११३॥
स क्रमाद् गुरुसामग्र्यां जातायां दयितायुतः ।
परिव्रज्यामुपादाय वव्राज त्रिदशालयम् ॥११४॥
ततश्च्युत्वा विदेहेषु प्राप्य मानुष्यकं भवम् ।
दीक्षां लात्वा च स क्षीणकर्मा मोक्षमवाप्स्यति ॥११५॥
इति दुर्गतस्य चरितं हि मनसि विनिधाय धीधनाः ॥
साधुचलनयुगवन्दनकं विदधीत येन लभत श्रियोऽनघाः ॥११६॥
(सौरभकम्)

॥ इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ साधुवन्दनदानविषये दुर्गतककथा समाप्ता ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

साधुवन्दनकदानवैषयिकं दुर्गतकदृष्टान्तमुक्त्वा नवमस्य तुष्टिदानस्य स्वरूपमाह-

**जेसिं चित्तं मुणिजणमवलोइय सहरिसं हवइ णिच्चं ।**
**तेसिं सिद्धिमयच्छी करगहणेणं अणुग्गहणं ॥ ६० ॥**

व्याख्या- येषां-पुण्यवताम्, चित्तं-मनो, मुनिजनं-साधुलोकम्, अवलोक्य-दृष्ट्वा, नित्यं-सर्वदा, सहर्षं-सानन्दम्, भवति-जायते। तेषां विवेकिनाम्, सिद्धिमृगाक्षी-मुक्तिकामिनी, करग्रहणेन-विवाहेनानुगृह्णाति-साभिलाषमालिङ्गतीति गाथार्थः ॥

अतुष्ट्या तुष्ट्या च पात्रदानं दत्तं दुःखाय सुखाय च जायत इत्याह-

**दाउं सुविहियदाणं, विसायहरिसे कुणंति जे मणुया ।**
**णिहिदेव-भोगदेवुव्व, ते दुहसुहभायणं हुंति ॥ ६१ ॥**

ये मनुजाः सुविहितदानं सुष्ठु-शोभने, विधौ-कृत्ये, हिता-अभीष्टाः विहिता कीदृशास्ते? यदुक्तं-

जे णाणदंसणचरित्तपहेणुरत्ता, खंती इमाइ दस भेय सुधम्म सत्ता ।
सज्झायझाणणिरया णिरया अमाया, वुच्चंति ते सुविहिया विहियप्पमाया ।१ ।

तेभ्यो दानमशनादि दत्त्वा-वितीर्य, विषादं-पश्चातापम्, ये पुनर्धन्योऽहं कृतपुण्योऽहमिति मनसि हर्षं-तोषम्, कुर्वन्ति-विदधति। ते निधि-देवभोगदेववद् दुःखसुखभाजनम्-अभोगभोगस्थानम्, भवन्ति-जायन्त इति गाथार्थः॥ भावार्थः पुनरयम्, तथाहि-

समस्ति शस्तवस्तूनामालयः पूस्**तमालिनी** ।
या तुङ्गचङ्गचैत्याग्रजाग्रत्कलशमालिनी ॥ १ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तस्यामनन्यसामान्यसौजन्यक्षीरसागरः ।
चतुरङ्गमहासेनो, **मित्रसेनो** नृपोऽजनि ॥ २ ॥
तस्य मित्रं च मन्त्री च, **सुमन्त्रः** समजायत ।
यश्चतुर्विधबुद्धीनामेकमोकः क्षमातले ॥ ३ ॥
तत्रैयुरेकदा प्रज्ञावज्ञातसुरसूरयः ।
प्रबोधयन्तो जनतां, **विनयंधरसूरयः** ॥ ४ ॥
तेषामागमनं श्रुत्वा, मित्रसेनो विशांविभुः ।
सुमन्त्रमन्त्रिणा सार्द्धं, सूरीन्द्रान् वन्दितुं ययौ ॥ ५ ॥
प्रभुपादाम्बुजान्नत्वा, निविष्टे विष्टपेश्वरे ।
सूरयो विदधुर्धर्मदेशनां भवनाशिनीम् ॥ ६ ॥
भो भो भव्या भवाब्धौ ज्वरमरणजरानक्रचक्रप्रकीर्णे,
श्वासातीसारकासप्रसृतमुखझषक्षुब्धमध्यप्रदेशे ।
माद्यद्दारिद्रमुद्राबहलजलभृते मज्जतां प्राणभाजाम्,
दानं हस्तावलम्बो भवति शिवपदप्राप्तयेऽपि प्रकामम् ॥ ७ ॥ (स्रग्धरा)
उक्तं च-दानं महिमनिदानं, कुशलनिधानं कलङ्ककरिसिंहः ।
श्रीकलकण्ठीचूतः सिद्धिवधूसंगमे दूतः ॥ ८ ॥ (आर्या)
यथा भवन्ति कल्याणात्, किरीटकटकादयः ।
तथैव दानादानन्दसौभाग्यविभवादयः ॥ ९ ॥
यथा हि मलिनं वासो, वारिणा विशदं भवेत् ।
तथैव तुष्टिपूर्वं द्राक्, दानं भोगाय जायते ॥ १० ॥
अतुष्टितुष्टिदत्तस्य, प्रदानस्य प्रभावतः ।
एके स्युर्धनिनो भोगहीना अन्ये तु भोगिनः ॥ ११ ॥
इत्याकर्ण्य नृपः प्राह, नाथ! मिथ्या वचो न वः ।
किन्त्वीक्ष्यते धनाढ्यानामन्तरं न च भोगिनाम् ॥ १२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गुरवोऽचिन्तयन्नेवं, यदेष क्षोणिनायकः ।
दुर्विदग्धो विना स्पष्टदृष्टान्तेन न भोत्स्यते ॥ १३ ॥
तदाहुः सूरयो राजन्!, **कन्यकुब्ज**निवासिनौ ।
**निधिदेवभोगदेवौ,** संशयं ते हरिष्यतः ॥ १४ ॥
एवं गुरुमुखाम्भोजाद्देशनावचनामृतम् ।
निपीय मुदितस्वान्तो, राजा प्रासादमासदत् ॥ १५ ॥
अथो राजा निजामात्यं, समाकार्येत्यभाषत ।
सुमन्त्र! प्रत्ययाय त्वं, कान्यकुब्जपुरं व्रज ॥ १६ ॥
सुमन्त्रोऽपि नृपस्याज्ञां, किरीटीकृत्य मूर्धनि ।
तत्संशयापनोदाय, कान्यकुब्जपुरं ययौ ॥ १७ ॥
विंशतिस्वर्णकोटीनामाधिपत्यैकशालिनः ।
निधिदेवस्य गेहेऽगान्मन्त्री पृच्छन् जनव्रजम् ॥ १८ ॥
वेतालबालकोत्तालविशन्निर्गच्छदङ्गिनः ।
विशीर्णपर्णशालस्य, भग्नकुड्यस्य वेश्मनः ॥ १९ ॥
तस्य द्वारप्रदेशस्थं, मलीमसतनूलतम् ।
असंस्कृतशिरःकेशं, निशाचरमिवापरम् ॥ २० ॥
लम्बमानाधरद्वन्द्वं, किरिवद्दन्तुराननम् ।
दधानमुदरं स्थूलं, पिङ्गाक्षं ह्रस्वनासिकम् ॥ २१ ॥
कुर्वाणं कलहं रौद्रं, व्यवहारिनरैः समम् ।
वसानं वाससी जीर्णे, दारिद्र्यमिव मूर्त्तिमत् ॥ २२ ॥
नरं निरीक्ष्य सोऽप्राक्षीन्मन्त्री वैदेशिकोऽस्म्यहम् ।
द्वारपाल! लघु ब्रूहि, निधिदेवः क्व वर्त्तते ॥ २३ ॥ पञ्चभिः कुलकम् ॥
सोप्याख्यन्निधिदेवेन, साकं किं ते प्रयोजनम् ।
सचिवोऽप्यूचिवांस्तस्यातिथीभूय समागमम् ॥ २४ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सोऽपि मन्त्रिवरस्यैवं, वचः क्रकचदारुणम् ।
उभाकर्णि समाकर्ण्य, जातमृत्युरिवाब्रवीत् ॥ २५ ॥
निधिदेवोऽहमेवास्मि, भद्र! विद्धो हहानिशम् ।
क्व गच्छामि क्व तिष्ठामि, मार्गणैर्मार्गणैरिव ॥ २६ ॥
त्वमपि प्राघुणकेष्वद्य संख्यां मद्धाम्नि पूरय ।
सनिर्वेदं स इत्यूचे, कुरु साकं मयाशनम् ॥ २७ ॥
तद्वेश्म प्राविशन्मन्त्री, निश्चेतुं स्वामिनो वचः ।
लभन्ते मानतां भूपान्निर्णीतार्था हि सेवकाः ॥ २८ ॥
स तत्र स्थूलचिकुरां, वक्रास्यां ह्रस्वनासिकाम् ।
जठरं पिठराकारं, बिभ्राणां काकजङ्घिकाम् ॥ २९ ॥
कलहप्रगुणामुष्ट्रगामिणीं रासभस्वराम् ।
मलपिच्छिलवस्त्राङ्गीं, काचकस्तीरभूषणाम् ॥ ३० ॥
धूलीधूसरितास्तोकबालजालसमाकुलाम् ।
तदीयां दयितां मन्त्री, दृष्टवान् शूकरीमिव ॥ ३१ ॥ कुलकम् ॥
ततो यामद्वयेऽतीतेऽपश्रुवन्मन्त्रिपुङ्गवम् ।
उपवेशयति स्मासावशनायासनं विना ॥ ३२ ॥
कोपाटोपवशाद् धूलीधूसरैर्दारकैः समम् ।
असमञ्जसं लपन्ती, सा वराकी तयोः पुरः ॥ ३३ ॥
तेमनं करवेल्लादि, भोजनं कङ्गुकोद्रवम् ।
अतसीसंभवं तैलमत्यल्पं पर्यवेषयत् ॥ ३४ ॥ युग्मम् ॥
तेमनम्-व्यञ्जनम् ।
अत्यन्तमधुराहारभोजिनस्तस्य मन्त्रिणः ।
तत्कदन्नमधो नैव, याति स्म गलकन्दलात् ॥ ३५ ॥
*अत्रान्तरे पयःपूर्णं, पात्रं शिरसि धारयन् ।*
वण्ठोऽकस्मात्तथास्थस्य, मन्त्रिणोऽभ्यर्णमाययौ ॥ ३६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कदन्नभोजनेनासौ विदीर्णगलकन्दलः ।
मन्त्री सुधामुधाकारि क्षीरं वण्ठादयाचत ॥ ३७ ॥
सकृपः सोऽपि तद्दातुं तस्मै यावत्समुद्यत ।
तावद्दुर्जनमैत्रीव पयोभाण्डमभज्यत ॥ ३८ ॥
तद् भग्नं सचिवो ज्ञात्वा कथंचित्तत्कदन्नकम् ।
भुक्त्वाचाम्य च तद्गेहचेष्टितं वीक्ष्य खिन्नवान् ॥ ३९ ॥
स्वयमास्वाद्य दत्त्वा च, मन्त्रिणे खादिरीत्वचम् ।
निधिदेवः समं तेन, निःससार गृहाद् बहिः ॥ ४० ॥
*विवादानो वणिक्पुत्रैः कृपणो द्रविणाय सः ।
अतिवाह्य दिनं मन्त्रियुक् सायं गृहमाययौ ॥ ४१ ॥
तूलिकालालिताङ्गाय, सोऽस्मै शयनहेतवे ।
शीर्णं जीर्णं कुथत्कन्थं शयनीयमदापयत् ॥ ४२ ॥
कृपणेष्वादिमां रेखां तस्य पश्यन् धनानि च ।
कन्थावैगन्ध्यदुस्थोऽयं मन्त्र्यमुच्यत निद्रया ॥ ४३ ॥
कथं निशातिवाह्येयमिति चिन्तयतो हृदि ।
अकस्मादेव तस्येदृग् वचोऽगात्कर्णगोचरम् ॥ ४४ ॥
शठ! वण्ठ! किमित्यस्मै पयो दातुमभीप्सितम् ।
परं पारं मयानीतोऽस्यागोऽब्धेर्भाण्डभङ्गतः ॥ ४५ ॥
इत्यस्य वचसः प्रान्ते विस्मयस्मेरचेतसः ।
जगाम कामिनी कापि पश्यतस्तस्य मन्त्रिणः ॥ ४६ ॥
वण्ठे तस्मिन्नवज्ञातचरित्रे मन्त्रिवृत्रहा ।
चिन्ताचान्ततमस्वान्तः कथंचिदनयन्निशम् ॥ ४७ ॥
ततोऽसौ निधिदेवस्यानुज्ञामादाय मन्त्रिराट् ।
श्रेष्ठिनो भोगदेवस्य सपताकं सतोरणम् ॥ ४८ ॥

* एष प्रयोगश्चिन्त्यः, विवादयन् इति संगतो भाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तुङ्गताभ्रङ्कषं शातकुम्भकुम्भविभूषितम् ।
जगाम धाम सश्रीकं विमानमिव दैवतम् ॥ ४९ ॥ युग्मम् ॥
तस्मै विनीतविनयो द्वारपालोऽतिवेगतः ।
समुत्थाय स्वयं भद्रासनं दत्त्वेदमब्रवीत् ॥ ५० ॥
भद्रोपविश तावत्त्वमत्र यावन्नृपौकसः ।
श्रेष्ठी समेति तच्छ्रुत्वा सोऽप्यासनमशिश्रियत् ॥ ५१ ॥
तदा राजकुलादश्वाधिरूढं प्रौढविभवम् ।
भट्टथट्टकृतापारसारस्फारजयारवम् ॥ ५२ ॥
ददानं दानमर्थिभ्यश्चम्पाधिपमिवापरम् ।
श्रीभोगदेवमायान्तं दृष्ट्वा मन्त्री तमभ्यगात् ॥ ५३ ॥ युग्मम् ॥
सोऽपि संमुखमायातं सचिवं वीक्ष्य तार्क्षतः ।
अवतीर्य समालिङ्गदहो सुविनयः सताम् ॥ ५४ ॥
ततोऽसौ भोगदेवाख्यश्रेष्ठिराट् तेन मन्त्रिणा ।
सहितो महितो लोकैर्निजं सदनमासदत् ॥ ५५ ॥
सुरूपं सुभगं विज्ञमकलङ्कं विवेकिनम् ।
सोऽस्य पश्यन् परीवारं, वारंवारं विसिष्मिये ॥ ५६ ॥
वरासिं परिधाप्यास्य स सुगन्धोष्णशीतलैः ।
सलिलैः स्नपयामास सिचा चाङ्गममार्जयत् ॥ ५७ ॥
चीनांशुकेन संभूष्य सचिवं श्रेष्ठिपुंगवः ।
स्वेन साकं गृहार्चानामर्चनाकृतयेऽनयत् ॥ ५८ ॥
श्रेष्ठ्यमात्यौ प्रभावेनाप्रतिमाः प्रतिमाः प्रभोः ।
अष्टप्रकारपूजाभिः पूजयामासतुर्मुदा ॥ ५९ ॥
स्तोत्रैर्विचित्रैः संगीतैः सुगीतैश्च निषेव्य ताः ।
श्रेष्ठिमन्त्रिवरौ हृष्टावीयितुर्भोज्यमण्डपम् ॥ ६० ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भद्रासनेषु न्यस्तेषु प्रेष्यवर्गैरुपाविशत् ।
श्रीभोगदेवोऽमात्येन समं परिजनेन च ॥ ६१ ॥
तदग्रे सेवकैर्मुक्ता मुक्तारत्नविभूषिता: ।
सुस्थिरा मेरुभूमीवत्तपनीयचतुष्किका: ॥ ६२ ॥
विज्ञानसारा: सद्वृत्ता: स्थिरत्वगुणराजिता: ।
न्यस्ता: सज्जनचेष्टावत् कुण्डल्यस्तत्र सेवकै: ॥ ६३ ॥
कल्याणस्थूलकच्चोलकलिता स्थालमालिका ।
तत्र न्यस्तावतीर्णेव व्योम्नो मार्तण्डमण्डली ॥ ६४ ॥
पूर्णेन्दुवदना कुन्दरदना पद्मलोचना ।
सर्वाङ्गसुन्दराकारा, सर्वाङ्गीणविभूषणा ॥ ६५ ॥
नानाविधां रसवतीमानयन्ती सखीवृता ।
परिवेषाय तत्रागाद् गृहश्रीरिव तत्प्रिया ॥ ६६ ॥ युगलम् ॥
अत्रान्तरे तपस्तेजोनामवाचंयमेश्वर: ।
तन्मन्दिरमलञ्चक्रे पूर्वाद्रिमिव भास्कर: ॥ ६७ ॥
तं मुनिं मूर्त्तिमद्धर्ममिव वीक्ष्य वणिग्वर: ।
उत्थाय संमुखं भक्त्या नत्वा चेति व्यजिज्ञपत् ॥ ६८ ॥
ममाद्य मन्दिरे कल्पद्रुमकामघटादय: ।
भगवन्! भवदालोकादसंशयमवातरन् ॥ ६९ ॥
तत्स्वामिन्नेषणीयानि भोज्यवस्तूनि संप्रति ।
गृहीत्वा मां भवाम्भोधिमध्यात्तारय तारय ॥ ७० ॥
महात्मा तानि शुद्धानि, ज्ञात्वा पात्रमधारयत् ।
भोगदेवोऽपि सत्तुष्ट्या दानं भगवते ददौ ॥ ७१ ॥
ततो यतिपतिर्भिक्षां शुद्धां लात्वा वनं गत: ।
आत्मपुण्यवपु:पुष्टिकारणं पारणं व्यधात् ॥ ७२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पशुसेवकवर्गस्य भोज्यचिन्तां विधाय सः ।
श्रेष्ठी परिजनामात्ययुक्तो भोक्तुं प्रचक्रमे ॥ ७३ ॥
अस्मिन्नवसरे सूपकारेऽतिव्यग्रचेतसि ।
ओतुरुज्जासयामास सहसा दधिभाण्डकम् ॥ ७४ ॥
तदाशयभरभ्रान्तः सूपकारो व्यचिन्तयत् ।
कथंकारमहं पारमाप्स्याम्यस्यागसो हहा ॥ ७५ ॥
एवं पुनः पुनर्ध्यायन् स यावद् व्याकुलोऽजनि ।
तावद्दैवाद् बहिर्ग्रामाद्दधिभाण्डमढौकत ॥ ७६ ॥
मधुरं दधि सुस्निग्धं, सुधापिण्डमिवापरम् ।
तैर्भुक्त्वा चान्तमम्भोभिः कर्पूरक्षोदवासितैः ॥ ७७ ॥
त्रयोदशगुणोपेतं पञ्चसौगन्ध्यबन्धुरम् ।
ताम्बूलं दत्तवान् श्रेष्ठी मन्त्रिणे निजपाणिना ॥ ७८ ॥
सचित्रचित्रशालायां, तल्पे मञ्जुलतूलिके ।
क्षणं विश्रम्य स श्रेष्ठी प्रबुद्धो मन्त्रिणा समम् ॥ ७९ ॥
समस्तशस्तशास्त्राणां, वार्त्तां कुर्वाणयोस्तयोः ।
पश्यतोर्नृत्यगीतादि दिनं क्षणमिवागमत् ॥ ८० ॥
सायं देवार्चनं कृत्वा, धर्मध्यानं विधाय च ।
स भोगदेवानुज्ञातोऽलञ्चक्रे शयनीयकम् ॥ ८१ ॥
तद्भोगवैभवं भूयो भूयो भावयतः सतः ।
मन्त्रिणो निशि संजज्ञे पूर्ववद्दैवतध्वनिः ॥ ८२ ॥
रे पाप सूपकृत्पाश! निर्वासमसि वाञ्छसि ।
किन्तु ते दूषणं दध्युपायनाद्रक्षितं मया ॥ ८३ ॥
इति श्रुत्वा महामन्त्री दृशं दिक्षु विदिक्षु च ।
प्रक्षिपन्निर्निमेषाक्षीं द्युतिद्योतितदिग्मुखीम् ॥ ८४ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रणन्मञ्जीरगम्भीरध्वनैर्बधिरिताम्बराम् ।
वराम्बरधरां काञ्चिद्दिव्यां नारीं निरैक्षत ॥ ८५ ॥
मन्त्री ससंभ्रमं तल्पात्समुत्थाय सविस्मयः ।
तामभाषत कासि त्वं किमर्थं समुपेयुषी ॥ ८६ ॥
साप्याह कुलदेव्यस्मि, निधिभोगाग्रदेवयोः ।
अत्रायाता तवामात्य! संदेहापोहहेतवे ॥ ८७ ॥
शृणु भो! निधिदेवेन प्राग्भवे तुष्टिवर्जितम् ।
दानं दत्तमभूत्तेनाभोगी सत्यपि वैभवे ॥ ८८ ॥
भोगदेवः पुनः पूर्वभवे तुष्टिसमन्वितम् ।
दानं ददौ मुनीन्द्रेभ्यस्तेनासौ पुण्यभोगभाक् ॥ ८९ ॥
निधिदेवो धनाढ्योऽभूद् भोगदेवश्च भोगवान् ।
मयादर्शि विशेषोऽयं त्वया वाच्यश्च भूभुजे ॥ ९० ॥
एवं प्रबोध्य मन्त्रीन्दुं, कुलदेवी तिरोदधे ।
सोऽप्यनैषीन्निशाशेषमशेषमपि पारताम् ॥ ९१ ॥
ततः प्रातर्महामात्यः श्रेष्ठिनो भोगदेवतः ।
अवाप्तमानो विज्ञातप्रत्ययः स्वपुरं ययौ ॥ ९२ ॥
तयोर्वृत्तान्तकथनाद्विशल्यासंगमादिव ।
नृपस्वान्तस्थसंदेहशल्यमुद्धृतवानयम् ॥ ९३ ॥
गुरुवचोऽनुगतं चरितादभुतं समधिगम्य तयोः सचिवाननात् ।
स धरणीरमणीरमणस्ततः प्रभृति दानपरो दिवमासदत् ॥ ९४ ॥

(द्रुतविलम्बितम्)

इत्थं चरित्रं निधिदेवभोगदेवाह्वयोः श्रोत्रपथं प्रणीय ।
दानं ददीध्वं भविकाः! प्रमोदाद्, यथा भवेद्वः परमार्थसिद्धिः ॥ ९५ ॥

(उपजातिः)

इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ अतुष्टि-तुष्टिविषये निधिदेवभोगदेवश्रेष्ठिकथा समाप्ता ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अतुष्टि-तुष्टिवैषयिकं निधिदेव-भोगदेवश्रेष्ठिदृष्टान्तमुक्त्वा संप्रत्यपात्र-वक्तव्यतां गाथायुगलेनाह-

**पच्छागड तह णिण्हव, कुलगणसंघाण पच्चणीया य ।**
**तवणियमणाण-दंसणमुक्कधुरा चरणपरिहीणा ॥६२॥**

**सावज्जजोगणिरया, कषायविसयाइदोससमुवेया ।**
**सासणउवघायकरा, पण्णत्ता एरिस कुपत्ता ॥ ६३॥**

व्याख्या-पच्छागडत्ति-पश्चाद्गताः-संयमं विमुच्य गृहस्थ-भावमापन्नाः। तहित्ति तथा णिण्हवा-अमुक्तमुद्रा भगवद्वचोऽन्यथा-जल्पका जमाल्यादयः, अत्र प्राकृतत्वाज्जसशसोर्लुगिति विभक्तेर्लोपः। कुलित्ति कुलं-चन्द्रादिः, गणः-कोटिकाख्यः संघः-साधु-साध्वी-श्रावक-श्राविकारूपस्तेषां प्रत्यनीका-विघ्नकृतः। चः- समुच्चये, तवित्ति तपो-द्वादशविधम्, नियमो-नानाभिग्रहरूपः, ज्ञानं-पञ्चप्रकारम्, दर्शनं-सम्यक्त्वम्, तेषां मुक्ता-त्यक्ता धुरा-भारो यैस्ते। चरणित्ति, चरणं पञ्चाश्रवाद्विरमणमित्यादि सप्तदशभेदं यद् व्रतं तेन परिहीणा-विरहिताः शिथिलचारित्रा इति। सावज्जित्ति सावद्ययोगः-षड्विधजीवनिकायव्या-पादनव्यापारस्तत्र-निरता आसक्ताः। कषायत्ति कषायाः-क्रोध-मान-माया-लोभाः, विषयाः-पञ्चेन्द्रियाप्रशस्तव्यापारा आदिशब्दान्मोहादय एवंविधा ये दोषास्तैः समुपेता व्याप्ताः। सासणित्ति-शासनं-जिनमतं तस्योपघात-उड्डाहलक्षणस्तं कुर्वन्तीति, अत ईदृक्षा ये भवन्ति तानि कुपात्राणि प्रज्ञप्तानि-प्ररूपितानि, प्राकृतत्वान्नपुंसकलिङ्गस्य पुंलिङ्गता न दोषायेति गाथायुगार्थः॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कुपात्रेभ्यो दाने दत्ते किं स्यादित्याह-

**तेसिं विइण्णं दाणं, अणत्थहेउं हवेइ णियमेण ।**
**दुद्धंव्व सप्पदिण्णं, विसमविसत्ते परिणमइ ॥६४॥**

व्याख्या- तेभ्यः-प्राक्प्रकटितस्वरूपेभ्यः कुपात्रेभ्यो वितीर्णं दानं नियमेन-निश्चयेन अनर्थहेतुर्भवति-अपायहेतवे जायत इति, अत्रार्थे उपमानमाह-तद्दानं किमिव दुग्धमिव, यथा दुग्धं-क्षीरं सर्पदत्तं विषमविषत्वेन परिणमति, तथेदमपीति गाथार्थः॥

आस्तां तावद्दानं कुपात्रेषूपकारोऽपि कृतो महतेऽनर्थाय स्यादित्याह-

**इहपरभवभयहेऊ, जाएइ सया कुपत्त उवयारो ।**
**हरिणयणुग्घाडण, विज्जपुत्तचरिउव्व दुहजणओ ॥ ६५॥**

व्याख्या-कुपात्रोपकार [सदा-नित्यम्] इहपरभवभयहेतु-र्जायते। इह जन्मनि तावन्मृत्यवे परलोके त्वनादिभवभ्रमणाद्यनर्थ-सार्थाय स्यादिति भावः। स क इव हरिनयनोद्घाटनवैद्यपुत्रचरित-वद् दुःखजनकः, हरिः-सिंहस्तस्य ये नयने नेत्रे, तयोर्यदुद्घाटनं सज्जीकरणं तत्र योऽसौ वैद्यपुत्रो भिषक्तनयस्तस्य यच्चरितं वृत्तान्त-स्तद्वत् । यथा लोचनविकलसिंहोपकारकरणात्तेनात्रापि मृत्युरासादित-स्तथा कुपात्रोपकरणाद्-अपरोऽपि विषमां दशामासादयतीति गाथार्थः॥
भावार्थः कथानकगम्यस्तच्चेदम्-

**काशी**जनपदे रामारामरामारमास्पदे।
अस्ति **वाराणसी** नाम पुरी स्वःपुरजित्वरी ॥ १॥
यस्यां जिनगृहोत्तुङ्गशृङ्गजाग्रद्ध्वजाञ्चलाः ।
जनानां व्यजनायन्ते, प्रस्वेदाम्भःप्रशान्तये ॥ २॥
शशास जितशत्रुस्तां **जितशत्रु**नरेश्वरः ।
यत्कीर्त्तिहंसिका विश्वमानसेऽद्यापि खेलति ॥ ३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तस्यासीत्कश्चिदाश्चर्यकारिवैद्यकविद्यया ।
नीरोगीकृतभूलोको वैद्यो वैद्यगणाग्रणीः ॥४॥
दैवाद्दिवं गते तस्मिन्नखिलोऽपि परिच्छदः ।
महीमहेन्द्रमागत्य प्रणत्येति व्यजिज्ञपत् ॥५॥
देव! यो भवतामासीद् वैद्यो विद्याविशारदः ।
स विपेदेऽस्य तु स्थाने स्थाप्यः कोऽप्यङ्गिरुक्छिदे ॥६॥
इत्याकर्ण्य नृपः प्राह तद्भूः कोऽप्यस्ति वा न वा ।
तेनाप्युक्तं सुतौ तस्यापठितौ स्तः स्तनन्धयौ ॥७॥
राजाप्याह किमेताभ्यां निर्गुणाभ्यां विधीयते ।
इत्युदित्वा ततोऽन्यस्मै भिषजे तत्पदं ददौ ॥८॥
अथ तौ शैशवान्मुक्तौ दध्यतुर्यत्पितुः पदम् ।
परो भुङ्क्ते तदावाभ्यां जाताभ्यां खलु को गुणः ॥९॥
उक्तं-
पुत्तेहिं जायएहिं कवणु गुणु अवगुणु कवणु मुएहिं ।
जा बप्पीकीभूहडी चंपिज्जइ अवरेहिं ॥१०॥
यद्वा निरक्षरावावामतः किं कुर्वहेऽथवा ।
चिन्तयालमधीत्यर्थे कोऽप्युपायो विधीयते ॥११॥
येन तातश्रियं पाणिकुशेशयशयालुताम् ।
आनयाव इति ध्यात्वा तौ स्वान्निर्ययतुः पुरात् ॥१२॥
क्रमेण पृथिवीपृथ्वीं क्रामन्तौ तौ विवक्षितम् ।
पुरमासाद्य वैद्यस्य कस्यचित्सदनं गतौ ॥१३॥
अनिन्द्यवैद्यकग्रन्थपरमार्थप्रकाशकम् ।
श्रीवैद्यमभिवन्द्योपाविक्षतां तौ विचक्षणौ ॥१४॥
विज्ञाय समयं मूर्ध्नि योजिताञ्जलिकुड्मलौ ।
तौ वैद्यपुङ्गवं विज्ञापयामासतुरादरात् ॥१५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यथा क्षुति विनष्टायां सूर्यं स्मरति कश्चन ।
यथा दरिद्रो दातारं स्मरति प्रतिवासरम् ॥१६॥
तथोपरतसद्विद्याप्रदातृपितरौ द्रुतम् ।
स्मृत्वावां पितृकल्पान् वः पठनार्थमिहागतौ ॥१७॥
तत्त्वमावामुपाध्याय! दयामाधाय पाठय ।
यथा न हास्यतां यावोऽतिविद्वद्वैद्यपर्षदि ॥१८॥
इति श्रुत्वा कलाचार्यो हृद्यचिन्तयदेतयोः ।
अहो विनयनम्रत्वमहो वचनचातुरी ॥१९॥
तदेतयोर्महाभागधेययोः सुष्ठुपात्रयोः ।
विद्या निवेशितात्यन्तगुणौन्नत्याय जायते ॥२०॥
यदुक्तम्-स्थानेषु शिष्यनिवहैर्विनियोज्यमाना,
विद्या गुरुं हि गुणवत्तरमातनोति ।
आदाय शुक्तिषु बलाहकविप्रकीर्णै-
रत्नाकरो भवति वारिभिरम्बुराशिः ॥२१॥ (वसन्ततिलका)
कुपात्रे तु पुनः शास्त्ररहस्यं प्रतिपादितम् ।
महते स्यादनर्थायेत्यागमेऽपि निवेदितम् ॥२२॥
उक्तं च-
आमे घडे णिहित्तं जहा जलं तं घडं विणासेइ ।
तह सिद्धान्तरहस्सं, अप्पाहारं विणासेइ* ॥२३॥
तदनेन विमर्शेन, पूर्णं तूर्णं त्वमू शिशू ।
पाठयित्वात्मनो विद्यालतां सफलतां नये ॥२४॥
इति ध्यात्वा स तावाह हे वत्सौ! सुष्ठ्वनुष्ठितम् ।
यदत्र विद्याभ्यासार्थं मदन्तिकमुपागतौ ॥२५॥

---

* उपदेशमाला गा०३४६. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तद् भवद्भ्यां स्वजनकादन्योऽयमिति मानसे ।
अस्मरद्भ्यां मदभ्यर्णे विद्याभ्यासो विधीयताम् ॥ २६ ॥
महाप्रसाद इत्युक्त्वा, शुभे लग्ने भिषक्सुतौ ।
प्रावर्त्तेतामुपाध्यायसविधेऽध्ययनाय तौ ॥ २७ ॥
विनयेन विद्या ग्राह्या पुष्कलेन धनेन च ।
अथवा विद्यया विद्या नान्योपायश्चतुर्थकः ॥ २८ ॥
इति न्यायं निजे चित्ते स्मरन्तौ वैद्यनन्दनौ ।
पठन्तौ जगृहाते द्राग् विद्यां विद्यागुरोर्गुरोः ॥ २९ ॥
तौ परेद्यविरात्मानं, वैद्यविद्याविशारदम् ।
ज्ञात्वा कलागुरुं विज्ञपयाञ्चक्रतुरादरात् ॥ ३० ॥
तात! युष्मत्पदद्वन्द्वपर्युपास्तिविघातिनी ।
स्वधामगमनेच्छा वामुत्सुकीकुरुतेतराम् ॥ ३१ ॥
तत्तात! पूज्यपादानामादेशो यदि जायते ।
तदावां स्वपुरं गत्वा पितुः स्वीकुर्वहे पदम् ॥ ३२ ॥
इति श्रुत्वा कलाचार्यस्तयोर्भाविवियोगतः ।
सबाष्पलोचनद्वन्द्वो गद्गदस्वरमब्रवीत् ॥ ३३ ॥
हे वत्सकौ! युवां यातमित्यप्रियवचोऽथवा ।
मा गच्छतमिति व्यक्तं भवत्प्रस्थानविघ्नकृत् ॥ ३४ ॥
उत मौनेन तिष्ठामीत्यौदासीन्यमतः किमु ।
ब्रुवेऽथवा विमर्शेन पूर्णं स्वं धाम गच्छतम् ॥ ३५ ॥ युग्मम् ॥
तत्रापि हि न मोक्तव्यः शास्त्राभ्यासः कदाचन ।
नैकान्ततो विधातव्या तृष्णा परधनादिषु ॥ ३६ ॥
यतनीयं हि निर्लोभतया साधुचिकित्सिते ।
*कृपयानाथदीनानां कार्या व्याध्युपशान्तयः ॥ ३७ ॥*

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किं बहूक्तेन हे वत्सौ! युवाभ्यां न्यायवर्त्मनि ।
तथा प्रवर्त्तितव्यं हि यथा स्याद्विशदं यशः ॥ ३८ ॥
इति तेनानुशास्येमौ सत्कृत्य वसनादिभिः ।
प्रमोदेनाभ्यनुज्ञातौ स्वधामगमनोपरि ॥ ३९ ॥
यदाज्ञपयतेत्युक्त्वा प्रणम्य च कलागुरुम् ।
शुभे क्षणे भिषक्पुत्रौ प्रतस्थाते गृहं प्रति ॥ ४० ॥
निरन्तरप्रयाणेनोल्लङ्घयन्तौ महीतलम् ।
तौ हृष्टमानसौ यावदर्धमार्गे समागतौ ॥ ४१ ॥
तावद् वनान्तरे ताभ्यामितश्चेतश्च पर्यटन् ।
क्षुधातिबाधितः क्षामः केसर्यन्धो निरीक्षितः ॥ ४२ ॥
तदा कनीयसा भ्रात्रा, प्रोचे तात! निशम्यताम् ।
वराको दृष्टिविकलः सिंहोऽयमुपचर्यते ॥ ४३ ॥
ज्येष्ठेन जगदे बन्धो! समाकर्णय मे वचः ।
अयं हरिर्महाक्रूरो विवेकविकलः पशुः ॥ ४४ ॥
दृश्युदघाटितमात्रायां सत्यां प्रथममेव हि ।
आवां भक्षयितातस्त्वं परित्यज कदाग्रहम् ॥ ४५ ॥ युग्मम् ॥
अनुजोऽप्यब्रवीद् भ्रातरिदानीमपि किं तव ।
कृपयानाथदीनानां कार्या व्याध्युपशान्तयः ॥ ४६ ॥
इति तातोपदेशोऽयं विस्मृत्य प्रगतोऽथ सः ।
गरीयानवदद्वत्स! नैवासौ विस्मृतोऽस्ति मे ॥ ४७ ॥ युगलम् ॥
किन्तु नास्योपदेशस्य योग्यः केसर्यन्धो यदि ।
जिजीविषुस्तदा तिष्ठातिदुष्टाध्यवसायतः ॥ ४८ ॥
कनीयानभणद् भ्रातस्त्वं भीरुरिव लक्ष्यसे ।
उपकारेच्छुना पुंसा, चिन्त्ये न हि सुखासुखे ॥ ४९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उक्तं च–उपकृतिराभसिकतया क्षतिमपि गणयन्ति नात्मनो गुणिनः ।
जनयन्ति हि प्रकाशं दीपदशाः स्वाङ्गदाहेऽपि ॥ ५० ॥
तत्ताताशरणं सिंहमुपेक्ष्य मम गच्छतः ।
पुरतो वहतो नैव क्रमौ तत्करवाणि किम् ॥ ५१ ॥
अतोऽतिदुःस्थितस्यास्य कृपारञ्जितचेतसा ।
अवश्यं दृष्टिरुद्घाट्या यद् भाव्यं तद् भवत्विति ॥ ५२ ॥
नायं सदुपदेशार्ह इति मत्वाग्रजो जगौ ।
भद्र! तावत्प्रतीक्षस्व, यावद् वृक्षं श्रयाम्यहम् ॥ ५३ ॥
इत्युक्त्वा तत्क्षणाज्ज्येष्ठो बन्धुर्बुद्धिमहोदधिः ।
उच्चैस्तरं समीपस्थमारुरोहतरां तरुम् ॥ ५४ ॥
कनीयानप्युपेक्ष्य स्वां मृतिं गुह्यकतोऽञ्जनम् ।
विनिष्काश्याञ्जयाञ्चक्रेऽनार्यो हर्यक्षचक्षुषी ॥ ५५ ॥
अञ्जनस्य सवीर्यत्वात् झटित्युद्घटिते स्फुटम् ।
विलोचने हरिः सर्वं द्रष्टुं लग्नः समंततः ॥ ५६ ॥
अन्यन्मृगादिकं तत्रापश्यन् सिंहः क्षुधातुरः ।
तमेव लोचनोद्घाटयितारं भक्षति स्म सः ॥ ५७ ॥
ततोऽन्यत्र गते सिंहे भूरुहादवरुह्य सः ।
तेनैव मारितं बन्धुं वीक्ष्य दुःखादचिन्तयत् ॥ ५८ ॥
अहो अकस्मादीदृक्षो भ्रातुर्मरणलक्षणः ।
महाननर्थः संजज्ञे तदहं करवाणि किम् ॥ ५९ ॥
यद्वा जातस्य पुंसो हि ध्रुवं मृत्युर्मृतस्य च ।
ध्रुवं जन्मेति निश्चित्य वैद्यपुत्रोऽचलत्पुरः ॥ ६० ॥
क्रमेण वैद्यपुत्रः स्वां क्षेमेण पुरमागतः ।
जितशत्रुनृपं स्वस्त्ययनेनैवाभ्यनन्दयत् ॥ ६१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विद्यया रञ्जितो राजा तस्मै प्रादात्पितुः पदम् ।
व्रजन्तु यत्र तत्रैव गुणिनो गौरवास्पदम् ॥ ६२ ॥

ततो लब्धप्रसादोऽश्वाधिरूढो वैद्यनन्दनः ।
सामन्तादिजनैर्युक्तः सोत्सवं गृहमागमत् ॥ ६३ ॥
साधुलोकोपकारेषु निरतोऽविरतोद्यतः ।
सोऽर्जयित्वा यशोलक्ष्मीं भुक्त्वा सुगतिभागभूत् ॥ ६४ ॥
इति विभाव्य भिषक्तनुजन्मनश्चरितमात्मविघातसुदारुणम् ।
उपकृतिं न कुपात्रजने क्वचिद्वितनुतां सुकृती हितहेतवे ॥ ६५ ॥
(द्रुतविलम्बितम्)

इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ कुपात्रोपकारदानविषये वैद्यसुतकथा समाप्ता ॥

कुपात्रोपकारदानवैषयिकीं वैद्यसुतकथामुक्त्वा साधुभ्यः कीदृगाहारादि न दीयते इत्याह–

**जं परउवघायकरं पडिकुट्ठं अत्तणो अकित्तिकरं ।**
**सुविशुद्धं पि न देयं असणचउक्कं जईणं तं ॥ ६६ ॥**

व्याख्या–यत्परोपघातकं–परप्राणितापहारि, प्रतिकुष्टं–सिद्धान्तनिषिद्धम्, आत्मनोऽकीर्त्तिकरं धिगमुं दुष्टात्मानमद्रष्टव्यमुखमित्याद्ययशस्करम्, तत्सुविशुद्धमपि–उद्गमादिदोषमुक्तमपि अशनचतुष्कमशन–पान–खादिम–स्वादिमरूपम् यतिभ्यो न देयमनर्थहेतुत्वादिति गाथार्थः ॥

पात्रेभ्य ईदृशमशनादिकं वितीर्णं सदत्यर्थमनर्थाय जायत इत्याह–

**विससरिसं कडुतुम्बं दाऊणं खवयसाहुपारणए ।**
**पिच्छह णागसिरीए अणुहविया दुक्खरिंछोली ॥ ६७ ॥**

व्याख्या–विषसदृशं प्राणिप्रणाशकत्वाद् गरलप्रायम्, कटुतुम्बं–

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कटुतुम्बिकाफलम्, क्षपकसाधुपारणके-मासिकभक्तकानगारपारणे, दत्त्वा-वितीर्य, नागश्रिया-सोमदेवधिग्जातिजायया, दु:खरिंछोली-इहपरभवासाततितिरनुभूता-अनुबभूवे, अतो भो भव्या! यूयं प्रेक्षध्वं-पश्यतेति गाथार्थः ॥

भावार्थः पुनरयम् तथाहि-

**भरते**ऽस्ति पुरी **चम्पा** यन्निकेतनकेतनैः ।
रविस्यन्दनगन्धर्वाः स्खलयन्ते चतुरा अपि ॥ १ ॥
तत्र विप्रास्त्रयः सन्ति वेदविद्याविशारदाः ।
**सोमदेवः सोमभूतिः सोमदत्तश्च** सोदराः ॥ २ ॥
तेषां क्रमात्प्रियास्तिस्रो नृपाणामिव शक्तयः ।
**नागश्रीर्भूतयज्ञश्री**संज्ञिके विज्ञताश्रिताः ॥ ३ ॥
तैरन्योन्यं समालोच्येयं स्थितिर्बान्धवैः कृता ।
यद् भोक्तव्यं क्रमादेकबन्धोर्गेहेऽखिलैरपि ॥ ४ ॥
नागश्रीरन्यदा स्वीयवारकाहेऽतिहर्षतः ।
सरसां व्यञ्जनै रम्यां चक्रे रसवतीं रयात् ॥ ५ ॥
तया मतिविमोहेन पक्वतुम्बीफलं कटु ।
अनेकद्रव्यसंस्कारमनोहरमपच्यत ॥ ६ ॥
तस्य स्वरूपं विज्ञाय पाकान्ते पापकर्मतः ।
सा स्मरन्ती बहुद्रव्यव्ययं नौज्झद् दुराशया ॥ ७ ॥
हालाहलमिव क्वापि तच्च तुम्बीफलं द्विजी ।
संगोप्य स्थापयामास ही विपाकः कुकर्मणाम् ॥ ८ ॥
स्वैरं ते सपरीवारा जीवितेश्वरदेवराः ।
तयान्यैर्भोजिता भोज्यैस्ततो गेहाद् बहिर्गताः ॥ ९ ॥
अथ चम्पापुरोद्याने ज्ञानभासितभूतलाः ।
समीयुर्**धर्मघोषा**ख्याः सूरयः सपरिच्छदाः ॥ १० ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तेषां **धर्मरुचि**र्नाम विनेयो मासपारणे ।
गतो नागश्रियो गेहं सर्पास्यमिव दर्दुरः ॥ ११ ॥
अस्मिन्नर्थव्ययः पाकश्रमश्च स्तान्न मे वृथा ।
अयं च भिक्षुर्भिक्षार्थी, तोषितोऽनेन जायताम् ॥ १२ ॥
इति निश्चित्य सा तस्मै कटुतुम्बीफलं ददौ ।
आत्मनः सौख्यवृक्षाय दवदानमिव ध्रुवम् ॥ १३ ॥
ततो यतिः समभ्येत्य सूरिभ्यस्तुम्बिकाफलम् ।
दर्शयामास तद्वीक्ष्य गुरवोऽप्यब्रुवन्निति ॥ १४ ॥
वत्स! नागश्रिया दुष्टभावादज्ञानतोऽथवा ।
कटुतुम्बीफलं दत्तं, विषवत्प्राणघातकम् ॥ १५ ॥
तदेतदुज्झ यत्नेन प्रासुके स्थण्डिले क्वचित् ।
सोऽप्यवाप्य गुरोराज्ञां विज्ञोऽगान्नगराद् बहिः ॥ १६ ॥
तद्बिन्दुं पात्रतो भूम्यां च्युतं सन्तं पिपीलिकाः ।
आस्वाद्य म्रियमाणास्ताः स विभाव्येत्यचिन्तयत् ॥ १७ ॥
यदेतद्बिन्दुमात्रेण, जायते जन्तुसंक्षयः ।
तदस्मिन्नुज्झिते जीवाः के के स्युर्न हि भस्मसात् ॥ १८ ॥
भुक्तेऽस्मिन् स्यान्ममैकस्य मृत्युस्त्यक्ते च देहिनाम् ।
विचार्येति स्वयं साधुर्बुभुजे तत्फलं मुदा ॥ १९ ॥
तत आराधनां कृत्वोपशमश्रेणिमाश्रितः ।
विपद्योत्पद्यते स्मर्षिः **श्रीसर्वार्थे** सुरोत्तमः ॥ २० ॥
कस्माद् धर्मरुचेर्जातो विलम्ब इति वीक्षितुम् ।
सूरयः प्रेषयाञ्चक्रुर्मुनिसंघाटकं बहिः ॥ २१ ॥
तं विपन्नं मुनी दृष्ट्वा तदीयोपकृतिं ततः ।
लात्वा गुरुपदान्ते च मुक्त्वा तद्वृत्तमूचतुः ॥ २२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ज्ञानातिशयतो ज्ञात्वा तद्वृत्तान्तं यथास्थितम् ।
गुरवः कथयामासुर्निजान्तेवासिनां पुरः ॥ २३ ॥
ततः कुतोऽपि तन्मृत्युं सोमदेवादयो द्विजाः ।
नागश्रिया कृतं ज्ञात्वा, तां गेहान्निरवासयन् ॥ २४ ॥
तर्ज्यमाणा पुरन्ध्रीभिर्निन्द्यमाना पुरीनरैः ।
आहन्यमानालर्कीव शिशुभिर्यष्टिलेष्टुभिः ॥ २५ ॥
अलर्की-शूनी ।
भिक्षामलभमाना सा क्षुत्तृषापीडिताधिकम् ।
पुरे तत्राभ्रमत् पापमिहैव हि फलेग्रहि ॥ २६ ॥ युग्मम् ॥
दुष्टकुष्ठादिरोगौघपूयक्लिन्नाखिलाङ्गिका ।
अलोलुठीदिलापीठे नागश्रीर्नागिनीव सा ॥ २७ ॥
शाकिनीव स्मरन्ती सा रौद्रध्यानं दुरात्मिका ।
मृत्वागमद् महादुःखां, **मघाख्यां** नारकावनीम् ॥ २८ ॥
इत्थं स्वरूपं परिभाव्य भव्या, नागश्रियो दुर्गतिपातहेतु ।
पात्रे कुदानं न कदापि कार्यं यद्यस्ति वाञ्छा शिवसौधवासे ॥२९ ॥(इन्द्रवज्रा)

॥ इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरि-विरचितायां श्रीदानोपदेशमालावृत्तौ कुदानविषये नागश्रीकथा समाप्ता ॥

कुदानवैषयिकं नागश्रीदृष्टान्तमुक्त्वा पात्रादिसामग्र्यां सत्यामपि येषां न दानविषये धिषणा तेषां किं स्यादिति गाथाद्वयेनाह-

**पुव्वकयकम्मवसओ पत्तेवि णिरग्गले विहवजाए ।**
**जेसिं ण दाणबुद्धी तण्हाए तरलियमणाण ॥६८॥**
**तेसिं सुपत्तपत्ती मणुयभवं जीवियं तह धणं च ।**
**घणियं सयलं विहलं मम्मणसिट्ठिव्व पडिहाइ ॥६९॥**

व्याख्या-पूर्वकृतकर्मवशतः-पाश्चात्यभवोपार्जितपुण्यकर्म-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

योगान्निरर्गले-प्रचुरे, विभवजाते-धननिचये, प्राप्तेऽपि-लब्धेऽपि, येषां-पाप्मनाम्, तृष्णया तरलितमनसां-धनसंचयरूपतया लुब्धचेतसाम्, न दानबुद्धिर्न दानविषये मतिः, अहो कृपणतायाः कोऽपि प्रकर्षः। यत्परमन्यस्मै दानं ददानं विलोक्य कृपणो महद्दुःखमनुभवति। यतः-किविणु पुच्छइ अण्णकिविणस्स,

कइं भाइय दुम्मणउं मग्गियं तुमादिण्णु कस्सइ ।

ण हु भाइय दिण्णुमइं अवरु देइ महु हियउ फुट्टइ ॥१॥

तसु दीयंता देखि करि लंघण पंच करेउं ।

अहवा भाइय तहिं समइ झंप हुयासणि लेउं ॥२॥

तेसिंत्ति-तेषामकृतसुकृतानाम् सुपात्रप्राप्तिः-सुसाधुलब्धिः, मनुष्यभवो-मानुषं जन्म, जीवितं-जीवितव्यम्, तथा धनं-द्रव्यम्, चः- समुच्चये। घणियम्-अत्यर्थम्, सकलं-सर्वम्, विफलं-निरर्थकम्, प्रतिभाति-प्रतिभासते। कस्येव मम्मणश्रेष्ठिवत्, यथा तस्यात्यन्तकार्पण्यादियं सामग्री सती निरर्थिकाभूत्तथापरस्यापीति गाथायुगार्थः॥ भावार्थस्तु संप्रति प्रपञ्च्यते स चायम् ॥

**मगधे**ऽस्त्यखिलश्रीणां गृहं **राजगृहं** पुरम् ।

यत्र निस्त्रिंशताशब्दः श्रूयतेऽसिषु नो नृषु ॥ १॥

तत्राभूद् दूरितारातिश्रेणिः **श्रेणिक**भूपतिः ।

यस्यानिशं स्वयं शक्रश्चक्रे सम्यक्त्ववर्णनम् ॥ २॥

तस्यासी**च्चेल्लणा**देवी यस्याः शीलं सुनिर्मलम् ।

रूपं चात्यद्भुतं वीक्ष्य, कैः कैः शीर्षं न घूर्णितम् ॥ ३॥

तदा दयितया साकं भोगाननुभवन्नृपः ।

समयं गमयाञ्चक्रे दोगुन्दक इवामरः ॥ ४॥

अन्यदा दुर्जनेनेव, ग्रीष्मेण परितापितान् ।

नृनाश्वासयितुं वर्षासमयः सन्निवाययौ ॥ ५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदाभिनवजीवेशागमने वसुधावधूः ।
तत्कालोत्थाङ्कुरैर्नीलं पर्यधत्तेव कञ्चुकम् ॥ ६ ॥
प्रादुरासीत्तरां विद्युज्झात्कारो गगनाङ्गणे ।
वियोगिनीजनप्राणहरणे यमदूतवत् ॥ ७ ॥
समग्रजगदानन्दजनकोऽपि वियोगिनाम् ।
जनानां गर्जितारावः कर्णशूल इवाभवत् ॥ ८ ॥
आशामृगीदृशीहाराकाराः स्फारा धाराधरः ।
धारा विकिरति स्मारं केकिदत्तमुदांभराः ॥ ९ ॥
प्रौढिं गतेन तेनाभ्रपटलैर्हेलिमण्डलम् ।
तिरोहितं हिताय स्यात् किं खलानां खलूदयः ॥ १० ॥
वाहिन्यो नीचगामिन्यः कुलटा इव जज्ञिरे ।
मार्गा अपि भृशं पङ्काविला दुर्जनचित्तवत् ॥ ११ ॥
अखण्डधारमम्भोदे परितः परिवर्षति ।
समस्तमपि भूपीठं नावातार्यमजायत ॥ १२ ॥
अस्मिन्नवसरे राजा राज्ञ्या चेल्लणया सह ।
प्रदोषसमये सप्तभूमिकं सौधमासदत् ॥ १३ ॥
तत्रस्था चेल्लणा पूरागतसिन्धुप्रवाहतः ।
महाकष्टेन काष्ठानि समाकर्षन्तमुच्चकैः ॥ १४ ॥
कृतकच्छोटकं कंचिन्मनुष्यमतिदुःस्थितम् ।
समालोक्य प्रजापालपुरस्तादित्यभाषत ॥ १५ ॥ युग्मम् ॥
प्राणेश! श्रूयते चैवं यन्नृपैर्जलदैरिव ।
भृता भ्रियन्ते यत्नेन, त्यज्यते शुषिरो नरः ॥ १६ ॥
इत्याकर्ण्य सकर्णानां वर्ण्यो वर्णपतिर्जगौ ।
प्राणप्रिये! किमेवं त्वं, सोपलम्भं प्रजल्पसि ॥ १७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततः साह विभो! पश्य कथमेतेन दुःखिना ।
रौद्रायाः सरितः काष्ठाकृष्टिक्लेशोऽनुभूयते ॥ १८ ॥
तदेनं धनदानेन कुरुष्व सुखशालिनम् ।
ता एव हि श्रियः श्लाघ्याः याः स्युः सर्वोपकारिकाः ॥ १९ ॥
इति श्रुत्वा विशामीशस्तमाकार्य समालपत् ।
भद्र! कस्त्वं किमित्येवं त्वयात्मा क्लिश्यतेऽधिकम् ॥ २० ॥
ततः स प्राह भूपालात्र वास्तव्योऽस्मि मम्मणः ।
श्रेष्ठी वृषभयुग्मार्थमेवं क्लिश्यामि संततम् ॥ २१ ॥
राजा जगाद हे श्रेष्ठिन्! वृषभाणां शतं तव ।
वितरिष्यामि तन्नूनममुं क्लेशं परित्यज ॥ २२ ॥
मम्मणः प्राह राजेन्द्र! त्वं न जानासि मे वृषौ ।
यदेकोऽनेकशो द्रव्याण्यर्जयित्वा कथंचन ॥ २३ ॥
रत्नैर्निर्माय संपूर्णोचक्रेऽन्यश्चावशिष्यते ।
अतस्तत्पूरणायायं प्रयासः प्रविधीयते ॥ २४ ॥ युगलम् ॥
राज्ञा निजगदे भद्र! स्वोक्षाणौ मे प्रदर्शय ।
महाप्रसाद इत्युक्त्वा ततोऽसौ मम्मणो वणिक् ॥ २५ ॥
देव्या चेल्लणया सार्धं गृहे नीत्वा नरेश्वरम् ।
वृषभौ रत्ननिर्वृत्तौ ज्योतीरम्यौ न्यभालयत् ॥ २६ ॥ युग्मम् ॥
प्रजाप्रभुरभाषिष्ट श्रेष्ठिन्नेतत्सदृग्मम ।
कोशे नो एकमप्यस्ति रत्नं तत्करवाणि किम् ॥ २७ ॥
तथापि हि त्वमेवास्य द्वितीयस्य ककुद्मतः ।
संपूर्णीकरणायालं त्वत्तो नान्यः पुमानिह ॥ २८ ॥
परं त्वमपि नो काष्ठैरमुं पूरयितुं प्रभुः ।
तत्त्वयायं कथं पूर्णीकर्त्तव्यस्तन्निवेदय ॥ २९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सोऽप्यूचे नृपते! द्रव्योपार्जनाय वणिक्सुताः ।
स्थलमार्गेऽम्बुमार्गे च प्रेषिताः सन्ति केचन ॥ ३० ॥
कृषिप्रभृतिकृत्येषु केचिच्च विनियोजिताः ।
विद्यते नियतं यस्माद्वणिजानामियं स्थितिः ॥ ३१ ॥
नृपः स प्रालपद् भद्र! यद्येवं तर्हि किं वृथा ।
त्वया काष्ठसमाकृष्टिक्लेशोऽयमनुभूयते ॥ ३२ ॥
मम्मणोऽप्याह भूपाल! देहः क्लेशसहो मम ।
अतो मयान्यव्यापाररहितेनायमादृतः ॥ ३३ ॥
पार्थिवोऽपि जगौ श्रेष्ठिन्नेतावति धने सति ।
कुकर्तव्यमिदं कर्तुं भवतो नैव युज्यते ॥ ३४ ॥
यद्धनं त्यागभोगाय कदाचन न जायते ।
तेनेक्षुपुष्पवत्किं स्यान्निष्फलेन प्रयोजनम् ॥ ३५ ॥
तदेतन्नलिनीपत्रगताम्भःकणसंनिभम् ।
अवबुध्य निजे चेतस्युपभुङ्क्ष्व यथासुखम् ॥ ३६ ॥
समये साधुवर्गेषु विनियुङ्क्ष्वातिभक्तितः ।
कृपयानाथदीनान्धदुःस्थेषु वितनुष्व च ॥ ३७ ॥
यथा सम्पद्यते सर्वं फलेग्रहि महाशय! ।
किमेतेनोक्षसंपूर्णीकरणेन करिष्यसि ॥ ३८ ॥ कुलकम् ॥
मम्मणोऽप्यवदद्देव! जानाम्येवं तथापि मे ।
अमुं वृषभमनापूर्य दाने धीर्न प्रवर्तते ॥ ३९ ॥
नोपदेशार्ह एवायमिति संचिन्त्य भूपतिः ।
देव्या चेल्लणया युक्तो निजप्रासादमासदत् ॥ ४० ॥
मम्मणोऽपि हि तत्तादृक्क्लेशावेशवशेन तम् ।
द्वितीयं वृषभं पूर्णीचकार कृपणाशयः ॥ ४१ ॥

Jain Education International          For Personal & Private Use Only          www.jainelibrary.org

तथापि हि स पापीयाल्लोभतृष्णातिबाधितः ।
आयुःक्षये विपन्नः सन्, दुर्गदुर्गतिभागभूत् ॥ ४२ ॥
इति मम्मणस्य वणिजस्य चरितमतिदुःखकारणम् ।
स्वीयमनसि विनिधाय बुधाः! प्रविधत्त साधुजनदानमादरात् ॥४३ ॥
(सौरभकम्)

इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ अदानविषये मम्मणश्रेष्ठिकथा समाप्ता ॥

अदानवैषयिकं मम्मणश्रेष्ठिदृष्टान्तमुक्त्वा संप्रत्यौषधदानमाह-

**उद्दामकाममयगलकुम्भत्थलदलणसबलसिहाणं ।**
**पडिजागरणं कुज्जा ओसहदाणा महरिसीणं ॥ ७० ॥**

व्याख्या-उद्दाम-उत्कटो योऽसौ कामः-कन्दर्पः, स एव मदकलो-गजस्तस्य यत्कुम्भस्थलं-करटप्रदेशस्तस्य यद्दलनं-विदारणं तत्र सबलाः-शौण्डीर्यशालिनः सिंहा इव-शार्दूला इव तेषाम्, यतो हर्यक्षकर्यादिजयिनः सुबहवो दरीदृश्यन्ते, किन्तु कन्दर्पजयिनो विरला एव ॥ यदुक्तम्-

मत्तेभकुम्भदलने भुवि सन्ति शूरा, उग्रप्रचण्डमृगराजवधेऽपि दक्षाः ।
किन्तु ब्रवीमि कृतिनां पुरतः प्रसह्य, कन्दर्पदर्पदलने विरला मनुष्याः ॥१ ॥
(वसन्ततिलका)

एवंविधानां महर्षीणां-मुनीनामौषधदानाद्वातपित्तश्लेष्मशल्याद्युपशामकभेषजकारापणात्प्रतिजागरणं रोगाद्यातङ्कोत्पत्त्यां सज्जीकरणं कुर्याद्विदध्यात् । यतः सर्वेष्वपि दानेष्वमुष्य महन्माहात्म्यमुक्तं सिद्धान्ते-कह णं भंते! जे गिलाणं पडियरेइ से धण्णे उयाहु जे तुमं दंसणेणं पडिवज्जइ। गोयमा जे गिलाणं पडियारइ से मे दंसणं पडिवज्जइ। जे मे दंसणेणं पडिवज्जइ। से गिलाणं पडिवयरइ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आणासरणं सारं खु अरहंताणं, तेणट्ठेणं गोयमा एवं वुच्चइ। से गिलाणं पडियरेइ सो मे दंसणेणं पडिवज्जइ इति॥ इति गाथार्थः॥

साधुचिकित्सायां कृतायां किं फलं स्यादिति गाथाद्वयेनाह-

**उद्धरिय विसल्लाए सल्लं संरोहिऊण वणघायं ।**
**संरोहिणीइ साहू सज्जो सज्जीकओ जेण ॥ ७१॥**

**तदुवज्जियसुकएणं वाणरजूहाहिवेण संपत्तो ।**
**सहसारकप्पवासो जं तेणं तं किमच्छरियं ॥ ७२॥**

व्याख्या-उद्धृत्य-निष्कास्य विशल्यया-महौषध्या, किं तच्छल्यं-पदतलप्रविष्टं काष्ठकीलकं, संरोहिण्या-मूलिकया, व्रणघातं-पदव्रणविवरं, संरोह्य-निर्व्यथीकृत्य, साधुर्महात्मा, सद्यस्तत्कालमेव, सज्जीकृतो येन, तेनेत्यग्रगाथायां सम्बन्धः। तदुवज्जियत्ति-तस्माद् भेषजदानादुपार्जितं यत्सुकृतं-पुण्यं, तेन, वानरयूथाधिपेन-कपिकुलनायकेन, सहस्रारकल्पवासोऽष्टमकल्पनिवासो यत्तेन प्राप्तो-लब्धस्तत्-किमाश्चर्यं, तत्किं चित्रमल्पत्वात् किन्तु मोक्षसौख्यमप्यवाप्यत इति गाथायुगार्थः ॥

भावार्थस्तु कथानकादवसेयस्तच्चेदम्-

अस्त्यौन्नत्यश्रियावन्ध्यो **विन्ध्यो** नाम महीधरः ।
ये **भद्रजातिनागानामेक** एवालयः क्षितौ ॥ १॥
तस्य चोपत्यकाभागेऽटवी द्वादशयोजना ।
या भारतकथेवास्ति, नकुलार्जुनभूषिता ॥ २॥
तस्यां चैकः कपिः कोऽपि, वानरीनिवहैः सह ।
भुञ्जानो भङ्गुरान् भोगान्, समयं गमयत्यलम् ॥ ३॥
इतश्च कस्यचित्सार्थपतेः सार्थे मुमुक्षवः ।
विहरन्तो महीपीठमटव्यां समुपाययुः ॥ ४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एकस्तन्मध्यगः साधुश्चरणत्राणवानपि ।
चरणत्राणहीनांह्रौ कीलेन समविध्यत ॥ ५ ॥
तस्मिन् पदात्पदमपि गन्तुं तद्व्यथयाक्षमे ।
सर्वेऽपि साधवः प्राहुः, सुधामधुरया गिरा ॥ ६ ॥
महात्मंस्त्वत्पदेऽतुल्या शल्यपीडातिदुःसहा ।
इयमप्यटवी सर्वशून्या श्वापदसंकुला ॥ ७ ॥
तत्त्वं निःशङ्कमस्माकं, स्कन्धमारोह संप्रति ।
यथेमां वयमुल्लङ्घ्य, यामो ग्रामान्तरे क्वचित् ॥ ८ ॥ युग्मम् ॥
इत्याकर्ण्य मुनिं प्रोचे भो भोः समयवेदिनाम् ।
भवादृशामिदं वाक्यं तथ्यं पथ्यं पुनर्मम ॥ ९ ॥
तथापि मम देहस्य, गत्वरस्य कृते मुधा ।
मा विनश्यत तद्यूयं सार्थेन सह गच्छत ॥ १० ॥
शल्येऽस्मिन् निर्व्यथीभूतेऽस्म्यहमागत एव हि ।
भवद्भिरवगन्तव्यो नान्यथेति विनिश्चयः ॥ ११ ॥
तस्येत्यायतिहृद्यानि वचांस्याकर्ण्य साधवः ।
ततोऽटवीं लघूल्लङ्घ्य, क्वापि ग्रामे *वसत्यगुः ॥ १२ ॥
अत्रान्तरे स यूथेशो गोलाङ्गूल इतस्ततः ।
पर्यटन्मूर्त्तिमद्धर्ममिव साधुं न्यभालयत् ॥ १३ ॥
क्वापीदृशो मया दृष्टः पुरासीदिति चेतसि ।
ईहापोहां प्रकुर्वाणः कपिः प्राग्भवमस्मरत् ॥ १४ ॥
श्रीकृष्णशासितायां श्रीद्वारवत्यां महापुरि ।
नाम्ना वैतरणिर्वैद्योऽभवं वैद्यधुरन्धरः ॥ १५ ॥
सपापैर्भेषजव्रातैः, कुपात्राङ्गिचिकित्सितम् ।
कुर्वता यन्मया पापमूर्ज्जस्वलमुपार्जितम् ॥ १६ ॥

* एष प्रयोगश्चिन्त्यः, वसतिम् इति समीचीनो भाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तेनाहं प्राप्तवांस्तिर्यग्भवं चैतन्यशून्यकम् ।
हहा क्लेशाय संसर्गो दुर्जनानामिवैनसाम् ॥ १७॥
यद्यप्यन्नादिकं दातुं पशुभावान्न हि प्रभुः ।
तथाप्यस्यानगारस्य, शल्योद्धारं करोम्यहम् ॥ १८॥
इति ध्यात्वा गिरौ गत्वा विशल्यां व्रणरोहिणीम् ।
द्वे मूलिके समादाय स मुनेः पार्श्वमाययौ ॥ १९॥
साधुपादे लगितया दन्तचर्वितयाद्यया ।
वानरः शल्यमुद्दध्रे रोहयामास चान्यया ॥ २०॥
अथ सज्जीकृते तस्मिन् हरिर्वक्तुमनीश्वरः ।
लिलेख प्राग्भवं सम्यग्, मुनेः पुरत आत्मनः ॥ २१॥
महात्मापि श्रुतज्ञानेनावगत्य तथैव तम् ।
वानरप्रतिबोधाय विदधे धर्मदेशनाम् ॥ २२॥
अस्मिन्नसारे संसारे, भृशं संसरतां सताम् ।
एक एव भवेत् त्राणं धर्मः श्रीजिनभाषितः ॥ २३॥
स च स्वाराधितः पुंभिरिह राज्यादिसौख्यदः ।
परलोके तथा स्वर्गापवर्गसुखदायकः ॥ २४॥
तदीदृग्पुण्यमाहात्म्यमवबुध्य प्लवङ्गम ! ।
तमेवाङ्गीकुरु यथा स भवेत्तव शर्मदः ॥ २५॥
मुनिवक्त्रेन्दुनिर्गच्छद् वचनामृतमेतकत् ।
निपीय कपिराजोऽभूत्परमानन्दनन्दितः ॥ २६॥
संवेगादलिखच्चैवं मुनीन्द्र! पशुभावतः ।
मया दुष्प्रतिपाल्यानि नियमादीन्यसंशयम् ॥ २७॥
तदेतर्ह्येव हे साधो! दयामय! दयां मयि ।
विधायानशनं देहि यथा स्यां सुखभाजनम् ॥ २८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तद्वचःश्रवणोत्पन्नामन्दानन्दो मुनीश्वरः ।
प्रददे कपिराजायानशनं पापनाशनम् ॥ २९॥
तच्च साधुमहाम्भोधेर्दक्षिणावर्तशङ्खवत् ।
दुष्प्रापमाप्य कपिना स्वात्मा धन्यो ह्यमन्यत ॥ ३०॥
दिनत्रयेण भावेन प्रपाल्यानशनं कपिः ।
विपद्याष्टादशाब्ध्यायुः **सहस्रारे** सुरोऽभवत् ॥ ३१॥
को मयाराधितो देवः को गुरुः पर्युपासितः ।
किं वा तपः कृतं येन संप्राप्ता पदवीदृशी ॥ ३२॥
इति ध्यायन् सुरो मत्वा निजं कपिभवं भवम् ।
अनगारोपकारं च ततस्तं नन्तुमागमत् ॥ ३३॥
भावेन मुनिमानम्य निजे गच्छे नियोज्य च ।
स्वरूपमात्मनः प्रोच्य सहस्रारमगात्सुरः ॥ ३४॥
इत्थं मुनेर्भेषजदानपुण्याद्यथा कपिः प्राप दिवः समृद्धिम् ।
तथा तदीयापरमानसेन विवेकिना शश्वदिदं विधेयम् ॥ ३५॥ (उपजातिः)

इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ भेषजदाने कपिकथा समाप्ता ॥

भेषजदानवैषयिकं कपिदृष्टान्तमुक्त्वा व्यापद्व्यापगतानामपि दातॄणां महत्त्वमाह–

**संकडसंपडियाण वि जेसिं उपज्जई मई दाणे ।**
**ससहरसरिसजसाणं ताण णमो दाणवंताणं ॥ ७३॥**

व्याख्या–संकटसंपतितानामपि–नानाविधापद्गतानामपि, येषां दानेऽशनादिप्रदाने मतिर्बुद्धिरुत्पद्यते–संजायते एतावता तेषां–दान-शौण्डानां मध्ये सर्वोत्कृष्टत्वमुक्तं, यतः सुखिनो दानमतयः स्युर्न दुःखिनः, अत एव शशधरसदृशयशोभ्यश्चन्द्रावदातकीर्त्तिभ्यस्तेभ्यो दानदातृभ्यो नमोऽस्तु–नमस्कारो भवतु। यद्यपि गुणिनः प्रगुणगुण-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गणैर्महिमानमुपार्जयन्ति, तथापि दानं विना यशोऽर्जनेऽसहिष्णवः ॥ यदुक्तं-

चातुर्यवर्योऽपि गुणाकरोऽपि, सौजन्यपुण्योऽपि जनप्रियोऽपि।
दानं विना नैव नरः स्वकीर्त्या, विश्वं विधत्ते धवलं कदापि ॥ १ ॥(इन्द्रवज्रा)

इति गाथार्थः ॥

ये परगृहप्रेष्यत्वगता अपि दानोन्मुखास्तानुपश्लोकयितुमाह-

**जे परघरपेसत्तं गया सया धणकणेण रहियावि ।**
**भुंजंति संविभत्तं ताण णमो दाणवीराणं ॥ ७४॥**

व्याख्या-ये मनुष्याः परगृहप्रेष्यत्वम् -अन्यमन्दिरदासत्वम्, गताः-प्राप्ताः, तत्रापि सदा-नित्यम्, धनकणेन-द्रव्यलवेन, रहिता अपि-निःस्वा अपि, वित्ते सति कृपणस्यापि स्यात्कदाचिद्दानोल्लासः। अत एवंविधा अपि संविभक्तं-साधुजनसंविभागीकृतमर्थादशनादिकं भुञ्जते-आस्वादयन्ति, तेभ्यो-दानवीरेभ्यो नमोनमः । उक्तं च-

ते च्चिय जयम्मि धन्ना ताण गया पाणिपल्लवे लच्छी ।
जे अतिहिसंविभागं काऊण सयावि भुंजंति ॥ १ ॥ इति गाथार्थः ॥

पात्रप्रयुक्तदानानां का गुणावाप्तिः स्यादित्याह-

**विप्फुरइ जसं तेसिं गिहंगणे उल्लसंति रिद्धीओ ।**
**जायइ सिवसुक्खं चिय जे पत्ते विहियवरदाणा ॥ ७५॥**

व्याख्या-तेषां-प्राणिनाम्, यशः-कीर्त्तिर्विस्फुरति-सर्वत्र प्रवर्त्तते, न केवलं यशः किन्तु गृहाङ्गणे ऋद्धयः-करि-हरि-रथ-पत्ति-धन-धान्य-मणि-मुक्ताफल-स्वर्ण-तारुण्य-लावण्य-पुण्यकलत्र-पुत्र-मित्राद्या उल्लसन्ति-प्रसर्पन्ति। आस्तां तावत्स्वर्गापवर्गाश्रियः किन्तु शिव-सौख्यमपि-मोक्षसुखमपि जायते-संपनीपद्यते। ये पात्रे सुसाधो-र्विहितवरदानाः-कृतसप्तचत्वारिंशद्दोषरहिताशनादिवितरणा इति गाथार्थः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एनमेवार्थं दृष्टान्तेन दृढयन्नाह-

**सिरिअमरसेणवरसेणयाण अच्छरियकारिचरियाण ।**
**सुविहियदाणा लडहो झणहणइ जए विजयपडहो ॥ ७६ ॥**

व्याख्या-आश्चर्यकारिचरितयोरद्भुतजनकचरित्रयोः श्रीअमरसेन-वरसेनकयोः, सुविहितदानात्-मुनिदानाल्लडहो देशीभाषया प्रधानं विजयपटहो जगति-भुवने झणहणइ-शब्दायत इति गाथार्थः ॥

भावार्थः कथानकगम्यस्तच्चेदम्-

श्री**कलिङ्गा**भिधे देशे निवेशे सर्वसंपदाम् ।
अस्ति **रत्नपुरं** नाम पुरं सुरपुरोपमम् ॥ १ ॥
तत्र श्री**विजया**देवी**सुयशा**दयितायुतः ।
**सूरसेनो**ऽवनीजानी राज्यं पालयति स्म सः ॥ २ ॥
दायादैरन्यदाकस्माद् राज्याद्राजा निराकृतः ।
**कुरु**देशे **गजपुरा**धीशं **सोम**मसेवत ॥ ३ ॥
सोमभूपवितीर्णाढ्यग्रामेषु वसतः सतः ।
राज्ञस्तस्यादिमा राज्ञी, सुषुवे तनयावुभौ ॥ ४ ॥
प्रथमो**ऽमरसेना**ख्यो द्वितीयो **वरसेनकः** ।
रञ्जयन्तौ गुणैः पौरांस्तौ प्राप्तौ यौवनश्रियम् ॥ ५ ॥
सपत्नमाता सुयशा राज्यभारधुरन्धरौ ।
सर्वाङ्गसुन्दराकारौ तौ दृष्ट्वैवमचिन्तयत् ॥ ६ ॥
सर्वन्यायविदोर्व्यक्तमनयोर्विद्यमानयोः ।
कथं मदीयपुत्राणां राज्यलक्ष्मीर्भविष्यति ॥ ७ ॥
ततः प्रभृति सा चिन्ताचान्तचित्ता तयोश्छलम् ।
अहर्निशं विनाशाय शाकिनीव स्म पश्यति ॥ ८ ॥
तयोर्विनीतयोः पापा न पश्यन्तीच्छलं क्वचित् ।
कूटनाटकमारेभे भर्तुर्वञ्चनहेतवे ॥ ९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

देशान्तरादुपायातस्तस्मिन्नवसरे पतिः ।
सशोकामिव तां वीक्ष्य प्राख्यन्मधुकिरा गिरा ॥ १० ॥
कृतान्तः कुपितस्तस्य तस्य वा मस्तकद्वयी ।
सिंहो जागरितस्तेन यस्त्वां कोपितवान् जडः ॥ ११ ॥
त्वदाज्ञा केनचिल्लुप्तापराद्धं वा क्वचिन्मया ।
तत्प्रसद्य प्रिये! ब्रूहि, मा मां खेदय खेदय ॥ १२ ॥
धूमोर्णेव सधूम्रास्या, सपूत्कारोरगीव सा ।
राक्षसीव जिघत्सन्ती, सोत्तालं कान्तमालपत् ॥ १३ ॥
साधु वः कुलधर्मोऽयं, काम्यतेऽम्बापि यत्सुतैः ।
इत्यनल्पकुकल्पं सा जल्पं कृत्वा क्षणं स्थिता ॥ १४ ॥
प्रिये! किमेतदेवं क्ष्मापेणोक्ता सा दुराशया ।
जजल्पास्वल्पकल्पान्तकल्पं जल्पं तदाग्रतः ॥ १५ ॥
नाथ! त्वयि गते ग्रामं, वैजयेयौ तनूद्भवौ ।
संभोगहेतवे तौ मां, प्रार्थयामासतुस्तमाम् ॥ १६ ॥
प्रविश्यान्तःपुरस्यान्तः कथंचन मया प्रिय! ।
भवदागमनं यावत्पालितं शीलमुज्ज्वलम् ॥ १७ ॥ युग्मम् ॥
तच्छ्रुत्वा नृपतिः कोपात्समाकार्य जनङ्गमम् ।
शिरश्छेदं समादिक्षद् वैजयेयकुमारयोः ॥ १८ ॥
मातङ्गोऽपि नृपादेशं श्रुत्वैवं हृद्यचिन्तयत् ।
यदसौ काशसंकाशगुणयोरेतयोरपि ॥ १९ ॥
मामादिशद्विनाशाय कुग्रहग्रहिलाशयः ।
तन्मन्येऽस्यावनीजानेरुपतस्थेऽन्तिमा दशा ॥ २० ॥ युग्मम् ॥
एतदेव परं चारु यत्कार्यं पुरतो मम ।
अब्रवीदेष तन्नूनं करिष्ये हितमेतयोः ॥ २१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आज्ञाप्रमाणमित्युक्त्वा नत्वा भूपं स वेगतः ।
न्यवेदयन् नृपादेशं वाह्यालिं कुर्वतोस्तयोः ॥ २२॥
ताभ्यामपि व्यचिन्त्यस्मदन्यायः कोऽपि भूपतेः ।
मानसे जागरुकोऽभूद्येनैवं वधमादिशत् ॥ २३॥
ततः प्रोचे च मातङ्ग! तातादेशं कुरु द्रुतम् ।
यतो भृत्याः प्रभोः कार्ये विलम्बन्ते न कर्हिचित् ॥ २४॥
सकृपः सोऽपि तावूचे प्रसद्य मयि सेवके ।
भवन्तौ गच्छतां नंष्ट्वा जवाद्देशान्तरे क्वचित् ॥ २५॥
तावूचतुः कृते त्वेवं त्वं सपुत्रोऽपि हन्यसे ।
तथा न तन्वहे येनास्मदर्थे पीड्यते परः ॥ २६॥
कर्त्ताहमात्मनो रक्षामित्युक्ते श्वपचेन तौ ।
विहाय तुरगौ वेगाज्जीवनाशं प्रणेशतुः ॥ २७॥
हयावादाय मातङ्गः शीर्षे चित्रकरात्तयोः ।
कृत्रिमे कारयित्वासौ सायं भर्तुरदर्शयत् ॥ २८॥
राजाप्याख्यदिमे शीर्षे शूलायामधिरोपय ।
एवं करिष्य इत्युक्त्वा, मातङ्गो निरगाद् बहिः ॥ २९॥
तद्विनाशं नृपाद् ज्ञात्वा सुयशाः कुयशोगृहम् ।
अतः परं सुतानां मे राज्यं भावीति साहृषत् ॥ ३०॥
कुमारावपि वेगेनोल्लङ्घयन्तौ महीतलम् ।
क्रमादटविकामेकामुदैक्षेतां पुरःस्थिताम् ॥ ३१॥
तमालतालहिन्तालैरिव क्लृप्तनिचोलिकाम् ।
आश्रितां तामसव्यूहैर्भीतभीतै रवेरिव ॥ ३२॥
शार्दूलबहलव्यालचित्रचित्रकसंचयैः ।
व्यञ्जयन्तीमिव स्वाङ्गं रौद्ररौद्ररसोत्तरम् ॥ ३३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

महीधरशिरोनिर्यत्तटिनीवेगशब्दितैः ।
ख्यापयन्तीमिवात्यर्थं स्वमहत्त्वस्य वैभवम् ॥ ३४॥ आदिकुलकम् ॥
तस्यामटाट्यमानौ तावटव्यां श्रान्तमानसौ ।
सायं कुमारौ विश्रान्तौ सहकारतरोस्तले ॥ ३५॥
वरसेनो जगौ ज्येष्ठं रुष्टस्तातः किमावयोः ।
ज्यायान् जजल्प न स्वल्पमपि जानामि कारणम् ॥ ३६॥
शैशवं यावदावाभ्यां विरूपं क्वाप्यकारि न ।
परं विलसितं मातुः सपत्न्या एव शङ्क्यते ॥ ३७॥
आवामवेक्ष्य विच्छाया शशिमूर्त्तिरिवाहनि ।
रोषारुणाक्षिपातेन सास्नापयदिवासृजा ॥ ३८॥
वरसेनः पुनः प्राह भ्रातस्तातस्तदीयकैः ।
अलीकवचनोद्गारैः कथमेवं विचेष्टते ॥ ३९॥
अग्रजः प्राह यद्वत्स! नार्योऽनार्यहृदो नरम् ।
सत्याभिरिव मिथ्याभिर्वाग्भिः सत्यापयन्त्यमूः ॥ ४०॥
स्वभावकुटिलस्वान्ताः स्मृताः प्रायः पुरन्ध्रयः ।
अतश्चरित्रमेतासां दुर्ज्ञेयममरैरपि ॥ ४१॥
यदुक्तम्-सायरजलपरिमाणं सुरगिरिमाणं तिलोयसंठाणं ।
जाणंति बुद्धिमंता महिलाचरियं ण याणंति*॥ ४२॥
यद्वावयोरसावेव, जातोपकृतिहेतवे ।
यया देशान्तरोऽदर्शीति जल्पन् स्वपिति स्म सः ॥ ४३॥
लघुः प्रहरके तिष्ठन्, सहकारोपरिस्थितम् ।
मिथः कथां प्रकुर्वाणं शुकयुग्मं व्यलोकयत् ॥ ४४॥
शुकः शुकीमवक् कान्ते! यदिमौ पुरुषोत्तमौ ।
सत्कारार्हौ न तच्चास्ति वस्तु येनोपकुर्वहे ॥ ४५॥

* पाईय. सू. ९७ ।

Jain Education International　　For Personal & Private Use Only　　www.jainelibrary.org

ततः शुकी शुकं प्राह, प्रिय! मा खेदमुद्वह ।
यदेतदुपकारायोपायोऽस्ति मयका स्मृतम् ॥ ४६ ॥
**सुगूढ**पर्वते गूढ**निकुञ्जा**भिधकानने ।
विद्याभिषिक्तबीजौ स्तो विद्याभृद्भिः प्ररोपितौ ॥ ४७ ॥
लघुस्थूलफलोपेतौ सच्छायौ चूतपादपौ ।
तयोर्माहात्म्यमन्येद्युः श्रुतं विद्याधरादिति ॥ ४८ ॥ युगलम् ॥
यस्योदरे रसालस्य, तिष्ठत्यात्तं फलं लघु ।
यावत्तावत्तदीयास्याद् दीनारशतपञ्चकम् ॥ ४९ ॥
गण्डूषेण समं सूर्योदये पतति नित्यशः ।
यस्तु स्थूलं फलं भुङ्क्ते, राज्यं तस्याह्नि सप्तमे ॥ ५० ॥ युग्मम् ॥
माहात्म्ये वरसेनेनेति श्रुते तन्मुखात्ततः ।
ताभ्यामानीय तस्याग्रे, फले मुक्त्वोदडीयत ॥ ५१ ॥
सत्यमेतदुतासत्यं वरसेनो व्यचिन्तयत् ।
यद्वा विद्याबलात्किं न स्यात्ते इति स चाददे ॥ ५२ ॥
अथ प्रहरके ज्येष्ठस्तस्थौ सुष्वाप चानुजः ।
सूर्योदये समुत्थाय चेलतुः पुरतः पुनः ॥ ५३ ॥
राज्यप्रदं फलं भ्रात्रे दत्त्वान्यत् स्वयमत्तवान् ।
वरसेनो न चावादीत् तत्प्रभावं तदग्रतः ॥ ५४ ॥
गच्छन्तौ पथि तावेकं पश्यतः स्म पुरः सरः ।
ततो लघीयानेकाकीभूय तत्तीरमासदत् ॥ ५५ ॥
तत्रास्यक्षालनं कुर्वन् स गण्डूषाम्बुना समम् ।
पुरः पतितमद्राक्षीद्दीनारशतपञ्चकम् ॥ ५६ ॥
तद् गृहीत्वा प्रतिग्रामं विलसन् भोजनादिभिः ।
स ज्येष्ठबन्धुनाप्रच्छि, वत्सेदं द्रविणं कुतः ॥ ५७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स गूढबुद्धिस्तं प्राह, पुरा कौटुम्बिकैर्मम ।
अर्पितं यत्करद्रव्यं, तत्कोशे न प्रवेशितम् ॥ ५८ ॥
मार्गं क्रमादतिक्रम्य कुमारौ सप्तमे दिने ।
श्री**काञ्चनपुरो**द्यानमलञ्चक्रतुरद्भुतम् ॥ ५९ ॥
पथश्रान्तोऽमरसेनः सुष्वापाम्रतरोरधः ।
स्थिरया छायया सोऽपि सत्पुण्यं तमसेवत ॥ ६० ॥
यतः-तेलिसुत्तह पुण्णुज्जलह रुक्ख वि छाव करंति ।
पुण्णविहूणा माणुसह ते वि परम्मुह हुंति ॥ ६१ ॥
वस्त्राभरणताम्बूलभोजनादानहेतवे ।
जगाम वरसेनोऽपि श्रीकाञ्चनपुरान्तरम् ॥ ६२ ॥
इतश्च तत्पुरस्वामिन्यपुत्रे स्वःपुरं गते ।
अभ्यषज्ज्यन्त दिव्यानि, पुरोधःप्रमुखैर्जनैः ॥ ६३ ॥
ससंभ्रमं भ्रमद्भिस्तैः पुरा निर्गत्य सत्वरम् ।
अभ्यषेच्याम्रवृक्षस्थोऽमरसेनो नरोत्तमः ॥ ६४ ॥
तेजस्विनं भानुमिव, हरिवद् विक्रमोद्धुरम् ।
तं वीक्ष्य मन्त्रिसामन्ताः प्रणेमुर्विस्मिताशयाः ॥ ६५ ॥
श्रीमानमरसेनोर्वीपतिरेकातपत्रितम् ।
पालयामास साम्राज्यं, पुण्याढ्यैः किं न लभ्यते ॥ ६६ ॥
यदुक्तं-करितुरयरहसमेयं णमंतसामंतमतिपरिकलियं ।
अक्खयकोससमिद्धं लब्भइ पुण्णेहिं रज्जमिणं ॥ ६७ ॥
वरसेनोऽपि राज्यश्रीसुभगां भावुकां कथाम् ।
सोदरस्य निशम्याशु मनस्येवमचिन्तयत् ॥ ६८ ॥
यदहं भूपतेर्भ्राता, दत्तातो मण्डलादिकम् ।
इति लोलापि मे लोला, कल्पान्तेऽपि न जल्पति ॥ ६९ ॥
लोला-चपला, लोला-जिह्वा ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यतः-सा रजनी दिवसोऽप्यथवा विलयं सहसा यातः ।
क्रियते यत्परापेक्षा पौरुषरहितैर्भ्रातः! ॥ ७० ॥
इति ध्यात्वा स तत्रैव **मगधा**गणिकागृहे ।
विललास यथास्वैरं विभवैः फलसंभवैः ॥ ७१ ॥
स्वनरैः शोधयन् राजा बन्धुशुद्धिमनाप्नुवन् ।
विषद्य चाभवद्राज्यश्रीसमालिङ्गशर्मभाक् ॥ ७२ ॥
अविच्छिन्नैर्धनैरेनं विलसन्तं विलासिनी ।
दीव्यन्तं देवनैर्दानं ददानमनुपार्जितम् ॥ ७३ ॥
वरसेनं विलोक्याक्का कुतोऽस्यैष धनागमः ।
एवं विमृश्य मगधां निजपुत्रीमवोचत ॥ ७४ ॥ युग्मम् ॥
वत्से! पृच्छ स्वभर्त्तारं कुतस्ते धनलब्धयः ।
साप्युवाचाम्ब! किं कार्यमनया तव चिन्तया ॥ ७५ ॥
यतस्ततोऽर्थमानीय पूरयत्वेष नः स्पृहाम् ।
तयेत्युक्तापि नामुञ्चत् कुग्रहं ग्रहिलेव सा ॥ ७६ ॥
ततो मगधया पृष्टोऽत्याग्रहात्प्राञ्जलाशयः ।
सोऽब्रवीद् द्रविणोपायं, धूर्तैः को न हि वञ्च्यते ॥ ७७ ॥
इति ज्ञात्वाक्कया मद्यं, मदनादिफलाविलम् ।
पायितस्यास्य वमतो जठरान्निरगात् फलम् ॥ ७८ ॥
तदुद्धृत्य फलं वान्तेरमेध्यादपि काञ्चनम् ।
शुम्भल्या क्षालयित्वात्तं निःशूका हि पणस्त्रियः ॥ ७९ ॥
अमेध्याद्-विष्ठायाः ।
अयं गृहीतसर्वस्व इति निष्कासितस्तया ।
काये नीरोगतां ह्याप्ते किं वैद्येन प्रयोजनम् ॥ ८० ॥
पञ्चशत्यामपतन्त्यां गण्डूषेण समं प्रगे ।
राजसूश्चिन्तयामास धिग्मां स्त्रीषु च तत्त्वदम् ॥ ८१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उक्तं च-यो रागोरगदष्टमना, वदति रहस्यं स्त्रीषु ।
नियमादेव हि तेनात्मा क्षिप्तो दुःखनदीषु ॥ ८२॥
विभवोपार्जनाभावाद्विलक्षोऽयं पुरे भ्रमन् ।
निशीथे बहिरुद्यानशून्यदेवकुलं ययौ ॥ ८३॥
स तत्र चतुरश्चौरान् युध्यमानान् परस्परम् ।
दृष्ट्वा नृपसुतोऽकार्षीच्चौरसांकेतिकं वचः ॥ ८४॥
तस्करोऽयमिति ज्ञात्वा तैरप्याकारि भूपभूः ।
विवादकारणं तेन, पृष्टास्ते चैवमब्रुवन् ॥ ८५॥
वस्तूनि त्रीणि चत्वारो वयं वादयन्तीव नः ।
को वो जल्पोऽल्पवस्त्वर्थे कुमारोऽभाषतेति तान् ॥ ८६॥
तेऽप्याहुस्त्वं विमुग्धोऽसि तत्त्वमेषामवैषि न ।
सस्पृहं नृपजेनापि ते पृष्टा इदमूचिरे ॥ ८७॥
आषण्मासीं श्मसानेऽत्र सिद्धेनाराध्य देवताः ।
वस्तुत्रयमिदं लब्धं जगदाश्चर्यकारकम् ॥ ८८॥
अस्माभिरप्याषण्मासीं, हेरयित्वाद्य सोऽवधि ।
तद्वस्तुत्रयमादाय, वयमत्र समैम च ॥ ८९॥
कन्थायां झाट्यमानायां रत्नपञ्चशती प्रगे ।
पतति प्रत्यहं धीर! तेनेयं भुवि दुर्लभा ॥ ९०॥
बंभ्रम्यमाणे लगुडे शस्त्रं लगति नात्मनः ।
प्रक्षिप्ताभ्यां पादुकाभ्यां नभोगश्च भवेन्नरः ॥ ९१॥
इति श्रुत्वा स धूर्तेन्द्रो राजसूस्तज्जिघृक्षया ।
तानुवाच विवादं वो वारयामि रयादहम् ॥ ९२॥
अत्र वस्तुत्रयं मुक्त्वा गच्छताशाचतुष्टये ।
मदाहूत्यागतेभ्यो वो दास्ये तच्च यथाक्रमम् ॥ ९३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

राजसूवचसाशासु ते ययुः सोऽपि पादुके ।
पदोः क्षिप्त्वांसदेशे च कन्थां लकुटसंयुताम् ॥ ९४॥
उड्डीय नगरद्वैतीयैकपार्श्वे स्वयं ययौ ।
विलक्षास्तेऽप्यगुः स्तेनाः, पापिनां क्व श्रियः स्थिराः ॥ ९५॥ युग्मम्॥
स पुत्रीभूय वृद्धायाः कस्याश्चित्सदने स्वयम् ।
स्थापयामास कन्थादि निधानमिव शाश्वतम् ॥ ९६॥
स्वर्लतावत्प्रतिप्रातः कन्थाया झाटनेन सः ।
रत्नपञ्चशतीं प्राप्य, चिक्रीड नगरे पुनः ॥ ९७॥
गन्धर्वपुरुषाकारं तारशृङ्गारभासुरम् ।
लीलावन्तं विलोक्याक्का तं विस्मयमवाप सा ॥ ९८॥
मगधां धवले वस्त्रे परिधाप्य तदन्तिकम् ।
निनाय धनलुब्धा सा पणस्त्रीणां कुतस्त्रपा ॥ ९९॥
दीनानना ततोऽवादीद्वत्स! त्वं मयका तदा ।
अज्ञानया तिरोऽकारि* दुःस्थयेव सुरद्रुमः ॥ १००॥
तदादि मगधामेनां त्वद्वियोगाग्नितापिताम् ।
स्वसङ्गमामृतेनाशु निर्वापय महाशय! ॥ १०१॥
तस्याः पटूनि चाटूनि शृण्वन्नयमचिन्तयत् ।
रण्डया चण्डयामण्डि पाखण्डः कोऽप्ययं पुनः ॥ १०२॥
सोऽप्यप्रकाशयंश्चेतोऽभिप्रायं तामभाषत ।
अम्ब! युक्तमिदं यत्साकरोन्मे विरहाच्छुचम् ॥ १०३॥
ममाप्येनां विना वर्षप्रमिता यान्ति वासराः ।
इति तद्गिरमाकर्ण्याक्का तुष्टा तं गृहेऽनयत् ॥ १०४॥
सलीलं तिष्ठतस्तस्य कियद्भिर्दिवसैर्गतैः ।
लाभात्पुनः स्वरूपार्थज्ञप्त्यै सा मगधां जगौ ॥ १०५॥

---

* 'त्वम्' इति व्याप्यत्वात् तिरोऽकारि इति क्रियापदस्थाने तिरोऽकृथाः समीचीनं भाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वत्स! पृच्छ निजं कान्तं कुतस्तव धनार्जना ।
सा प्राह नाहं प्रष्टास्मि, तल्लुब्धे! पृच्छ तत्स्वयम् ॥ १०६ ॥
सा निस्त्रपान्यदाप्राक्षीत्तं धनार्जनकारणम् ।
सोऽप्याह पादुकारूढो, दूरादम्बार्थमानये ॥ १०७ ॥
सहसा सहसा साह समाकर्ण्येति तन्मुखात् ।
हे स्वान्त! नृत्य यत्तेऽद्य फलन्ति स्म मनोरथाः ॥ १०८ ॥
वत्स! त्वद्विरहादेवं जगृहेऽभिग्रहो महान् ।
यदा त्वया समं मेलो दैवाद् भावी तदा मुदा ॥ १०९ ॥
वार्द्धावम्बरशैलस्थकामार्चामर्चयित्र्यहम् ।
त्वत्पादुकाप्रभावेण, स चास्तु सफलो मम ॥ ११० ॥ युग्मम् ॥
अहो प्रपञ्चचातुर्यमस्याः किमपि चित्रकृत् ।
यन्मामपिच्छलयितुं, दुष्टा प्रववृते पुनः ॥ १११ ॥
तत्प्रपञ्चममुं चास्या मस्तके पातयाम्यहम् ।
प्रक्षिप्यैनामनेनैवोपाधिनागाधिवारिधौ ॥ ११२ ॥
उपाधिना-छद्मना ।
पादुके परिधायैष विहस्य प्राह मेहरीम् ।
पदयोर्लग मे स्थानं यथा यामि तवेप्सितम् ॥ ११३ ॥
मेहरीम्-अक्काम् ।
तथा कृते तया सोऽपि नभस्युड्डीय तत्क्षणात् ।
अनङ्गायतनं प्राप्य, पादुके द्वारि मुक्तवान् ॥ ११४ ॥
यावद्याति स कामार्चाकृते तावद् दुराशया ।
पादयोः पादुके क्षिप्त्वा कुट्टिनी गृहमागमत् ॥ ११५ ॥
सोऽनङ्गप्रतिमापूजां कृत्वा स्म वलते यदा ।
तदैते पादुके नैव ददर्श न च कुट्टिनीम् ॥ ११६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अहो अहं कथंकारं छलितः पापयानया ।
इत्थं विषद्य स स्वान्ते दध्यौ विधिविजृम्भितम् ॥ ११७॥
उक्तं च-परिजनसाहसधनमतयः किमु विदधति भुवि तस्य ।
विधिरखिलाहितघटनपटुः प्रतिदिवसं किल यस्य ॥ ११८॥
चिन्ताचान्तः कुमारोऽपि यावद् भ्रमति भूधरे ।
तावद्विद्याधरः कश्चित्सकृपस्तमवोचत ॥ ११९॥
कुमार! कुरु मा खेदं करिष्येऽहं त्वदीप्सितम् ।
आपक्षमत्र तिष्ठ त्वं कुर्वन् कन्दर्पपूजनम् ॥ १२०॥
स्मरचैत्यपुरोरूढशाखिनोः सविधे त्वया ।
न गन्तव्यमिति प्रोच्य भोज्यं दत्त्वा च सोऽगमत् ॥ १२१॥
कौतुकादेकदा राजतनयो द्रुमयोस्तयोः ।
जिघ्रन्नेकस्य पुष्पाणि, क्षणाद्रासभतां गतः ॥ १२२॥
तत्रागतस्तथारूपं पक्षान्ते खचरोऽथ तम् ।
दृष्ट्वाकरोद् द्वितीयद्रुप्रसूनाघ्रापणान्नरम् ॥ १२३॥
तेनात्यर्थमुपालब्धः क्षमयित्वा स्वदूषणम् ।
स विद्याधरमप्राक्षीत्किमेतच्चित्रकृत्प्रभो! ॥ १२४॥
विद्याभृदाह चैत्याग्रे रोपितौ पादपाविमौ ।
खरमानवविद्याभ्यां वासितौ कौतुकान्मया ॥ १२५॥
स पुनः स्थापयित्वागात् कुमारं पञ्चवासरीम् ।
सोऽपि तद्वृक्षपुष्पाणि पृथक् पृथगुपाददे ॥ १२६॥
ततो विद्याधराधीशः प्रसन्नः पञ्चमे दिने ।
वरसेनमनैषीद् द्राक् श्रीकाञ्चनपुरं पुरम् ॥ १२७॥
तं पुनस्तादृशैर्भोगैर्विलसन्तमनेकधा ।
वीक्ष्याक्का विस्मिता दध्यावयमत्रायया कथम् ॥ १२८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तद्वञ्चनाकृते पापा मगधावारितापि सा ।
प्रत्यङ्गपट्टकान् बद्ध्वागात् क्रन्दन्ती तदन्तिकम् ॥ १२९॥
कुमारोऽपि निजामर्षं वैदग्ध्यादप्रकाशयन् ।
कुट्टिनीं तामभाषिष्ट कष्टं किमिदमम्ब! ते ॥ १३०॥
मायया रुदती पापा सोपालम्भं तमालपत् ।
वत्स! त्वत्कारणादेतदवाप्तं कष्टमीदृशम् ॥ १३१॥
तदा वत्स! कलाकेलिनिलयं विशतस्तव ।
कश्चिद्विद्याभृदभ्येत्य गृहीत्वा पादुके व्रजन् ॥ १३२॥
मयाधारि करे यावत्तावत्तेनातिरोषिणा ।
उत्पाट्य पातितात्राहं तन्ममाङ्गमभज्यत ॥१३३॥ युग्मम् ॥
ज्ञाततत्त्वः कुमारोऽपि तामभाषत नाम्ब! माम् ।
दुनोति पादुकानाशो जीवन्ती मिलितासि यत् ॥ १३४॥
ततस्तं सा करे धृत्वा, नीत्वा च निजमन्दिरे ।
कियत्यपि गते कालेऽपृच्छद् द्रव्यार्जनं पुनः ॥ १३५॥
सोऽप्युवाचाम्ब! कामेनाराधितेन घनं धनम् ।
प्रदत्तमौषधिनामा वृद्धतारुण्यकारिणा ॥ १३६॥
अमा-सह ।
लगित्वा पादयोस्तस्य सा याच्ञामकरोदिति ।
देहि वत्सौषधं तन्मे यौवनं येन जायते ॥ १३७॥
अम्ब! त्वदर्थमेवाहमानिनायेदमौषधम् ।
तत्कृतार्थीकुरुष्वाद्येति निगद्य मुमोद सः ॥ १३८॥
ततो लकुटमादाय कन्थां च नृपनन्दनः ।
पुष्पाण्याघ्राप्य तां सद्यो मेहरीमकरोत् खरीम् ॥ १३९॥
मुखयन्त्रणमासूत्र्य, पृष्ठे कन्थां निधाय सः ।
लकुटं च करे कृत्वा तामारुक्षद्रुषोत्कटः ॥ १४०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रकटैर्लकुटाघातैः कुट्टयन् कुट्टिनीखरीम् ।
हासयन्नागरांश्चासौ कुमारो निरगात् पुरः ॥ १४१ ॥
साधु साधु कुमारेण कृते प्रतिकृतं कृतम् ।
इति संचिन्तयन्ती सा मगधा मुदिता हृदि ॥ १४२ ॥
अपरस्तु परीवारस्तारपूत्कारमाचरन् ।
परारक्षाय तद्वृत्तं गत्वा सर्वं न्यवेदयन् ॥ १४३ ॥
तदैव दुर्गपालोऽपि निर्गत्य नगराद् बहिः ।
ददर्श तं कुमारं तां ताडयन्तं मुहुर्मुहुः ॥ १४४ ॥
रे रे! कर्मेदृशं कुर्वन्नस्माकं पुटभेदने ।
न बिभेषीति तं दुर्गाधीशोऽत्यर्थमतर्जयत् ॥ १४५ ॥
सकोपं भूपजेनापि, जल्पितः पुरपालकः ।
अरे! यस्य यमो रुष्टः स युद्धाय समेतु माम् ॥ १४६ ॥
साक्षेपं तद्वचः श्रुत्वारक्षो रक्ष इवापरः ।
कुन्तकार्मुककौक्षेयैर्योद्धुमेनं प्रचक्रमे ॥ १४७ ॥
तत्प्रयुक्तानि शस्त्राणि लकुटभ्रमणात्तनौ ।
न लगन्ति कुमारस्य, विषाणीव गरात्मनि ॥ १४८ ॥
तेन न्यक्कृतमारक्षमेक्ष्याक्कायाः परिच्छदः ।
भूपायामरसेनाय, तत्स्वरूपं व्यजिज्ञपत् ॥ १४९ ॥
राजापि सपरीवारः कौतुकोत्तानमानसः ।
राजकुञ्जरमारुह्य तत्समीपमुपागमत् ॥ १५० ॥
उपलक्ष्य महीपालोऽमरसेनः सहोदरम् ।
वरसेनं समुत्तीर्य गजादालिङ्गदादरात् ॥ १५१ ॥
नृपस्तमाह साश्चर्यः किमिदं वत्स! चेष्टितम् ।
प्रोत्तुङ्गचङ्गमातङ्गस्कन्धारोहोचितस्य ते ॥ १५२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रणत्य भूपतिं प्राह कुमारोऽपि सहोदरः ।
दुःखानि कत्यहं वच्मि विहितान्येतया हि मे ॥ १५३ ॥
राज्ञा पृष्टोऽवदत्सोऽपि, वृत्तान्तं कुट्टिनीकृतम् ।
नृपादेशात्ततः स्थाणौ बन्धयामास तां खरीम् ॥ १५४ ॥
सिन्धुरस्कन्धमारोप्य महोत्सवपुरस्सरम् ।
बन्धुं प्रवेशयामास नृपतिर्निजपत्तनम् ॥ १५५ ॥
सर्वापि जनताभ्येत्याभ्येत्यैनां कुट्टिनीखरीम् ।
दर्शं दर्शं पपाठोच्चैः श्लोकमेकमिति स्फुटम् ॥ १५६ ॥
अतिलोभो न कर्त्तव्यो लोभं चैव परित्यजेत् ।
अतिलोभाभिभूता सा कुट्टिनी रासभी कृता ॥ १५७ ॥
नृपाग्रहाद् द्वितीयानि सुमान्याघ्राप्य सा खरी ।
नरीकृत्य ततोऽमोचि तेनोपादाय पादुके ॥ १५८ ॥
युवराजपदं दत्त्वा बन्धवे गुणसिन्धवे ।
भूपालः पालयामास, पृथ्वीमेकपुरीमिव ॥ १५९ ॥
आनाय्य पितरावेतौ, सपत्नजननीमपि ।
प्रीणयामासतुः सन्तो न हि कस्य हितावहाः ॥ १६० ॥
ताभ्यां श्वेतातपत्राधःस्नापनात् स्वोपकारकृत् ।
पावयित्वा स मातङ्गो, देशदानेन सत्कृतः ॥ १६१ ॥
अन्यदा तौ गवाक्षस्थौ विहरन्तौ पुरान्तरे ।
मुनी विलोक्य सोत्कण्ठौ, तत्प्रणत्यै वने गतौ ॥ १६२ ॥
भक्त्या नत्वा यती राजयुवराजौ निषीदतुः ।
तदग्रे च चकारैको मुमुक्षुर्धर्मदेशनाम् ॥ १६३ ॥
देशनान्ते मुनिर्भक्त्या पृष्टः स्वामिन्! पुरा भवे ।
*किमावाभ्यां कृतं पुण्यं राज्यं येनाजनीदृशम् ॥ १६४ ॥*

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्रुतज्ञानेन विज्ञाय, तयोः पूर्वभवं मुनिः ।
कथयाञ्चकृवान् सम्यक् सोत्कण्ठं शृण्वतोः पुरः ॥ १६५॥
इहैव **भरते**ऽस्ति **श्रीऋषभाग्र**पुरं पुरम् ।
**तत्राभयङ्करः** श्रेष्ठी नाम्नापि क्रिययापि च ॥ १६६॥
यथार्थनामिका तस्याभूत् **कुशलमतिः** प्रिया ।
कुर्वन्तौ गृहगोकर्माभूतां कर्मकरौ तयोः ॥ १६७॥
तौ सर्वदा जिनेन्द्रार्चामुनिदानादिसादरम् ।
निरीक्ष्य श्रेष्ठिनं चित्ते स्मेति चिन्तयतश्चिरम् ॥ १६८॥
समाने मानवत्वेऽपि यदयं श्रेष्ठिपुंगवः ।
दानादि कुरुते तत्प्राक्कृतपुण्यभवं फलम् ॥ १६९॥
आवां कर्मकरावस्य रौद्रदारिद्र्यमुद्रितौ ।
प्राक्कृतासुकृतौ येन तेनात्रापि हि नो सुखम् ॥ १७०॥
पुण्याभिलाषिणौ मत्वा श्रेष्ठी तौ जिनमन्दिरे ।
निन्ये कारितनेपथ्यौ चातुर्मासकपर्वणि ॥ १७१॥
पूजार्थं हृद्यपुष्पादि दातुं प्रववृते वणिक् ।
यावत्तावदिमौ ब्रूतः स्म नादास्यावहे विभो! ॥ १७२॥
यस्य वस्तु फलं तस्यावयोरेव परिश्रमः ।
इति ब्रुवाणौ तेनापि बोधितौ नोक्तियुक्तिभिः ॥ १७३॥
ततः श्रेष्ठी निनायैतौ बोधाय गुरुसन्निधौ ।
तैरपि ज्ञातवृत्तान्तैस्तौ च पृष्टावथोचतुः ॥ १७४॥
स्वामिन्निजधनेनावां पूजयावो जिनेश्वरम् ।
तन्नास्त्येव पुनः प्राह गुरुः किमपि विद्यते ॥ १७५॥
गोपालः प्राह हे नाथ! कपर्दकशतं मम ।
पार्श्वे दुरोदरक्रीडायोग्यमस्ति न चापरम् ॥ १७६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्तोकेनानेन वित्तेन पूजा स्यात्कीदृशी प्रभो! ।
सूरयोऽपि विदित्वास्य भावमेवमुपादिशन् ॥ १७७॥
स्वल्पस्वेनापि देवार्चां, यथाशक्ति वितन्वतः ।
पुंसः स्याद्विपुला संपद्धर्मे भावो बली यतः ॥ १७८॥
ततः सहर्षः पुष्पाणि गृहीत्वा तैः कपर्दकैः ।
वासनावासितस्वान्तः, स जिनेशमपूपुजत् ॥ १७९॥
तत्कृतां वीक्ष्य देवार्चां द्वितीयो गृहकर्मकृत् ।
विममर्शेति किं कुर्वे यत्कपर्दोऽपि नास्ति मे ॥ १८०॥
तस्मिन्नवसरे प्रत्याख्यानं श्राद्धान् प्रकुर्वतः ।
दृष्ट्वा स सूरिमाहैवं कृतेऽपि सुकृतं भवेत् ? ॥ १८१॥
भवतीत्युदिते सूरीन्द्रेण कृत्वौपवस्तकम् ।
स भोजनक्षणोऽगारं जगाम श्रेष्ठिना सह ॥ १८२॥
औपवस्तकम्-उपवासम् ।
परिवेष्याशनं स्थाले, गृहद्वारमुपेत्य च ।
दिक्षु चक्षुः क्षिपन्नेष चेतस्येवमचिन्तयत् ॥ १८३॥
यदि मे पुण्ययोगेन कश्चिदेति मुनीश्वरः ।
तदा तस्मै वितीर्यैतत् कृतकृत्यो भवाम्यहम् ॥ १८४॥
यतः श्रेष्ठिगृहे कर्म कृत्वा प्राप्तमिदं मया ।
अतो निजभुजोपात्तं दत्तं पुण्याय जायते ॥ १८५॥
तस्मिन्नेव क्षणे साधुयुगलीममलीमसाम् ।
भिक्षार्थमागतां वीक्ष्य मनस्येवमचिन्तयत् ॥ १८६॥
क्वाहं कर्मकरो रङ्कः क्व चैतौ मुनिसत्तमौ ।
क्व न्यायोपार्जितं भक्ष्यं, यद्योगोऽयमभून्मम ॥ १८७॥
तन्मन्ये कापि संपद् भवित्री परजन्मनि ।
अतस्तेन मुनिभ्यां तद् दत्तमद्भुतभावतः ॥ १८८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तद्विलोक्य निजे चित्ते हृष्टः श्रेष्ठी जगाद तम् ।
उपादत्स्वापरं भोज्यं पुनर्भोजनहेतवे ॥ १८९ ॥
सोऽपि प्राह न भोक्ष्येऽहं यतोऽद्य गुरुसन्निधौ ।
उपवासो मयाकारि ततः श्रेष्ठी बभाण तम् ॥ १९० ॥
कथं तर्हि त्वया पूर्वं भोजनं परिवेषितम् ।
सोऽप्यूचे स्वभुजायुग्मार्जितं मुञ्चामि तत्कथम् ॥ १९१ ॥
ततस्तौ सुकृतोद्युक्तौ श्रेष्ठिवात्सल्यहर्षुलौ ।
सुखेन निन्यतुः कालं पुण्यं ह्यत्रापि कामदम् ॥ १९२ ॥
गृहकर्मकृतो जीवो मुनिदानानुभावतः ।
त्वं बभूविथ भूमीशोऽमरसेनो नृपाङ्गभूः ॥ १९३ ॥
गोपालस्याथ जीवस्तु जिनपूजानुभावतः ।
वरसेनोऽभवत् पञ्चशतदीनारलब्धिमान् ॥ १९४ ॥
भोगा निरन्तराः प्राप्ता रूपैश्वर्याद्यभङ्गुराः ।
यद्दानपुण्यात्तत्पुष्पं फलं त्वग्रे भविष्यति ॥ १९५ ॥
यदेतस्माद् भवात्पञ्च भवान् सुरनरोद्भवान् ।
प्रवर्धमानलक्ष्मीकान् युवामवाप्स्यथस्तमाम् ॥ १९६ ॥
ततः षष्ठे भवे पूर्वविदेहेषु नरेन्द्रताम् ।
भुक्त्वा त्यक्त्वा च तां दीक्षामादाय शिवमाप्स्यथः ॥ १९७ ॥
इमां गुरोर्गिरं श्रुत्वा जातजातिस्मृती तकौ ।
आत्तश्राद्धव्रतौ साधून्नत्वा प्रासादमीयतुः ॥ १९८ ॥
प्रतिग्रामं प्रतिद्रङ्गं दानशालां विशालिकाम् ।
कारयामासतुर्जैनप्रासादानप्यनेकशः ॥ १९९ ॥
चिरतरं परिपाल्य गृहिव्रतं स वरसेनयुतोऽमरसेनराट् ।
सुगुरुपादपयोरुहसन्निधौ श्रितचरित्रभरो दिवमासदत् ॥ २०० ॥
(द्रुतविलम्बितम्)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्यमरसेनवरसेननृपतिचरितं निशम्य भो भव्याः! ।
कुरुत शुभपात्रदानं येन भवेद्वः सदा सौख्यम् ॥२०१॥ (आर्या)

इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ सत्पात्रदानविषये श्रीअमरसेन-वरसेननरेन्द्रकथा समाप्ता ॥

सुपात्रदानफलमुक्त्वा सांप्रतं द्वितीयमुचितदानमाह-

**अह समुचियदाणमिणं जसवल्लीकंदकंदलणकंदं ।**
**भुवणच्छेरयकरणं भणिज्जमाणं सुणिज्ज बुहा ॥ ७७॥**

व्याख्या-अथानन्तरं हे बुधा!-विचक्षणा! मया कथितमानं (कथ्यमानं) समुचितदानं शृणुताकर्णयतेति क्रियासम्बन्धः। तद्विशिनष्टि जसत्ति यश एव-कीर्त्तिरिव वल्ली-लता यशोवल्ली, तस्या योऽसौ कन्दो-मूलं, तस्य यत्कन्दलनं-किशलयनं तत्र कन्द इव-मेघ इव तत्। नन्वपरैरपि कूपादिजलैर्वल्लयः पल्लवोल्लासिन्यः स्युः परं वारिदेन सिक्तास्ता अपरामेव मुखच्छायां वहन्ति। उक्तं च-

अवरेहि वि कूवजलेहि किं न जीवंति नाम वल्लीओ ।
जलहरजलसित्ताणं सा कावि अवरा मुहच्छाया ॥ १॥

तथोचितदानजलसिक्ता यशोवल्ल्यपि सश्रीका भवतीति। भुवनस्य-स्वर्गमर्त्यपाताललोकरूपस्य, आश्चर्य-विस्मयः, क्रियते-ऽनेनेति तत्। को नामाद्भुतं दानं दीयमानमालोक्य चेतसि न मुत्करोतीति गाथार्थः॥

तदुचितदानं केषु केषु विधीयत इति गाथात्रयेणाह-

**वेसेसिय-णेयाइय-मीमंसय-संख-भिक्खुपमुहेसु ॥**
**तियसट्ठिसहियतियसयकिरियाकिरियाइवाईसु ॥ ७८॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अतिहीसुं माहणेसुं, मागहगंधव्वनडभडेसुं च ।**
**सहियसुयासणिणंदणजंमूसवपमुहकज्जेसु ॥ ७९ ॥**
**कित्तिणिमित्तं दाया, जं दव्वं वावरेइ एएसु ।**
**णाणधणा मुणिवइणो तमुचियदाणं समाहिंसु ॥ ८० ॥**

व्याख्या-वैशेषिका-औलूक्यमतानुसारिणो, नैयायिका-अक्षपादमतावलम्बिनो जटाधराः, मीमांसका-भाट्टप्राभाकरभेदास्त्रिदण्डिनः, सांख्याः-कापिलदर्शिनः, भिक्षवः-सौगताः, प्रमुखशब्दोऽमीषां भेदप्रभेदसूचकः । वैशेषिकाश्च नैयायिकाश्च मीमांसकाश्च सांख्याश्च भिक्षुप्रमुखाश्च वैशेषिकनैयायिकमीमांसकसांख्यभिक्षुप्रमुखास्तेषु, तियसट्ठित्ति त्रिषष्ट्यधिकसहितानि यानि त्रीणि शतानि तत्संख्या ये क्रिया-अक्रियादिवादिनः पाखण्डिनस्तेषु जिनमतप्रतीतेषु ॥ यदुक्तं-

असिइसयं किरियाणं अकिरियवाईण होइ चुलसीई ।
अण्णाणिय सत्तट्ठी वेणइयाणं च बत्तीसं ॥१॥*

एतत्संख्योत्पत्तिमाह-अशीत्यधिकशतं क्रियावादिनाम्, तथा च न कर्त्तारमन्तरेण क्रिया पुण्यबन्धादिलक्षणा भवति, तत एवं परिज्ञायात्मसमवायिनीं वदन्ति तच्छीलाश्च ये ते क्रियावादिनः, ते पुनरात्माद्यस्तित्वप्रतिपत्तिलक्षणा अमुनोपायेनाशीत्यधिकशतसंख्या विज्ञेयाः। जीवाजीवाश्रवबन्धसंवरनिर्जरापुण्यपापमोक्षरूपान्नवपदार्थान् परिपाट्या विन्यस्य स्वपरभेदाभ्यां गुणयित्वा नित्यानित्याभ्यां च संगुण्य ततः कालेश्वरात्मनियतिस्वभावभेदैः पञ्चभिर्गुणिता जाता अशीत्यधिकशतं भेदाः । [९×२×२×५=१८०]

अक्रियावादिनां संख्यामाह-

न कस्यचित्प्रतिक्षणमनवस्थितस्य पदार्थस्य क्रिया संभवति-

---

* श्रीसूत्रकृताङ्गे उद्धृत-गाथा- पृ.१९६

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उत्पत्त्यनन्तरविनाशादिति वादिनः । एते चात्मादिनास्तित्वप्रतिपन्नलक्षणा अमुनोपायेन चतुरशीतिसंख्या द्रष्टव्याः, पुण्यापुण्यरहिततत्त्वसप्तकं स्वपरभेदाभ्यां गुणितं जाताश्चतुर्दश, ते च कालेश्वरात्मनियति-स्वभावयदृच्छाभेदैः षड्भिर्गुणिता जाताश्चतुरशीति भेदा अक्रिया-वादिनाम्। [७×२×६=८४]

अज्ञानवादिनां संख्यामाह-ज्ञाने सत्यभिनिवेशसंभवात्तस्माद-ज्ञानमेव मुमुक्षुणा मुक्तयेऽभ्युपगन्तव्यं न ज्ञानमिति । तद्भेदानाह-जीवादिनवतत्त्वानि । सत्त्वाऽसत्त्वसदसत्त्वावाच्यत्वसदवाच्यत्वा-सद-वाच्यत्वसदसदवाच्यत्वभेदसप्तकेन गुणितानि जातास्त्रिषष्टिभेदाः । [९×६=६३]

वैनयिकानां संख्यामाह-विनयेन चरन्तीति वैनयिकाः । एते चानवधृतलिङ्गाचारशास्त्राविनयप्रतिपत्तिलक्षणा वेदितव्याः । तद्भेदाः सुर-नृप-यति-ज्ञाति-स्थविराधम-मातृ-पितृरूपा अष्टौ भेदाः । तेन मनोवाक्काय-दानभेदैश्चतुर्भिर्गुणिताद्द्वात्रिंशद्भेदा भवन्ति । [८×४=३२]

एवं त्रिषष्ठ्यधिकशतत्रयप्रमाणाः पाखण्डिनः स्याद्वादमुद्रानल-ङ्कृतत्वादेकैकनयमतावलम्बिनो मिथ्यादृश एवेत्यवगन्तव्याः । अति-हित्ति अतिथिषु-सामान्यप्राघूर्णकेषु, माहणित्ति माहनेषु-विप्रेषु, मागहित्ति मागधा-मङ्गलपाठकाः, गन्धर्वा-गायनाः, नटाः-शैलूषाः, भटा-राजपुरुषाः, मागधाश्च गन्धर्वाश्च नटाश्च भटाश्चेति द्वन्द्वस्तेषु। सहियत्ति सख्योर्धर्मभगिन्यः, स्वासिन्यः-पितृष्वसृस्वसृभाग्नेय्यो नन्दनजन्मोत्सव-प्रमुखकार्यं च पुत्रोत्पत्तिलेखशालाकरणपाणिग्रहणप्रभृत्युत्सवकृत्यं सख्यश्च स्वासिन्यश्च नन्दनजन्मोत्सवप्रमुखकार्यं चैति द्वन्द्वस्तेषु । चः समुच्चये। कित्तिणिमित्तंति यद् एतेषु पूर्वोक्तेषु कीर्त्तिनिमित्तं-यशो-निमित्तं, स दाता-दायकपुरुषो यद् द्रव्यं धनकनकमणिमाणिक्य-वस्त्रादिकं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

व्यापारयति-निवेशयति । तज्ज्ञानधना-मतिश्रुतावधिमनः-पर्यायकेवल-ज्ञानविभवा मुनिपतयः-साधुपुंगवा उचितदानं-पात्रानुसारिप्रदानं कथयन्ति-ब्रुवते इति गाथात्रयार्थः ॥

उचितदानदातृफलप्रतिपादिकां गाथामाह-

**सारयससहरसोयरजसभरघणसारवासियदियंतो ।**
**इह उचियदाणदाया सिरिकण्णणरेसरुव्व हवे ॥ ८१ ॥**

व्याख्या-शारदः-शरत्कालसंबन्धी, यः शशधरः-सुधाकरस्तस्य सोदरः-सदृक्षो योऽसौ यशोभरः-कीर्त्तिपूरः स एव घनसारः-कर्पूरस्तेन वासिताः-परिगलिता दिगन्ता-आशाप्रान्ता येन स एवंविध इहलोके उचितदानदाता श्रीकर्णनरेश्वर इव-चम्पाधिप इव भवेज्जायेतेति **गाथार्थः** ॥ अमुष्य च दृष्टान्तः सविस्तरो महाभारताज्ज्ञेयः, परमत्र ग्रन्थ-गौरवभयाद्दिग्मात्रमेव प्रदर्श्यते।

तथाहि-अस्त्यपूर्वः श्रिया पूर्वदेशः देशेषु योऽर्हताम् ।
जन्मत्वेनात्मनि व्यक्तं व्यनक्ति परभागताम् ॥ १ ॥
तस्मि**न्नङ्गा**भिधो देशो निवेशोऽखिलसंपदाम् ।
यस्मिन् पलाशाः श्रूयन्ते तरवो न हि देहिनः ॥ २ ॥
तत्र शत्रुकृताकम्पा **चम्पा** नाम महापुरी ।
यस्यां करप्रचारः स्त्रीस्तनेषु न जनेषु च ॥ ३ ॥
तस्यामासीदसीमश्रीः **कर्णो** नाम नरेश्वरः ।
यत्कीर्त्तिनर्त्तकी विश्वमण्डपेऽद्यापि नृत्यति ॥ ४ ॥
एकदा पर्षदासीनं श्रीकर्णमवनीश्वरम् ।
दौवारिकः समभ्येत्य, प्रणिपत्य व्यजिज्ञपत् ॥ ५ ॥
देव! **दुर्योधन**क्षोणीशतो दूत इहागतः ।
युष्माकं दर्शनं वाञ्छत्यम्भोदमिव चातकः ॥ ६ ॥

भूपालः प्राह रे द्वारपाल! तं दूतमानय ।
इति भूमिभुजादिष्टः स प्रावेशयदाशु तम् ॥ ७॥
संदेशहारके नत्वा निविष्टे विष्टपाधिपः ।
तं प्राह कुशलं श्रीमद्दुर्योधनधरेशितुः ॥ ८॥
सोऽप्यूचे नृपतेऽरातिकुलदावदवानले ।
त्वयि भ्रातरि जागर्त्ति, तस्यास्त्यकुशलं कुतः ॥ ९॥
परं कुरुकुलाकाशभानुना येन हेतुना ।
प्रेषितो भवदभ्यर्णं तन्महीश! निशम्यताम् ॥ १०॥
देव! संप्रति संपूर्णावधिभिः **पाण्डुसूनुभिः** ।
**कृष्णाद्** दुर्योधनक्ष्मापपुरस्तादिति भाणितम् ॥ ११॥
पूर्णीबभूव नोऽरण्यनिवासो द्वादशाब्दिकः ।
वर्षस्त्रयोदशोऽप्यन्यजनाविज्ञातलक्षणः ॥ १२॥
अतो मुञ्च विलम्बं नो यच्छ राज्यं भवाथवा ।
संग्रामप्रगुणोऽत्रार्थे, तृतीयोऽध्वा न विद्यते ॥ १३॥
तच्छ्रुत्वा धार्तराष्ट्रोऽसावेषां राज्यं ददामि किम् ।
किं वा रणं करोमीति, विमर्शाविष्टमानसः ॥ १४॥
वेगेन युष्मदाह्वानकृते मां प्रैषिषत्तमाम् ।
भवद्भिरपि यद्युक्तं, भवेत्तद्धि विधीयताम् ॥ १५॥ युग्मम् ॥
इत्थमाकर्ण्य कर्णाभ्यां, सकर्णः कर्णपार्थिवः ।
तेनैव साकं सानीको, **हस्तिनापुर**माययौ ॥ १६॥
दुर्योधनः परीवारवृतस्तत्संमुखं गतः ।
महाविभूत्या श्रीकर्णदेवं प्रासादमानयत् ॥ १७॥
ऊचे चास्माभिरेतेषां, किं राज्यं दीयतेऽथवा ।
युद्धं विधीयतेऽत्रार्थे प्रमाणं हि भवद्वचः ॥ १८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कर्णः प्राह नृपेदानीं पाण्डवाः क्षीणसंपदः ।
सुजेयास्तदिमैः सार्द्धं, युद्धमेव विधीयते ॥ १९ ॥
दुर्योधनोऽपि तद्वाक्यं, तथैव प्रतिपद्य च ।
सोऽग्रेऽपि रणसज्जोऽभूत्तदुक्ते तु किमुच्यते ॥ २० ॥
अथ श्रीपाण्डुभूदुर्योधनभूधनयोर्मिथः ।
रणोऽतिदारुणो जज्ञे, रामरावणयोरिव ॥ २१ ॥
जाते सप्तदशेऽहन्यद्यार्जुनेनैव समं मया ।
ध्रुवं विधेया संग्रामसंकथा हृद्व्यथापहृत् ॥ २२ ॥
इति निश्चयमाधाय विहितस्नानमङ्गलः ।
आराधितपरब्रह्मा सर्वाङ्गीणविभूषणः ॥ २३ ॥
सन्नद्धबध्यकवचो विविधायुधबन्धुरः ।
सिन्धुरस्कन्धमारूढः श्वेतच्छत्रोपशोभितः ॥ २४ ॥
चामराभ्यां वीज्यमानो, भट्टथट्टकृतस्तुतिः ।
सर्वेभ्यो याचकेभ्यो रैरूप्यरत्नादिकं ददत् ॥ २५ ॥
जितकाशी भवान् भूयादिति वृद्धाङ्गनाशिषाम् ।
वचांस्याकर्णयन् कर्णकोटराभ्यां पदे पदे ॥ २६ ॥
सुयोधनादिभूपालपरीवारपरीवृतः ।
वाद्यमानेषु निस्वानादिवादित्रेषु सत्सु सः ॥ २७ ॥
श्रीकर्णदेवभूजानिर्मृगारिरिव निर्भयः ।
पुरीदरीतो निर्गत्य, रणभूम्यामुपेयिवान् ॥ २८ ॥ सप्तभिः कुलकम् ॥
यः कोऽप्येत्य कमप्यर्थं, प्राणी प्रार्थयतेऽधुना ।
तस्मै तत्तद् ददाति श्रीकर्ण इत्थमघोषयत् ॥ २९ ॥
तच्छ्रुत्वाभ्यर्णवर्त्तिभ्यो, ग्रामेभ्यो विभवार्थिनः ।
अहंपूर्विकया तत्रास्तोका लोकाः समागमन् ॥ ३० ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अस्मिन्नवसरे कश्चिद्विप्रो दारिद्र्यविद्रुतः ।
रोमशः प्रत्यहं भिक्षावृत्तिकृद् रुक्षविग्रहः ॥ ३१ ॥
देशाननेकशो भ्रामं भ्राममप्राप्तवैभवः ।
वेश्मन्यागाद्यतोऽभाग्यवतां लाभोदयः कुतः ॥ ३२ ॥ युग्मम् ॥
तमर्थशून्यमालोक्य, भार्या पिङ्गलकुन्तला ।
विरूपवदना लम्बस्तनी चिपिटनासिका ॥ ३३ ॥
स्थूलोदरा परद्रव्यसतृष्णा कृष्णविग्रहा ।
राक्षसीवातिघोराख्यत्, सा रुषा परुषाक्षरम् ॥ ३४ ॥ युग्मम् ॥
रे! निर्भाग्याद्य कर्णेन, याचका अदरिद्रिणः ।
रैरूप्यरत्नवस्त्रोक्षाश्वादिदानेन चक्रिरे ॥ ३५ ॥
तत्त्वं विलम्बमुत्सृज्य, तत्र व्रज यथा स ते ।
ददाति किमपीत्युक्तस्तयासौ निरगात्ततः ॥ ३६ ॥
*यत्रास्ते कर्णदेवपालस्तत्र समागतः ।
जीर्णशीर्णांशुको विप्रो दत्तस्वस्त्ययनोऽवदत् ॥ ३७ ॥
राजन्नाजन्मदारिद्र्योत्कटलुण्टाकलुण्टितम् ।
मां तथा कुरु येनाहं नाऽभवं पुनरीदृशः ॥ ३८ ॥
कर्णो वितीर्णसम्पूर्णधनोऽपि हि ममाधुना ।
मा दानखण्डना भूयान्मानम्लानिविधायिनी ॥ ३९ ॥
इति ध्यात्वा निजस्वान्ते, भूमिदेवमवोचत ।
दत्तं मयाखिलं किंतु, वस्तुत्रय्यस्ति संप्रति ॥ ४० ॥ युग्मम् ॥
एकार्कपाकरसवत्याह्वा विद्या द्वितीयकः ।
पटः सकलरोगघ्नस्तृतीयः स्वर्णसंकलः ॥ ४१ ॥
एतद्वस्तुत्रयस्यान्तर्यत्ते ब्राह्मण! रोचते ।
तदेकं प्रार्थयस्वेति, राज्ञा पृष्टः स ऊचिवान् ॥ ४२ ॥

---

* इदं चरणं सर्वप्रतिषु सप्ताक्षरीयमेव दृश्यते ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

महाराज! गृहे गत्वा, पृष्ट्वा प्राणप्रियां तथा ।
समायामि यतो लोके, गृहिणो गृहिणीमुखाः ॥ ४३ ॥
कर्णः प्रोवाच हे विप्र! संग्रामव्यग्रमानसः ।
संप्रत्यहमतो वेगात् प्रियां पृष्ट्वा त्वमेहि भोः! ॥ ४४ ॥
ओमित्युक्त्वा द्विजो गेहं गतः सुतसुतायुताम् ।
दयितां प्रति कर्णोक्तं, वृत्तान्तं सर्वमब्रवीत् ॥ ४५ ॥
इत्याकर्ण्य प्रियापुत्रपुत्र्यस्तं प्रोचिरे नृपात् ।
सूर्यपाकरसवतीं पटं संकलमर्पय ॥ ४६ ॥
एवमस्वल्पजल्पानां, कल्पनाकोटिसंकटम् ।
निजं कुटुम्बं विज्ञाय, ब्राह्मणस्तमदोऽवदत् ॥ ४७ ॥
स कर्णः सकृपोऽमायी, दायी त्वेकस्य वस्तुनः ।
यूयं च सर्वलुब्धास्तद् गत्वाहं तं निषेधये ॥ ४८ ॥
ततः कर्णान्तिकं प्राप्तः किंकर्त्तव्यजडाशयः ।
क्षणं तूष्णीं स्थितो विप्रो, भूभुजा समभाष्यत ॥ ४९ ॥
किमित्यद्यापि हे भट्ट! विलम्बः क्रियते त्वया ।
इत्युक्तस्तेन सोऽवादीद् देव वक्तुं न शक्यते ॥ ५० ॥
किमर्थं पार्थिवेनेति प्रोक्तो विप्रोऽवदन्नृप! ।
सूर्यपाकरसवतीं गृहाणेति प्रिया जगौ ॥ ५१ ॥
पुत्रो जगाद हे तात! पटं याचस्व मत्कृते ।
मद्भूषार्थं सुताप्याख्यदानय स्वर्णसंकलम् ॥ ५२ ॥
एवं कुटुम्बं मेऽनल्पजल्पसंकल्पनाकुलम् ।
विद्यतेऽतस्त्वया देव! स्वं कार्यं कार्यमेव हि ॥ ५३ ॥
तन्निशम्य विशामीशो, निराशो मा भवत्वसौ ।
इति संचिन्त्य विप्राय, तद्वस्तुत्रयमप्यदात् ॥ ५४ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदादाय द्विजः पूर्णकामो धाम जगाम सः ।
यतो गरीयसां सङ्गः, कस्य न स्यात्फलप्रदः ॥ ५५ ॥
अहो उचितदानेऽस्य, राज्ञो बुद्धिर्विजृम्भते ।
इत्यद्यापि जनैर्लोके, कर्णो व्यावर्ण्यते नृपः ॥ ५६ ॥
इत्थं जना उचितदानगुणाभिरामं, श्रीकर्णदेवनृपतेश्चरितं निशम्य।
एतद्विधानमवधानपराः कुरुध्वं, येनाभवं भवति वो यशसां विलासः ॥५७॥
(वसन्ततिलका)

इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ उचितदानविषये श्रीकर्णनरेन्द्रकथा समाप्ता॥

अथ तृतीयमनुकम्पादानमाह-

**इत्तो तं अणुकंपादाणं वुच्छं अतुच्छवच्छलयं ।**
**तं पिच्छिऊण सच्छा सययं हियए चमक्कंति ॥ ८२॥**

व्याख्या-इत्तो-अतः परम्, तदनुकम्पादानं वक्ष्ये-कथयिष्यामीति क्रियासंबन्धः ॥ तद्विशिनष्टि अतुच्छवच्छलयंति-अतुच्छेनापारेण-वात्सल्येन-निरुपमप्रेम्णा, जायत-उत्पद्यत इति अतुच्छवात्सल्यजम्, 'कगचजतदपयवां प्रायो लुगित्यनेन' जस्य अकारः, 'अवर्णो यः श्रुतिरित्यनेन' अकारस्य यादेशः। उत्तरार्द्धो विव्रियते । जं पिच्छि-ऊणित्ति-यदनुकम्पादानं दात्रा दीयमानं प्रेक्ष्य-दृष्ट्वा, स्वच्छाः- शरन्निशा-करकरनिकरानुकारिमनसः पुंसः, सततं-निरन्तरम्, हृदये-चित्ते, चमत्कुर्वन्ति-आश्चर्यचर्याभाजो भवन्तीति गाथार्थः॥

केषु केष्वनुकम्पादानमासूत्र्यत इति गाथात्रयेण तत्स्वरूपं प्ररूपयन्नाह-

**दीणाणमणाहाणं विहीणचरणाण णयणरहियाणं ।**
**बंदिपडियाण बंधणबद्धाणमजंगमाणं च ॥ ८३॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**विगलियवयाण सरणागयाण पत्थणपराण पंगूणं ।**
**काउरिसाण दुहीणं रोगेहिं गहियदेहाणं ॥ ८४॥**
**एएसिं जं दाणं सकरुणहियऊ पयच्छए दाया ।**
**तं अणुकंपादाणं परूवियं पुव्वसूरीहिं ॥ ८५ ॥**

व्याख्या-दीणत्ति । दीनेभ्योऽनुकम्पापात्रेभ्यः, अनाथेभ्यो-निःस्वामिकेभ्यः, विहीनचरणेभ्यः-छिन्नपादेभ्यः, नयनरहितेभ्यः-सर्वथान्धेभ्यः, बन्दिपतितेभ्यः-कारागाराद्युपद्रवमुद्रामुद्रितेभ्यः, बन्धनबद्धेभ्यो-नानाविधनिगडनिगडितेभ्यः, अजङ्गमेभ्यो-मनोवचनकायबलविकलेभ्यः, चः-समुच्चये ।

विगलियत्ति-विगलितवयोभ्यो-निरन्तरं जरापरिभूतेभ्यः, शरणागतेभ्यो-जीवितव्यापहारिभयभरविधुरत्वेन शरणं प्रपन्नेभ्यः, प्रार्थनापरेभ्योऽत्यन्तदीनत्वेन याच्ञानिरतेभ्यः, पङ्गुभ्यः-संकुचितचरणेभ्यः, कापुरुषेभ्यो-दुर्वारवैरिवाराहंकारापहारकारिपौरुषरहितत्वेनाकिंचित्करेभ्यः, दुःखिभ्यः-पितृमातृभ्रातृकलत्रमित्रपुत्रस्वजनादिवियोगोत्पन्नास्तोकशोकसागरनिमग्नेभ्यः, रोगैर्गृहीतदेहेभ्यः-कासश्वासज्वरभरभगन्दरादिरोगैराक्रान्तशरीरेभ्यः ।

एएसिंति-एतेभ्य उपलक्षणत्वात् प्राणिभ्यो यद्दाता-दानवीरः, सकरुणहृदयो-दयार्द्रचेता, दानं-विभवजीवितव्यादिप्रदानं प्रयच्छति-दत्ते । तदनुकम्पादानं प्ररूपितं-भणितम्, पूर्वसूरिभिर्गणधरदेवैरिति-गाथात्रयार्थः ॥

एतदेव दृष्टान्तेन स्पष्टयन्नाह-

**जयउ जए मेहरहो इन्देण वि वण्णीयचरिउ सो* ।**
**जस्सणुकंपादाणे रणरणए दुन्दुहीरावो ॥ ८६॥**

---

* एष दृष्टान्तोऽन्यत्राभयदानविषये कथितम्, अत्र तु अनुकम्पादानविषये भणितम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

व्याख्या-स-प्रसिद्धो, जगति-विश्वे, मेघरथो-मेघरथनामा नृप आस्तां तावदपरैर्नरसुरविसरैः किन्त्विन्द्रेणापि-ईशानेन्द्रेणापि वर्णनीय-चरित्रः-श्लाघ्यमानावदातो, जयतु-सर्वोत्कर्षेण वर्त्तताम्, यस्य-मेघरथनृपस्यानुकम्पादानेऽनुकम्पादानविषये दुन्दुभिरावो-ढक्कानिनादो रणरणायते-शब्दायत इति गाथार्थः॥

भावार्थः कथानकगम्यस्तच्चेदम्-

**जम्बूद्वीपा**भिधे द्वीपे, प्राग्**विदेहे** श्रियां गृहे।
विजये **पुष्कलावत्या**मस्ति पूः **पुण्डरीकिणी** ॥ १॥
यस्यामभ्रंलिहावासा वातोद्धूतैर्ध्वजापटैः।
तर्जयन्ति विमानानां श्रियं श्रीगर्विता इव ॥ २॥
तस्यां **घनरथा**भिख्यचक्रवर्त्तितनूभवः ।
श्रीमत्**प्रियमती**कुक्षिशुक्तिमुक्ताफलोपमः ॥ ३॥
विशुद्धतीर्थकृद्धर्म्मवल्लीपल्लवनाम्बुदः ।
शरणागतजन्तूनां वज्रपञ्जरसोदरः ॥ ४॥
विक्रमाक्रान्तदिक्चक्रः श्री**मेघरथ**पार्थिवः ।
जनानवति सन्नीत्या दिवीन्द्र इव नाकिनः ॥ ५॥ कुलकम्॥
निःसीमरूपसंपन्ने **प्रियमित्रामनोरमे** ।
अभूतां दयिते तस्य रतिप्रीती इवातनोः ॥ ६॥
तयोर्भुञ्जानयोर्भोगान् पत्या सह बभूवतुः ।
तनयौ **नन्दिषेण**श्च **मेघसेन**श्च विश्रुतौ ॥ ७॥
अन्यदेशानकल्पेन्द्रो लोकपालादिनाकिभिः ।
सेव्यमानपदद्वन्द्वोऽलञ्चकार निजां सभाम् ॥ ८॥
विस्मयेन शिरःकम्पं कुर्वन्तं वीक्ष्य नाकिनः ।
पप्रच्छुस्त्रिदशाधीशं मौलिधूननकारणम् ॥ ९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सोऽप्याह पुण्डरिकिण्यां पुरि मेघरथो नृपः ।
दृष्टः सत्त्ववतां धुर्यः, प्रयुक्तावधिना मया ॥ १० ॥
तदीयशरणायाता, जन्तवो न कदापि हि ।
पराभवितुमीश्यन्ते, सुरेन्द्रैः ससुरैरपि ॥ ११ ॥
अतो मम चमत्कारः स्फुरति स्म सुरा हृदि ।
स किं पुमान् योग्यगुणान्, वीक्ष्य हर्षं तनोति न ॥ १२ ॥
इत्याकर्ण्य सुरः कोऽपि तद्वचो वितथं विदन् ।
श्रीमेघरथसत्त्वस्य परीक्षार्थं दिवोऽचलत् ॥ १३ ॥
सत्वरायान्नभोमार्गे श्येनपारापतौ मिथः ।
युध्यमानौ रुषा वीक्ष्य तयोर्वपुरशिश्रियत् ॥ १४ ॥
अथ मेघरथक्ष्मापे सामन्तामात्यमण्डितम् ।
सभामण्डपमासीने, कान्दिशीको मरुत्पथात् ॥ १५ ॥
राजन्! मां रक्ष रक्षेति जल्पन् मानुषभाषया ।
पारापतपतत्री स तदुत्संगेऽपतद्भयात् ॥ १६ ॥ युग्मम् ॥
पक्षिणं भक्षभूतं मे, मुञ्च मुञ्चेति भूपते! ।
वदन्ननुपदं तस्य, श्येनोऽप्योतुरिवाययौ ॥ १७ ॥
नृपोऽपि प्राह भोः श्येन! कथमेनं ददामि ते ।
न क्षत्राणामयं धर्मः शरणस्थो यदर्प्यते ॥ १८ ॥
किञ्च श्येन! तवाप्येष न योग्यः कुग्रहाग्रहः ।
यदन्यजीवघातेन स्वपिण्डपरिपोषणम् ॥ १९ ॥
पक्षेऽपि त्रोट्यमाने ते यथा स्यान्महती व्यथा ।
तथान्यस्यापि जायेत हन्यमानस्य का कथा ॥ २० ॥
भक्षिते पक्षिणि श्येन! तृप्तिः स्यात्क्षणिका तव ।
अमुष्य तु वराकस्य हा सर्वं जन्म पूर्यते ॥ २१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पञ्चेन्द्रियाणां जन्तूनां वधो मांसादनं तथा ।
प्रथमं नरकपातश्रीकरग्रहणमङ्गलम् ॥ २२ ॥
गत्वरस्य शरीरस्य, पोषायामिषभक्षणम् ।
क्रियते श्येन! यैस्तैस्तु, पश्यद्भिः कूपमज्जनम् ॥ २३ ॥
बुभुक्षानाशनोपाया भवन्ति ह्यशनादयः ।
तत्किं श्वभ्रे मुधा मांसादनैः स्वात्मा निपात्यते ॥ २४ ॥
प्राणिप्राणापहारेण नरकातिथितामिताः ।
ताड्यन्ते श्येन! सोल्लुण्ठैः, परमाधार्मिकामरैः ॥ २५ ॥
तदद्यापि निवर्तस्व, वधाज्जीवदयां श्रय ।
यथामुत्रापि तैरश्ची न जायते गतिस्तव ॥ २६ ॥
इत्युदित्वा स्थिते राज्ञि, श्येनः स्माह नृभाषया ।
भूप! युक्तममुं पासि, पक्षिणं शरणागतम् ॥ २७ ॥
परं क्षुत्क्षामकुक्षिः सन् किं करोमि क्षमापते! ।
यतो बुभुक्षिता न स्युः पुण्यापुण्यविवेचकाः ॥ २८ ॥
यथा रक्षस्यमुं भक्ष्यं पक्षिणं मे क्षमापते! ।
तथा क्षुद्राक्षसीतो मां रक्ष सन्तो यतः समाः ॥ २९ ॥
स्थापयित्वैक उत्सङ्गे, रक्ष्यतेऽन्यस्तु हन्यते ।
श्रीमेघरथभूपाल! केयं ते धर्मचातुरी ॥ ३० ॥
न मांसभक्षिणो जीवा मोदन्ते मोदकैरपि ।
करभः कण्टकास्वादी, किं मुखं क्षिपतीक्षुषु ॥ ३१ ॥
यावत् स्वचञ्चुघातेन, हत्वा नो जीवमद्म्यहम् ।
तावद् भवेन्न मे तृप्तिरतोऽमुं नृपतेऽर्पय ॥ ३२ ॥
इतीरिते सति श्येने, राजा चेतस्यचिन्तयत् ।
चेद्ददेऽमुममुष्मै मे, तदा याति शरण्यता ॥ ३३ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यद्येनं न ददाम्यस्मै तदायं म्रियते खगः ।
किं करोमि द्विधाचेता, इतो व्याघ्र इतस्तटी ॥ ३४॥
आ ज्ञातोऽस्ति मयोपायो निजाङ्गपलदानतः ।
श्येनस्य तृप्तिः स्याज्जीवरक्षा पारापतस्य च ॥ ३५॥
विमृश्येति नृपः प्राह श्येन! स्वपिशितं तव ।
तुलया तोलयित्वाहं, पारापतसमं ददे ॥ ३६॥
श्येनेनेति प्रतिज्ञाते तुलायामचलाधिपः ।
न्यस्थात् कपोतमेकत्रान्यत्र छित्त्वा निजामिषम् ॥ ३७॥
छेदं छेदं नृपः स्वाङ्गात्पलं न्यस्थाद् यथा यथा ।
वज्रादपि महाभारः, कपोतोऽभूत्तथा तथा ॥ ३८॥
एवं कुर्वन्नपि क्ष्मापो, यावत् खगसमानताम् ।
नानैषीत्स्वपलं तावत्तुलायामधिरूढवान् ॥ ३९॥
तुलाधिरूढं सत्त्वाढ्यं नृपं दृष्ट्वाखिलो जनः ।
शूलारूढनिजप्राण, इवाकृत हहारवम् ॥ ४०॥
आचक्षुश्च विशामीशं सामन्तामात्यपुंगवाः ।
हहा किमेतदारब्धं, साहसं भूपते! त्वया ॥ ४१॥
पतत्रिमात्रं संत्रातुं, किं जहासि निजानसून् ।
यतो न मतिमान् काचकृते चिन्तामणिं त्यजेत् ॥ ४२॥
विश्वोपकारि किं स्वाङ्गं त्यजेरेकवयःकृते ।
कः सुधीरेकपत्रार्थे छिन्द्यादखिलमङ्घ्रिपम् ॥ ४३॥
स्वामिन्! श्येनमिषात् कोऽपि मायी देवोऽथवासुरः ।
ईदृक्षः पक्षिणां भारो, यन्न संगतिमङ्गति ॥ ४४॥
इत्युक्तोऽपि महीपालः कृपालूनां मतल्लिका ।
तानाह गत्वराङ्गार्थे कः कीर्त्तिं शाश्वतीं त्यजेत् ॥ ४५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उक्तं च-

यशःशरीरं भुवि ये निवेश्य स्वर्गं गताः पुण्यशरीरभाजः ।
तेषामसारस्य शरीरकस्य ह्रासेऽपि का नामपरिक्षितिः स्यात् ॥ ४६ ॥
(उपजातिः)

तदवश्यं मया रक्ष्यः पक्ष्ययं शरणागतः ।
स्वीकृतं न हि मुञ्चन्ति, विधुरेऽपि महाशयाः ॥ ४७ ॥

यदुक्तम्-

दिग्गजकूर्मकुलाचलफणिपतिविधृतापि चलति वसुधेयम् ।
प्रतिपन्नममलमनसां न चलति पुंसां युगान्तेऽपि ॥ ४८ ॥ (आर्या)

एवं मेरुरिवाचाल्यसत्त्वो यावन्नृपः स्थितः ।
तावत्पुरः स्वप्रतापमिवापश्यन्महन्महः ॥ ४९ ॥
तदन्तर्हारकेयूरकोटीरादिविभूषणः ।
आविरासीत्सुरः कोऽपि, तत्पुरोऽग्निरिवारणेः ॥ ५० ॥
अहो सत्त्वमहो धैर्यमहो तेऽन्योपकारता ।
इति प्रशंसां कुर्वाणः सोऽश्रयद् बन्दिभूमिकाम् ॥ ५१ ॥
उवाच च त्वमेवैको वर्ण्यो मध्ये महीभुजाम् ।
सत्त्वतश्चाल्यसे यन्न देवदानवमानवैः ॥ ५२ ॥
श्रीमेघरथभूमीन्द्र! सभायामेकदा स्थितः ।
शमीशानदिवो भर्त्ता वर्णयामासिवानिति ॥ ५३ ॥
न सुरैर्नासुरैश्चैवानुकम्पाभिधदानतः ।
यच्चाल्यते युगान्तेऽपि, राजा घनरथात्मजः ॥ ५४ ॥
इति तद्वचनं श्रुत्वा, जातज्वर इवाधिकम् ।
अचिन्तयमहं चित्ते कोऽसंभाव्यं हि मन्यते ॥ ५५ ॥
किं सत्त्वं मानवेषु स्यात्, कृमिकीटसनाभिषु ।
स्वैरालापः परं स्वामी, वक्ति तद्रोचते हि यत् ॥ ५६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यतः–सच्छंदं जंपिज्जइ कीरइ जं णियमणस्स पडिहाइ ।
अजसस्स न बीहिज्जइ, पहुत्तणं तेण रमणीयं ॥ ५७॥
ततोऽसहिष्णुः स्वर्लोकात्त्वत्परीक्षाकृते कृतिन्! ।
समागां संक्रमय्य स्वं, पक्षिद्वयतनाविह ॥ ५८॥
स्वर्णस्येव तव क्ष्माप! परीक्षां कुर्वता मया ।
सैन्द्रीवाक् सत्यतां नीता त्वत्साहसविलोकनात् ॥ ५९॥
तत्क्षमस्वापराधं मे सन्तः क्षुद्रहृदो न हि ।
इत्युक्त्वा स सुरः क्लृप्तपुष्पवृष्टिरगाद्दिवम् ॥ ६०॥
ततोऽङ्गिश्लाघ्यमानानुकम्पादानगुणोदयः ।
श्रीमेघरथपृथ्वीन्द्रः प्रसिद्धोऽभूदिलातले ॥ ६१॥
अन्यदा तीर्थकृत्तातः श्रीमान् घनरथो भुवम् ।
विहरन् पुण्डरीकिण्या उद्याने समवासरत् ॥ ६२॥
वनपालकविज्ञप्तः सान्तःपुरपरिच्छदः ।
राजा राजगजारूढः श्रीतातं वन्दितुं ययौ ॥ ६३॥
तं त्रिःप्रदक्षिणीकृत्य निविष्टे विष्टपेश्वरे ।
संवेगजननीं धर्मदेशनां भगवान् व्यधात् ॥ ६४॥
आयुर्वायुवदस्थिरं गिरिनदीपूरोपमानं धनम्,
तारुण्यं शरदभ्रविभ्रमसखं स्वप्नोपमाः संगमाः ।
अङ्गं वार्धितरङ्गभङ्गुरतरं चेत्याशु विज्ञाय भोः!,
भव्याः! शाश्वतमोक्षसौख्यवसतिं दीक्षां श्रयध्वं मुदा ॥ ६५॥
(शार्दूलविक्रीडितम्)

इत्याकर्ण्य प्रभोर्धर्मदेशनामवनीश्वरः ।
संवेगवेगतोऽर्हन्तं प्रणिपत्य व्यजिज्ञपत् ॥ ६६॥
प्रभो! प्रसादमाधायात्रैव तावद्विलम्ब्यताम् ।
यावत्स्वपुत्रसाम्राज्यं कृत्वा दीक्षार्थमागमम् ॥ ६७"

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ज्ञात्वा बहुगुणं तस्य वचने स्वीकृते सति ।
स्वामिना स ततो मेघरथः प्रसादमासदत् ॥ ६८ ॥
स्वं राज्यं **नन्दिषेणाय** ददौ मेघरथो नृपः ।
सूनवे **मेघसेनाय** युवराजपदं तथा ॥ ६९ ॥
कृतकृत्यस्ततस्त्यक्तसर्वसङ्गो विशांविभुः ।
समेत्य तातपादाब्जमूले चारित्रमग्रहीत् ॥ ७० ॥
असिधाराव्रतप्रायं, व्रतं राजर्षिशेखरः ।
प्रपाल्यानशनी मृत्वा **सर्वार्थ**दिवमासदत् ॥ ७१ ॥
यथानुकम्प्येष्वकृतानुकम्पादानं मुदां मेघरथो नरेन्द्रः ।
तथैतदन्योऽपि जनो विदध्यान्निर्वाणवध्वाः परिरम्भलब्ध्यै ॥ ७२ ॥
(उपजातिः)

इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तावनुकम्पादानविषये श्रीमेघरथनृपकथा समाप्ता ॥

अनुकम्पादानस्वरूपमुक्त्वा चतुर्थमभयदानमाह-

**तत्तो भणिमो सिरिअभयदाणमइसयसयाणं तं ।**
**सयलाण वि दाणाणं चक्कित्तं जस्स जयपयडं ॥ ८७ ॥**

व्याख्या-तत इति क्रमायातम् तत् श्रीअभयदानं-जन्तुजात-रक्षणदक्षणम्, अतिशयशतानां-माहात्म्यविशेषाणाम्, सदनं-निवास-भूमिम्, भणामः-कथयामः, यस्याभयदानस्य सकलानामपि दानानां मध्ये चक्रित्वं जगत्प्रकटम्, अपरोऽपि यश्चक्रवर्त्ती भवति स सर्वत्र विख्यातः स्यात्तथेदमपि सर्वदर्शनसंमतत्वादिति गाथार्थः ॥

तदभयदानं केषु केषु क्रियत इत्याह-

**पुढविजलअगणिमारुयवणस्सइतसपमुहजीवसमवाए ।**
**अप्पाणंपि व रक्खह जइ इच्छह सिवसिरीसंगं ॥ ८८ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

व्याख्या-पृथ्वीकायो-मृदादि, जलं-नीरं हिमादि, अग्निर्वह्निः तडिदादि, मारुतो-(वायुः) झंझोत्कलिकादिः, वनस्पतिः-प्रत्येक-साधारणरूपः, त्रसाः-द्वित्रिचतुष्पञ्चेन्द्रियाः, कृमि-पिपीलिका-भ्रमर-मनुष्यादयः, प्रमुखशब्द एतेषां भावानां भेदानुभेदवाची, अत इत्यादयो ये जीवसमवायाः-प्राणिगणास्तान्, भो भव्या आत्मानमिव-स्व-जीवितव्यमिव, रक्षत-पालयध्वम्, यदि शिवश्रीसंगं-मोक्षलक्ष्मी-संगममिच्छत-अभिलषतेति गाथार्थः ॥

पुनस्तस्यैव ऐहिकामुष्मिकं फलं गाथायुगलेनाह-

**जं दीहतरं आउं कंदप्पमडप्पखंडणं रूवं ।**
**भुवणजणणयणमाणसविम्हयसयकारिया रिद्धी ॥ ८९॥**
**घणसारसारसारयससहरकरणियरसुन्दरं च जसं ।**
**संपज्जइ पाणीणं तं जाणह अभयदाणफलं ॥ ९०॥**

व्याख्या-यद्दीर्घतरमायुः-समयानुसारिपरमजीवितम्, यच्च कन्दर्पदर्पखण्डनम्, रूपं-शरीरसौन्दर्यम्, यच्च भुवनजननयनमानस-विस्मयशतकारिका ऋद्धिः-शक्रचक्रवर्त्तिसाम्राज्यरूपा । यच्च घन-सारसारशारदशशधरकरनिकरसुन्दरं च यशः-कीर्त्तिविशेषः प्राणिनां संपद्यते, तदभयदानफलं जानीत-वित्त ।

उक्तं-दीर्घमायुः परं रूपमारोग्यं श्लाघनीयता ।
अहिंसायाः फलं सर्वं किमन्यत्कामदैव सा ॥ १ ॥ इति गाथाद्वयार्थः ॥

पुनरपि तस्यैव दानेषु तथात्वं प्रकटयन्नाह-

**देवेसु सुरवरिन्दो करीसु एरावणो उडूसु ससी ।**
**जह लोएसु य राया तह दाणेसुं अभयदाणं ॥ ९१॥**

व्याख्या-यथा देवेषु-चतुर्विधनिकायरूपेषु सुरवरेन्द्रः, करिषु-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

समस्तहस्तिजातिषु ऐरावणः-शक्रगजः, उडूषु-अश्विनीप्रमुखनक्षत्रेषु शशी-चन्द्रः, लोकेषु च प्रजासु राजा-नरेन्द्रः, सर्वोत्कृष्टस्तदधिपतित्वात्, तथा दानेषु सत्पात्रादिषु अभयदानमर्थात् सर्वोत्तमं प्रवरम्।

उक्तं च-देवेसु वीयरागो चारित्ती उत्तमो सुपत्तेसु ।
दाणाणमभयदाणं वयाण बंभवयं पवरं ॥१॥ इति गाथार्थः॥

अभयदानविमुखस्य किं स्यादित्याह-

**इक्कंपि हु जो जीवं णिहणवि पाणी समज्जए पावं ।**
**तो सो बहुदाणेण वि ण छुट्टए जं सुए भणियं ॥ १२॥**

व्याख्या-आस्तां तावद्बहून् एकमपि यः प्राणी जीवं निहत्य-सर्वथा व्यापाद्य, पापं-कल्मषं समुपार्जयेत, 'तो' तस्मात्पापात्स पुमान् बहुदानेनापि-गणनातीतधनकनकप्रभृतिदानेनापि न च्छुटति- न पारगामी स्यात्। यत्-यस्माद्धेतोः, श्रुते-सिद्धान्ते, भणितमुक्तं, खुशब्दो निश्चये इति गाथार्थः ॥ तदेवाह-

**मेरुगिरिकणयदाणं धणाणं देइ कोडिरासीओ ।**
**इक्कं वहेइ जीवं, ण छुट्टए तेण दाणेण ॥ १३॥**

व्याख्या-आस्तां धनकनकमणिमाणिक्यप्रभृतिवस्तुविस्तारा मेरुगिरेरपि-लक्षयोजनमानस्यापि यत्कनकं-सुवर्णं तस्य दानं तथा धान्यानां-शाल्यादीनां कोटिराशीन्, दत्ते-ददाति । एवं कृते सति एकं जीवं वधेद्-व्यापादयेत् तथापि तेन दानेन प्राणी न च्छुटतीति गाथार्थः॥ एतद्विना कृतानां सकलधर्मकृत्यानामफलत्वमाह ॥

**तवउ तवं पढउ सुयं, जवउ जवं चेव चरणमायरउ ।**
**जइ जीवेसु न करुणा सयले वि हु अहलयं तस्स ॥ १४॥**

व्याख्या-तपो-बहिरन्तरङ्गभेदेन द्वादशविधं तपश्चरणं तप्यताम्,

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तपः कुरुताम्, श्रुतं-द्वादशाङ्गीरूपम्, पठत्वभ्यसतु, जपमिष्टदेवता-स्मरणादिकम्, जपतु-स्मरतु, चरणं-सप्तदशभेदयुक्तं व्रतम्, आचरतु-विदधातु, चेव शब्दः सर्वत्र ज्ञेयः, एवंविधकष्टक्रियां विदधानस्यापि पुंसो यदि जीवेष्वेकेन्द्रियादिपञ्चेन्द्रियपर्यन्तेषु न करुणा-न कृपा, तत्सकलमपि तस्य अफलं तुषवन्निःसारम्, खुशब्दोऽवधारणे इति गाथार्थः ॥

प्राणिवध-प्राणिपालनफलमाविर्भावयन्नाह-

**पाणिवहपाणिपालणपराण चरियाणि असुहसुहयाणि ।**
**सिरिमाणभंग-सिरिअभयसिंहरांयाण णिसुणेह ॥९५॥**

व्याख्या-प्राणा दशप्रकाराः उक्तं च-

पञ्चेन्द्रियाणि त्रिविधं बलं च उच्छ्वासनिःश्वासमथान्यदायुः ।
प्राणा दशैते भगवद्भिरुक्तास्तेषां वियोगीकरणं च हिंसा ॥ १॥
(इन्द्रवज्रा)

इत्यादि प्राणा विद्यन्ते येषां ते प्राणिनस्तेषां यो वधो-जीवितव्यात् प्रच्यावनम्, तेषामेव च यत्पालनं मनोवाक्कायैः सम्यग्रक्षणं तत्र रतयोः -सदा सावधानमानसयोः, श्री**मानभङ्ग-श्रीअभयसिंह**राजयोश्चरितानि-कर्त्तव्यविशेषान्, असुखसुखदानीति, असुखं-नरकावाप्तिरूपम्, सुखं-चैहिकामुष्मिकलक्षणम्, तद्ददत इति तानि नितरां शृणुत-आकर्णयत अर्थात् भो भव्या इति गाथार्थः ॥

भावार्थस्त्वयं प्रतन्यते । तथाहि-

अस्ति **श्वेतविका** नाम नगरी यत्र सुस्थिताः ।
वसन्ति कमलावासा नागराः सागरा इव ॥ १॥
तत्रासीत्प्रस्फुरत्सेनो **वीरसेनो** नरेश्वरः ।
यत्कृपाणापणेऽरीणां श्रियः क्रयमुपाययुः ॥ २॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यथा गौरी गिरीशस्य, यथा मघवतः शची ।
तथा तस्य भुवो भर्तु**र्वप्रा**नामाभवत् प्रिया ॥ ३ ॥
मघवतः-इन्द्रस्य, तकारान्तः शब्दोऽयम् ।
सा पट्टमहिषी राज्ञा, सदा भोगानभङ्गुरान् ।
भुञ्जाना सुषुवे सूनुं सिंहस्वप्नेन सूचितम् ॥ ४ ॥
धरित्रीवृत्रहा पुत्रस्यातुच्छं जनुरुत्सवम् ।
महाविभूत्या कृतवान् मेरौ शक्र इवार्हतः ॥ ५ ॥
इतश्च मासे संवृत्ते वीरसेननृपोपरि ।
**मानभङ्ग**नृपोऽचालीत्प्रबलेन बलेन युक् ॥ ६ ॥
स्फुरद्धरिखुरक्षुण्णक्षमोद्धूतरजोभरैः ।
दिवापि सैन्यलोकानां, निशां संदर्शयन्निव ॥ ७ ॥
मतङ्गजकपोलोद्यद्दानाम्बुनिकुरम्बकैः ।
इलातलमकालेऽपि, कुर्वन्निव जलाविलम् ॥ ८ ॥
प्रचलच्चक्रिचीत्कारध्वनिबधिरितश्रुतीन् ।
सीमालपृथिवीपालान्, विदधान इवानिशम् ॥ ९ ॥
तत्पुरः प्रचलत्पत्तिकृपाणप्रतिबिम्बितः ।
एकोऽप्यनेकधा मार्गे गच्छंस्तत्पुरमाप सः ॥१० ॥ कलापकम् ॥
वीरसेनोऽपि भूपालश्चतुरङ्गचमूवृतः ।
नगरान्निरगादाशु केशरीव गुहान्तरात् ॥ ११ ॥
ततः प्रातःक्षणे वृत्ते, दलयोरुभयोरपि ।
आयोधनं प्रववृते, खड्गाखड्गि शराशरि ॥ १२ ॥
वीरेण वीरसेनेन, सेनानीर्मानभूपतेः ।
पातितो धरणीपीठे, वायुनेव महीरुहः ॥ १३ ॥
विसंस्थुलं बलं वीक्ष्य मानभङ्गनृपो निजम् ।
कोपाटोपेन दष्टौष्ठो, वीरसेनमधावत ॥ १४ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तयोः परस्परं घोरं रणं दृष्ट्वा सुराङ्गनाः ।
मानवत्योऽपि भीभ्रान्ताः, प्रियालिङ्गनमादधुः ॥ १५ ॥
विधिनियोगतो वीरसेने राज्ञि विनाशिते ।
मानभङ्गनृपस्तस्य, साम्राज्यं स्वात्मसाद् व्यधात् ॥ १६ ॥
राजभङ्गे राजपत्नी सपत्नभयविह्वला ।
गुणैरबालं बालं तं, वप्रादायापलायत ॥ १७ ॥
सा राजकान्ता कान्तारे, बम्भ्रमती ससंभ्रमम् ।
केनापि पत्तिनादर्शि, व्याधेनेव कुरङ्गिका ॥ १८ ॥
व्यचिन्ति चाहो मे पुण्यप्रकर्षो यदियं वशा ।
अवाप रूपलावण्यात्तर्जितामरसुन्दरी ॥ १९ ॥
तन्मोचयामि भामिन्याः सकाशादेनमर्भकम् ।
येन मां स्वीकरोत्येषा, ध्यात्वेत्याह स तां प्रति ॥ २० ॥
भद्रे! भद्राकृते! बालं, मुञ्च मां च पतीकुरु ।
इति तेनोदिता साह, कथं पुत्रं त्यजाम्यहम् ॥ २१ ॥
सोऽप्यूचे मयि रम्भोरु! स्वाधीनेऽन्येऽपि ते सुताः ।
भविष्यन्त्येवमुक्तापि, सा यावन्न तमत्यजत् ॥ २२ ॥
तावच्छठो हठाद् बालं, त्याजयित्वा वनान्तरे ।
तां च राज्ञीं पुरःकृत्वा, पूर्णकाम इवाचलत् ॥ २३ ॥
ऊचे च भद्रे! मा रोदीः, खेदं त्यज भजस्व माम् ।
अरण्याम्भोजवन्मुग्धे! यौवनं मा कृथा वृथा ॥ २४ ॥
इदं तद्वचनं वज्रप्रपातमिव दुस्सहम् ।
श्रुत्वा साश्रूणि मुञ्चन्ती, चेतसीति व्यचिन्तयत् ॥ २५ ॥
हा विधातर्मया किं तेऽपराद्धं पूर्वजन्मनि ।
यद् दुःखोपरि दुःखानां घटनां कुरुषेऽकृप! ॥ २६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एकं यस्याभवं प्राणप्रिया प्राणाधिकप्रिया ।
तस्य श्रीवीरसेनस्य, मरणं जीवितेशितुः ॥ २७ ॥
द्वितीयं तु रथाश्वेभपत्तिराजिविराजितात् ।
कोशग्रामपुरश्रीभिः, प्राज्याद्राज्यात्परिच्युतिः ॥ २८ ॥
अन्यच्च भक्तरक्तस्य, कलाकौशलशालिनः ।
परिच्छदस्य स्वजनवर्गस्य च वियोजनम् ॥ २९ ॥
अपरं तु सदाशून्येऽरण्ये श्वापदसंकुले ।
एकाकिन्या पिपासाक्षुत्क्लान्ताया भ्रमणं मम ॥ ३० ॥
इतोऽपि मे किमधिकं व्यसनं भविता खलु ।
यदरण्यान्तरे तादृक्, पुत्ररत्नस्य संस्थितिः ॥ ३१ ॥
एवंविधाननर्थांस्त्वं, कुर्वन् धातर्न तृप्तवान् ।
यदिदानीमपि हहा, शीलं मे हर्तुमीहसे ॥ ३२ ॥
स्वान्त! त्वमपि रे! दुष्ट! वज्रेण घटितासि किम् ।
ईदृशं वैशसं पश्यद्यदाशु न विदीर्यसे ॥ ३३ ॥
इत्थं चिन्ताजुषोऽमुष्या हृत्संघट्टनमाश्वभूत् ।
येन सा मुमुचे प्राणैरहो विधिविजृम्भितम् ॥ ३४ ॥
शीलपालनमाहात्म्यात्, व्यन्तरीत्वमवाप सा ।
ज्ञानेनावधिना ज्ञातवती, स्वं पूर्वजन्म च ॥ ३५ ॥
ददर्श च वनस्थल्यां, जम्बूवृक्षतले स्थितम् ।
सुतं वाताहतं भक्षयन्तं जम्बूफलं कलम् ॥ ३६ ॥
ततः स्नेहवशाद्देवी, कृत्वा गोरूपमर्भकम् ।
**सा** पयः पाययामास, पालयामास चानिशम् ॥ ३७ ॥
कियत्यपि गते काले, तत्र श्वेतविकापुरः ।
वास्तव्य**प्रियमित्रा**ख्यसार्थवाहः समाययौ ॥ ३८ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इतस्ततो भ्रमंस्तत्र, सार्थाधीशो ददर्श तम् ।
तरुच्छायापरावृत्त्या, भाग्यवन्तममंस्त च॥ ३९॥
ततो गृहीत्वा पाणिभ्यां, चिन्तामणिमिवार्भकम् ।
सोऽपुत्रायाः स्वभार्याया, **राजाख्यायाः** समार्पिपत् ॥ ४०॥
मत्पत्न्या गूढगर्भायाः, संप्रत्यजनि दारकः ।
इति स्वजनवर्गेऽसौ, कथयन्नुत्सवं व्यधात् ॥ ४१॥
मयासावभयो दृष्टः, सिंहवन्निर्जनवने ।
इतीव सार्थवाहोऽस्या**भयसिंहा**भिधां व्यधात् ॥ ४२॥
क्रमेण वर्द्धमानोऽसौ, वपुषा कलयापि च ।
विलासिनीजनक्रीडावनं यौवनमासदत् ॥ ४३॥
सोऽन्यदा स्वर्णपल्यङ्कप्रसुप्तो रजनीभरे ।
प्रेमतो भाषितो मातृव्यन्तर्या मधुरस्वरम् ॥ ४४॥
वत्स! स्वच्छमते! पूर्वमस्यां पुर्यां विशांपतेः ।
वीरसेनस्य भार्याहं वप्रा तस्याः सुतो भवान् ॥ ४५॥
मानभङ्गेन भूपेन, स पिता ते रणे हतः।
अहं नष्टा सती मृत्वा, व्यन्तरीभावमासदम् ॥ ४६॥
तद्वत्स! शत्रुपुत्रत्वात्तवैष सहजो रिपुः ।
अतोऽदृश्यकरीं विद्यामादत्स्व स्वात्मरक्षिकाम् ॥ ४७॥
ततः स जननीं नत्वा, तां विद्यामपठत्क्षणात् ।
सापि शम्पालतेवाशु, कृतकृत्या तिरोदधे ॥ ४८॥
अथ श्रीमानभङ्गाख्यः कुर्वाणो मांसभक्षणम् ।
मनोज्ञमप्यन्यदन्नं, पलालमिव मन्यते ॥ ४९॥
कदाचित्सूपकारस्य प्रमादादोतुना द्रुतम् ।
सुपक्वमामिषं जग्धं, पापिनां हीदृशी स्थितिः ॥ ५०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कालक्षेपासहत्वेन क्रूरत्वेन च भूपतेः।
अन्यमांसानवाप्त्यासौ, कान्दिशीक इवाभवत् ॥ ५१॥
तस्मिन्नवसरे तस्य बालको दृक्पथं गतः ।
तं च व्यापाद्य निस्त्रिंशकर्मा मांसमपक्त सः ॥ ५२॥
भोजनावसरे राज्ञे तत्सूदेनोपढौकितम् ।
नृपोऽप्यदंस्तमाहाद्य, कस्येदं पेशलं पलम् ॥ ५३॥
सूपकारोऽपि भूपस्य पुरोऽवादीद्यथास्थितम् ।
सोऽपि तत्पिशितास्वादलम्पटः सूदमूचिवान् ॥ ५४॥
अरे! प्रत्यहमेकैकं बालं व्यापाद्य मत्कृते ।
मांसं संस्कृत्य संस्कृत्य परिवेष्यं पुनः पुनः ॥ ५५॥
एवं कारयतस्तस्य पौरा विज्ञाय चेष्टितम् ।
शिशून् संगोपयामासुर्धनानि कृपणा इव ॥ ५६॥
कदामुष्य कुकर्त्तव्यनिरतस्य विशांपतेः ।
पातो भावीति ते चिन्तापरायणधियोऽभवन् ॥ ५७॥
एकदा मानभङ्गाख्यश्चेतस्येवमचिन्तयत् ।
किमस्मद्वंशजो राज्यं, स्वीकर्तीतापरो नरः ॥ ५८॥
अस्मिन्नवसरेऽकाण्डात्कल्पान्तपवनोपमः।
तरून् परःशतान् भञ्जन्, प्रोल्ललास समीरणः ॥ ५९॥
तस्मादत्युल्लसद्रेणुनिकरैर्दुर्जनैरिव ।
संप्राप्तप्रसरैश्चक्रे मित्रधाम्नोऽपि लोपनम् ॥ ६०॥
स कोऽप्यभूत्तमस्तोमो, येनान्धितविलोचनैः ।
नीचोन्नतानां स्थानानां, विशेषो ज्ञायते न हि ॥ ६१॥
तमालतालहिन्तालदलनीलमरीचयः ।
गर्जन्ति स्म तमोव्योम्नि, पर्जन्या दुर्जना इव ॥ ६२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ज्वलज्ज्वालाजटालाग्नितेजःपुञ्जसदृक्तडित् ।
यमजिह्वेव भीरूणां, भयकृत् प्रास्फुरत्तराम् ॥ ६३ ॥
अत्रान्तरे धरित्रीशो, विहायसि मिथोऽवदद् ।
भयविस्मयकृद् भूतमिथुनं पश्यति स्म सः ॥ ६४ ॥
भूतः प्राह प्रिये! किञ्चित्, त्वत्पुरो वच्म्यनागतम् ।
साप्युवाच प्रिय! ब्रूहि सावधानास्म्यहं यतः ॥ ६५ ॥
ततो भूतोऽब्रवीद्देवि! जीवसंघातघातकृत् ।
पापीयानेष भूपालः स्वल्पकाले विनङ्क्ष्यति ॥ ६६ ॥
खेचर्यप्याह नाथात्र को भविष्यति भूपतिः ।
भूतोऽभणच्छृणु प्राणप्रिये! भाषेऽविकल्पकम् ॥ ६७ ॥
योऽवमन्ता नृपस्याज्ञां यो गजं वशयिष्यति ।
यः कनकवतीं कष्टाद्रक्षिता भविता स राट् ॥ ६८ ॥
इत्युक्त्वा सहसा भूतमिथुनेऽस्मिंस्तिरोहिते ।
वायुरेणुतमोऽम्भोदविद्युद्वल्ल्यो विलिल्यिरे ॥ ६९ ॥
मानभङ्गोऽपि तद्वाक्यमाकर्ण्य भयविह्वलः ।
पुरारक्षकमाकार्य, साक्षेपमिदमादिशत् ॥ ७० ॥
रे रे! यः कोऽपि दुष्टात्मा ममाज्ञालोपमाचरेत् ।
निरारेकं त्वया सोऽङ्गी नेयः कीनाशवश्यताम् ॥ ७१ ॥
अथो वसन्तमासस्य संप्रवृत्ते महोत्सवे ।
रात्रावभयसिंहाख्यः, कामधाम जगाम सः ॥ ७२ ॥
तत्र प्रेक्षणकं वीक्ष्य, वलितः स्वालयं प्रति ।
नगरारक्षकेणासौ भाषितो परुषाक्षरम् ॥ ७३ ॥
भद्र! मा गच्छ तिष्ठ त्वमात्मानं च निवेदय ।
नगरारक्षकेणेति जल्पितोऽपि न स स्थितः ॥ ७४ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततस्तेन सकोपेन नृपाज्ञास्मै व्यतीर्यत ।
सोऽपि तां लङ्घयामास हनुमानिव सागरम् ॥ ७५ ॥
हंहो योद्धाः ! स्फुरत्क्रोधा अमुं हत हत द्रुतम् ।
इति जल्पन्नयं खड्गपाणिः श्राक्तमधावत ॥ ७६ ॥
तं समायान्तमालोक्यानिन्द्यया विद्यया तया ।
गीर्वाणवत्तिरोभूयाऽभयसिंहो गृहं ययौ ॥ ७७ ॥
गते चास्मिन् पुरारक्षो, विलक्षोऽभ्येत्य वेगतः ।
न्यवेदयद्यथावृत्तं, सर्वं सर्वंसहाभुजे ॥ ७८ ॥
राजा जगाद रे क्लीब! भवता किं विनिर्ममे ।
यद्योधशतयुक्तेनाप्येकाकी स हतो न हि ॥ ७९ ॥
परेद्यविर्महीजानिसिन्धुरो मददुर्धरः ।
आलानस्तम्भमुन्मूल्य नगरे स्वैरमभ्रमत् ॥ ८० ॥
क्वापि प्रभञ्जन इवोन्मूलयन् भूरिभूरुहान् ।
क्वचिन्म्लेच्छ इवामूलचूलं चैत्यानि पातयन् ॥ ८१ ॥
परचक्र इव क्वापि त्रासयन्नागरान्नरान् ।
क्वचिन्मदाम्बुभिर्मेघ इव वर्त्मानि पङ्कयन् ॥ ८२ ॥
कुशिष्य इव स क्वापि, कामगुणगुरून् गुरून् ।
निषादिनः खिलीकुर्वन् कल्पान्ततुलनां ललौ ॥ ८३ ॥ कुलकम् ॥
इतश्च काननात्कामपूजां कृत्वा नृपाङ्गजा ।
व्यावृत्ता **कनकवती,** ददृशे तेन दन्तिना ॥ ८४ ॥
कोपाटोपोत्कटाकारः, करी राजाङ्गजां प्रति ।
वेगेनाधावत व्याघ्र, इव त्रस्तमृगीं प्रति ॥ ८५ ॥
शमनस्यापरं बन्धुमिव तं मत्तहस्तिनम् ।
आयान्तं वीक्ष्य तत्सख्यः इति पूच्चक्रिरे भिया ॥ ८६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हंहो वीराधिवीराः! स, कोऽप्यस्ति वसुधातले ।
य एनां कनकवतीं वारणात् परिरक्षति ॥ ८७॥
अस्मिन्नवसरे वीराधिवीरो वीरसेनसूः ।
तत्तारस्वरमाकर्ण्य, तूर्णं तत्र समागमत् ॥ ८८॥
आचिक्षेप च रे दुष्ट! मातङ्गोऽसि सुनिश्चितम् ।
यदेवं स्त्रीवधं कुर्वन्, सर्वथापि न लज्जसे ॥ ८९॥
इत्युदीर्य सद्वीर्यश्रीर्वज्रादपि कठोरया ।
मुष्ट्या जघान दुर्वारं वारणं मारणोद्यतम् ॥ ९०॥
ततो राजसुतां त्यक्त्वाभयसिंहं प्रति क्रुधा ।
दुर्धरः सिन्धुरोऽधावीत्, सिन्धुरोध इवाम्बुधिम् ॥ ९१॥
अभयोऽपि हि मण्डल्या भ्रमेण भ्रमयन्निभम् ।
खेदखिन्नमकार्षीद् द्रागहो शक्तिर्महात्मनाम् ॥ ९२॥
सिन्धुरो वसुधापीठममन्दस्वेदबिन्दुभिः ।
सिञ्चन् क्षणं स्थिरो रेजे सानुमानिव निर्झरैः ॥ ९३॥
ततोऽसौ विद्युदुत्पातकरणेन पराक्रमी ।
सिन्धुरस्कन्धमभयसिंहः सिंह इवाचटत् ॥ ९४॥
तीक्ष्णाङ्कुशप्रहारेण वशीकृत्य मतङ्गजम् ।
राजपुत्राकुलं राजकुलं प्रत्यचलद् बली ॥ ९५॥
अहो धैर्यमहो तेजः प्रियमित्रवणिग्भुवः ।
इत्ययं बन्दिभिरिव, लोकैरस्तावि शस्तधीः ॥ ९६॥
सुरूपं सुभगाकारं कुमारं वीक्ष्य भूपभूः ।
सा पञ्चबाणबाणानामियाय लघु लक्षताम् ॥ ९७॥
चिरं पुरपुरन्ध्रीणां, विलोचनविलोकितः ।
बबन्ध धीमानालानस्तम्भे राजमतङ्गजम् ॥ ९८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दध्यौ धराधिपो नायं वणिक्सूनुः परं ह्यसौ ।
आकृत्या पौरुषेणापि लक्ष्यते क्षत्रगोत्रजः ॥ ९९ ॥
अतोऽसौ दैवतं वाक्यं, प्रायः सत्यापयिष्यति ।
तथापि पुरुषेणोच्चैर्न मोक्तव्यं स्वपौरुषम् ॥ १०० ॥
येन केनाप्युपायेन विनाश्योऽयं मया रिपुः ।
एवं विमृश्य भूमीशः सुभटान् प्रत्यभासत ॥ १०१ ॥
सतीषु भटकोटीषु यदेष वणिजाङ्गजः ।
गजं वशीचकारेत्यपवादो वो भविष्यति ॥ १०२ ॥
अतो भवद्भिर्निःशङ्कं, कुञ्जरादवरोहतः ।
अस्य मूर्धा कृपाणेनच्छेद्यः कमलनालवत् ॥ १०३ ॥
इत्यादिष्टा भटास्तेन विविधायुधपाणयः ।
तं निहन्तुं परिवव्रुः, शूकरा इव वारणम् ॥ १०४ ॥
अभयोऽप्यभयस्वान्तस्तान्मत्वा स्वस्य घातकान् ।
अदृश्यवश्यतां प्राप्य, निजं धाम जगाम सः ॥ १०५ ॥
विलक्षैः सुभटैरेत्य भूपो व्यज्ञपि हे विभो! ।
यावत् प्रवृत्तास्तं हन्तुं तावत्सोऽन्तर्दधे द्रुतम् ॥ १०६ ॥
तन्नाथ! बहुशोऽस्माभिः, शोध्यमानोऽपि सर्वतः ।
नोपलेभे वणिक्पुत्रोऽन्धलैरिव दिवा मणिः ॥ १०७ ॥
राजा तानाह साक्षेपं, रे रे! क्लीबावतंसकाः! ।
मुधा द्रव्यादिनो यूयं, दूरीभवत मद्दृशोः ॥ १०८ ॥
इतीरिते क्षणं क्षोणीनाथे प्रक्षीणतेजसि ।
**वसन्तसेना** कनकवत्यादिष्टागता सती ॥ १०९ ॥
प्रणत्य च महीपालं व्यजिज्ञपदिदं वचः ।
देवः स्वयं तनूजाया, जानात्येव हि चेष्टितम् ॥ ११० ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यन्नाथ! भूमिनाथानां मूर्त्तयः पटचित्रिताः ।
आनाय्य दर्शितास्तस्यै, तासु सा नान्वरज्यत ॥ १११ ॥
पुरुषद्वेषिणी सैषा, सांप्रतं करिसंकटात् ।
मोचिता येन वीरेण, तमेव हि पतीयति ॥ ११२ ॥
स्वामिंस्तदा मयाभाणि, प्रियमित्रवणिक्सुतः ।
नोचितोऽभयसिंहोऽयं, क्षत्रगोत्रभुवस्तव ॥ ११३ ॥
साप्याह सखि! मा स्मैवं वोचः कोऽप्येष भूपभूः ।
अन्यथा कथमीदृक्षं, वशीकुर्यादिभं शुभम् ॥ ११४ ॥
यद्येष न भवेद्राजतनयो न तदा मम ।
चौरवच्चोरयेच्चेतोरत्नमन्यदिदं शृणु ॥ ११५ ॥
येन मे रक्षिता प्राणा, धर्मराजनिभादिभात् ।
तं मुक्त्वान्यं पतीयामि चेत्तदा स्यां कृतघ्निका ॥ ११६ ॥
इत्युक्त्वा विरतायां, तद्वयस्यायां विशांपतिः ।
दध्याविति वणिक्पुत्रो निहन्तव्यो यथा तथा ॥ ११७ ॥
ततः सखीसमक्षं क्ष्मापालः पत्तनपालकम् ।
इत्यादिशदरे ! गत्वाऽभयसिंहमिहानय ॥ ११८ ॥
यस्मादस्मत्सुतानेन रक्षिता करिसंकटात् ।
अतोऽस्माभिरसौ श्रेष्ठिसूनुः संमान्य एव हि ॥ ११९ ॥
इति तद्वचसा सोऽपि, प्रियमित्रवणिग्गृहे ।
गत्वाभयाग्रतो राजशासनं स न्यवेदयत् ॥ १२० ॥
सोऽपि दध्यौ विरुद्धोऽयं, राजा यद्यपि विद्यते ।
तथापि पूर्वमाता मे, सर्वं भव्यं विधास्यति ॥ १२१ ॥
इति चेतसि निश्चित्याऽभयसिंहः स सिंहवत् ।
निर्भयो मानभङ्गस्य सभां तेन सहाययौ ॥ १२२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भूपालोऽपि विभावर्यां, प्रच्छन्नं श्रेष्ठिनन्दनम् ।
हन्तास्मीति विनिश्चित्य, पत्तिभ्यस्तं ददौ मुदा ॥ १२३ ॥
तैः पदातिभिरात्मानं रक्षन्तमभिवीक्ष्य सः ।
निशीथे स्वस्य रक्षार्थमशिश्रियददृश्यताम् ॥ १२४ ॥
तत्रस्थमप्यपश्यन्तः, पत्तयस्तं मिथो जगुः ।
यन्नो मुखे रजः क्षिप्त्वा, क्वाप्यगादेष सिद्धवत् ॥ १२५ ॥
तच्छ्रुत्वा मानभङ्गोऽपि मैष दुष्टो मदङ्गजाम् ।
हरेदिति विचिन्त्याशु तद्गृहोर्ध्वतलं ययौ ॥ १२६ ॥
यत्र सुप्तास्ति कनकवती तत्रैव पार्थिवः ।
सुप्तः स्वप्ने सुतां तेन, ह्रियमाणां व्यलोक्यत ॥ १२७ ॥
रे रे! क्व यासि दुष्टात्मन्नपहृत्य मदङ्गजाम् ।
इति जल्पन्नृपः खड्गकरोऽधावदमुं प्रति ॥ १२८ ॥
तीव्रक्रोधवशाद् धावन् सौधोपरिगभागतः ।
पतितो नृपतिर्मृत्वा जगाम नरकावनीम् ॥ १२९ ॥
तदाखिलो जनो मानभङ्गभूमिविभुं मृतम् ।
उभाकर्णि समाकर्ण्य, परमानन्दमासदत् ॥ १३० ॥
सांप्रतं कं क्षमापालं विदध्याम इति जल्पताम् ।
प्रधानानां पुरो मातृव्यन्तरी व्योमगेत्यवक् ॥ १३१ ॥
हंहो सामन्तमन्त्र्याद्या वीरसेनमहीपतेः ।
सूनवेऽभयसिंहाय ददध्वं राज्यसंपदम् ॥ १३२ ॥
इमां दैवीं गिरं श्रुत्वा तैरपि स्फुटविक्रमः ।
वीरसेनाङ्गजो राज्येऽभयसिंहोऽभ्यषिच्यत ॥ १३३ ॥
भूपालोऽभयसिंहोऽपि, महोत्सवपुरस्सरम् ।
चकार कनकवत्याः पाणिपीडनमङ्गलम् ॥ १३४ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदा राज्यश्रिया स्वर्णवत्या च प्रिययान्वितः।
राजा रेजे स्मर इव रतिप्रीतिपरीवृतः ॥ १३५॥
पितृवत्प्रियमित्राख्ये, वणिजि प्रीतिभक्तिभाक् ।
नरेन्द्रोऽभयसिंहाख्यो, न्यायेन प्रशशास गाम् ॥ १३६॥
अन्यदा दयितायुक्तं गवाक्षस्थं प्रजाप्रभुम् ।
वनपालः समभ्येत्य प्राञ्जलिस्तं व्यजिज्ञपत् ॥ १३७॥
देवाद्य युष्मदुद्याने **ज्ञानसूरा**ह्वयो गुरुः ।
ज्ञानोद्योतहतध्वान्तनिकरः समवासरत् ॥ १३८॥
इति श्रुत्वा नृपो हर्षाद्दानेन परितोष्य तम् ।
परिच्छदयुतो गत्वा सूरिपादानवन्दत ॥ १३९॥
सोऽपि सूरीश्वरो धर्मलाभेनानन्द्य तं नृपम् ।
जन्तुजातहितां धर्मदेशनामीदृशीं व्यधात् ॥ १४०॥
भो! भो! भव्या भवजलनिधौ संभ्रमाद् बंभ्रमद्भि-
श्चिन्तारत्नोपमनरभवं प्राप्य दुष्प्रापमेनम् ।
त्याज्या हिंसा नरकजननी, येन युष्माकमत्र,
प्रोच्चैः स्वर्गासुरनरभवाः संपदः संभवेयुः ॥ १४१॥ (मन्दाक्रान्ता)
गुरुवक्त्राब्जनिर्गच्छद्देशनाममृतोपमाम् ।
निपीय मस्तकन्यस्तहस्तोऽपृच्छद् गुरुं नृपः ॥ १४२॥
भगवन्! मयका पूर्वभवे किं कर्म निर्मितम् ।
येनात्रैव ममात्यर्थं संपदः सापदोऽभवन् ॥ १४३॥
तत्प्रसद्य प्रभो! ब्रूहि, मत्पुरस्ताद्यथास्थितम् ।
ततो गुरुर्जगौ राजन्! शृणु पूर्वभवं निजम् ॥ १४४॥
तथाहि **भरते** रम्यारामे ग्रामे **कुशस्थले** ।
प्रकृत्या भद्रको **भद्र**नामासीत् कुलपुत्रकः ॥ १४५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सोऽन्यदा जनताकाले, दुष्काले भुवि सर्पति ।
अन्नाभावादनिर्वाहं विदन्नेवमचिन्तयत् ॥ १४६ ॥
गत्वा शून्याटवीमध्ये, जन्तुजातं शशादिकम् ।
व्यापाद्य तत्पलेनाहं कुर्वे स्वोदरपूरणम् ॥ १४७ ॥
ततो लकुटमादाय शशं द्रष्टुं वने गतः ।
धावंस्तस्य विघाताय प्रैषीत्तं कुलपुत्रकः ॥ १४८ ॥
आयान्तं मुद्गरं दृष्ट्वा, शशोऽनश्यन्मृतेर्भिया ।
भद्रोऽपि धावंस्तत्पृष्ठे, तं चिक्षेप पुनः पुनः ॥ १४९ ॥
शशोऽप्यलभमानोऽन्यस्थानं शरणमात्मनः ।
प्रतिमास्थमुनेरंह्र्योरन्तराले न्यलीयत ॥ १५० ॥
अत्रान्तरे मुनेस्तीव्रतपसा रञ्जिताशया ।
वनदेवी विचक्रे द्राक् तत्पुरः स्फाटिकीं शिलाम् ॥ १५२ ॥
भद्रेण मुद्गरो मुक्त आस्फाल्य स्फटिकाश्मनि ।
व्यावृत्तो भालदेशेऽस्यालगद् वज्र इवापरः ॥ १५३ ॥
तत्प्रहारगलद्रक्तसिक्तदेहो व्यथातुरः ।
वाताहतद्रुवद् भद्रो, मूर्च्छितो भूतलेऽपतत् ॥ १५४ ॥
शीतलानिलसंस्पर्शप्राप्तचैतन्यसंगमः ।
भद्रो भद्राकृतिं साधुं, पुरः पश्यन्नदोऽवदत् ॥ १५५ ॥
हहा मया दुराशेन, यत् कर्म विनिनिर्ममे ।
तदिदानीमपि व्यक्तं दुःखदायि ममाजनि ॥ १५६ ॥
अथवा मे शुभं कर्म किमप्यद्यापि वर्त्तते ।
यददृष्टेन केनापि, मुद्गराद्रक्षितो यतिः ॥ १५७ ॥
अन्यथा स्यात् कथंकारमनगारविघातजात् ।
*पातकान्नरकातिथ्यभाजो मम परिच्युतिः ॥ १५८ ॥*

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथो मुनिरपि ज्ञात्वा, भद्रं भद्रकभाविनम् ।
प्रतिमां पारयित्वा च, गिरा मधुकिरागृणात् ॥ १५९ ॥
हे भद्र! यः पुमान् मांसलुब्धो निष्करुणाशयः ।
जीवान् व्यापादयेत् स स्याद् दुर्गदुर्गतिभाजनम् ॥ १६० ॥
यस्तु शश्वत्कृपां कुर्यादार्यधीः सर्वजन्तुषु ।
स उल्लङ्घ्यापदां वृन्दं प्राप्नुयात्सुखसंपदः ॥ १६१ ॥
इत्याकर्ण्य मुनिं नत्वा, भद्रोऽवादीदतः परम् ।
यावज्जीवं जीवघातं न हन्तास्मि दयानिधे! ॥ १६२ ॥
श्रमणोऽप्यभणद् भद्र!, भाविभद्रोऽसि यस्य ते* ।
एवंविधा भवेन्मेधा, प्राणिरक्षणदक्षणा ॥ १६३ ॥
नतिपूर्वं मुनेः पार्श्वादुपादायादिमव्रतम् ।
मन्वानो धन्यमात्मानं भद्रः स्वं धाम जग्मिवान् ॥ १६४ ॥
नियमस्यानुभावेन, स्वपरीवारपोषणम् ।
सुखेन विदधानः सन् स दिनान्यत्यवाहयत् ॥ १६५ ॥
स भद्रस्तेन पुण्येन, विपद्यात्रैव भारते ।
क्षेत्रे श्वेतविकापुर्यां, वीरसेनविशांविभोः ॥ १६६ ॥
देव्या वप्राऽभिधानायाः, पुत्रत्वेनोदपद्यत ।
स त्वं भूपाल! यत्तेऽस्मिन् भवे कष्टपरंपरा ॥ १६७ ॥ युग्मम्॥
तत्त्वया लकुटो मुक्तो, यावद्वेलं शशं प्रति ।
तावत्यो भवतो विघ्नश्रेणयो जज्ञिरे नृप! ॥ १६८ ॥
मानभङ्गनृपो यच्च, जीवान् हत्वा पलाद्यभूत् ।
तत्पापान्निरये गत्वा भ्रमिष्यति चिरं भवे ॥ १६९ ॥
इति श्रुत्वा नृपो जातजातिस्मृतिर्ऋषीश्वरात् ।
यावज्जीवं जीवरक्षाभिग्रहं साग्रहोऽग्रहीत् ॥ १७० ॥

---

* एष प्रयोगोऽर्थसंगतो न भाति, यत्तवेत्य समीचीनोऽस्ति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततः सूरीश्वरान्नत्वाऽभयसिंहो गृहे गतः ।
सकलेऽपि निजे राज्येऽचीकरन्मारिवर्जनम् ॥ १७१ ॥
दिने दिने जिनेन्द्राणां, मन्दिरेषु प्रभावनाम् ।
कुर्वन्नभयसिंहेशो विपद्य त्रिदिवं ययौ ॥ १७२ ॥
इत्थं श्रीमानभङ्गाभयहरिनृपयोर्जीवहिंसावनाख्यम्,
सम्यग्वृत्तान्तमेतं श्रवणपथगतं भव्यलोका विधाय।
त्यक्त्वा प्राणिप्रहाणं नरकगतिकरं जीवरक्षाप्रदानम्,
कुर्वीध्वं येन वेगान्नरसुरशिवकृत् संपदो वो भवेयुः ॥१७३॥(स्रग्धरा)

इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ प्राणिवध-प्राणिपालनविषये मानभङ्गाभयसिंहनरेन्द्रकथा समाप्ता ॥

अभयदानस्वरूपमुक्त्वा पञ्चमस्य ज्ञानदानस्य स्वरूपमाह-

**अह कमपत्तं सिरिणाणदाणमाहप्पयं णिसामेह ।**
**जह गरुयकम्मणियरं हणिय लहुं सिवसिरिं लहह ॥१६॥**

व्याख्या-अथ क्रमप्राप्तं-अनुक्रमायातम्, श्रीज्ञानदानमाहात्म्यं निशाम्यताकर्णयत अर्थाद् भो भव्या इति शेषः, तस्मिन्नाकर्णिते किं स्यादित्याह। यथा गुरु(क)-कर्मनिकरं गरीयो ज्ञानावरणादिकर्मकदम्बकं हत्वा समूलमुन्मूल्य, लघु-क्षिप्रं, शिवश्रियं-मोक्षलक्ष्मीं, लभध्वं-प्राप्नुत श्रुतज्ञानावाप्तिर्गुरुशुश्रूषात एव स्यात् ।

यदुक्तं पञ्चमाङ्गे-तहारुवेणं भंते! समणं माहणं वा पज्जुवासमाणस्स किंफला पज्जुवासणा पण्णत्ता? गोयमा! सवणफला। से णं भंते! सवणे किंफले? णाणफले। से णं भंते! णाणे किंफले? विण्णाणफले । से णं भंते! विण्णाणे किंफले? पच्चक्खाणफले । से णं भंते! पच्चक्खाणे किंफले? संजमफले। से णं भंते! संजमे किं-फले? अणण्हयफले। से णं भंते ! अणण्हए किंफले ? तवफले। से णं भंते! तवे किंफले ? वोदाणफले। से णं भंते ! वोदाणे किंफले?

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अकिरियाफले। से णं भंते ! अकिरिया किंफला ? सिद्धिपज्जुवसाणफला पण्णत्ता इति गाथार्थः ॥ [श्रीभगवतीसूत्रम्-१/६१]

तस्यैवोत्पत्तिस्वरूपमाह-

**जं सीसाणं सुकुलुब्भवाण विणयाइगुणसमिद्धाण ।**
**कारइ सुयअज्झयणं साहिज्जइ णाणदाणं तं ॥९७॥**

व्याख्या-यत्-सुकुलोद्भवानां-प्रांशुवंशजानाम्, विनयादिगुण-समृद्धानां-गुरुशुश्रूषाप्रभृतिगुणैश्वर्यवताम्, शिष्याणां-विनेयानाम्, श्रुता-ध्ययनं-सिद्धान्तशास्त्रपठनम्, कार्यते-विधाप्यते तद् ज्ञानदानं कथ्यत इति गाथार्थः ॥

सम्यक्शास्त्राभ्यासात्किं फलं स्यादित्याह-

**अपमाइ गुरु सयासे सीसो वि हु णिच्चमुज्झमेण जुओ ।**
**पढिय सुयं भवजलहिं तरेइ समए जओ कहियं ॥९८॥**

व्याख्या-प्रमाद्यन्ति मोक्षं प्रत्येभिरिति प्रमादास्ते चाष्टधा, यदागमः-

पमायओ मुणिंदेहिं भणिओ अट्ठभेयओ ।
अ[१]ण्णाणं संस[२]ओ चेव मिच्छा[३]णाणं तहेवय ॥१॥
रा[४]गो दो[५]सो सइ[६]भंसो धम्मंमि य अणा[७]यरो ।
जोगाणं दुप्प[८]हीणाणं अट्ठहा वज्जियव्वओ ॥२॥

न विद्यन्ते प्रमादा यस्मिन् सोऽप्रमादी। यतः प्रमादादि-सेव्यमानाश्चातुर्गतिकभवनिबन्धनीभवन्ति । यदुक्तं-

चउदसपुव्वी आहारगावि मणणाणवीयरागा वि ।
हुंति पमायपरवसा तयणंतरमेव चउगइया ॥१॥

एवंभूतो यो गुरुः-कलाचार्यस्तस्य सकाशे-पार्श्वे आस्तां तावद् गुरुः शिष्योऽपि-विनेयोऽपि, खु-निश्चितम्, नित्यं-सदा, उद्यमेन युतः-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रमादपरिहाररूपेण सहितः, श्रुतं-सिद्धान्तम्, पठित्वाधीत्य भवजलधिं-संसारसागरम्, तरति-पारं गच्छति, यतो-यस्माद् हेतोः, समये-प्रवचने, कथितं-प्रोक्तमिति गाथार्थः॥

एतदेव चतुर्भङ्ग्याह-

**णिच्चं गुरु पमाई सीसा य गुरु ण सीसगा तहय ।**
**अपमाइ गुरु सीसा पमाइणो दोवि अपमाई ॥ ९९॥**

व्याख्या-नित्यं गुरुः प्रमादी पूर्वोक्तप्रमादाष्टकसहितः। न केवलं गुरुः शिष्याश्च प्रमादिन इत्येको भङ्गः। तथा च गुरुः प्रमादी न शिष्याः प्रमादिन इति द्वितीयो भङ्गः । गुरुरप्रमादी शिष्याश्च प्रमादिन इति तृतीयो भङ्गः । द्वावप्यप्रमादिनौ गुरुरप्यप्रमादी शिष्या अप्यप्रमादिन इति चतुर्थो भङ्गः । तत्राद्यौ भङ्गौ प्रथमद्वितीयौ न ज्ञानदौ, तृतीय-भङ्गो मनाक् ज्ञानदः, चतुर्थस्तु भङ्गो ज्ञानदायीति गाथार्थः ॥

अस्यामेव चतुर्भङ्ग्यां दृष्टान्तघटनां प्रतिपादयन् गाथायुगेनाह-

**अप्पह्नुया य गोणी णेव य दोद्धा समुज्जओ दोढुं ।**
**खीरस्स कओ पसवो जइ वि हु बहुखीर आसाय ॥ १००॥**

**बीए वि णत्थि खीरं थोवंपि हविज्जए य तइए वि ।**
**अत्थि चउत्थे खीरं, एसुवमा आयरियसीसो ॥ १०१॥**

व्याख्या-अप्रस्नुता च गौर्नैव च दोग्धा दोग्धुं समुद्यतः एवं च सति क्षीरस्य कुतः प्रसवो यद्यपि खु-निश्चितम्, सा च गौर्बहुक्षीरदा । एवं गुरुः प्रमादी शिष्याश्च प्रमादिनः कथं ज्ञानभाजनं भवेयुरित्याद्यभङ्गोपनयः।

अप्रस्नुता गौर्दोग्धा तु दोग्धुं समुद्यत एवंरूपे भङ्गे नास्ति क्षीरम्, तथा प्रमादिनि गुरौ अध्येतुमुद्यतानामन्तेवासिनां न ज्ञान-प्राप्तिरिति द्वितीयभङ्गोपनयः । प्रस्नुता गौर्दोग्धा तु न दोग्धुमुद्यत

Jain Education International　　For Personal & Private Use Only　　www.jainelibrary.org

एवंविधे भङ्गे स्तोकमपि भवत्येव, तथा अप्रमादिनि गुरौ अध्येतुमसावधानानां साधूनां तत्प्रेरणत्वान्मनाक्ज्ञानावाप्तिरिति तृतीयभङ्गोपनयः । प्रस्तुता गौर्दोग्धापि दोग्धुमुद्यत एव एवंभूते भङ्गेऽस्ति प्रचुरं क्षीरम्, तथा अप्रमादिगुरुशिष्ययोः संपूर्णज्ञानावाप्तिः स्यादिति चतुर्थभङ्गोपनयः। अत एवाचार्यशिष्ययोरेषोपमा ज्ञेयेति गाथायुगार्थः॥

ज्ञानावाप्तौ किं फलं स्यादित्याह-

**णाणी मुणेइ णाणं णाणं गुणेइ णाणेण कुणइ किच्चाइं ।**
**भवसंसारसमुद्दं, णाणी णाणेण उत्तरइ ॥ १०२॥**

व्याख्या-ज्ञानी ज्ञानं जानाति, ज्ञानं गुणयति-पुनः पुनः परावर्त्तयति, यतो ज्ञानं विना तपश्चरणादिकं व्यर्थम्, यदुक्तं महानिशीथे-

छट्ठट्ठमदसमदुवालसाइ मासद्धमासखवणाइं ।
सज्झायज्झाणरहिओ णेगोवास फले लहइ ॥१॥

ज्ञानेन कृत्यान्यावश्यकादीनि करोति। ज्ञानपूर्विकैव क्रिया कर्म्मक्षयाय स्यात् ।

उक्तं च-जं अन्नाणी कम्मं खवेइ बहुयाहिं वासकोडीहिं ।
तण्णाणी तीहिं गुत्तो खवेइ ऊसासमित्तेण ॥ १॥
[महापच्च०पयन्ना-(१०१)]

ज्ञानेन *भवसंसारसंसरणसागरमुत्तरति हेलयेवोल्लङ्घयतीति गाथार्थः॥

श्रुताध्येतृणामुपष्टम्भे कृते किं भवेदित्याह-

**णाणज्झयणपराणं, साहूणं असणपाणवसणाइं ।**
**जो वियरइ जिणसासण-अव्वुच्छित्ती कया तेण ॥१०३॥**

यो विवेकी ज्ञानाध्ययनपराणां साधूनामशनपानवसनानि

---

* वृत्तिस्त्रुटिता भाति..भवश्चातुर्गतिकरूपः, संसारः तस्मिन्-संसरणम् तदेव, समुद्रः-सागरस्तम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वितरति, तेन पुण्यात्मना जिनशासनाव्युच्छित्तिः-श्रीमदर्हत्प्रवचनानवरतप्रवर्त्तनं कृता-विहितेति गाथार्थः ॥

पुस्तकदानात् किं भवतीत्याह-

**सिद्धंतपुत्थयाणं लेहिय पढणाय देइ समणाणं ।**
**जो तेण सयलभवणे, धम्मपवा वाहिया णूणं ॥१०४॥**

व्याख्या-यः श्रुतभाक् सिद्धान्तपुस्तकानि लिखित्वा लेखयित्वा वा श्रमणेभ्यः पठनाय ददाति, तेन धार्मिकेण सकलभुवने नूनं-निश्चितं धर्मप्रपा वाहिता-प्रवर्त्तिता यथा प्रपायां सर्वः कोऽपि पानीयमापीय सुहितः स्यात्तथा धर्मरूपायां प्रपायां शास्त्रामृतं निपीय परमानन्दमेदुरोदरा भवन्तीति गाथार्थः।

सदृष्टान्तं ज्ञानदानमुपदिशन्नाह-

**जह केसिणा विइण्णं, पएसिरायस्स णाणदाणमिणं ।**
**तह जाणियजिणवयणा, सुयदाणपरा सया होह ॥ १०५॥**

व्याख्या-यथा-येन प्रकारेण, केशिना-श्रीपार्श्वनाथशिष्यशिष्येण, प्रदेशिराजस्य-श्वेतविकापुरीप्रभोरिदं-ज्ञानदानं, वितीर्णम्, तथा-तेन प्रकारेण ज्ञातजिनवचना-अधिगतसिद्धान्ततत्त्वा अर्थाद् भो भव्याः! श्रुतदानपराः ! सदा-सर्वदा भवत-जायध्वम् ।
यतः सर्वेष्वपि दानेषु ज्ञानदानं महीयः यदुक्तं-

क्षोणिः पुण्याङ्कुराणां निबिडतमतमस्तोमतिग्मांसधाम,
व्यामोहापोहमन्त्रं त्रिभुवनजनताश्रोत्रपीयूषवृष्टिः ।
सिद्धीनां केलिशैलः प्रबलकलिमलक्षालनामूलतीर्थम्,
तीर्थेशत्वादिहेतुर्जगति विजयते ज्ञानदानं गरीयः ॥१॥ (स्रग्धरा) इति गाथार्थः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भावार्थ: कथानकगम्यस्तच्चेदम्-

श्रीमत्यामलकल्पास्ति पुरी भरतभूषणम् ।
यत्र कल्पद्रुमायन्ते दानेन धनिनो जनाः ॥ १ ॥
तत्रार्क इव सर्वत्र हर्षकृच्चरमो जिनः ।
बोधयन् गोविलासेन, महीपद्मं समागमत् ॥ २ ॥
तत्र वृन्दारकाश्चक्रुर्भगवद्देशनासदः ।
तदन्तश्चासनासीनः, स्वामी व्याख्यानमातनोत् ॥ ३ ॥
देशनान्ते दिवोऽभ्येत्य **श्रीसूर्याभा**भिधः सुरः ।
प्राञ्जलिः प्रभुमानम्य सम्यग् विज्ञप्तवानिति ॥ ४ ॥
प्रभो! यद्यनुजानीषे मां तदा भक्तियुक्तितः ।
गौतमादिमुनीन्द्राणां, नाटकं दर्शयाम्यहम् ॥ ५ ॥
सुरेणोक्तं त्रिरुक्तोऽपि नाजल्पत् किमपि प्रभुः ।
तेन चावारणाज्ज्ञातं, स्वामिनानुमतं ह्यदम् ॥ ६ ॥
ततः स दिशमैशानीं गत्वा देवः स्वदोर्युगात् ।
अष्टोत्तरशतं देवान् देवीश्च निरकाशयत् ॥ ७ ॥
वेणुवीणामृदङ्गादिवादित्रध्वनिबन्धुरम् ।
द्वात्रिंशद्बद्धकं नाट्यं स तेभ्यो निरमापयत् ॥ ८ ॥
मुनीनां दर्शयित्वासौ नाट्यं भुवनमोहनम् ।
प्लवङ्गम इवोत्प्लुत्य सूर्याभः स्वरगात्पुनः ॥ ९ ॥
अथेन्द्रभूतिर्भून्यस्तमस्तकः स विदन्नपि ।
श्रीवीरजिनमप्राक्षील्लोकबोधनहेतवे ॥ १० ॥
स्वामिन्! कोऽयं सुरः कस्मादस्य बोधिरुपार्जनम् ।
जगदाश्चर्यकारिण्यः कुतोऽमुष्य च संपदः ॥ ११ ॥
प्रभुरप्यभ्यधात् वत्स! समाकर्णय गौतम! ।
इहास्ति **श्वेतवी**नामपुरी सुरपुरीसमा ॥ १२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्रास्ति नास्तिकः प्रास्तारिः **प्रदेशी** नरेश्वरः ।
यत्कोपाग्निकणायन्ते, तपनाद्या महस्विनः ॥ १३ ॥
**सूर्यकान्ता**स्ति तत्कान्ता, **सूर्यकाल**स्तदङ्गभूः ।
तन्मन्त्री **चित्र**नामा च, जैनतत्त्वविदांवरः ॥ १४ ॥
प्रदेशिना महीशेन सोऽन्यदा प्रैषि मन्त्रिराट् ।
**श्रावस्त्यां** राजकार्यार्थं **जितशत्रु**नृपान्तिकम् ॥ १५ ॥
राजकार्यं विधायासौ तत्रस्थान् गणधारिणः ।
श्री**केशि**संज्ञकान् विज्ञान्, प्राणंसीत्प्राणिपालकान् ॥ १६ ॥
गृहिधर्मफलं श्रुत्वामात्यः श्रीकेशिसूरितः ।
व्रतानि द्वादशाप्याशु ससम्यक्त्वान्युपाददे ॥ १७ ॥
श्रीश्वेतवीविहाराय गुरूनभ्यर्थ्य भक्तितः ।
जगाम धाम मन्त्रीशः पुण्यप्राप्तिप्रहर्षितः ॥ १८ ॥
अथ श्रीकेशिनो नृणां पूरयन्तो मनोरथान् ।
श्वेतव्या भूषयामासुरुद्यानं स्वर्द्रुमा इव ॥ १९ ॥
वनपालमुखान्मन्त्री विज्ञायागमनं गुरोः ।
स्वस्थानस्थस्तमानम्य, मनस्येवमचिन्तयत् ॥ २० ॥
चेत्स्वामी धीसखे सख्यौ, सत्यपि श्वभ्रपात्ययम् ।
तदा मदीयसंसर्गोऽफलोऽस्येक्षुप्रसूनवत् ॥ २१ ॥
तत् स्यात्केनाप्युपायेन गुरोः पार्श्वं नयाम्यमुम् ।
श्रावयामि च तद्वाणीं सुधामिव रसोत्तराम् ॥ २२ ॥
वाहकेलिच्छलान्मन्त्री, प्रजापालं प्रदेशिनम् ।
निन्ये केश्याश्रितं देशं, शिवं बोधिरिवाङ्गिनम् ॥ २३ ॥
तरोरधः स्थितः श्रान्तः सूरीणां देशनावचः ।
कृशानुमिव सोऽमंस्त कोकवच्छशिनो महः ॥ २४ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नाशां विकूणयन्नाह नृपः सचिवपुंगवम् ।
नीरसोऽसौ प्रसार्यास्यं, खरवद्रारटीति किम् ॥ २५ ॥
सचिवोऽप्यूचिवान्नाथ! गत्वामुष्यैव सन्निधौ ।
एतद्वचनविन्यासनिर्णयः प्रविधीयते ॥ २६ ॥
तद्वचः प्रतिपद्यायं राजा गुर्वन्तिकं गतः ।
श्रीकेशिगणराजस्य, देशनामशृणोदिमाम् ॥ २७ ॥
तत्त्वातत्त्वमविन्दन्तो भिन्दन्तो धर्मवर्त्म च ।
असद्वासनया मूढा हारयन्ते हहा जनुः ॥ २८ ॥
जीवाः कदाग्रहग्रस्ता व्यतीक्ष्यन्तेऽखिलं जगत् ।
रसासृग्मांसविस्राङ्गीं रागान्धा इव भामिनीम् ॥ २९ ॥
पतन्ति नरके घोरे, सत्त्वाः कुमतमादृताः ।
न पुनस्तत्त्वमाश्रित्य भजन्त्यूर्ध्वगतिश्रियम् ॥ ३० ॥
एकान्ताध्यक्षवादेन, कथंकारं जडाशयः ।
सर्वप्रमेयवस्तूनां, निर्णयं कर्तुमीश्वरः ॥ ३१ ॥
सूक्ष्मान्तरितदूरस्थानात्मादीन् योगिगोचरान् ।
अपश्यन्नन्धवद् मुग्धः कथं जानाति नास्तिकः ॥ ३२ ॥
अत्यन्ताचेतनेभ्योऽयं, भूतेभ्यो ज्ञप्तिसंभवम् ।
ध्रुवन्निच्छेद् ध्रुवं षण्ढादपत्यप्रसवं जडः ॥ ३३ ॥
प्रत्यक्षानुपलब्धत्वान्नास्त्यात्मेति गदन्नयम् ।
वादिभिर्हन्यते किं नो अनुमानादिवादिभिः ॥ ३४ ॥
तथाहि-यथा तेजस्विनं तेजः समाश्रयति निश्चितम् ।
तथेच्छाद्वेषबुद्ध्यादि कामप्याधारसंगतिम् ॥ ३५ ॥
यथा धूमध्वजः शैले धूमदृष्ट्यानुमीयते ।
तथात्मापि ध्रुवं लिङ्गी लिङ्गैरिच्छासुखादिभिः ॥ ३६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तारतम्येन दृश्यन्ते, ज्ञानानि प्राणिजातिषु ।
अतो मूढ! तदाधारमात्मानं स्वीकरोषि न ॥ ३७॥
इदं भुक्तमिदं पीतं ह्यो मया विहितं त्विदम् ।
तच्चात्मानं विना कोऽन्यो, मूर्ख! रे! स्मर्तुमर्हति ॥ ३८॥
स एव गच्छति श्वभ्रं, पापव्यापारकारकः ।
स एवोर्ध्वगतिं याति, धर्मध्यानपरायणः ॥ ३९॥
स एव शुक्लध्यानाग्नौ, कर्मैधान् भश्मतां नयन् ।
सर्वज्ञतां समासाद्य लभते च परं पदम् ॥ ४०॥ युग्मम्॥
सर्वज्ञस्याविसंवादिवाक्यत्वादाप्तता मता ।
यतस्तदुक्तसूर्येन्द्वोर्ग्रहणस्य तथेक्षणात् ॥ ४१॥
अतः प्रमाणसंसिद्धसर्वज्ञादिष्टवर्त्मनि ।
भो! भो! भव्याः! प्रवर्त्तध्वम्, शिवश्रीसंगदायिनि ॥ ४२॥
इति त्वद्देशनां श्रुत्वा, राजा सचिवसंयुतः ।
संदेहदोलामारूढः, सभायामाययौ गुरोः ॥ ४३॥
सूर्यालोकनतस्तस्य, नृपस्य मुखपङ्कजम् ।
विस्मेरत्वमवाप्येत्युल्लासयामास वाङ्मधु ॥ ४४॥
सूरे! नास्तिकवादी मे, जनको नरकं ययौ ।
माता सर्वज्ञधर्मज्ञा, दिवं चेति भवन्मतम् ॥ ४५॥
नापरस्मिंस्तथा प्रीतौ पितरौ मे यथा मयि ।
तस्मादेत्य यथा युक्तं, किं न ब्रूतो हितं हि तौ ॥ ४६॥
गुरुराह कथं श्वभ्रात्पराधीनो जनो नृप! ।
समेति कर्मभिर्बद्ध, आलानितगजेन्द्रवत् ॥ ४७॥
भोगाभोगैः सदासक्ता देवा देवालयान्नृप! ।
परानपेक्षव्यापाराः, समियुरति. कथं भुवि ॥ ४८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अन्यच्च पञ्च चत्वारि, योजनानां शतानि वा ।
भूदुर्गन्धः प्रयात्यूर्ध्वं, तन्नायान्तीह देवताः ॥ ४९ ॥
तपस्वितपसाकृष्टा जिनकल्याणकेषु वा ।
जन्मान्तरस्य च प्रीत्यायान्ति देवा न चान्यथा ॥ ५० ॥
पुनराह गुरुं राजा, चौरः कुम्भान्तरे मया ।
क्षिप्त्वा पिधाय तद्द्वारं स्वापितः स्वापतेयवत् ॥ ५१ ॥
समये स मयादर्शि, निश्चेष्टः कृमिसंकुलः ।
नात्मा निर्गममार्गश्च, प्रवेशश्च परात्मनाम् ॥ ५२ ॥
चूर्णीकृत्य पुनस्तस्मिन्, कणशः प्रविलोकिताः ।
नोपलेभे मया क्वापि, जीवो व्योमारविन्दवत् ॥ ५३ ॥
चौरोऽन्यदा मयातोलि, रुद्ध्वा श्वासं च मारितः ।
पुनश्च तोलितस्तावानेवात्मा नास्त्यतः क्वचित् ॥ ५४ ॥
पूर्वपक्षममुं कृत्वा प्रदेशिनृपतौ स्थिते ।
तत्संदेहापनोदाय सूरिरित्युत्तरं ददौ ॥ ५५ ॥
कुम्भ्यां स्थगितवक्त्रायां, क्वाप्यन्तस्थो नरो नृप! ।
शङ्खं धमति तन्नादः, कथमाश्रूयते बहिः ॥ ५६ ॥
ध्वनेः पुद्गलरूपस्य, सुसूक्ष्माः पुद्गला यथा ।
कुम्भीं भित्त्वा बहिः सस्रुस्तन्मार्गोऽस्यां च नेक्ष्यते ॥ ५७ ॥
तथैव मूर्त्तिमानात्मा बहिः कुम्भ्या विनिर्गतः ।
लक्ष्यते न हि सूक्ष्मत्वाद्, ध्वनिपुद्गलवन्नृप! ॥ ५८ ॥
सन्नप्यग्निर्यथाच्छिन्नेऽरणिकाष्ठे न दृश्यते ।
तथैव प्राणिपिण्डेऽपि, जीवसत्ता महीपते! ॥ ५९ ॥
यथा रिक्ता च पूर्णा च, वायुना तोलिता दृतिः ।
समा तथा तनुर्जीवे, सत्यसत्यपि भूपते! ॥ ६० ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मूर्त्तानामपि सूक्ष्माणां, भावानां गतिमीदृशीम् ।
समीक्ष्यात्मन्यमूर्त्ते सा राजन्! किं न प्रपद्यते ॥ ६१ ॥
कर्मबद्धे महावीर्ये, पुण्यपापोपभोक्तरि ।
सूक्ष्मे ज्ञानमये जीवे, किमु संदिह्यते त्वया ॥ ६२ ॥
तस्मात्परंपरायातं, मुक्त्वा नास्तिकतामतम् ।
चतुर्वर्गश्रियां पात्रं, जैनं शासनमाश्रय ॥ ६३ ॥
एवं केशिवचोमुग्धदुग्धेन क्षालयन्नलम् ।
सन्देहौघमषीमेष, निर्मलत्वमवाप राट् ॥ ६४ ॥
ततोऽस्तनास्तिकमतमतिः स पृथिवीपतिः ।
प्रदेशी केशिनामानमिति स्तोतुं प्रचक्रमे ॥ ६५ ॥
नाथ! त्वमेव मे तातस्त्वमेव जननी परा ।
त्वमेव परमो मित्रं, त्वमेव हि सहोदरः ॥ ६६ ॥
त्वमेव च गुरुर्येन, त्वयाहं भववारिधौ ।
सज्ज्ञानदानपोतेन तारितः कृपया ब्रुडन् ॥ ६७ ॥
तदिदानीमपि स्वामिन्! दयामय! दयां मयि ।
विधाय दिश तं धर्मं, येन मुच्येय पापतः ॥ ६८ ॥
अहो सुलब्धं मानुष्यजन्म ते नृपते! त्विति ।
उपबृंह्य गुरुस्तस्य, पुरस्तादेवमादिशत् ॥ ६९ ॥
जिनो देवो गुरुः पञ्चमहाव्रतधरः परः ।
जिनोदितश्च सिद्धान्त, इति रत्नत्रयं श्रय ॥ ७० ॥
एतन्मूलानि पापस्य प्रतिकूलानि भूपते! ।
स्वानुकूलानि सुश्राद्धव्रतानि द्वादशाश्रय ॥ ७१ ॥
भावेन तान्युपादाय, गुरुं नत्वा च मन्त्रियुक् ।
मन्वानो धन्यमात्मानं, राजा प्रासादमासदत् ॥ ७२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

केशिनोऽवाप्तसज्ज्ञानदानदीपेन नाशयन् ।
स मिथ्यात्वतमो धर्मोद्योतं चक्रे स्वमण्डले ॥ ७३ ॥
धर्मचक्रेण चक्री च प्रसारिमहसा भृशम् ।
अजैषीद्द्विषयानेष बाह्यानाभ्यन्तरांस्तथा ॥ ७४ ॥
जिनधर्मानुरक्तात्मा, पालयन् द्वादशव्रतीम् ।
सोऽग्रहीत् पौषधं पर्वतिथिवृन्दे निरन्तरम् ॥ ७५ ॥
क्वापि शून्यगृहेऽन्येद्युः पौषधप्रतिमास्थितः ।
राजान्यपुरुषासक्तां सूर्यकान्तां निजां प्रियाम् ॥ ७६ ॥
प्रविलोक्यापि न ध्यानाच्चचालाचलनिश्चलः ।
विशिष्य च पुपोषासौ विशुद्धां भावनामिमाम् ॥ ७७ ॥ युग्मम्॥
कायोऽपि न भवेत्स्वीयः का कथा चाऽन्यवस्तुषु ।
इति ध्यायन्नृपस्तस्यां, न चुकोप मनागपि ॥ ७८ ॥
सविटा सूर्यकान्तापि, स्वकान्तं प्रतिमास्थितम् ।
प्रगे प्रवीक्ष्य साशङ्का गृहं गत्वेत्यचिन्तयत् ॥ ७९ ॥
मा मामन्यरतां मत्वा, विगोपयेदयं जने ।
अतो नृपाय पापादात्पारणे विषमोदकम् ॥ ८० ॥
स कायव्याकुलत्वेन, सूर्यकान्ताविचेष्टितम् ।
ज्ञात्वा ददौ निजं राज्यं, **सूर्यकालाय** सूनवे ॥ ८१ ॥
अरक्तद्विष्टचित्तोऽसौ परमेष्ठिनमस्कृतिम् ।
चिन्तामणीमिवानर्घ्यां, स्मरन्नेकाग्रभावतः ॥ ८२ ॥
मृत्वा प्रदेशिभूपालः, **सौधर्मे** त्रिदशालये ।
**श्रीसूर्याभ**विमानेऽभूद्देवः **सूर्याभ**नामकः ॥ ८३ ॥ युग्मम् ॥
स एष सूर्याभसुरोऽद्भुतश्रीः, स्वपूर्वजन्मावधिनाधिगत्य ।
अत्रैत्य हे गौतम! नाटकं वः, प्रदर्श्य हर्षाच्च दिवं जगाम ॥ ८४ ॥

(उपजातिः)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पल्योपमानि जलधिप्रमितान्यथायु-
र्भोगैरभङ्गुरतरैः परिपाल्य तत्र ।
च्युत्वा ततो वरविदेहभुवं स एत्य,
रत्नत्रयं समुपलभ्य च मुक्तिमाप्ता ॥ ८५ ॥ (वसन्ततिलका)
इत्थं केशिगणेश्वरेण विधिवत्सज्ज्ञानदानं मुदा,
न्यस्तं क्षोणिपतौ प्रदेशिनि महासाफल्यकोटिगतम् ॥
ज्ञात्वान्यैरपि विज्ञपुंगवगणैः कार्यं तदेवानिशम्,
येनाक्षीणतमा भवन्ति भविनः सद्योऽनवद्याः श्रियः ॥ ८६ ॥
(शार्दूलविक्रीडितम्)

इति श्रीरुद्रपल्लीयगच्छशृङ्गारहारश्रीसंघतिलकसूरिशिष्यश्रीदेवेन्द्रसूरिविरचितायां श्रीदानोपदेशमालावृत्तौ सज्ज्ञानदानविषये श्रीकेशिगणधरकथा समाप्ताः ॥

ज्ञानदानमुक्त्वा सकलप्रकरणार्थं निगमयन्नाह-

**एवं पंचविगप्पं दाणं भावेण जो पयच्छेइ ।**
**सो पाउणेइ णरसुरसुहाइं अणुहविय सिद्धिपयं ॥ १०६ ॥**

एवममुना प्रकारेण, पञ्चविकल्पं-सुपात्रोचितानुकम्पाभयज्ञान-भेदेन पञ्चप्रकारं दानम्, भावेन-मनःशुद्ध्या, यः-श्रद्धालुः प्रयच्छति, स पुमान्नरसुरसुखानि-मनुष्यदेवसौख्यान्यनुभूय-भुक्त्वा, सिद्धिपदं-निर्वृत्तिस्थानम्, प्राप्नोति-लभत इति गाथार्थः ॥

अथ ग्रन्थसमाप्तौ कविनामगर्भां मङ्गलाशिषमाह-

**इइ संघतिलयगणहरसीसेण दिवायरेण रइएयं ।**
**दाणोवएसमाला, कण्ठगया कं ण भूसेइ ॥१०७॥**

व्याख्या-इत्यमुना प्रकारेण श्रीसंघतिलकगणधरशिष्येण दिवा-करेण रचिता-कृतेयं दानोपदेशमाला-दानोपदेशकुसुमदाम कण्ठगता-गलकन्दलस्थिता कं-भविकं न भूषयति? अपि तु सर्वप्रकारेणा-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

लङ्करोति। यथा किल माला पुष्पस्रक् कण्ठगता प्राणिनं भूषयति तथेयमपि दानोपदेशमाला-दानोपदेशश्रेणिः कण्ठगता अर्थादधीता सती प्राणिनं मण्डयतीति गाथार्थः। समाप्ता चेयं दानोपदेशमाला-प्रकरणवृत्तिः॥ श्रीशुभं भवतु॥

विक्रमादित्यतोऽष्टेन्दुवार्द्धीन्दुमितवत्सरे ।
चक्रुर्देवेन्द्रसूरीन्द्रा वृत्तिमेतां मनोहराम् ॥ १॥ (१४१८)
यदिह मया मतिमान्द्यात् किमप्यसंबद्धभाषणं व्यरचि ।
तच्छोधयन्तु सुधियो दयामया मयि दयां कृत्वा ॥२॥
एतत्प्रकरणविवरणकरणाद्यत्पुण्यमनघमार्जि मया ।
तेन मम निखिल-मङ्गलदायी वरबोधिलाभोऽस्तु ॥३॥ (आर्या)
यावन्नभःसरसि तारकपद्मभाजि, सद्राजहंसयुगलं खलु खेलतीह ।
तावन्मुनीश्वरगणाः परमादरेण, टीकामिमामनुपमां परिशीलयन्तु॥४॥
ग्रन्थाग्रम्-५३३८॥[1] (वसन्ततिलका)
श्रीवृद्धगच्छे वादीन्द्राः, श्रीमुनीश्वरसूरयः ।
तेषां विनेयो व्यलिखन्मुनिहर्षः सहर्षधीः ॥ १॥
श्रीविक्रमार्कात्समयाद्युगदिग्गजसागरेन्दुमितशरदि । (१४८५)
सश्रेयसे कृतेयं पुस्तकरचना चिरं जीयात् ॥२॥ शुभम् ॥
लिपीकृतं लैया श्रीराममुथाः रेवासी अईपुरमध्ये ॥
विक्रम संवत् १९६६ राः मिती सावणवदी १०, सोमवार ॥

## ॥ अथ प्रशस्तिः ॥

अस्ति स्वस्तिमती सदा विजयिनी दर्भावती पावना ।
श्रीमद्गुर्जरदेशभूमिवनितालंकारहारोपमा ॥
श्रीमल्लोढणपार्श्वनाथप्रमुखार्हन्मन्दिरैरष्टभिः,
शोभाढ्या जनसंकुला सुविदिता, वप्रेण विश्वेऽखिले ॥१॥ (शार्दूलविक्रीडितम्)

---

१. अस्य ग्रन्थस्येयं सङ्ख्यास्ति, ख-ख बाणबाणेतिसंख्यास्ति ग्रन्थाग्रस्वभाषायां-५५००॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अस्यां पुरा विशलदेवनरेशमन्त्री, श्रीवस्तुपाललघुबान्धवतेजपाल:।
श्रीगोद्धरावनिपघुघुलराजजेता रम्यांश्चकार जिनमन्दिरमुख्यकार्यान् ॥ २॥
भिल्लादितस्करगणै: परिपीडितानां-
दु:खं विलोक्य सचिवाधिपति: प्रजानाम् ।
तेषां हिताय करुणाजलधिर्विशालं,
सालं विधाय जनदु:खमलं जहार ॥ ३॥ (वसन्ततिलका)
तस्यां श्रीमालिवंशोऽभूत्, सर्ववंशशिरोमणि: ।
तस्मिन्वंशेऽजनि श्राद्धो, नाम्ना दलपतोऽनघ: ॥ ४॥ (अनुष्टुप्)
तत्पुत्रो मगनलालोऽभूत्, मुक्तास्तीति तदङ्गना ।
तयो: पुत्रास्त्रयस्सन्ति, विवेकविशदाशया: ॥ ५॥
(बापुलाल:, पानाचन्द:, खुशाल:)
आद्येन बापुलालेन, स्वमातु: पुण्यहेतवे ।
सटीका लेखयाञ्चक्रे, दानोपदेशमालिका ॥ ६॥
स्वच्छे बृहत्तपोगच्छे, विजयसिंहसूरय: ।
बभूवुर्भुवनोत्तंसा:, शीलैकचारुभूषणा: ॥ ७॥
आज्ञां तेषां समासाद्य, सत्यविजयपण्डिता: ।
क्रियोद्धारं ततश्चक्रुर्जिनागमानुसारत: ॥ ८॥
तदादितो हि प्रगटीबभूव, संविग्नशाखा भुवने प्रसिद्धा ।
क्रमेण तस्यामभवन्मुनीशा, बुद्ध्यादियुक्ता विजयाभिधाना: ॥ ९॥ (उपजाति:)
तच्छिष्या भुवने ख्याता, विजयानन्दसूरय: ।
गङ्गोर्मिस्वच्छशीलाढ्या:, शिष्यौघसेवितक्रमा: ॥ १०॥
तेषां पट्टे किलेदानीं, वर्त्तते गच्छनायका: ।
विजयकमलाचार्या:, शीलालंकृतभूघना: ॥ ११॥
विक्रमभूपते: कायकायाङ्कभूमितेऽष्टके रम्ये । (१९६६)
भूपतिशयाजिरावइत्यभिधे यस्य शुभे राज्ये ॥ १२॥
विजयानन्दसूरीणां, विनयि विनेयस्य वाचनायेयम् ।
श्रीमत्प्रवर्त्तककान्तिविजयस्य समर्पिता हर्षात् ॥ १३॥ (आर्या) इति।

॥ समाप्त ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# महागुणाष्टकगर्भित-श्रीपार्श्वजिनस्तुतिः

(रम्यपदभञ्जिकावृत्तिः)

परार्थवासनास्यासीत् स्वार्थलताच्छिदे तव ।
तयैवाद्यातिवर्धिष्णुं स्वार्थवल्लीं ममामूलम् ॥१॥

परार्थवासनेति....श्रीपार्श्वप्रभो ! इत्यामन्त्रणमध्याहार्यम् । तव-भवतः, परार्थवासना-परोपकारप्रकृष्टता...निगोदावस्थातः सिद्धावस्थां यावत् परोपकृतिप्रकृतिः आयुष्मदात्मनः प्रतिप्रदेशे एकरसीभूता तत एव एषा वासना कथिता...सैव परोपकारप्रवणता एव स्वार्थलताच्छिदे-स्वार्थः निजकार्यकारिता स एव लता वल्ली तस्याः छिद्-छेदनं तस्यै, अस्यासीत्-खड्गीभूता । तयैव...परोपकृतिप्रकृत्यैव, मम-अनादिस्वार्थमूलदृढीकरणशीलस्य, तव सेवकस्य, अतिवर्धिष्णुं-जन्मान्तरे तृष्णाजलेन अतिसिक्तत्वादत्यन्त-वर्धनशीलाम्, स्वार्थवल्लीं-निजकार्यकरणशीलतात्मिकां लताम् आमूलम्-मूलादेव आद्य- आ समन्तात् द्य-छिन्धीति...।

सत्त्वयन्त्रेऽहिनो नाथ ! परिषहादिधान्यकम् ।
ततो दाह्याशु मेऽनादि-देहाध्यासान्नमार्तिदम् ॥२॥

सत्त्वयन्त्र इति...नाथ ! योगक्षेमकृत्परमात्मन् ! सम्यग्दर्शनादिनूतन-गुणानां प्रापकत्वात् प्राप्तसम्यग्दर्शनादिगुणानां च संवर्धकत्वात् परमात्मा नाथस्तन्निमन्त्रणे....हे नाथ ! त्वमित्यध्याहार्यम् । सत्त्वयन्त्रे सत्त्वम्-आत्मवीर्यं तदेव यन्त्रं यन्त्र्यते पील्यतेऽनेनेति...पिष्टकरणसाधनं तस्मिन्, परिषहादि-धान्यकम्-परिषहाः-क्षुत्तृषादि द्वाविंशतिविधाः मनोवचःकायसंबन्धिकष्टानि वा आदिशब्दात् उपसर्गा देवमनुजतिर्यक्कृता गृह्यन्ते तद्रूपं धान्यकम्-अन्नम्, अहिनः-चूर्णितवान्, ततः-तस्मात् सत्त्वयन्त्राद् एव, मे-मम, आर्त्तिदम्-आर्त्ति-बाधां ददाति करोतीति आत्मपीडाकृत्, अनादि- देहाध्यासान्नम्-अनादिः-नास्ति आदिः आरम्भो यस्य सः अनादिकालीनः देहाध्यासः, देहो देहधर्मो वा आत्मा आत्मधर्म इव अध्यास्ते मन्यतेऽस्मिन् स देहाध्यासो भण्यते, स एव अन्नं धान्यम्, आशु-शीघ्रं, दाहि-चूर्णीकुरु इति....।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निगृह्य मौनतो वाचं, नाथारुणोऽशुभाश्रवात् ।
तथा वाचालुताग्रस्तां, तद्राह्यवाश्रवाद् विभो ! ॥३॥

निगृह्येति.......विभो ! स्वामिन् ! यथेत्यध्याहार्यम् । मौनतः मौनं तूष्णीभावं बचोगुप्तिपालकत्वात् अवलम्ब्य यबन्तस्य गम्यत्वात् ''गम्ययपः कर्माधारे'' (सि.हे.२।२।७४) इति सूत्रात् पञ्चमी । वाचं-जल्पनं, निगृह्य-संपूर्णतया निरुध्य, त्वम् अशुभाश्रवाद्-अशुभानां अकुशलकृत्कर्मणां ज्ञानावरणीयादीनां वा आश्रवात् आगमनात्, अरुणः-निवृत्तः । तथा-तयैव रीत्या, मह्यमिति शेषः, तद्-मौनं, राहि-देहि....वाचालुताग्रस्तां-वाचालुता-जल्पनशीलता तया ग्रस्तां पीडितां मामिति च गम्यम् आश्रवाद्-अशुभकर्मागमनत्वाद् अव-रक्षेति ॥

ध्यानं तेऽहन्यथा वज्री-भूय कर्माचलं प्रभो ! ।
सद्ध्यानाशनिनास्यारं, कर्माद्रिं तेऽनुगस्य मे ॥४॥

ध्यानमिति...प्रभो ! तारकत्वशक्तिशालिन् ! हे भगवन् ! यथा-येन प्रकारेण, ते-तव, ध्यानं-ध्यायते चिन्त्यते द्रव्य-गुण पर्यायस्वरूपाद्यनेनेति... चिन्तनं धर्म-शुक्लध्यानात्मकं ग्राह्यं तयोरेव कर्मविनाशकत्वात्, आद्यद्वयोस्तु कर्मग्रहणहेतुत्वान्न गृह्यते । तादृक् ध्यानं वज्रीभूय-वज्ररूपेण भूत्वा कर्माचलं कर्म क्रियते बध्यते मिथ्यात्वाविरतिकषाययोगैः...ज्ञानावरणीयादि...तदेव अचलो न चलतीति नगः पर्वत इत्यर्थस्तम् अहन्-अखण्डयः । तथेति शेषः ते-भवतः, अनुगस्य-अनु पश्चाद् गच्छति सरतीति अनुगः-सेवकः आज्ञानुसारी दासो वेत्यर्थस्तस्य, मे-मम, कर्माद्रिं-कर्मशैलम्, सद्ध्यानाशनिना सद्ध्यानं-सद् शुभं यद् ध्यानं-धर्मशुक्लात्मकं तदेव अशनिः वज्रं तेन, अरं-तत्कालम्, आस्य-आ समन्तात् स्य भिन्धीति......।

परौदासीन्यजाङ्गुल्या, रागद्वेषविषापहृत् ।
यद्यभूस्ते ममोदस्ये, रक्तद्विषागरं तया ॥५॥

परौदासीन्येति-हे स्वामिन् ! इत्यध्याहार्यम्, यदि-चेत्,

परौदासीन्यजाङ्गुल्या-परेषु-परद्रव्य-क्षेत्र-काल-भावेषु औदासीन्य मुपेक्षाभावः, अथवा परम्-उत्कृष्टतमम् औदासीन्यं स्वद्रव्यादेरन्यद्रव्यादिषु उदासीनता...तदेव जाङ्गुली गारुडिकमन्त्रविशेषस्तया, ते-तव, राग-द्वेषविषापहृत्-रागः-मानसाभीष्टद्रव्ये प्रीतिः, द्वेषः-मनोऽनिष्टद्रव्येऽप्रीतिः, तावेव विषं-हालाहलम् अपहरति दूरीकरोतीति...इष्टानिष्टद्रव्येषु मनोजन्यहर्ष-शोकमयमानसपरिणामनाशक इत्यर्थः, अभूः-आसीः, तया-पूर्वोक्तपरौदासीन्यजाङ्गुल्या, मम-रागद्वेषविषोपहतस्य निजसेवकस्य, रक्तद्विषागरं-रक्तो-रागः द्विषा-द्वेषस्ते एव गरं-गरलम्, उदस्येः-संहरेरिति ।

स्वस्वरूपार्चिषानात्म-भावध्वान्तं परैत्तव ।
तद्राया मे विभावान्ध-कारो दूरीभवेद्यतः ॥६॥

स्वस्वरूपेति..हे नाथ! इति गम्यम् स्वस्वरूपार्चिषा-स्वस्य-आत्मनः शुद्धात्मद्रव्यस्य स्वरूपं-स्वभावः शुद्धात्मरूपमित्यर्थः । तदेव अर्चिः-ज्योतिस्तेन, तव-भवतः, अनात्मभावध्वान्तम्-अनात्मभावः-आत्मनः भावः-तादृग् नेत्यतः आत्मस्वरूपविरहितत्वं पुद्गलादिद्रव्यनिगृहीतात्मलक्षणं स एव ध्वान्तं-तमः, यथान्धकारेऽन्यद्रव्यमन्यद् ज्ञायते तथैव अनात्मभाव-नामान्धकारेऽपि देह-दैहिकधर्मस्य आत्मात्मिकधर्मत्वेन दृश्यतेऽतः सोऽन्धकारशब्देनोपमीयते । तादृक् तामसं परैत्-परा-समन्तात्, ऐत्-अगच्छद् दूरीभूतमित्यर्थः, मे-मह्यम्, तद्-स्वस्वरूपार्चिः, रायाः-देयाः, यतः-यस्मात् स्वरूपप्राप्तिरूपज्योतिषः, मे-मम देहलीदीपकन्यायात् मे इति द्विधा योजनीयम् । विभावान्धकारः-विभावः-विरुद्धो शुद्धात्मद्रव्याद् विपरीतो भावः-स्वरूपम् आत्मनो ह्यशुद्धरूपमित्यर्थः, स एवान्धकारस्तमः दूरीभवेद्-अपगच्छेदिति.......।

प्रमादादिरजोऽहारि, स्वरतिवात्यया त्वया।
तवायं शरणं मेऽर्हन्! क्षार्यैतद्धूलिरेतया ॥७॥

प्रमादादीति हे अर्हन् अर्हति चतुस्त्रिंशदतिशयान् सुरेन्द्रादिकृत-पूजामिति तीर्थंकरस्तत्रिमन्त्रणम् । त्वया-भवता, स्वरतिवात्यया-स्वम्-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आत्मा तस्मिन् रतिः- रमणम् आत्मरमणमित्यात्मगुणमात्रेषु संचरणम्, सैव वात्या वातानां समूहः 'पाशादेश्च ल्यः' (सि.हैं.६।२।२५)इति सूत्रेण ल्यः, महावातस्तया, प्रमादादिरजः-प्रमादाः-प्रमाद्यन्ते मोक्षं प्रत्येभिरिति..ते चाष्टौ अज्ञानादयः (दृश्यतामेतद्ग्रन्थस्य गाथा ९८) त आदौ येषां तद् । आदिशब्दात् कषायविषयादयो ग्राह्यास्तदेव रजो धूलिः, आत्मनः मलिनी कारकत्वात्, अहारि-ह्रियते स्म...पुनश्च शुद्धिकरणार्थं शुद्धद्रव्यवतः समीपे गम्यतेऽत एव तव-भवतः, शरणम्-आश्रयम् अहम् आयम्-आगच्छम् । अथैतया-स्वरतिवात्यया एतद्धूलिः-प्रमादादिपांशुः क्षार्या दूरीकार्येति........।

समत्वं शत्रु-मित्रे ते, प्रार्थये पार्श्व ! देहि मे ।
आशंसे पूज्यपादाब्जे, रम्यरेणुरसानि ते ॥८॥

समत्वमिति-पार्श्व ! हे पार्श्वप्रभो ! त्रयोविंशतितमतीर्थपते !, ते-तव, शत्रुमित्रे-शत्रुः-रिपुः प्रतिकूलप्रवृत्तिमान् वा मित्रं सखा अनुकूलप्रवृत्तिमद्वा एतयोः समाहारः शत्रुमित्रं तस्मिन् यत् समत्वं-सदृग्भावस्तत्, प्रार्थये-याचेऽहमिति शेषः । पार्श्वप्रभोः समत्वं प्रसिद्धमेव यदुक्तम्-

कमठे धरणेन्द्रे च, स्वोचितं कर्म कुर्वति ।
प्रभुस्तुल्यमनोवृत्तिः, पार्श्वनाथः श्रियेऽस्तु वः ॥

(श्रीसकलार्हत्स्तोत्रम्-२५)

आशंसे-ईहेऽहम्, ते-आयुष्मतः पूज्यपादाब्जे-पूज्यौ-पूजनीयौ पादौ-चरणौ एव अब्जम्-पङ्कजम्, तस्मिन् रम्यरेणुः-सुन्दरधूलिः असानि भवानीति..।

॥ अर्हं नमः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# गुप्तक्रियापदात्मिका श्रीगुरुस्तुतिः

(रम्यपदभञ्जिकावृत्तिः)

यस्य हृत्सागरोच्छालि-कारुण्यवारिणा गुरोः ।
भवान्तरोच्चितावद्य-मलन्नोऽपास्थदन्तरात् ॥१॥

यस्येति...यस्य-श्रीभद्रसूरीश्वर-श्रीॐकारसूरीश्वराभिधस्य गुरोः-सद्गुरोः, हृत्सागरोच्छालिकारुण्यवारिणा-हृदयम्-अन्तःकरणमेव सागरः-समुद्रस्तस्मात् उच्छलति उल्लोलयतीति हृत्सागरोच्छालि...तादृग् कारुण्यं-करुणारसः एव वारि-नीरं तेन, नः-अस्माकम्, अन्तरात्-हृदः, भवान्तरोच्चितावद्यमलम्-भवान्तरम्-अन्यो भवः...जन्मजन्मान्तरं वा तस्मिन् उच्चितं-प्राबल्येनैकीकृतं यद् अवद्यं-पापमेव मलं-किट्टम् तद् अपास्थद्-दूरं गतं विनष्टमित्यर्थः... ॥

वात्सल्यवात्ययापार, यन्नेत्रमलयैतया ।
अस्मत्तनुमनस्तापः, शाताश्वदात्मिका सदा ॥२॥

वात्सल्यवात्ययेति.....यन्नेत्रमलयैतया-यस्य-पूर्वोक्तनाम्नः सद्गुरोः ये नेत्रे-नयने ते एव मलयः-मलते चन्दनवृक्षान् यत्र मलयो दक्षिणाचलस्तन्नामाचलविशेष इत्यर्थः, तस्मात् मलयाचलात् एता-आगता तया, वात्सल्यवात्यया वात्सल्यं-वत्सलता पुत्रवत्स्नेहभावो वा तदेव वात्या-वायुलहरी तया, अस्मत्तनुमनस्तापः-अस्माकं छद्मस्थत्वाद् अशाता-दुर्भावादिजन्यो यः तनोः शरीरस्य मनसश्च मानसस्य तापः- दुःख-जन्योद्वेगः-अपार-पारंगतः । यथा मलयाचलादागतो वायुः तनुसम्बन्धि-तापो हरति तथैव सद्गुरुनेत्रावहद्वात्सल्यमस्मादृशानेकात्मनां दुःखोद्वेगहारि भवतीत्यर्थः । तथा, सदा-सर्वदा आत्मिका-आत्मसम्बन्धिनी शाता-सुखम् अश्वद्-अवर्धत वृद्धिंगतेत्यर्थः ॥

यत्प्रतिलोमतो निर्यत्साधनोर्जा सुखावहा ।
प्रमादध्वान्तमासान्नो रोमरोमाशितं ननु ॥३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यत्प्रतिलोमत इति यत्प्रतिलोमत:यस्य पूर्वोक्तसद्‌गुरो: प्रतिलोमत:-रोमरोमत: निर्यन्ती-निष्क्रामन्ती या साधना साध्यतेऽपवर्गो यया मोक्षगामिणी आराधना सैव ऊर्जा अथवा तदुद्भवा ऊर्जा-तेज:पुञ्ज:कीदृशी सा? सुखावहा सुखम् आत्मिकाह्लादम् आवहति-आकर्षतीति...सुखा वहा... आत्मा-नन्दप्रदेत्यर्थ: । ननु-निश्चे, न:-अस्माकम्, रोमरोमाशितं-रोमरोमव्याप्तम्, प्रमादध्वान्तं-प्रमाद्यन्ते मोक्षं प्रति एभि: प्रमादा: त एव ध्वान्तमन्धकारम्, आसाद्-आ समन्तात् असाद् अभिनद् विनाशितमित्यर्थ: ।

जिनाज्ञापालनोद्दीप्त-यज्जीवनप्रदीपरुक् ।
भवारण्याटिनेऽरान्मे महाशिवपथं सुखम् ॥४॥

जिनाज्ञेति..जिनाज्ञापालनोद्दीप्तयज्जीवनप्रदीपरुक् जिनानां जितराग-द्वेषमोहानां या आज्ञा चरणकरणसप्ततिरूपा तस्या यत् पालनम् आदर-पूर्वकाचरणम् तेन उद्दीप्तं-प्रकाशितम्, यस्य-पूर्वोक्तनामाङ्कितसद्‌गुरो: जीवनं-साधनामयकाल एव प्रदीप:-दीपकस्तस्य या रुक्-प्रकाश: भवारण्याटिने-भव:-संसार एव अरण्यम्-गाढवनम् तस्मिन् अटति-भ्राम्यतीति तस्मै संसारवनसंचारिणे मे-मह्यम्, सुखम् शातादायिनं महाशिवपथंमहान्तम् अतिशयमुदारमनुत्तरत्वात् शिवं-कल्याणकरं मोक्षो वा तस्य पन्थानं-मार्गम्, अरात्-अदादित्यर्थ: ।

यद्वैराग्यसुधावर्षि-वचोब्देनाशमत्तमाम् ।
विषयवासनाघर्म-तप्तान्तरावनिस्तु न: ॥५॥

यद्वैराग्येति...तु:-पुन: नि:संशयं वा, यद्वैराग्यसुधावर्षिवचोब्देन-यस्य-पूर्वोक्तसद्‌गुरो:, वैराग्यं-परद्रव्येषु औदासीन्यरूपं तदेव सुधां-पीयूषं वर्षतीति वर्षणशीलो यद् वच:-वचनं तदेव अब्द: अप: ददातीति मेघस्तेन, न:-अस्माकम्, विषयवासनाघर्मतप्तान्तरावनि:-विषया:-मन-इन्द्रियपोषकाणि पुद्‌गलद्रव्याणि तेषु तेषां वा या वासना-आसक्ति: सैव घर्म:-ग्रीष्मार्त्तिस्तेन तप्ता-उष्णीभूता अन्तरं-हृदयं तदेवावनि:-पृथ्वी... पुद्गलद्रव्येषु इष्टानिष्टता परिणामजन्योष्णतयोत्तप्तहृदयभूमिरित्यर्थ:, अशमत्तमाम्-अत्यन्तं शान्तेत्यर्थ: ।

यन्मनोवाटिकास्त्रुवन्मैत्रीमोदेन वासितम् ।
शासनं संयतै: सर्वै: एकीभूयाप्यतिमुदा ॥६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यन्मनोवाटिकेति-यस्य-पूर्वोक्तसद्गुरोः, मनः-मानसम् एव वाटिका-उद्यानं ज्ञानादिगुणपुष्पोत्फुल्लत्वात् तस्याः स्रुवन्-प्रसरन् यो मैत्रीसर्वजीवेषु आत्मौपम्यं सैव मोदः-सौरभस्तेन, शासनं-प्रसिद्धं चतुर्विधसङ्घरूपं वा वासितम्-सौरभितम्, सर्वैः-अखिलैः तपोगच्छाचल-पार्श्वचन्द्रगच्छस्थितैः अन्यान्यसमुदायवर्तिभिश्च संयतैः-श्रमणैः, एकीभूय-संमिल्य, अति-अत्यन्तं मुदा-हर्षः आपि-प्राप्यते स्मेत्यर्थः ।

सेनानीभूय यत्प्रज्ञाहिनन्मौनीं मिथोऽरिताम् ।
जीयाद् विश्वाम्बरे तस्य सदाक्षयो यशोरविः ॥७॥

सेनानीभूयेति..यत्प्रज्ञा-यस्य पूर्वोक्तसद्गुरोः प्रज्ञा-नवनवोन्मेष-शालिनी प्रतिभा सेनानीभूय-सेनानीः सेनां नयतीति सेनापतिः भूत्वा, मौनीं-मुनीनां-साधूनाम् इयम् "तस्येदम्" (सि.हे.६।३।१६०) इति सूत्रेणाण् तत्पश्चात् ङी, मौनी तां मुनिसम्बन्धिनीमित्यर्थः मिथः-परस्परम् या अरिता-रिपुता पृथक्त्वभावरूपा वा, साधनाक्षेत्रे मानसिकभेदरेखापि साधनारोधिका भवतीत्यतः शत्रुस्वरूपा कथितेति ताम्, यः अहिनः-छिनत्ति स्म यद्वा येन पारस्पर्यं मैत्री स्थापिता...तस्य-सद्गुरुदेवस्य, यशोरविः-यशः-कीर्त्तिरिव रविः-सूर्यः, विश्वाम्बरे-विश्वं-जगत् एव अम्बरं-नभस्तस्मिन्, सदा-सर्वदा, अक्षयः क्षयो विनाशो अस्ततारूपो नास्ति यस्य...सदैव नूत्नरूपो निरस्तःसन् जीयात्-जयत्वित्यर्थः ।

नमो नमोऽस्तु मे भद्र-ॐकारगुरुयुग्म ! नः ।
भवत्पुनितपादाब्जे रम्यरेणूभवान्यहम् ॥८॥

नमोनम इति...हे भद्रॐकारगुरुयुग्म ! सर्वसत्त्वानां भद्रकारित्वात् भद्रः, परमेष्ठिध्यानलीनत्वाद् ॐकारः इति पुनिताभिधानं ययोस्तौ गुरू परभावान्धकारात्त्रायकत्वाद् अनन्योपकारिणौ...तयोः युग्मं द्विकः तत्संबोधनम्। नः-युष्मभ्यं, मे-मम, नमोनमः-भूयोभूयोऽविरतत्वेन नमस्कारः-मनोवाक्काययोगेन वन्दनमस्तु-भवतु । आशंस इत्यध्याहार्यम्, अहं-भवच्छरणाश्रितार्या भवत्पुनितपादाब्जे-भवतामायुष्मताम् पुनितौ-पवित्रौ पादौ-चरणौ एव अब्जम् पङ्कजं तस्मिन्, रम्यरेणूभवानि-रम्या-सुन्दरतमा रेणुः-रजोरूपा भवानि-भवेयमित्यर्थः ।

卐 卐 卐 卐 卐

Jain Education International For Personal & Private Use Only www.jainelibrary.org

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भरत ग्राफिक्स : अहमदाबाद-१
फोन : २१३४१७६, २१२४७२३

Jain Education International For Personal & Private Use Only www.jainelibrary.org